June 1931.

THE

CHOWKHAMBÁ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 402.

मीमांसाकौस्तुभः।

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(प्रथमाध्यायस्य द्वितीयः पादः ।)

पूर्वोत्तरमीमांसापारावारपारीण-

श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयमीमांसाप्रधानाध्यापकेन

वेदविशारदविरुदभाजा

पं० अ. चिन्नस्वामिशास्त्रिणा

तच्छिष्येण श्रीपट्टाभिरामशर्मणा मीमांसा शास्त्रिणा च

संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम्।

MIMAMSAKAUSTUBHA

[An exhaustive Commentary of Jaiminisutras]

(II Pada of I Adhyaya)

BY

KHANDADEVA.

Edited by

"VedaVisarada" Pandit A. Chinnaswami Sastri,

Chief Professor of Mimamsa. Benares Hindu University

and his pupil Sri Pattabhirama Sarma M S.

Vol. III. FASCICULUS I-१.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Vidya Vilas Press, North of Gopal Mandir, Benares.

1931

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तबकः—४०२

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,

श्रीः ॥

नमश्शिवाभ्याम् ॥

श्रीखण्डदेवविरचितः

॥ मीमांसाकौस्तुभः ॥

प्रथमाध्याये द्वितीयः पादः ॥ (अर्थवादपादः)

(प्रथममर्थवादप्रामाण्याधिकरणम्)

विघ्नध्वान्तनिवारणैकतरणिर्भक्तैकचिन्तामणि-
र्विद्याकाननगाहनैकसरणिर्मच्चित्तभूषामणिः ।
भूयादेष कुतर्ककर्कशधियां हर्ताऽपहर्ता तथा
मोहानां सुधियां सदैव सविता कात्यायनीशात्मजः॥१॥
बृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी ।
मच्चित्तरङ्गचारी भूयान्नृत्यप्रियः कृष्णः ॥ २ ॥
शश्वद्बोधतरङ्गा विद्यागङ्गोत्तमाङ्गे यस्य ।
श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्यै ॥ ३ ॥

सूत्रम्—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥ १–२–१. ॥ (पू)

(विषयसंशयौ)

अत्र "(१)सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्"

१. तै. सं. १-५-१. पुरा कदाचित देवा असुरैस्साकं युयुत्सवः कदाचिदस्माकं पराजये जीवनार्थमिदं भविष्यतीति मन्वानाः स्वनिकटस्थममूल्यं वस्तुजातमग्नौ निधाय योद्धुमगच्छन् । तत दृष्ट्वा लो-

"(१)वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" इत्यादयोऽर्थवादा धर्माधर्मयोः प्रमाणं नवेति सन्देहः ।

(सङ्गतिः)

अत्र लक्षणसङ्गतिर्धर्माधर्मयोः प्रमाणनिरूपणात् सुलभैव । (२)यस्यापि मते वेदप्रामाण्यनिरूपणमध्यायार्थः, तस्याप्यस्मिन्नधिकरणे तावत्सङ्गतिस्सुलभैव । पादसमनन्तरसङ्गतिस्तु विध्यतिरिक्तवेदवाक्यप्रामाण्यनिरूपणात् स्पष्टा । नामधेयस्य च विध्यन्तर्भावस्य वक्ष्यमाणत्वान्नातिप्रसङ्गः । वाक्यपदेन वा पदरूपस्य नामधेयादेर्निरासः । अनन्तरसङ्गतिरपि पूर्वाधिकरणे विध्यर्थमपि निरूपितेऽपौरुषेयत्वे कर्तृस्मरणाभावरूपयुक्तिसाम्यादर्थवादेषु प्रसक्ते तद्वदेव धर्मप्रमोत्पादकत्वमस्ति ? नवा ? इति विचाराद्द्रष्टव्या ॥

(पूर्वपक्षः)

तत्राप्रमाणं धर्माधर्मयोरर्थवादा इति पूर्वः पक्षः । तथाहि-एते किं स्वातन्त्र्येण तयोः प्रमाणम् ? विध्येकवाक्यत्वेन वा ?

भाक्रष्टचित्तोऽग्निः तैर्वस्तुभिस्साकं पलायते स्म । युद्धे जयं प्राप्य प्रतिनिवृत्ता देवा अग्निमपश्यन्तस्तमन्विष्य क्वचित् लब्ध्वा स्वीयानि वस्तूनि ततोऽगृह्णन् इति पूर्वसन्दर्भः । एवं गृहीतः सोऽग्निः अरोदीत । यस्मादरुदत तस्मात् तस्य रुद्रत्वम् , इति प्रकृतवाक्यार्थः ।

१. तै. सं. २-१-१. "वायव्यं श्वेतमालभेत भूतिकामः"इति विधिसन्निधिपठितोऽयमर्थवादः। वायुः क्षेपिष्ठा क्षिप्रगामिनी देवता । वैशब्दः प्रसिद्धौ । स्वेन भागधेयेन स्वसम्बन्धिना श्वेतपशुरूपेण हविषा यजमानस्तं प्रीणयति यदि स वायुः एनं यजमानं भूतिं प्रापयत्येवेत्यर्थः

२. प्राभाकरमतमिदम् ।

आद्येऽपि किं स्वशक्त्या ? (१)लक्षणाध्याहारादिभिर्वा ? नाद्यः; सदसद्रूपसिद्धार्थबोधकत्वेन धर्माधर्मबोधानुत्पादनात् । न द्वितीयः; लक्षणादिकं हि तात्पर्यानुपपत्त्या वा स्यात्,? अन्वयानुपपत्त्या वा ? न तावत्तात्पर्यानुपपत्तिः; धर्माधर्मतात्पर्यकत्वस्य प्रमाणान्तरेणासिद्धेः । न चाध्ययनविधिनैवार्थज्ञानार्थत्वेनाध्ययनं विदधता निष्प्रयोजनार्थज्ञानस्य भाव्यत्वानुपपत्तेः प्रयोजनवदर्थज्ञानार्थत्वमध्ययनस्य बोधयता अर्थवादानां धर्माधर्मयोस्तात्पर्यमवगम्यते । अतश्च स्वरसतस्तेषां विधिवत्तदनवाप्तेः लक्षणासिद्धिरिति वाच्यम् । अर्थज्ञानार्थत्वमध्ययनस्य लोकत एव सिद्धमिति तदंशे विधिवैफल्यात् । न चार्थज्ञाने उपायान्तरस्यापि पक्षे प्राप्तत्वादध्ययननियमांशे विधेरर्थवत्तास्त्विति वाच्यम् । नियमस्याप्यध्ययने तत्कार्ये वाऽर्थज्ञानेऽनुपयोगेन विधिवैयर्थ्यात् । न चावघातादिनियमवदपूर्वसाधनत्वो-

---

१. अध्याहारोऽश्रुताक्षेपो व्यत्यासो व्यवधिः पदैः । मतो विपरिणामोऽसौ प्रकृतिप्रत्ययान्यथा । वाक्यान्यथात्वकरणं व्यवधारणकल्पना । इति प्राचां सङ्ग्रहश्लोकस्सार्धः । तत्राध्याहारस्योदाहरणम्–विश्वजिता यजेतेति । अत्र स्वर्गकामपदाध्याहारः ॥ अश्रुताक्षेपस्योदाहरणम्–भाट्टमते शब्दादप्रतीतस्याप्यपूर्वस्याक्षेपः ॥ 'उपहूत उपह्वयस्व' इत्यत्र क्रमवैपरीत्येन पूर्वभागस्य सोमभक्षणार्थमाज्ञाप्रश्ने उत्तरभागस्याज्ञादाने विनियोगः । पदव्यवधानोदाहरणम्— "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इत्यत्र ये प्रतितिष्ठन्ति प्रतिष्ठासन्ति ते एता रात्रीरुपयन्ति उपेयुः इति यच्छब्दस्य व्यवहितेन प्रतितिष्ठन्तिपदेनान्वयः ॥ विपरिणामस्याप्येतदेवोदाहरणम्, 'प्रतितिष्ठन्ति' 'उपयन्ति' इत्यनयोः प्रतितिष्ठासन्ति, उपेयुः इति विपरिणामात् ॥ व्यवधारकल्पना तु–यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत्" इत्यत्र । अत्र हि उपक्रमे दातुरेवं प्रजापतेरिष्टिकरणावगमात् तदनुरोधेन प्रतिगृह्णीयात्' इत्यस्य दानार्थकता कल्प्यते ॥ लक्षणा तु सिद्धान्तिनोक्तैव ॥

पयोगादर्थवत्ता । अध्ययनविधेरनारभ्याधीतत्वेन प्रकरणादपूर्वसाधनत्वानुपस्थितेः ।

न च(१) पर्णतादाविवाव्यभिचरितक्रतुसम्बन्धात्तदुपस्थानम्, अर्थज्ञानस्य क्रतुं विनाऽप्यध्यापनादिद्वारा द्रव्यार्जनोपयोगसम्भवेन व्यभिचारात् ।

न च नियमस्य पुरुषार्थत्वकल्पनया स्वर्गार्थं पापक्षयार्थं वा विधिरर्थवानस्त्विति वाच्यम्, एवमप्यध्ययनविधेरर्थज्ञानार्थत्वेनाध्ययनविधाने व्यापारोऽस्ति ? न वा ? आद्ये विध्यानर्थक्यम् । अन्त्ये अर्थवादानां प्रयोजनवदर्थतात्पर्यकत्वस्याध्ययनविध्यधीनत्वाभावान्न तल्लक्षणासिद्धिः ।

एतेन "अनधीयाना व्रात्या भवन्ती" तिवचनादध्ययनाकरणे प्रत्यवायावगतावपि भावनाया भाव्यापेक्षायां दृष्टत्वात्प्रयोजनवदर्थज्ञानमेव भाव्यत्वेनाध्ययनविधिस्स्वीकरोतीत्यपास्तम् । अध्ययनविधेरर्थज्ञानभाव्यकत्वे तात्पर्यस्वीकारे लोकसिद्धत्वाद्विध्यानर्थक्यम् । अस्वीकारे भावनाया लोकदृष्टनान्तरीयकतया अर्थज्ञाने भाव्यतया सम्बध्यमानेऽप्यर्थवादकृतं भूतार्थज्ञानमेव भाव्यतया सम्बध्येत, न प्रयोजनवदर्थज्ञानम्; विधितात्पर्याभावात् । अतश्च लक्षणाया असिद्धिस्तदवस्थैव ।

किञ्च सत्यामपि लक्षणादिसिद्धौ अनेकेष्वर्थवादेषु लक्षणाद्यपेक्षयाऽध्ययनविधेरेवैकस्य अदृष्टार्थत्वकल्पनोचिता । आवश्यकं चाध्ययनविधेरदृष्टार्थत्वं (२)हुंफडाद्यध्ययनांशे । अत एवावैरूप्यादर्थवादांशेऽप्यदृष्टार्थत्वमेव कल्प्यम् ।

---

१ 'यस्य पर्णमयी जुहूर्भवति न स पाप ँ श्लोक ँ शृणोति' इति वाक्यविहितपलाशवृक्षीयत्वादिवदित्यर्थः ।

२ हुंफडादीनामर्थाभावादिति भावः ।

न चैवं विध्यध्ययनस्याप्यदृष्टार्थत्वापत्तेस्तेषां धर्मे प्रामाण्यानापत्तिः, तदध्ययनस्यादृष्टार्थत्वेऽपि स्वशक्त्यैव विधीनां प्रयोजनवदर्थप्रमापकत्वरूपप्रामाण्योपपत्तेः । अतोऽध्ययनविधिस्स्वर्गार्थं पापक्षयार्थमेव वाऽध्ययनं विधत्ते, यथाश्रुतार्थज्ञानार्थं वा । अध्ययनमेव वा समानपदोपात्तत्वात् भावनाभाव्यमस्तु । न चैवमन्त्यपक्षद्वये प्रवृत्त्यनुपपत्तिः, अपुरुषार्थत्वादिति वाच्यम् । "अनधीयाना" इति वाक्येनाकरणे प्रत्यवायबोधनादेव प्रवृत्तिसिद्धेः । एवंच सर्वथा नाध्ययनविधिस्तात्पर्यग्राहक इति सिद्धम् । तस्मान्न तावत्तात्पर्यानुपपत्तिर्लक्षणाबीजम् ।

नाप्यन्वयानुपपत्तिः । "वायुर्वै क्षेपिष्ठा" त्यादिपदार्थान्वयस्योपपन्नतरत्वात् । यद्यपि "ग्रावाणः प्लवन्ते" "(१)यजमानः प्रस्तर" इत्यादिष्वन्वयानुपपत्तिर्धर्माधर्मलक्षणाबीजं शक्यते वक्तुम्, तथापि धर्माधर्मयोर्निर्धारणाभावः । ग्रावाणोऽपि प्लवन्ते अतोऽन्येन चेतनेन प्लवितव्यम्, अथ वा ग्रावाणोऽपि मूर्खा यत्र प्लवन्ते तत्राऽन्येन जानता कथं प्लवितव्यमिति । यदि तु निषेधकल्पनातो विधिकल्पनायां लाघवं नियामकं शंक्येत, ततो "(२)न बाहुभ्यां नदीं तरे" दित्यादिशास्त्रविरोधो वक्ष्यमाणो दुष्परिहरः । तस्मादुभयथापि स्वातन्त्र्यपक्षोऽयुक्तः ।

अथ विधिनिषेधैकवाक्यताबलेन प्राशस्त्याप्राशस्त्यलक्षणया प्रामाण्यमुच्यते, ततो वाक्यस्वारस्येन भिन्नवाक्यत्वप्रतीतेर्नैकवाक्यत्व एव प्रमाणं पश्यामः । नचान्यत् प्राशस्त्याप्राशस्त्यलक्षणायां प्रमाणमस्ति । अध्ययनविध्यदृष्टार्थत्वस्य स्थापितत्वात् ।

किञ्च किमिदं प्राशस्त्यमप्राशस्त्यं वा? तद्धि गुणवत्त्वं दो-

१ तै. सं. १.७.४. प्रस्तरो दर्भमुष्टि विशेषः । २ मनुस्मृ. ४.७.

षवत्त्वं वा तच्छब्दवाच्यत्वेन लोके प्रसिद्धम्, तद्यदि विधिनिषेधविषयत्वम्, इष्टानिष्टफलकत्वविशिष्टेतिकर्तव्यताकत्वं वा गुणदोषवत्त्वम्? तदन्यतास्सिद्धत्वान्नार्थवादापेक्षम्। न च स्तुतिनिन्दयोर्विधिनिषेधोपकारकत्वं सम्भवति, ताश्च इच्छानिच्छोत्पादकत्वेन वा स्यात्? प्रवृत्तिनिवृत्तिप्रतिबन्धकालस्योत्साहनिवर्तकत्वेन वा? नाद्यः; विधिनिषेधाक्षिप्तेष्टानिष्टमूलकत्वादेव तत्सिद्धेः। नान्त्यः; प्रवृत्तिनिवृत्तिहेतुभूताविधिनिषेधाभ्यामेव तत्सिद्धेः। एतेन साक्षात्प्रवृत्तिहेतुत्वं प्रत्युक्तम्। अर्थवादोपात्तस्तुतिनिन्दाभ्यामेव तत्सिद्धेः विधिनिषेधवैयर्थ्यशङ्का तु अर्थवादेभ्यस्स्वरसतस्स्तुतिनिन्दयोरप्रतीतेः अध्ययनविधिवशेन च प्रयोजनवत्त्वावगमेऽपि स्तुतिनिन्दालक्षकत्व एव प्रमाणाभावान्निराकर्तव्या।

किञ्च सत्यपि विधेः प्राशस्त्यापेक्षत्वे निरर्थवादकविधौ विधेरेव प्राशस्त्यप्रतिपादने दृष्टशक्तिकस्य प्राशस्त्यपरत्वोपपत्तौ नादृष्टशक्तिकार्थवादापेक्षणं युक्तम्। एवंचानपेक्षितत्वादयोग्यत्वाच्च विद्यमानोऽपि सान्निधिर्नैकवाक्यत्वकारणमिति न धर्माधर्मयोः प्रमाणमर्थवादाः। न च धर्माधर्मयोः प्रामाण्यसम्भवः; वायुक्षेपिष्ठत्वादीनां मानान्तरप्राप्तत्वेनानधिगतार्थगन्तृत्वरूपमुख्यप्रामाण्यासम्भवात्। 'ग्रावाणः प्लवन्त' इत्यादौ याथार्थ्यलक्षणस्याप्यसम्भवाच्च। तस्मादप्रमाणमर्थवादाः॥

सूत्रं तु आम्नायस्य(१)तद्भूताधिकरणे अंशत्रयविशिष्टभावनारूपक्रियाप्रतिपादकत्वेन प्रामाण्यस्य स्थापितत्वात्, अतत्प्रतिपादकानामर्थवादानां, आनर्थक्यम् प्रयोजनवदर्थराहित्यम्। तस्मादप्रमाणमेवंजातीयकमर्थवादजातमिति व्याख्येयम्॥

यत्तु मूले आदावर्थवादमन्त्रनामधेयानां त्रयाणां सामान्य-

१ पू. मी. १-१-७.

तोऽप्रामाण्यपूर्वपक्षं कृत्वा तथैव सिद्धान्तसूत्रे निराकरणं कृतं, तत् पृथगधिकरणे मन्त्रनामधेययोः पृथगप्रामाण्यस्य निराकरिष्यमाणत्वेन पुनरुक्तत्वादनुपयुक्तत्वाच्चोपेक्षितम् । मूले तु शिष्यशिक्षार्थं कृतमिति वेदितव्यम् ॥ १ ॥

सू—शास्त्रदृष्टविरोधाच्च॥ १—२—२ ॥ (पू)

किञ्च 'वायुर्वै क्षेपिष्ठे' त्यादौ धर्मप्रमानुत्पादनेऽपि स्वार्थेऽपि तावत्सत्यत्वानिश्चयः। 'सोऽरोदी'दित्यादावप्यतीतार्थकथनेन योग्यानुपलब्ध्यभावान्न स्वार्थासत्यत्वनिश्चयः । "स्तेनं मनोऽनृतवादिनी वागि" त्यत्र तु स्तेयमनृतवदनशीलत्वञ्च वाङ्मनसयोरुच्यमानं योग्यानुपलब्ध्या स्वार्थेऽप्यप्रामाण्यमापादयति । यदि त्वौपचारिकं स्तेनशब्दलाक्षितं प्रच्छन्नरूपत्वं मनसो, वाचश्च प्रायिकमनृतवादिनीत्वमनूद्येत, ततो (१)भूतानुवादादप्रामाण्यम् ।

अथ तु प्रामाण्यलिप्सया पूर्वोक्तदूषणगणमभ्युपगम्याप्यध्याहारादिभिर्विधिः कल्प्येत—वाङ्मनसे अपि यतः स्तेनानृतवादिनी तस्मादन्येनापि पुंसा स्तेयं मृषोद्यञ्च कर्तव्यमिति, तत्राप्ययमपूर्वविधिर्वा स्यात् ? परिसंख्याविधिर्वा ?—द्रव्यार्जनं वाग्व्यवहारं वा कुर्वन् स्तेयातिरिक्तं मृषोद्यातिरिक्तञ्चोपायं न कुर्वीतेति । नियमविधिर्वा—स्तेयं मृषोद्यञ्च कुर्वीतैवेति । नाद्यः; प्राप्तार्थत्वात्, स्वर्गार्थत्वकल्पने च गौरवापत्तेः; 'स्तेयं न कुर्यात्' 'नानृतं वदे' दित्यादिशास्त्रस्यापूर्वविषयकत्वकल्पनाय संकोचरूपबाधापत्तेश्च । न द्वितीयः; दोषत्रयापत्तेः, परिसंख्याफलकत्व-

१ प्रमाणान्तरसिद्धार्थबोधकत्वेनाज्ञातज्ञापकत्वाभावादिति भावः।

स्य सत्यां गतावन्याय्यत्वाच्च । 'ब्राह्मणः प्रतिग्रहादिना द्रव्यमार्जयेत्' 'सत्यमेव वदे'दित्यादिशास्त्रविरोधश्च तदवस्थः ।

एवं यद्यपि गौरवत्रैदोष्यभिया (१)ऋतौ भार्यामुपेया' दितिवन्नियमविध्याश्रयणं, तथापि "स्तेयं न कुर्या"दित्यादिशास्त्रविरोधस्तदवस्थ एव । न च(२) ग्रहणाग्रहणवाद्विकल्पः, क्लृप्तकल्प्यत्वेन वैषम्यात् । नच(३) "न तौ पशौ करोती" तिवत् कल्प्यविधिप्राप्तेनापि क्लृप्तविधिविहितस्योपजीव्यत्वात् विकल्पोऽस्त्विति वाच्यम् । तद्वदिह निषेधस्य रागप्राप्तस्तेयानृतवादोपजीवनेन कल्प्यविध्युपजीवकत्वाभावात् । अतश्शास्त्रविरोधापत्तेरप्यप्रमाणम् ।

किञ्च "धूम एवाग्नेर्दिवा ददृशे नाग्निः" "आर्चिरेवाग्नेर्नक्तं ददृशे न धूम" इत्यादेर्दृष्टविरोधात् स्वार्थेऽप्यप्रामाण्यं निर्विवादम् । एवं तदुपपादकस्य–"दिवाग्निरादित्यं गतो रात्रावादित्यस्त" मित्यस्यापि । अतश्च निरालम्बनत्वात्सिद्धान्त्यभिप्रेतस्तावकत्वेन विध्येकवाक्यतापि दुरुपपादा ।

तथोदाहरणान्तरेऽपि "न चैतद्विद्मो ब्राह्मणास्स्मो वयमब्राह्मणा वे" त्यत्र दृष्टविरोधः ।

ननु नायं दृष्टविरोधः,(४) "सवर्णेभ्यस्सवर्णासु जायन्ते हि सजातय" इत्यादिशास्त्रगम्यत्वाद्ब्राह्मणत्वादीनाम् । ब्राह्मण-

---

१ गौ.ध. ५-१. अस्य नियमविधित्वं परिसंख्याविधित्वमित्युभयमप्यङ्गीकृतं शास्त्रकारैः ।

२ अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णातीत्यत्र विहितप्रतिषेधात् यथा विकल्पः तथेत्यर्थः ।

३ तौ आज्यभागौ पशुयागे न करोतीत्यर्थः । अतिदेशस्य कल्प्यत्वेन तत्प्रापितयोः आज्यभागयोः अतिदेशप्राप्तपदार्थविषयकेण निषेधेनात्यन्तबाधायोगात् विकल्प एवाङ्गीक्रियते तद्वदिहाप्यस्तु इत्याशङ्कतुराशयः ।

४ याज्ञ. स्मृ. १.९० ।

मातापितृसम्बन्धानभिज्ञस्य चक्षुस्सन्निकृष्टेऽपि ब्राह्मणोऽयमित्यननुभवाच्च । न च ब्राह्मणमातापितृसम्बन्धस्य ब्राह्मणत्वजात्यभिव्यञ्जकस्यानुपस्थितेर्न क्षतिरिति वाच्यम्, नैवोत्पादकब्राह्मणत्वजातिज्ञानस्य सहकारित्वम्, आत्माश्रयापत्तेः ।

वस्तुतस्तु ब्राह्मणत्वादिजातावेव मानाभावः, विश्वामित्रादौ साङ्कर्यप्रसङ्गात् । अतो विशुद्धमातापितृजन्यत्वं, (१)"शमो दमस्तपश्शौचं सत्यमिन्द्रियनिग्रहः । ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम्" इतिस्मृतेर्वा शमदमादिजन्यादृष्टवत्त्वं ब्राह्मणत्वम् । तस्य च प्रत्यक्षागोचरत्वात् कथं दृष्टविरोधोदाहरणत्वमिति चेत्—न; ब्राह्मणोऽयमित्यनुगतप्रतीत्या घटत्वादिजातिवत् ब्राह्मणत्वादिजातिस्वीकारे बाधकाभावात् । न च साङ्कर्यम्, विश्वामित्रे तपःप्रभावेन ब्राह्मणाधिकृतकर्माधिकारोत्पत्तावपि (२)ब्राह्मणत्वजातेरस्वीकारात् । एवं "मासेन शूद्रीभवति ब्राह्मणः क्षीरविक्रयादि" त्यादावपि न शूद्रत्वादिजातिमत्ता । अत एव शूद्रीभवतीत्यभूततद्भाववाचिच्विप्रत्ययप्रयोगः । न चाभिव्यञ्जकाभावः; ब्राह्मणत्वजातिमन्मातापितृसम्बन्धजन्यत्वस्याभिव्यञ्जकत्वात् । एकत्वेऽपि चोत्पादकव्यक्तिसम्बन्धित्वेनाभिव्यञ्जकत्वम्, उत्पाद्यव्यक्तिसम्बन्धित्वेन चाभिव्यंग्यतेति न विरोधः। तच्चाभिव्यञ्जकज्ञानं मातुः प्रत्यक्षेण, अन्येषां त्वाप्तोपदेशादिनेत्येतावान् विशेषः । न त्वेतावताऽभिव्यञ्जकज्ञानवतश्चक्षुषा ब्राह्मणत्वप्रत्यक्षे काश्चिद्विरोधः ।

अत्र "(३)विन्नास्वेष विधिस्स्मृत" इतिवचनादभिव्यञ्जके

---

१. भगवद्गी. १. ८४.

२. ब्राह्मणत्वादि. इति क. पु.

३. याज्ञ. स्मृ.१.९२. विन्नासु विवाहितास्वित्यर्थः ।

विवाहितपदं देयम् । तेन कुण्डगोलकयोर्व्यभिचारोत्पन्नयोर्न ब्राह्मणत्वमिति केचित् ।

वस्तुतस्तु गौरवापत्तेर्न विवाहितपददानम् । गोर्गव्युत्पन्नस्य गोत्ववद्ब्राह्मणाद्ब्राह्मण्यामुत्पन्नस्यैव ब्राह्मणत्वोपपत्तेः । 'विन्नास्वि'ति वचनं तु (१)ब्राह्मणादिविहितकर्मानधिकारमात्रप्रतिपादनपरम् । कुण्डगोलकयोस्तु सत्येव ब्राह्मण्येऽवान्तरसंज्ञाकरणं कार्यविशेषविधानार्थम् । अत एव श्राद्धे(२) तयोर्निषेधो ब्राह्मणत्वेन प्रसक्तत्वात् सङ्गच्छते । न चोक्तविधाभिव्यञ्जकस्य सृष्ट्याद्यब्राह्मणे ऽभावादव्यापकत्वम् । अस्मन्मते प्रलयप्रतिपादकवचनानामर्थवादत्वेन सृष्ट्यादेरनङ्गीकारात् ।

यत्तु शमादिवचनं, तन्न शमादिजन्यादृष्टवत्त्वं ब्राह्मणत्वमित्येतत्परम्, गौरवापत्तेः । नापि शमादीनां तदभिव्यञ्जकत्वपरम्, (३)शमादिमत्यदुष्टशूद्रे व्यभिचारात् । अतः प्रायिकद्योतकत्वपरम्, शमाद्यधिकारविधानार्थं वेति द्रष्टव्यम् । तस्माद्ब्राह्मणत्वस्य प्रत्यक्षसिद्धत्वात्तद्विरुद्धं "न चैतद्विद्म" इत्यादिवचनं स्वार्थेऽप्यप्रमाणम् ।

तथा "(४)को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वेती" त्यादीनां स्वर्गसद्भावाज्ञानप्रतिपादनात्मस्वार्थेपि प्रामाण्यम्; "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिशास्त्रस्य ज्ञापकस्य सत्त्वेन शास्त्रविरोधात् । अत्र शास्त्रविरोधदृष्टविरोधयोरुदाहरणद्वयं (५)परिहारभेदात् प्रदर्शितम् । व्युत्क्रमश्च परि-

---

१. ब्राह्मणाधिकारविहित. इति क. पु.

२. शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ । म. स्मृ. ३.१५६. इति मन्वाद्युक्तो निषेधः इत्यर्थः ।

३. शमादिमति दुष्टशूद्रे. इति. ख पु.

४. तै. सं. ६-१-१ ५. परिहारहेतुभेदात्. इति क. पु.

हारसूत्रक्रमानुरोधेन । तत्कारणं तु तत्रैव प्रदर्शयिष्यते ॥
सूत्रं निगदव्याख्यातम् ॥ २ ॥

सू—तथा फलाभावात् । ॥ १—२—३ ॥ (पू)

(१)गर्गत्रिरात्रब्राह्मणं प्रकृत्य श्रूयते—"शोभतेऽस्य मुखं य एवं वेद" इति । अत्र गर्गत्रिरात्रब्राह्मणार्थज्ञानकाले उच्यमानाया वर्तमानमुखशोभाया योग्यानुपलब्धिबाधितत्वात् स्वार्थेऽप्रामाण्यम् । न हि तज्ज्ञानकाले मुखशोभा दृश्यते, आयासेन विपरीतशोषदर्शनात् । अथ ज्ञानफलानुवादः, तदपि प्रत्यक्षविरुद्धम्, तदानीमजायमानत्वात् । न च कालान्तरे भविष्यतीत्यत्र (२)प्रमाणमस्ति । नच 'शोभत' इत्यस्यैव विभक्तिव्यत्ययेन भविष्यदर्थकत्वं परिकल्प्य रात्रिसत्रवत्फलपरत्वसम्भवः, ज्ञानस्य गर्गत्रिरात्रानुष्ठानयोग्यतासंपादनद्वारा तत्कर्तृसंस्कारस्य (३)तीर्थे स्नाति' त्यादिवत्परार्थत्वेन प्रयोजनानाकाङ्क्षत्वात्फलपरत्वकल्पनानुपपत्तेः । अतश्च पर्णमयीन्यायेनैवास्य फलकल्पकत्वासम्भवादप्रामाण्यम् । न च तेन पौनरुक्त्यम्—एतत्सूत्रे फलपरत्वासम्भवेनानर्थक्यमाशंक्यते,, तत्र तु फलपरत्वासम्भवेनैवार्थवादत्वं सिद्धान्त्यत इत्यदोषः ॥ सूत्रं निगदव्याख्यातम् ॥ ३॥

---

१. गर्गत्रिरात्रो नाम त्रिसुत्याकोऽहीनविशेषः । गर्गत्रिरात्रेण प्रजातिं भूमानं गच्छत्यभिस्वर्गलोकं जयति (आप. श्रौ. २२-१५-१.) इति विहितः ।

२ नियामकं इति क. पु.

३ तै. सं. ६-१-१ ज्योतिष्टोमप्रकरणे विहितस्य तीर्थस्नानस्य यथा तदीयकर्तृसंस्कारद्वारा ज्योतिष्टोमाङ्गत्वात् न स्वतन्त्रफलापेक्षा तद्वदित्यर्थः । तीर्थस्नानस्य क्रतुयुक्तपुरुषसंस्कारद्वारा क्रत्वङ्गत्वं तृतीयाध्यायचतुर्थपादे सिद्धान्तितम् । यत्र ऋष्यादयो महात्मानो नियमेन स्नान्ति सोऽवतारदेशस्तीर्थमित्यभिधीयते ।

सू—अन्यानर्थक्यात् । ॥ १—२—४ ॥ (पू)

"पूर्णाहुत्या सर्वान् कामानवाप्नोति" "पशुबन्धयाजी सर्वान् लोकानभिजयति" "तरति मृत्युं, तरति पाप्मानं, तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमेवं वेद" इति ।

अत्रापि पर्णमय्यधिकरणन्यायेन पूर्णाहुतेराधानाङ्गभूतकर्मरूपत्वात् प्रयाजादिवत्प्रयोजनानपेक्षत्वम्। (१)मूले तु अग्निसंस्कारकत्वान्न तदित्युक्तम् । पशुबन्धस्यापि ज्योतिष्टोमाङ्गभूतकर्मरूपत्वादेव न फलापेक्षत्वम्। अश्वमेधज्ञानस्य तु गर्गत्रिरात्रब्राह्मणज्ञानवत् कर्तृसंस्कारकत्वादेव प्रयोजनानपेक्षत्वम् । अतश्चानपेक्षत्वादेवैतेषां फलकल्पकत्वासंभवः । अभ्युपेत्यापि तु फलकल्पकत्वं प्रामाण्य उच्यमाने यदि तावत्स्वतन्त्रफलार्थत्वं ततो वाक्येन कल्प्येन प्रकरणावगतक्रत्वर्थत्वबाधः । (२)अथायुरादिवदानुषङ्गिकफलार्थत्वं, ततः पूर्णाहुत्यादिनैव सर्वकामावाप्तौ जातायां तदुत्तरभाविनां क्रतुविधीनामानर्थक्यप्रसङ्गः । न हि पूर्णाहुतिमग्न्युत्पादकाधानाङ्गभूतामकृत्वा अग्निसाध्येषु कर्मस्वधिका-

---

१. भाष्यकारेण—पवमानेष्टीनां नाधानाङ्गत्वम्, किन्तु आधानवत् साक्षादेवाग्निसंस्कारद्वाराऽग्न्यङ्गत्वम्—इत्युक्तम् ।

२. दर्शपूर्णमासप्रकरणे—"सूक्तवाकेन प्रस्तरं प्रहरति" इति वाक्येन सूक्तवाकाख्यमन्त्रकरणकं प्रस्तरप्रहरणमाम्नातम् । सूक्तवाको नाम "इदं द्यावापृथिवी भद्रमभूत्" इत्यनुवाकपठितो मन्त्रविशेषः। प्रस्तरो वेद्यां हविरासादनार्थ मास्तरितो दर्भमुष्टिः। प्रहरणं अग्नौ प्रक्षेपः। तत्र "आयुराशास्ते, सुप्रजास्त्वमाशास्ते," इत्यादय आयुरादिप्रार्थनारूपा आम्नाताः प्रस्तरप्रहरणस्य दर्शपूर्णमासाङ्गभूतत्वात् तदुपकारकत्वं विनानान्यत् पृथक् फलं तस्य, तथापि तन्मन्त्रप्रतिपाद्यानामायुरादिफलानामपि आनुषङ्गिकतया प्रस्तरजन्यत्वमङ्गीक्रियते, तद्वदिति भावः ।

रस्सम्भवति । न चाग्नीषोमीयमकृत्वा ज्योतिष्टोमे साङ्गतास्ति । अश्वमेधज्ञानं विना चाश्वमेधाकरणमसामर्थ्यात् स्पष्टम् । अतश्च पूर्वभाविभिः पूर्णाहुत्यादिभिरेव तत्तत्फलावाप्तौ तदुत्तरभाविनां क्रतुविधीनामानर्थक्यप्रसङ्गो दुर्वारः ॥ (१)सूत्रं निगदव्याख्यातम् ॥

सू—अभागिप्रतिषेधात् ॥ १—२—५ ॥ (पू)

"न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवी"त्यत्रान्तरिक्षे दिवि वा तावच्चयनस्याप्राप्तत्वान्न प्रतिषेधयोग्यत्वम् । एवं पर्युदासोऽपि निराकर्तव्यः; अनन्तरिक्षे अदिवि च पृथिव्यां चयनस्य नित्यप्राप्तत्वात् । पृथिवीचयनप्रतिषेधोऽपि चयनविधेः प्रामाण्ये ऽप्रामाण्ये वोभयथाप्यनुपपन्नः । न हि चयनं कुर्वता पृथिवीचयन(२)प्रतिषेधार्थश्शक्यते सम्पादयितुम् । अकुर्वतस्तु प्राप्त्यभावादेव प्रतिषेधवैयर्थ्यम् । एवं पर्युदासानुपपत्तिरपि द्रष्टव्या । अतो नामान्तरेण चयनप्रतिषेधार्थमेव तादित्यङ्गीकर्तव्यम् । तथाच तद्विधिवैयर्थ्यमपि । न च(३)ग्रहणाग्रहणवत् पाक्षिकत्वसिध्यर्थः प्रतिषेधोऽर्थवान् स्यादिति वाच्यम्; (४)पशुकामश्चिन्वीत' "प्रजाकामश्चिन्वीते" त्यादिवाक्यै(५)रग्नेः काम्यत्वावगमादेव पाक्षिकत्वसिद्धेः प्रतिषेधवैफल्यात् । न चैतैरग्नेः काम्यत्वावगमेऽपि "अथातोऽग्निमग्निष्टोमेने" त्यादिवचनै-

---

१. सूत्रं नियन्त्रितम् । इति क. पु.   २ निषेधार्थः इति क. पु.

३. अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' इति वाक्यद्वयं श्रूयते । तत्र पूर्ववाक्यविहितस्य षोडशिग्रहणस्य पाक्षिकत्वासिध्यर्थं प्रतिषेध उत्तरवाक्येन क्रियते तद्वदिहापीत्यर्थः ।

४. तै. आ. १–२६–४.

५. इष्टकोपधानसम्पादितस्थण्डिलाविशेषोऽत्राग्निपदार्थः ।

(१)स्संयोगपृथक्त्वन्यायेन क्रत्वर्थत्वस्यापि वक्ष्यमाणत्वात् तस्य पाक्षिकत्वार्थं प्रतिषेधोऽर्थवानिति वाच्यम्। उत्तरवेदिमात्रेणापि निरग्निकस्यापि क्रतुप्रयोगस्य "ते यद्यग्निं चेष्यमाणा भवन्ती"ति सत्रे(२) समारोपणकालादिगुणविधिपरे वाक्ये सिद्धवत्पाक्षिकत्वानुवादादिभिर्लिङ्गै(३)र्दशमे वक्ष्यमाणत्वात्। अत एव (४)अग्निं सोमाङ्गमिच्छता" मिति कात्यायनोऽप्युक्तवान्। साग्निके प्रयोगे परं(५) "उत्तरवेद्यां ह्यग्निश्चीयत" इति वचनादग्न्युत्तरवेद्योस्समुच्चयस्सङ्कर्ष उक्तः। न त्वेतावता क्रत्वर्थस्याग्नेर्नित्यत्वम्। अतश्चाग्नेः पाक्षिकत्वस्य सिद्धत्वात्तत्प्राप्त्यर्थं प्रतिषेधानर्थक्यम्। किञ्च पृथिवीचयननिषेधस्य चयनक्रियायां कल्प्यत्वेन क्लृप्तचयनविधेः पाक्षिकत्वापादनायोगः। अत एवंजातीयकं स्वार्थेऽप्यप्रमाणम्। अप्रतिषेधभागित्वादिति सूत्रार्थः॥

सू—अनित्यसंयोगात् ॥ १–२–६ ॥ (पू)

(६)"बबरः प्रावाहणिरकामयत वाचः प्रवादिता स्यामिति" इत्यत्र स्वार्थपरत्वे अनित्यसंयोगः परं प्रसज्येत। न ह्यनित्यं बबरनामानं पुरुषं प्रतिपादयतो वेदस्य स्वार्थे प्रामाण्यं सम्भवति, आदिमत्तादोषप्रसङ्गात्। यद्यपि च "(७)परं तु श्रुतिसामान्यमात्र" मित्यत्र एतद्दोषपरिहारार्थं बबरादिशब्दानां नित्यसिद्धवाय्वादिपरत्वमुक्तम्, तथाप्यत्रार्थवादानां कथमपि प्रामा-

---

१. एकस्य तूभयत्वे संयोगपृथक्त्वम, इति न्यायः।
एकस्य कर्मणो दध्यादेर्द्रव्यस्य वोभयोद्देशेन विधायकं वाक्यद्वयं यत्र स संयोगपृथक्त्वन्यायः।

२. समारोप. इति ख. पु.
३. १०–३–८
४. का. श्रौ. १६–१,२.
५. तै. आ. १. २६–३.
६. तै. सं. ७–२–१०–२.
७. पू. मी. १–१–३१.

ण्ये निराकृते बबरादिशब्दानां श्रौतार्थत्यागकारणाभावान्न लक्षणया वाय्वादिपरत्वं युक्तमाश्रयितुम् । अतश्चानित्यसंयोगप्रसङ्गस्तदवस्थ एवेत्याक्षिप्यते । सूत्रं निगदव्याख्यातम् ॥ ६ ॥ तस्मादप्रमाणमर्थवादा इति पूर्वः पक्षः ॥

सू—विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ॥ १–२–७ ॥ (सि)

(सिद्धान्तः)

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । सत्यमर्थवादानां न स्वार्थद्वारा धर्माधर्मप्रमोपयोगसम्भवः, प्राशस्त्यलक्षणया विध्येकवाक्यत्वेन तदुपयोगस्तु दुर्वारः । तत्रापि प्राशस्त्यलक्षणायां यद्यपि नान्वयानुपपत्तिर्बीजम्, तथाप्यध्ययनविध्यवगततात्पर्यानुपपत्तिरेव बीजम् । तथा हि—"स्वाध्यायोऽध्येतव्य" इत्यत्र(१०) "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इति स्मृत्या तव्यप्रत्ययस्य प्रैषवाचित्वात् (११)प्रैषस्य च प्राप्तविषयत्वप्रवर्तनात्मकत्वसमुदायरूपत्वात्, ब्राह्मणे च प्राप्तविषयत्वासम्भवेन समुदायासम्भवेऽपि तदेकदेशलक्षणया तव्यप्रत्ययेन प्रवर्तनाऽभिधीयते । तस्याश्च प्रवृत्त्यनुकूलव्यापाररूपत्वात् प्रवृत्तिरूपार्थभावनापि तेनैवाक्षिप्यते । तस्याश्च भाव्यापेक्षायां कर्मोत्पन्नतव्यप्रत्ययोपात्तकर्मत्वस्य स्वाध्यायस्य भाव्यत्वेनान्वये जाते अध्ययनस्य(१२)भावार्थाधिकरणन्यायेन करणत्वेनान्वयः कल्प्यते । स्वाध्यायस्य

---

१ पा. सू. ३-३-१६३.

२. प्रवर्तनस्मृतिः प्राप्ते प्रैष इत्यभिधीयते ।
अप्राप्तप्रापणं सर्वं विधित्वं प्रतिपद्यते ॥

३. पू. मी. २. १. २.

चाध्ययनं प्रत्युत्पाद्यत्वरूपकर्मत्वासम्भवादाप्यत्वरूपं तदाश्रीयते । ततश्चाध्ययनेनाक्षरग्रहणद्वारा स्वाध्यायं प्राप्नुयादित्यर्थः । निष्प्रयोजनस्य च स्वाध्यायस्य कर्मत्वानुपपत्तेः प्रयोजनाकाक्षायां दृष्टसम्भवे ऽदृष्टकल्पनानुपपत्तेः स्वाध्यायजन्यं दृष्टमर्थज्ञानादिप्रयोजनमाश्रीयते ।

नचैवं संस्कारविध्यन्यथानुपपत्त्या प्रयोजनकल्पनायां (१)सक्तुष्वपि तदापत्तिः; प्रयोजनस्येह सामर्थ्यलभ्यत्वेनाकल्प्यत्वात् । अतश्च यथावघातादेरपूर्वसाधनीभूतव्रीहिवितुषीभावरूपसंस्कारार्थस्याप्यपूर्वार्थत्व एव विधेस्तात्पर्यम्, तथाऽध्ययनस्याप्यर्थज्ञानादिसाधनस्वाध्यायाक्षरग्रहणरूपसंस्कारसाधनस्यार्थज्ञानाद्यर्थत्व एवाध्ययनविधेस्तात्पर्यम् । एवंच निष्प्रयोजनार्थज्ञानस्य प्रयोजनत्वासम्भवात् प्रयोजनवत्तामर्थस्य स्वाध्यायविधिरवबोधयति । एवंचार्थवादानां (२)वाच्यार्थस्य निष्प्रयोजनत्वात्तदसम्भवे लाक्षणिकस्यापि प्राशस्त्यस्य गौणसामर्थ्यलभ्यत्वेन दृष्टत्वात् तत्परत्वं स्वाध्यायविधिबलादवगम्यते ।

यत्तु वार्त्तिके–साक्षादध्ययनस्यैवार्थज्ञानभावनाकरणत्वमुक्त्वा अर्थवादानां प्राशस्त्यलक्षणोपपादिता, तद्बलेन च भवदेवेनाध्ययनस्यार्थकर्मत्वं, स्वाध्यायस्य तु सक्तुन्यायेन विनियोगभङ्गं परिकल्प्याध्ययनार्थत्वमेवेत्युक्तम्, तन्न-उक्तविधया संस्कारकर्मत्वोपपत्तौ विनियोगभङ्गे प्रमाणाभावात्; वार्तिककृता तु स्थलान्तरे(३) बादर्यधिकरणादौ संस्कारकर्मत्वस्याप्युक्तत्वादातिशयार्थमत्रार्थकर्मत्वमुक्तम् । यस्त्वस्मिन् पक्षे स्वाध्यायस्य संस्कार्य-

१. "सक्तून् जुहोति" इत्यत्र द्वितीयाश्रवणेऽपि सक्तूनां भूतभाव्युपयोगाभावेन कर्मत्वासम्भवात् द्वितीयायाः करणत्वलक्षकत्वमङ्गीकृत्य सक्तुकरणकहोमविधिरेवाङ्गीकृतो द्वितीये, तद्विरुध्येतेति भावः ।

२ वाक्यार्थस्य इति ग. पु. । ३. पू. मी. ३-१-३.

त्वेनोद्देश्यत्वात्तद्विशेषणस्यैकत्वस्याविवक्षापत्तेः शाखान्तराधिकरणवार्तिकव्युत्पादितैकशाखाध्ययनविरोधप्रसङ्गः, स चैकत्वाविवक्षायामपि स्वाध्यायपदे स्वशब्देनात्मीयवाचिना पित्रादिपरम्परया आगताया एव शाखायाः कर्मव्युत्पत्त्या वाच्यत्वावधारणात् अनेकशाखाध्ययने च स्वशब्दवैयर्थ्यापत्तेः "अध्वर्युं वृणीत" इतिवच्चार्थज्ञानार्थतादशायामुपादेयत्वेनैकत्वविवक्षोपपत्तिरित्येवं तत्रैव निराकरिष्यते ।

यत्तु पूर्वपक्षवादिना प्रयोजनवदर्थज्ञानार्थत्वेऽध्ययनस्य लोकत एव प्राप्तत्वाद्विध्यानर्थक्यमुक्तम्, तत्र भवदेवः—शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वमन्वयव्यतिरेकासिद्धम्; असत्यामपि शब्दशक्तौ सति तात्पर्यज्ञाने गौरश्वः, पुरुष, इत्यत्राध्याहारादिना गौर्दुह्यताम्, अश्वो गच्छति, पुरुषो वर्तते इत्येवं शाब्दबोधदर्शनात्, सत्यामपि च तस्यामसति तात्पर्यज्ञाने नानार्थस्थले(१)नार्थविशेषावधारणम्, तेन शब्दोच्चारणमात्रं शब्दवृत्तिज्ञानमात्रं वा नार्थबोधजनकम्, (२)किन्तु तात्पर्यज्ञानसहकृतं तत्, तच्च लोके पुरुषाशयवशादुन्नीयते, वेदे तु तदभावादर्थज्ञानोद्देश्यकाध्ययनविधिवशादेव तात्पर्यमुन्नेयम् । अतश्च विधिवाक्यानामप्यध्ययनविध्यभावे सति नैवार्थपरत्वमिति अध्ययनविधिरेव सकलस्य वेदस्यार्थतात्पर्यनिश्चायक इति न सत्यपि दृष्टार्थत्वे विधिवैफल्यमिति । (३)"अध्ययनविधिना इतरे सर्वे विधायकास्स्वात्मा च विनियुज्यते" इति(४)यथाश्रुतवार्तिकग्रन्था-

१ अर्थविशेषानवधारणं इति ग. पुस्तके ।
२ एवं च तात्पर्य इति क. पु. ।
३ तं. वा. पृ. १३. पं. २०
४ यथाश्रुनेति नास्ति क. पुस्तके ।

(१)दध्ययमर्थो निश्चीयते–इति ।

न त्वेतद्युक्तमिव–शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वे शुकादिवाक्यात्(२) निस्तात्पर्यकाच्छाब्दबोधानापत्तेः । अतो लक्षणादिजन्यशाब्दबोधे नानार्थस्थले च तस्य कारणत्वं न सर्वत्र, व्यभिचारात् । न चैककार्यकारणभावकल्पनालाघवेन शाब्दबोधत्वावच्छिन्नं प्रति कारणत्वेऽवधृते शुकादिवाक्येऽपीश्वरतात्पर्यज्ञानं शब्दनिष्ठधर्मविशेषरूपतात्पर्यज्ञानं वा कारणत्वेन कल्प्यतामिति वाच्यम्; तात्पर्यज्ञानस्यानेकार्थबोधकपदजन्यशाब्दबोधत्वावच्छिन्नं प्रति कारणत्वकल्पनेना(३)स्मन्मतेऽपि लाघवस्याविशिष्टत्वात् । अस्तु वा सर्वत्रैव कारणत्वं, तथापि शुकादिवाक्यस्थले तात्पर्यग्राहकाभावेन बोधानुपपत्तिरनिवार्यैव ।

अथ तत्र शब्दस्वभावादेव तात्पर्यमनुमाय बोधः, तदा प्रकृतेऽपि दीयतां दृष्टिरिति कृतमध्ययनविधिना ।

किंच अध्ययनविधेरर्थज्ञानतात्पर्यकत्वे किमन्यद्ग्राहकमिति या गतिस्तस्य साऽन्येषामपि विधीनामिति न किंचिदेतत् । अत एवं परिहर्तव्यम्–सामर्थ्यापेक्षया प्रत्यक्षश्रुतेश्शीघ्रप्रवृत्तत्वेनावघातादिवदध्ययनविधिरनधिगतमेव प्रयोजनवदर्थज्ञानार्थत्वमध्ययनस्यावबोधयति, तत्फलं चार्थवादेषु प्राशस्त्यतात्पर्यकत्वबोधः ।

यद्यपीदं फलं विधिषु न सम्भवति, अध्ययनविध्यभावेऽपि विधिषु शब्दस्वभावादेवार्थतात्पर्यकत्वावधारणसम्भवात्, तथाऽप्यर्थवादेष्वेव सम्भवन्नासति बाधके त्यक्तुं युक्तम् । सर्वसाधारण्येन तत्फलं त्वध्ययनविधिसिद्धार्थज्ञानवत एव पुंसो लाभात् क्रतुविधीनां ज्ञानाक्षेपशक्तिकल्पनानुपपत्तेरुपायान्तर-

१ अध्ययमर्थोऽवगम्यत इति निश्चीयते इति क. पु. ।

२ असत्तात्पर्य इति क. पु.   ३ अस्मिन् मते इति क. पु.

निवृत्तिफलका(१)ध्ययननियमः । एतद्विध्यभावे हि क्रतुविधयोऽनुष्ठेयार्थज्ञानार्थं पक्षे पुस्तकपाठाद्युपायान्तरमप्याक्षिपेरन् । अतस्तद्व्यावृत्त्या नियमफलकत्वमध्ययनविधेरुपपन्नमेव । न च येनापि त्रैवर्णिकेन नित्यत्वावेदकप्रमाणाभावान्नार्थज्ञानं सम्पादितम्, तद्विषये कथं तद्व्यावृत्तिसिद्धिः; "अनधीयाना व्रात्या भवन्ति"(२)"स्थाणुरयं भारवाहः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्" इत्याद्यकरणनिन्दाश्रवणोन्नीतविधिबलेन नित्यत्वप्रतीतेः । अतस्साधारण्येन नियमफलकत्वेऽपि अर्थवादादिषु प्रयोजनवदर्थतात्पर्यकत्वेऽपि न काचित्क्षतिः । वार्तिकं तु सिद्ध्यदपि प्रमाणान्तरेण विधिषु प्रयोजनवदर्थपरत्वमध्ययनविधिबलेनाऽपि सिद्ध्यतीत्येतदर्थम् ।

यत्तु स्तोभाद्यंशे अदृष्टार्थत्वादितरांशे चार्थज्ञानार्थत्वे अपूर्वविधिनियमविधित्वकृतवैरूप्यापत्तिरित्युक्तम्, तन्न ; स्तोभानामपि सामभागपरिपूरकत्वेन दृष्टार्थत्वस्य (३)नवमे वक्ष्यमाणत्वान्न तदंशेऽपूर्वविधित्वम् । अतश्च दृष्टत्वेन भाव्यत्वानुगमादर्थज्ञानं सामभागपरिपूर्तिश्चेत्यनेकोद्देश्यताऽप्यनाशंक्या ।

यत्त्वकरणे प्रत्यवायभियैव प्रवृत्तिसिद्धेरध्ययनमेव भाव्यमस्तीत्युक्तम्, तत् तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वोक्तेरपास्तम् । अवशिष्यते तु स्वाध्यायद्वारा यथाश्रुतार्थज्ञानस्यैव भाव्यत्वम् ; तत्त्वेवं निराकर्तव्यम्—व्रात्यताबोधकवाक्येनाध्ययनस्य गृहीतपदपदार्थसङ्गतिकस्य 'स्थाणुरयं भारहारः' इति वचनाच्च यथाश्रुतार्थज्ञानस्याप्यावश्यकत्वबोधनादेव प्राप्त्युपपत्तेरेतद्वाक्यानर्थक्यप्रसङ्गात् अनेन वाक्येन प्रयोजनवदर्थज्ञानसाधनीभूतस्वा-

१ अध्ययनविधिनियम इति क. पु.
२. निरु. ३. पू. मी. ९. २. ५.

ध्यायोद्देशेनैवाध्ययनं विधीयत इति। तेन सिद्धाऽध्ययनविध्यनुरोधेनार्थवादेषु प्रयोजनवदर्थान्तरलक्षणा। तच्चार्थान्तरं स्तुतिनिन्दारूपमेवेति विधिनिषेधापेक्षितत्वान्निर्णीयते। कथम्?–सर्वत्र हि चेतनप्रवृत्तिः क्वचित्स्वेच्छया क्वचित्परप्रवर्तनाजनितयेच्छयेत्यविवादम्, तद्यत्र शब्दश्रवणोत्तरं प्रवृत्तिः, तत्र परस्य प्रवर्तनेन प्रवर्तकत्वं निश्चीयते। प्रवर्तना चेयं पुरुषप्रवृत्तिहेतुः प्रवर्तयितुर्धर्मः, प्रवर्तयितृधर्मत्वाभावे 'देवदत्तो मां प्रवर्तयति न यज्ञदत्त' इति व्यवस्थानुपपत्तेः।

अथास्य प्रवर्तनाज्ञापनमात्रेण प्रवर्तकत्वं, नाश्रयत्वेन, ततो 'देवदत्तस्त्वां प्रवर्तयती'तिवाक्यप्रयोक्तुः यज्ञदत्तस्य प्रवर्तकत्वापत्तिः। लोके चाहमेनं प्रवर्तयामीति प्रवर्तयितुरनुभवात्तद्धर्मत्वम्। अत्र चाचार्यत्वादेः प्रवर्तयितुर्धर्मत्वेऽपि प्रवृत्तिहेतुत्वाभावादाद्यं विशेषणम्। धर्मपदञ्च समवेतत्वपरम्, अतश्च लोकनिन्दादेः प्रवृत्तिहेतुत्वेऽपि प्रवर्तयितृपुरुषसमवेतत्वाभावादपरम्। पुरुषप्रवृत्तिश्च परसमवेता विवक्षिता। तेनाचार्यसमवेतफलस्य दुग्धपानादेर्गामानयेतिवाक्योच्चारणानुकूलाचार्यनिष्ठप्रवृत्तिहेतुत्वेऽपि शिष्यप्रवृत्तिहेतुत्वे प्रमाणाभावान्नातिप्रसङ्गः। स च धर्मो लोके प्रैषादिरूपः पुरुषाशयविशेषः, वेदे तु (१)तदभावाल्लिङादिनिष्ठ एव कश्चित्कल्प्यः। प्रैषादीनां हि प्रवृत्तिहेतुत्वमाचार्यप्रेषितोऽहं गामानयामीत्यनुभवासिद्धम्। हेतुत्वं चात्र न जनकत्वं प्रमाणाभावात्, अपि तु प्रयोजकत्वं, तच्च प्रवृत्तिकारणीभूतेष्टसाधनताज्ञानजनकज्ञानविषयत्वम्। प्रवर्तनारूपस्याशयादेर्ज्ञानेनेष्टसाधनत्वानुमानात्। अतो युक्तं प्रैषादीनां निरुक्तप्रवृत्तिहेतुत्वम्।

---

१. पुरुषाभावात् इति क. पु.

अतश्च प्रवर्तनाज्ञानकारणजिज्ञासायां शब्दश्रवणोत्तरभावित्वादावापोद्वापाभ्यां घटादिपदशक्तिवदेव वृद्धव्यवहारेण लिङादीनां प्रैषादिरूपप्रवर्तनायां शक्तिर्निश्चीयते। (१)"विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" "लोट् च" "लिङर्थे लेट्" इत्याद्यनुशासनबलादप्ययमर्थो निश्चीयते। तत्र विधिर्निकृष्टस्य प्रेरणम्; अयमेव च व्याकरणे प्रैषः। लोके तु प्राप्तविषये निकृष्टस्य प्रेरणमिति विवेकः। निमन्त्रणमावश्यके श्राद्धादौ दौहित्रादेः प्रवर्तनम्। आमन्त्रणं कामचारानुज्ञा; इदमेवातिसर्गपदेनाभिधीयते। अधीष्टं सत्कारपूर्वको व्यापारः। अत्र नानार्थकत्वपरिहाराय प्रवर्तनात्वमेवैकं शक्यतावच्छेदकं घटत्वादिवत्। वस्तुतस्तु लाघवादनुकूलव्यापारत्वमेव शक्यतावच्छेदकम्, प्रवृत्तिनिरूपितत्वं तु वाक्यार्थविधया लभ्यम्, आख्यातार्थकृतौ स्वर्गादिनिरूपितत्ववत्। प्रवर्तकनिष्ठत्वं च योग्यतालभ्यमिति द्रष्टव्यम्।

अथ वा विध्यादिषु चतुर्षु वैदिके च वक्ष्यमाणे अलौकिके धर्मे प्रवर्तनात्वमखण्डोपाधिः प्रवृत्तिप्रयोजकतावच्छेदककोटिप्रविष्टतया कल्प्यते, तदवच्छिन्नविषयकज्ञानप्रयोज्यतावच्छेदकं चाव्यवहितोत्तरत्वसंबन्धेन तादृशज्ञानविशिष्टप्रवृत्तित्वम्। नातस्तदनुत्तरप्रवृत्तौ व्यभिचारः। अखण्डोपाधिरेव च लिङादिपदशक्यतावच्छेदक इति तत्त्वम्। अतो विध्यादय एव चत्वारो व्यक्तिस्थानीया लोके लक्ष्याः, सम्प्रश्नप्रार्थनयोस्त्वतिरिक्तैव शक्तिः, आनुशासनिकी वा लक्षणा। एतेषां च पुरुषाशयविशेषाणां प्रैषादीनां वेदे ऽसंभवात् प्रवर्तनात्वेन च शक्तेर्लिङादिषु गृहीतत्वात्तदनुरोधेन प्रवर्तनाविशेषरूपो विधिप्रेरणानियोगापरनामधेयरूपोऽलौकिको धर्मस्स्थायी कल्प्यते। स च प्रैषादिवत्प्रवर्तकधर्मत्वावगतेर्वेदे च

१ पा. सू. ३. ३. १६१. पा. सू. ३. ३. १६२. पा सू. ३. ४. ७.

पुरुषाभावादन्यस्य च यागादेरसिद्धत्वेन प्रवृत्तिविषयत्वेन च प्रवर्तकत्वानुपपत्तेः पारिशेष्याल्लिङादेरेव प्रवर्तकत्वावधारणात्, लिङादेश्च वर्णरूपत्वेन स्थायित्वात्तन्निष्ठोऽवधार्यते। तस्य च प्रवृत्तिहेतुत्वादुक्तलक्षणाव्याहतिः।

अत्र षष्ठे शास्त्रदीपिकायां पार्थसारथिः—नातिरिक्तधर्मान्तरकल्पनम्, तथा सति तत्सद्भावस्तस्य च प्रवृत्तिहेतुत्वं लिङादिनिष्ठत्वं तल्लक्ष्यत्वमिति चतुष्टयकल्पनाद्गौरवापत्तेः। अतो लाघवादर्थभावनाभिधानानुकूलशक्तेरभिधाख्याया लिङादिनिष्ठत्वेन क्लृप्तायाः (१)केवलं प्रवृत्तिहेतुत्वं लिङादिलक्ष्यत्वं च कल्प्यम्। (२),अतः सैव प्रवर्तनात्वेन लिङाद्यभिहिता प्रवृत्तिहेतुर्विध्यादिपदाभिधेया चेति। तन्न; तर्हि ततोऽप्यतिलाघवेनेष्टसाधनत्वस्य प्रवृत्तिहेतुत्वेनापि क्लृप्तस्य लिङादिलक्ष्यत्वमात्रकल्पनया (३)प्रवर्तनाविशेषत्वोपपत्तेर्जितं मण्डनेन।

न चेष्टसाधनत्वस्य यागादिनिष्ठत्वेन लिङादिनिष्ठत्वाभावाद्यागादेश्चासिद्धत्वेन प्रवर्तकत्वायोगात् प्रवर्तनायाः प्रवर्तकनिष्ठत्वस्य स्थापितत्वान्नेष्टसाधनत्वस्य प्रवर्तनाविशेषत्वोपपत्तिरिति वाच्यम्; तर्हि फलेच्छाया उपायेच्छाया वा सिद्धत्वेन लिप्सा प्रवर्तयतीतिवदिच्छा मां प्रवर्तयतीत्यनुभवाच्च प्रवर्तकत्वोपपत्तेस्तन्निष्ठत्वेन क्लृप्तस्येच्छात्वस्य प्रवृत्तिहेतुत्वं इच्छात्वेन (४)कामपदाभिधेयत्वेऽपि प्रवर्तनात्वेन लिङादिवाच्यत्वं परिकल्प्य प्रवर्तनाविशेषत्वोपपत्त्या विनिगमनाविरहात्।

न चेच्छायाः प्रवर्तकत्वे इच्छात्वे प्रवृत्तिहेतुत्वाभावेऽपि हेतुतावच्छेदकत्वस्य क्लृप्तत्वाल्लाघवेन तस्यैव प्रवर्तनाविशे-

---

१ केवलं इति नास्ति क. पु. २ अतः इति नास्ति क. पु.
३ प्रवर्तनात्वोपपत्तेः क. पु. ४ कामपदाभिहितत्वेऽपि. इति.ग. पु.

षत्वोपपत्तौ न तदादाय शक्तेर्विनिगमनाविरहश्शंक्यः इति वाच्यम्, इच्छावत् कृतिसाध्यत्वज्ञानस्यापि सिद्धत्वेन प्रवर्तकत्वात्तन्निष्ठज्ञानत्वस्य प्रवर्तनात्वेन लिङादिपदवाच्यत्वकल्पनया प्रवर्तनाविशेषत्वोपपत्तौ तदादायेच्छात्वेऽपि विनिगमनाविरहस्यावारणात् ।

न चेच्छात्वादीनामतिप्रसक्तत्वेन प्रवर्तकमात्रनिष्ठत्वाभावान्न तेषां प्रवृत्तिहेतुत्वकल्पनाशंका; शक्तेरपि लिङादिष्वतिप्रसक्तत्वस्य तुल्यत्वात् । तस्मात् क्लृप्तेर्विनिगमनाविरहाद्धर्मान्तरकल्पनैवोचितेत्युत्पश्यामः ।

नचैवं धर्मान्तरस्यापि लिङादिनिष्ठत्वमिच्छादिनिष्ठत्वं वाऽऽदाय विनिगमनाविरहः । इच्छादेरस्थायित्वेन स्थायिधर्मान्तराश्रयत्वानुपपत्तेः । इदमेव धर्मान्तरं शाब्दीभावनेत्युच्यते ।

एवं 'न कलञ्जं भक्षयेत्' 'ब्राह्मणो न सुरां पिबे' दित्यादौ प्रवर्तनावन्निवर्तनापि लिङाद्यर्थः, साऽपि च पुरुषनिष्ठनिवृत्तिहेतुर्निवर्तयितुर्धर्मः 'अहमेनं निवर्तयामी'त्यनुभवसिद्धः । तद्विशेषाश्च प्रैषादयो लोके । धर्मान्तरञ्च निवारणानिषेधप्रतिषेधापरनामधेयं वेदे तथैव प्रसाध्यम् । तत्र त्वेतावान् विशेषः–न शुद्धो लिङादिः प्रवर्तनावन्निवर्तनामभिधत्ते । किन्तु नञ्समभिव्याहृत एव, तत्र नञो द्योतकत्वमात्रम् । लिङादेरेव तु निवर्तनायां शक्तिः, निपातोपसर्गाणां द्योतकत्वस्य व्युत्पत्तिसिद्धत्वात् । अथाऽपि तेषां वाचकत्वं स्यात्, तथाऽपि "तदन्यतद्विरुद्धतदभावेषु नञ्" इति स्मरणादभाववाचित्वेन क्लृप्तस्य नञो निवर्तनावाचित्वकल्पने मानाभावः । लिङादिसमभिव्याहाराभावे च घटो नास्तीत्यादौ निवर्तनाया अप्रतीतेः । तस्याप्रतीतद्योतकत्वकल्पने गौरवप्रसं-

गाच्च । "अमानोनाः प्रतिषेध" इति तु द्योतकत्वेनाप्युपपन्नम् । तदयमत्र वाक्यार्थः—कलञ्जभक्षणब्राह्मणकर्तृकसुराकर्मकपानादिभावनां प्रवृत्तिरूपामाख्यातवाच्यामुद्दिश्य लिङा तन्निवृत्तिफलका व्यापाररूपा निवर्तना विधीयते, नञस्तु प्रवृत्त्यभाववाचित्वेन प्रधानभूतभावनासम्बन्धेऽपि निवर्तनाद्योतकत्वमविरुद्धम् । शुद्धप्रवृत्तेश्चोद्देश्यत्वासम्भवात् हविरार्तिन्यायेन धात्वर्थतत्कारकयोरुद्देश्यान्तर्गत्या कृतिविशेषणत्वस्य व्युत्पत्तिसिद्धत्वात् तद्विवक्षायामपि कर्तृकर्मादिकारकनिष्ठलिङ्गसंख्यादिविशेषणानामविवक्षा उद्देश्यविशेषणत्वादुपपन्ना ।

न च लिङः प्रवर्तनावाचित्वेन नञश्चाभाववाचित्वेन क्लृप्तस्य निवर्तनावाचित्वकल्पने गौरवापत्तेः प्रवर्तनाभाव एव निषेधाधिकारे वाक्यार्थोऽस्त्विति वाच्यम्; लिङ्निष्ठप्रवर्तनाभावबोधेऽपि रागादिना प्रवृत्तौ प्रत्यवायानापत्तिप्रसङ्गात् ।

न च रागादिनिष्ठप्रवर्तनाभाव एव वाक्यार्थः, तस्या लोके वेदे वा लिङादिवाच्यत्वेनाक्लृप्तेः, तत्रापि शक्तिकल्पने गौरवतादवस्थ्यापत्तेः ।

एतेन नञोऽभाववाचकस्यापि लिङादिसमभिव्याहारे सति निवर्तनावाचित्वम्, 'अमानोनाः प्रतिषेधे' इति प्रसिद्धेः, न तु लिङः प्रवर्तनावाचित्वेन क्लृप्तस्य, गौरवात् । अतश्च रागाद्यर्थप्राप्तां पानादिप्रवर्तनां लिङादिनोद्दिश्य नञा निवर्तना विधीयते इत्यपास्तम् । रागादिनिष्ठप्रवर्तनावाचित्वस्य लोके वेदे वा अक्लृप्तत्वेनानुवादायोगात्, स्वनिष्ठप्रवर्तनायाश्चाप्राप्तत्वेन लिङादिनाऽननुवादात् । विधाने वाक्यभेदो विकल्पापत्तिश्च । अत एवायं पक्षो वार्तिककृता "ते (ये) षा" मित्यादिनाऽन्यमतत्वेनोक्तः । केषांचित्त्वत्र स्वमतत्वप्रमितिर्भ्रम एव ।

वस्तुतस्तु-लिङोऽपि न निवर्तनायां शक्तिः, किन्त्वनुकूलव्यापारत्वे ऽखण्डोपाधौ वा । तत्र यथा नञोऽभावे प्रवृत्तिनिरूपितत्वं संसर्गः, एवं नञ्सत्त्वे प्रवृत्त्यभावनिरूपितत्वमिति न किञ्चित्कल्प्यम् । अत्रापि निवृत्तिहेतुत्वं नाम प्रवृत्त्यभावप्रयोजकत्वमेव, न तु निवृत्तिः पदार्थान्तरं, हेतुत्वं वा जनकत्वम्, प्रमाणाभावात् । प्रजोकत्वं च प्रवृत्त्यभावकारणीभूतानिष्टसाधनत्वानुमितिजनकज्ञानविषयत्वं पूर्ववत् । अनिष्टसाधनत्वज्ञानस्याभावकारणता च योगक्षेमसाधारणी, तत्त्वं चाभावप्रतियोगिप्रवृत्तिसामग्रीविघटकत्वम् । अनिष्टसाधनत्वे हि बुद्धेऽनिष्टबोधात्तद्गतं बलवत्त्वं झटिति बुद्ध्यत इति बलवदनिष्टानुबन्धित्वज्ञानात्प्रवृत्तिकारणीभूतबलवदनिष्टाननुबन्धित्वज्ञानाभावप्रतिबन्धस्सुलभः । अतश्चात्रापि प्रवृत्तेस्तदभावस्यानुकूलत्वस्य चान्यत एव भानाल्लिङो नातिरिक्ता निषेधस्थले शक्तिः, किन्तु विधिसाधारण्येनाखण्डोपाधावेवेति सिद्धम् । तेन सिद्धा निषेधाधिकारेऽपि निवर्तनाविशेषरूपनिवारणापरनामधेया शाब्दी भावना । चेतनप्रवृत्तिनिवृत्त्योश्चेष्टानिष्टसाधनताज्ञानं विनाऽसम्भवात् विधिनिषेधाभ्यामिष्टानिष्टसाधनत्वं प्रवृत्तिनिवृत्तिविषयस्याक्षिप्यते । तयोश्च शाब्दीभावनयोर्भाव्यापेक्षायां आख्यातवाच्या प्रवृत्तिर्विधिरूपायाम्, नञ्वाच्या च तन्निवृत्तिः निषेधरूपायां भाव्यत्वेनान्वीयते । करणाकाङ्क्षायां च प्रेरणानिवारणयोः स्वरूपेण प्रवृत्तिनिवृत्तिजनकत्वायोगाल्लिङ्गादिजन्यं तयोर्ज्ञानमेव करणम् । केचित्तु लिङ्भावनयोः सम्बन्धरूपशक्तिस्मरणमेव करणम् । भावनाज्ञानं त्ववान्तरव्यापार इत्याहुः । इतिकर्तव्यताकाङ्क्षायां च स्तुतिनिन्दयोरन्वयः । तथा हि-विधिनिषेधाभ्यमिष्टानिष्टसाधनत्वाक्षेपात्प्रवृत्तिनिवृत्तिहेतुभूतेच्छानिच्छोत्पत्तावपि तात्का-

लिकेष्टानिष्टसाधनत्वस्यापि प्रत्यक्षेणावगतेः द्वेषोत्साहसम्भवेन प्रवृत्तिनिवृत्त्यभावप्रसङ्गात्तदपनायकापेक्षायां लोके तदपनयनशक्तत्वेनावगतस्य स्तुतिनिन्दाज्ञानस्यानुग्राहकत्वं परिकल्प्यते। ज्योतिष्टोमसुरापानादिरूपसाधनयोश्च द्वेषोत्साहौ हि निसर्गसिद्धौ। तन्निवर्तकत्वं च स्तुतिनिन्दयो रुचिद्वेषोत्पादनद्वारा बहुक्षीरादिवाक्येषु लोकसिद्धमेव। अतस्स्तुतिनिन्दाप्रतिपादकापेक्षाय प्रयोजनापेक्षिणामर्थवादानामेव तल्लक्षकत्वं कल्प्यते। न च फलपदेन वा प्रशस्तफलयुक्तत्वाद्विध्यादिपदेन वा निर्दोषविधिनिषेधविहितत्वादितिकर्तव्यतापदैर्वा विशिष्टेतिकर्तव्यताकत्वात्प्रशस्तोऽप्रशस्त इत्येवं तत्प्रतिपादनसम्भवः, तेषां श्रौतफलादिपरत्वेन लाक्षणिकस्तुतिनिन्दागमकत्वकल्पनानौचित्यात्। नच रात्रिसत्रन्यायेन फलादिपरत्वेऽप्याकांक्षितप्राशस्त्यादिकल्पनापरत्वसम्भवः। प्रयोजनाकांक्षिभिस्सन्निहितैरर्थवादैरेव तत्प्रतिपादनसम्भवेनानुपपत्त्यभावात्। यत्र तु सन्निधावर्थवादाभावस्तत्राप्यानुमानिकवचनातिदेशेन तत्प्राप्तिः।

ननु—नार्थवादानामतिदेशेन प्राप्तिः, सा हि प्रयाजाद्यतिदेशेन वा स्यात्? भिन्नेन वा? नाद्यः, अर्थभावनाया इतिकर्तव्यताकांक्षया कल्पितेनातिदेशेन प्राप्तानां प्रयाजादीनामर्थभावनासम्बन्धोत्तरकालमंशत्रयविशिष्टभावनावगमे सति विधिप्रवृत्तौ प्राशस्त्यापेक्षायां विरम्यव्यापारत्वेन क्लृप्तातिदेशस्य तत्प्रापकत्वानुपपत्तेः। नान्त्यः; विधेरेव प्रवर्त्तनावाचकस्यापि रात्रिसत्रन्यायेन प्राशस्त्यादिपरत्वोपपत्तौ स्वतन्त्रातिदेशकल्पने गौरवात् इति चेत्? प्रयाजादिप्राप्तेः पूर्वमप्युत्पत्तिवाक्य इष्टसामान्यवदितिकर्तव्यतासामान्येनाप्यंशत्रयवैशिष्ट्योपपत्त्या विधेर्भावनासम्बन्धोपपत्तौ तस्य प्राशस्त्यापेक्षायामवश्यकल्प्येनैके

नैवातिदेशेनोभयप्राप्त्युपपत्तौ विधेः प्राशस्त्यपरत्वकल्पनायां प्रमाणाभावात् ।

न च—शाब्दभावनायास्साद्दश्याभावः । निर्वपतिधातुमद्वाक्यसम्बन्धित्वरूपस्य शब्दसाद्दश्यस्यार्थभावनायामिव शब्दभावनायामपि तुल्यत्वात् ।

नचैवं विश्वजिति ज्योतिष्टोमिकार्थवादातिदेशे सति तत एव (१)रात्रिसत्रन्यायेनार्थवादिकफलकल्पनोपपत्तौ विश्वाजिन्न्यायभङ्गप्रसङ्गः । अप्राकृतकार्यकारित्वप्रसंगेनार्थवादानां फलकल्पकत्वानापत्तेः ।

न च-फलाकांक्षायां सत्यामप्राकृतकार्यकारित्वं न दोषः। यूपावटास्तरणबर्हिषोऽपि धर्माकांक्षायां बर्हिर्धर्माणां तत्कल्पनापत्तेः ।

अथ तत्र लौकिकोपायाक्षेपकल्पनात्तन्निवृत्तिः, तदा प्रकृतेऽपि स्वर्गकल्पनयेति तुल्यम् । अस्तु वा यदि ज्योतिष्टोमे फलविधिसरूपार्थवादश्रवणं तदा विश्वजित्यतिदेशप्राप्तार्थवादिकफलकल्पनम्। सर्वथा विश्वजिति स्वर्ग एव फलम्। तदधिकरणन्यायस्तु (२)पिण्डपितृयज्ञादिविषयो भविष्यतीति न किंचिदनुपपन्नम् । तन्त्ररत्नन्यायसुधयोस्तु प्राशस्त्यानतिदेशकथनेऽभिप्रायं न विद्मः ।

एवं नामातिदेशेऽपि नाम्नाऽग्निहोत्रधर्माणामन्येषामिव प्राशस्त्यस्यापि तद्धर्मस्य लक्षणया प्राप्तिर्द्रष्टव्या । (३)"एतद्ब्राह्मणा·

---

१. रात्रिसत्रन्यायश्चतुर्थाध्याये तृतीयपादेऽष्टमाधिकरणे द्रष्टव्यः।

२. "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इति पिण्डपितृयज्ञविधायके वाक्ये फलाश्रवणात् सान्निध्यार्थवादाभावाच्च रात्रिसत्रन्यायाप्रवृत्तेः अपूर्वत्वाच्च प्रकृतितोऽर्थवादातिदेशस्याप्यभावात् स्वर्गवाचकफलकल्पनेनैव तत्र फलाकाङ्क्षा शमनीयेति भावः॥

३. तै. ब्रा. १. ७. १.

नि पञ्च हवींषि" इत्यादौ वचनातिदेशे तु तत्प्राप्तिरविवादैव। यत्र तु प्रकृतावेव दर्वीहोमेषु चोपदेशातिदेशयोरभावस्तत्र विधेरेव प्राशस्त्यापेक्षत्वात्तस्यैव प्राशस्त्यकल्पकत्वमपि रात्रिसत्रन्याये-नोचितम्, न तु फलादिपदानाम्, तेषां तदनपेक्षत्वात्। यत्र तु सन्निधावर्थवादाः पठितास्तत्र विधेरुभयपरत्वकल्पने प्रमाणाभा-वादर्थवादा एव प्रयोजनापेक्षा लक्षणया प्राशस्त्यमप्राशस्त्यं वा विधिनिषेधापेक्षितं प्रतिपादयन्ति। तच्च प्राशस्त्यमप्राशस्त्यं वा रुच्यरुचियोग्यत्वरूपं निर्वाच्यम्। रुच्यरुचियोग्यत्वज्ञानस्यापि प्रवृत्तिनिवृत्तिप्रतिबन्धकरुच्यरुचियोग्यत्वज्ञानाविरोधित्वेन प्रवृ-त्तिनिवृत्त्युपयोगित्वात्। तत्त्वं च बलवदनिष्टाननुबन्धित्वानु-बन्धित्वयोग्यत्वम्। तज्ज्ञानस्य च प्रवृत्तिनिवृत्तिकारणत्वमविवाद-मेव। अत उक्तविधमेव प्राशस्त्यमप्राशस्त्यं वा सर्वत्रार्थवादैर्ल-क्ष्यते। योग्यतावच्छेदकीभूताः परं गुणदोषाः क्वचित् "वायुर्वै क्षेपिष्ठा" इत्यादौ शक्त्या प्रतिपाद्यन्ते, क्वचित्तु "यजमानः प्र-स्तरः" इत्यादौ गौण्यादिनेति विशेषः। रुच्यरुचियोग्यत्वरूप-प्राशस्त्याप्राशस्त्यलक्षणा तु सर्वत्राविशिष्टेति ध्येयम्॥

वाक्ये चेयं लक्षणा, नैकस्मिन्पदे, इतरपदानां वैयर्थ्या-पत्तेः। तेषां तात्पर्यग्राहकत्वकल्पने च विनिगमनाविरहः। ल-क्षणाप्रकारश्च गुणवादसूत्रे स्पष्टीकरिष्यते। तच्च प्राशस्त्यम-प्राशस्त्यं वा शाब्दभावनयैवान्वेति—'यागेन स्वर्गं भावयेत्प्रशस्त-त्वात्, 'न सुरां पिबेदप्रशस्तत्वा'दिति। अतश्च विध्यर्थवादयो-रेकवाक्यत्वसिद्धिः। तत्रापि पदैकवाक्यतैव, विध्यर्थवादानां स्वस्वार्थबोधे सामाप्त्यभावादित्युत्तराधिकरणे वक्ष्यते। अतश्चा-र्थवादसत्त्वेऽर्थवादप्ररोचितमेव कर्माभ्युदयकारीत्यध्ययनविधि-वशेन कल्पनान्नान्यत्प्ररोचनं कर्माङ्गमित्यपि नियमसिद्धिः। य-

त्रापि केवलार्थवादश्रवणं तत्रापि विधिकल्पनया प्रामाण्योपपत्ति(१)रौदुम्बराधिकरणे वक्ष्यते ।

तस्मात्सिद्धं साधनेतिकर्तव्यताविषयद्वेषोत्साहनिवर्तकस्तुतिनिन्दालक्षकत्वमर्थवादानां, न तु स्वार्थपरत्वमपि, प्रमाणाभावात्; युगपद्वृत्तिद्वयविरोधापत्तेश्च । एवं च यत्र सुखनरकादिरूपफले निसर्गत एव रुच्यरुची, तत्र प्रयोजनाभावात्,

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" ॥

इत्यादीनां न प्राशस्त्याप्राशस्त्यलक्षकत्वं, किन्तु विधिनिषेधापेक्षितस्वर्गनरकादिस्वरूपपरत्वमेव ।

एवं दूरस्थानामपि विनाशिदेहादिव्यतिरिक्तनित्यकर्तृभोक्तृरूपात्मप्रतिपादिकानामुपनिषदां परलोककर्मविध्यपेक्षितोक्तरूपात्मपरत्वमेव । उक्तविधात्मज्ञानस्य चानारभ्याधीतस्यापि सामर्थ्यात्(२)"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इति वाक्याद्वा क्रत्वङ्गत्वाविरोधः । असंसारिसगुणनिर्गुणात्मप्रतिपादिकानां तूभयविधोपासनाविध्यपेक्षितत्वेन स्वार्थपराणामेवाभ्युदयनिःश्रेयसहेतुत्वमिति वार्तिके व्याकरणाधिकरण उपपादयिष्यते । तेन सिद्धमर्थवादानां प्रामाण्यम् ।

सूत्रं तु-विधीनां विधेयानां, स्तुत्यर्थेन स्तावकत्वेन, विधिनैकवाक्यत्वसम्भवादर्थवादाः प्रमाणं स्युरिति व्याख्येयम् ॥ ७ ॥

तुल्यं च सांप्रदायिकम् ॥ १–२–८ ॥

किञ्चाध्ययनधर्माणां स्वाध्यायानध्यायपरिपालनादीनां

---

१. अनन्तराधिकरणे ।   २. छन्दोग्य. १. १. १०.

यथा प्रमाणभूतविध्यध्ययने क्रियमाणेऽनुष्ठानं वैदिकानाम्, तथार्थवादाध्ययनेऽपि। तेषां हि न स्वातन्त्र्येण पुरुषार्थत्वम्, फलाश्रवणात्।

(१)"तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः।
वेदः कृत्स्नोऽधिगन्तव्यस्सरहस्यो द्विजन्मना" ॥

इति स्मरणेन धर्माणामध्ययनाङ्गत्वावगमाच्च। न चाध्ययने तत्कार्ये वार्थज्ञाने धर्माणामनुपयोगेनानर्थक्यात्तत्पूर्वकज्योतिष्टोमादिकर्माङ्गत्वं वक्तुं शक्यम्, वाक्यप्रकरणाभ्यामध्ययनाङ्गत्वेनावधारितानां धर्माणां क्रत्वङ्गत्वे प्रमाणाभावात्। उपयोगस्त्वध्ययन एव विघ्ननिवृत्त्यर्थत्वेनोपपन्न इति द्वादशे वक्ष्यते। तेनाप्रामाण्येऽर्थवादानां तदध्ययनमध्ययनाङ्गधर्मानुष्ठानं च साम्प्रदायिकपदाभिधेयं विधिवदनुष्ठीयमानमनुपपन्नं स्यात्, अतस्तद्वदेव प्रमाणम्।

अथवा—पूर्वपक्षिणाऽप्रामाण्येऽप्यर्थवादानामध्ययनस्यादृष्टार्थत्वाङ्गीकारात्, धर्माणामपि प्रयाजादिवद्वा विघ्नसमाप्त्यर्थत्वेन वाऽध्ययनाङ्गत्वोपपत्त्या पूर्वव्याख्याया अयोगेऽपि अर्थवादानामर्थपरत्वाभावेऽदृष्टार्थस्याध्ययनस्य (२)सर्वौषधावघातवत्सकृत्प्रयोगापत्तेः आवृत्तेरविस्मरणप्रयोजनाभावेन च धारणाध्ययनस्य साम्प्रदायिकपदाभिधेयस्यानुपपत्तिः। प्रयोजनवदर्थपरत्वे हि व्रीह्यवघातवदावृत्तिर्धारणाध्ययनं च विधावेवोपपद्येत। तस्मात्तद्वदेवार्थपरत्वम्। सूत्रं व्याख्यातम् ॥८॥

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधस्स्यात् शब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्यते ॥१-२-९॥

१. मनु २-१६५. २. सर्वौषधावघातश्चयने विहितः।

अनेन सूत्रेण पूर्वपक्ष्युक्तानां शास्त्रविरोधादीनां सामान्यतः परिहारोऽभिधीयते । या शास्त्रविरोधादिकाऽनुपपत्तिस्साऽस्मत्पक्षमप्राप्ता, प्रयोगे अनुष्ठाने हि, स्तेयादीनामुच्यमाने, विरोधस्स्यात, अस्माकं मते पुनः शब्दस्य श्रौतोऽर्थः, अप्रयोजनभूतः, उत्तरसूत्रोक्तरीत्याऽविवक्षित इति यावत् । अथवा-शब्दस्य विधेः, अनुग्रहार्थस्सन्नयमर्थवादः, अप्रयोगभूतः प्रयोगमप्राप्तः, न प्रयोगं विधत्त इति यावत् । तस्मात्प्रामाण्यमुपपद्येत । विधिकल्पकत्वे श्रौतार्थपरत्वे वा भवदुक्तदोषास्स्युः, न तु स्तुत्यर्थत्व इति भावः । 'अप्राप्ताश्चानुपपत्ति' मिति पाठे याऽनुपपत्तिस्तामप्राप्तां मन्यामह इत्यध्याहारः । 'अप्राप्तं चानुपपत्ति' मिति पाठे त्वसमद्व्याख्यानमनुपपत्तिमप्राप्तमिति व्याख्येयम् ॥ ९ ॥

गुणवादस्तु ॥ १–५–१० ॥

ननु-(१)"स एवैनं भूतिं गमयति," इत्यादिभिः पदैः स्तुतिप्रतीतावपि "वायुर्वै क्षेपिष्ठा" इत्यादिभ्यस्तदप्रतीतेः कथं तेषां स्तावकतासम्भवः ?

उच्यते-गुणागुणरूपस्तुतिनिन्दावादस्तु सर्वत्र यथासम्भवं कल्प्यः, कारणानुरूपत्वात्कार्यस्य, क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति सर्वेषामपि पदानां स्तुत्युपपादकत्वेनाविरोधात् ।

एवं-(२)"सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं, यदश्रु व्यशीर्यत तद्रजतमभवत्, पुरास्य संवत्सरात् गृहे रोदनं भवति, तस्माद्बर्हिषि रजतं न देयम्" इत्यत्रापि बर्हिश्शब्दलक्षिते यज्ञे "यथा-

---

१. तै. सं. २. १. १.   २. तै. सं. १. ५. १.

श्रद्धं दक्षिणां ददाति" इत्यादिसामान्यविहितदक्षिणाके स्वे-च्छाप्राप्तरजतदाननिषेधस्यायमर्थवादः । तत्र स इति तच्छब्देन "तदग्निर्न्यकामयत" इति पूर्वोपक्रान्तोऽग्निः परामृश्यते । 'तद्र-जतमित्यत्र तच्छब्देनाश्रु, अत्र "पुरास्य संवत्सरा" दिति रजतदाननिन्दा । तदुपपात्तिश्च 'सोऽरोदी'दित्यादिः । कार-णानुरूपत्वात्कार्यस्य रोदनप्रभवरजतदानाद्रोदनं भवतीति रज-तदाननिन्दा । अतो रजतदाननिषेधे दोषाभावरूपगुणवादोप-पत्तिः । न च-रुद्ररोदनरजताश्रुप्रभवत्वसंवत्सररोदनादीनां प्रमाणाभावात्प्रत्यक्षविरोधाच्च निरालम्बननिन्दानुपपात्तिः । गौण्या वृत्त्या सर्वत्रालम्बनोपपत्तेः । तथाहि-रुद्रशब्दस्तावद्व्या-करणे रोदनकर्तृवाचित्वेन व्याख्यातः । स च "रुद्रमग्निं प्रजाः प्राहुः" इत्यरुदत्यप्यग्नौ रूढ्या प्रयुक्तः, तत्र च तत्सि-द्धिसूत्रोक्तन्यायेन रुद्रशब्दाभिधेयत्वसादृश्याद्रोदनकर्तृत्वमुपच-र्यते, अश्रुणश्च चक्षुर्ग्राह्यवर्णसारूप्यादन्यत्र च कार्ये समवायि-कारणसादृश्यदर्शनाद्रजते तत्प्रभवत्वोपचारः । धनत्यागेन चात्यन्तोदारस्यापि गृहे दुःखदर्शनात्तत्सामान्येन रोदनोप-न्यासः ।

अत एवासत्यार्थप्रतिपादनादप्रामाण्यं नाशङ्क्यम्, अस-त्यार्थे तात्पर्याभावात्; तात्पर्यविषयीभूतायाश्च निन्दाया-स्सत्यत्वात् । असत्यार्थोपादानं तु लक्षणोपायत्वेन साधुत्वोपा-यत्वेनैवाऽसत्यत्रिवबाद्यन्वाख्यानं न विरुद्ध्यते । न ह्युपाख्यानं स्वरूपसत्प्राशस्त्याप्राशस्त्यज्ञान उपयुज्यते, अपि तु तज्ज्ञानम् । अतश्च रज्ज्वां सर्पज्ञानस्येव भयकारणत्वमसत्योपाख्यानज्ञा-नस्य प्राशस्त्याप्राशस्त्यज्ञानकारणत्वं, तस्य च प्रवृत्तिनिवृत्ति-हेतुत्वं न विहन्यते । यत्र हि न ज्ञानमात्रेणोपयोगः, यथा अर्थ-

भावनांशेषु, तत्रापि ज्ञानमात्रोपयोगे वेदस्य निष्फलत्वेनाप्रामाण्यापत्तेस्तत्रार्थ एव तात्पर्यात्सत्यत्वाश्रयणम् । शब्दभावनांशेषु तु ज्ञानमात्रोपयोगा(१)न्न सर्वांशोपायसत्यत्वादरः ।

अत एव लोकेऽर्थासत्यत्व एव स्तुतिबुद्धिः, अर्थसत्यत्वे तु वक्तारो भवन्ति-कात्र स्तुतिर्निन्दा वा सत्यमेवैतदिति । सत्यपि चार्थासत्यत्वज्ञाने प्राशस्त्याप्राशस्त्यज्ञानस्य वेदकृतत्वात्प्रवृत्तिनिवृत्तिजनकत्वोपपत्तिः । अत एव लोके मेधादिहेतुभूते वचादिभक्षणे मेधाद्यनिच्छन्तं पुरुषं प्रवर्तयितुं तदभिप्रेतं सौभाग्यमसत्यमप्युपन्यस्य तं नियुङ्क्ते । सोऽपि च सौभाग्यासत्यतां जानन्नपि सर्वथा मामयं पुरुषार्थे प्रवर्तयतीति ज्ञात्वा प्रवर्तत एवेति सर्वस्वसंवेद्यम् । तस्मादेवमादौ शक्यार्थासत्यत्वेऽपि गौण्या वृत्त्या कथञ्चिदर्थसत्यत्वमापाद्य लक्षणया निन्दोपपत्तेः प्रामाण्यं सिद्धम् । एवं स्तुत्यर्थवादेष्वप्यर्थसत्यत्वानादरो द्रष्टव्यः । एवं यत्रापि अन्यद्विधौ, अन्यच्चार्थवादे संकीर्त्यते, यथा(२) "वेतसशाखयाऽवकाभिश्चाग्निं विकर्षति" इति, "आपो वै शान्ताश्शान्ताभिरेवास्य शुचं शमयति" इति च, तत्राप्यपां स्तुत्याऽब्जन्यानां वेतसावकानां स्तुतिर्लक्षितलक्षणया न विरुद्ध्यते ।

सूत्रं तु-तत्सिद्धिसूत्रोक्तरीत्या गौणवृत्तिप्रकाररूपो गुणवादः स्तुतिहेतुर्ज्ञेय इति व्याख्येयम् ॥ १० ॥

रूपात्प्रायात् ॥ १–२–११ ॥

अतः परं पूर्वपक्ष्युक्तस्तेनाद्युदाहरणेषु तत्सिद्धिसूत्रोक्तगौणवृत्तिप्रकारनिरूपणार्थानि सूत्राणि ।

तत्र -"हिरण्यं हस्ते भवति, अथ गृह्णाति" इत्यस्य विधे-

---

१. सर्वत्रांशोपायेति० ख. ग. पु. २. तै. सं. ५. ४. ४. ५ मी० कौ०

श्शेषः "स्तेनं मनोऽनृतवादिनी वाक्" इति । अत्र वाङ्मन-सयोर्निन्दा हिरण्यस्तुत्यर्था । अत्यन्तप्रशस्तयोरपि हि वाङ्-मनसयोः स्तेनानृतवादयोगाद्धिरण्यादूनत्वम् । अतो 'न हि निन्दा निन्दितुं प्रवर्ततेऽपि तु विधेयं स्तोतुं', इति न्यायेन हिरण्यस्तुतिः, न तु निन्दया स्वतन्त्रनिषेधोन्नयनम् । निषेधैकवाक्यताविरहे नि-न्दात्वस्यैवासिद्धेः; क्लृप्तविध्येकवाक्यत्वसम्भवे वाक्यभेदापाद-कनिषेधोन्नयनस्यान्याय्यत्वाच्च । मनसश्च स्तेनस्येव प्रच्छन्नरूप-त्वात्तत्कार्यकारित्वं गौणतानिमित्तम् । । वाचश्च प्रायशोऽनृत-वादिनीत्वाद्भूमा ॥ ११ ॥

दूरभूयस्त्वात् ॥ १–२–१२ ॥

"धूम एव" इत्यादिः,(१) "तस्माद्दिवाग्निरादित्यं गतो रात्रा-वादित्यस्तं" इत्यादिश्चोपपाद्योपपादकरूपेण सर्वोऽर्थवादः(२) "अग्निर्ज्योतिर्ज्योतिस्सूर्यस्स्वाहा" इत्यादि(३)मिश्रलिङ्गकमन्त्र-विधेश्शेषः । उभयोर्देवतयोरेकत्र सन्निधानेन चोभयदैवत्यहोम-स्तुतेरुपपत्तिः ।

वस्तुतस्तु केवललिङ्गकमिश्रलिङ्गकमन्त्रविध्योर्मध्येऽयं पठि-तोऽपि मिश्रलिङ्गविधेः(४) "उभाभ्यां सायं हूयते, उभाभ्यां प्रातः, न देवताभ्यस्समदं दधाति" इत्यर्थवादान्तराम्नानात्, 'अग्नि-र्ज्योतिर्ज्योतिरग्निस्स्वाहेति सायं जुहोति" इत्यादेः केवलमन्त्र-विधेरेवायं शेषः—यस्माद्दिवाग्नेरदर्शनादादित्यान्तर्गतिस्सूर्य-स्यैव चातो ज्योतिष्ट्वं, एवं रात्रावप्यग्नेः । अतः केवलदैवत्यावेव युक्ताविति । दूरस्थस्य च भूयस्त्वेन यद्दर्शनं तद्दूराशिना लक्षयि-

१. तै. ब्रा. २. १. २–९. २. तै. ब्रा. २. १. २. १०.

३. अग्निसूर्ययोरुभयोः प्रतिपादनान्मिश्रत्वम् ॥ ४. तै. ब्रा. २. १. २. १०.

त्वा तद्विषयत्वाभावोऽग्न्यादौ नञा बोध्यत आदित्यं स्तोतुमिति पूर्ववत् भूमैवात्र गौणवृत्तिनिमित्तम् ।

वस्तुतस्तु—'न ददृश' इति वाक्यस्य मुख्यो दर्शनाविषय आकाशादिरित्यर्थः । तद्गतस्य दूरस्थवृत्तिभूयस्त्वप्रकारकदर्शनाविषयत्वरूपस्य गुणस्यैकसम्बन्धिदर्शनेनापरसम्बन्धिस्मरणमिति न्यायेनोपस्थितस्याग्न्यादौ योगादेव गौणत्वोपपत्तेर्न गुणांशेऽपि लक्षणेति तत्त्वम् । एवमेव गौण्युपपत्तिस्सर्वत्रोपपादनीया ॥ १२ ॥

स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनम् (नात्) ॥१-१-१३॥

"न चैतद्विद्म" इत्ययं प्रवरानुमन्त्रणमन्त्रविधेश्शेषः । अब्राह्मणस्यापि प्रवरानुमन्त्रणेन ब्राह्मण्यं भवतीत्येतत्स्तुत्यर्थमुपपादयितुं स्वस्यैव ब्राह्मणत्वाज्ञानोपन्यासः । पूर्ववच्चात्रापि ज्ञानगतं प्राशस्त्यं 'विदि' धातुना लक्षयित्वा तद्विषयत्वं नञा ब्राह्मणत्वे प्रतिषिध्यते । लक्षणां विना चोपपत्तिः पूर्ववत् । सम्भवति हि ब्राह्मणत्वस्य दुर्ज्ञानत्वं, मातुर्व्यभिचाररूपापराधसम्भवात् । नचापराधेऽपि(१) "बीजाद्योनिर्बलीयसी" इति प्रसिद्धेर्मातृजात्यैव जातिनिश्चयः, "माता भस्त्रा पितुः पुत्रो (यस्माज्जा) येन जातस्स एव सः" इति बीजावापकर्तुः पुत्रस्सम्भवतीति स्मरणात् तस्य च नानाजातित्वोपपत्तेर्निश्चयायोगात् । अत एव क्षेत्रिजात्यापि न व्यभिचारोत्पन्ने जातिनिश्चयः । अतश्च ब्राह्मणत्वस्य दुर्ज्ञानत्वादज्ञानवचनं गौणं, प्रशंसा च गौणी निमित्तम् ॥ १३ ॥

आकालिकेप्सा ॥ १-२-१४ ॥

"को हि तद्वेद" इत्ययं प्राग्वंशे(२) "दिक्ष्वतीकाशान् करोति"

१. मनुस्मृ. ९. ५२. २. तै. सं. ६. १. १.

इत्यस्य विधेश्शेषः। सर्वस्य हि सद्यः फलं यथाभिमतं न तथा कालान्तरभावि। अतश्चातीकाशकरणं सद्यो धूमनिर्गमफलकत्वेन प्रशंसितुं कालान्तरभाविस्वर्गनिन्दा। अत्र ऐहिकवदभिमततरत्वरूपमाशस्त्यमेवामुष्मिकफलपरामर्शिना तच्छब्देन तद्गतं लक्षयित्वा तस्यानवक्लृप्तिः "को हि तद्वेद" इत्यनेनोच्यत इति प्रशंसैव गौणीवृत्तिनिमित्तम्। (लक्षणाभावो वा पूर्ववत्)

सूत्रं तु-यत्तदानीमेवोत्पद्यते तदाकालिकं, तस्यैव चेष्टा सर्वस्याभिमता, अतस्तामभिप्रेत्यायं गुणवाद इति। अकालिकमिति पाठेऽपि, काले विप्रकर्षे, भवं कालिकं, न कालिकमकालिकमिति व्युत्पत्त्या च स एवार्थः॥ १४॥

विद्याप्रशंसा॥ १-२-१५॥

"शोभतेऽस्य मुखं" इत्यादिश्च गर्गत्रिरात्रविधेश्शेषस्तत्स्तुत्यर्थः, यज्ज्ञानस्याप्येवं फलं, किमुत तस्य गर्गत्रिरात्रस्येति। शोभत एव हि शिष्यैरुद्वीक्ष्यमाणं ज्ञातुर्गुरोर्मुखम्। अतस्तदनुवादोऽयं प्रशंसार्थः, न तु ज्ञानफलं; तस्य सामर्थ्यात् क्रत्वर्थकर्तृसंस्कारकत्वेन फलानपेक्षत्वस्य त्वयैवोक्तत्वात्। यद्यपि चेयं न शोभापदाभिधेया, लावण्यादेरेव तत्पदवाच्यत्वेन लोकप्रसिद्धत्वात्, तथापि प्रीतिजनकत्वेन तत्कार्यकारित्वाद्गौण्या तदभिधानम्।

सूत्रं-या विद्या फलहेतुत्वेनोक्ता सा प्रशंसेति व्याख्येयम्॥ १५॥

सर्वत्वमाधिकारिकम्॥ १-२-१६॥

"पूर्णाहुत्या सर्वान्" इत्यादयोऽर्थवादाः पूर्णाहुत्यादिवि-

धीनां शेषाः, न तु स्वतन्त्रफलविधयः, पूर्णाहुत्यादीनां त्वदुक्तरीत्यैव फलानपेक्षत्वात् । सर्वकामावाप्तिवचनं च सर्वकामजनककर्माधिकारसम्पादनाद्गौणम् । पूर्णाहुत्यादौ कृत एव हि तत्तदुत्तरकर्माधिकारः। यद्यपि चेहैव सर्वशब्दानुरोधात्सुरकन्यागमनादिजनककर्माधिकारः कथमप्यसम्भवी, तथापि सर्वमोदनं भुञ्जत इतिवत्सर्वत्वमाधिकारिकं सम्भवमात्रापेक्षमित्यर्थः ॥ १६ ॥

फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषस्स्यात् ॥ १-२-१७ ॥

यद्यपि च पूर्णाहुत्यादेस्सर्वफलसाधनत्वं स्यात्, तथापि नान्यानर्थक्यम्, कर्मतारतम्येन फलतारतम्योपपत्तेः। अवश्यं चान्यत्राप्यग्निहोत्रदर्शपूर्णमासादिष्वेकफलकेषु कर्मस्वल्पेनैव महतःफलस्याप्तौ महति कर्मणि समानपरिमाणत्वेऽपि निस्सारशमीमयत्वादिनैव तदाप्तौ समारह्हिरण्मयस्रुक्करणे प्रवृत्त्यनुपपत्तेर्विधिवैयर्थ्यप्रसङ्गात्फलतारतम्यं कल्प्यम् । दृष्टं च लोकेऽपि वृष्ट्यादितारतम्येन फलतारतम्यम् । "ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः" इति स्मरणं, "यदग्निहोत्रं जुहोत्यथ गृहमेधिनमाप्नोत्येकया रात्र्या, अथ दशसंवत्सरानग्निहोत्रं जुहोत्यथ दर्शपूर्णमासयाजिन आप्नोति", इत्याद्यर्थवादाश्चामुमेवार्थं गमयन्ति ॥ १७ ॥

अन्त्ययोर्यथोक्तम् ॥ १-२-१८ ॥

शुद्धपृथिवीचयननिषेधो "हिरण्यं निधाय चेतव्य" मित्यस्य विधेर्नहिनिन्दान्यायेन स्तुत्यर्थो नित्यानुवादो वाङ्मनसयोरिव। तदुपपादकत्वेन चेतरावपि प्रतिषेधौ नित्यानुवादौ । यथा

चान्तरिक्षे दिवि वा चयनं न प्रसिद्धं, तथा हिरण्यरहितायां पृथिव्यामपीति हिरण्यस्तुतिः । अनित्यसंयोगस्तु अर्थवादप्रामाण्ये स्थापिते "परन्तु श्रुतिसामान्यमात्रं" इत्यनेन न्यायेन बबरशब्दस्य शब्दानुकारित्वं प्रावाहणिशब्दस्य च प्रकर्षेण वहतीति व्युत्पत्तिमङ्गीकृत्य नित्यवायुपरत्वाङ्गीकारात्तस्य च बबरशब्दलक्षितध्वनिमात्रप्रवदनकामयितृत्वेन स्तुत्युपपत्तेः परिहृतः ॥

प्रयोजनं तु—

(१)रात्रिसत्रे प्रतिष्ठा स्या(२)दञ्जने घृतसंस्थितिः ।
(३)तथा श्येनादिशब्दानां नामता भेदकारणम् ॥
(४)वारुणेष्ट्यां तथा दानं (५)वमनं वैदिकं तथा ।

---

(१) 'प्रतितिष्ठन्ति ह वै एता रात्रीरुपयन्ति' इत्यर्थवादबलादेव रात्रिसत्राख्ये कर्मणि प्रतिष्ठाख्यं फलमिति निर्णीतं चतुर्थतृतीये। (४-३-६)

(२) 'अक्ताश्शर्करा उपदधाति' इत्यत्र शर्कराणामञ्जनं केन द्रव्येणेत्यपेक्षायां स्वसन्निधिपठिते 'तेजो वै घृतं' इत्यर्थवादे घृतस्यैव स्तवनाद्विधिस्तुत्योरेकवाक्यत्वसिध्यर्थं पूर्ववाक्ये घृतस्यैव विधेयत्वमङ्गीकृत्य तेनैवाञ्जनमिति निर्णीतं प्रथमचतुर्थे । (१-४-१९)

(३) 'श्येनेनाभिचरन्यजेते'त्यादौ श्येनपदस्य विधेयगुणसमर्पकत्वं उत कर्मनामधेयत्वमिति सन्देहे 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इत्यर्थवादे श्येनसादृश्योक्तिबलादेव विधिगतस्य श्येनपदस्य कर्मनामधेयत्वमुररीकृतं प्रथमचतुर्थे । (१-४-५)

(४) 'यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणान् चतुष्कपालान्निर्वपे' दित्यत्राश्वप्रतिग्रहीतुरेवाश्वसमसङ्ख्याकेष्टिप्रतीतावपि उपक्रमस्थार्थवादे 'प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छत्' इत्यादिनाऽश्वदातुरेव वरुणग्रहरूपजलोदरप्राप्तेः इष्टिकरणेन च तन्निवृत्त्यभिधानात्तदनुसारेण दातुरेवेयमिष्टिः, न प्रतिग्रहीतुः, इति निर्णीतं तृतीयचतुर्थे । (३-४-१४)

(५) 'वि वा एष इन्द्रियेण वीर्येणर्ध्यते यस्सोमं वमिति यस्सो-

(१)सोमयागपरत्वं च ज्योतिष्टोमपदस्य यत् ॥
(२)निवेशनं च धाय्यानामिध्यमानऋगुत्तरम् ।
(३)सोमविद्याप्रजानां च नित्यत्वं षष्ठसंस्थितम् ॥

मवामी स्यात्तस्मा एतं सोमेन्द्रं श्यामाकञ्चरुं निर्वपेत्' इति वाक्यविहिता श्यामाकेष्टिः यागाङ्गद्रव्यसंस्कारकत्वेन विहितभक्षणविशिष्टसोमस्य वमने कर्तव्या ? उत लौकिकस्य वमनविरेकार्थमेव पीतस्य सोमस्य वमन इति संशये उपक्रमस्थार्थवादे सोमवमनकर्तुरिन्द्रियवीर्यव्यृद्धिरूपदोषश्रवणात्तस्य च लोकेऽभावेन वैदिकसोमवमन एव कस्यचनादृष्टस्य दोषस्योत्पत्त्यङ्गीकारावश्यंभावेन तन्निर्घातार्थवैदिकसोमवमन एवेयमिष्टिः, न तु लौकिके इति सिद्धान्तितं तत्रैव ।

(१) 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यत्र ज्योतिष्टोमपदस्य 'त्रिवृत्पञ्चदशस्सप्तदश एकविंशः, एतानि वाव तानि ज्योतींषि, य एतस्य स्तोमाः' इत्यर्थवादबलात् त्रिवृदादिस्तोमचतुष्टयवत्सोमयाग एव वाच्योऽर्थः इति निर्णीतं चतुर्थचतुर्थे । (४-४-१२)

२. प्रकृतौ दर्शपूर्णमासयोस्सामिधेनीनां पञ्चदशत्वमुक्तम् । विकृतौ च तदधिका सप्तदशैकविंशत्यादिका सङ्ख्योक्ता। तत्र संख्यासम्पत्त्यर्थं तावत्य ऋचः दाशतयीभ्यस्समानेयाः । आनीयमानानामृचामादावन्ते मध्ये वा यत्र कुत्रचिदनियमेन वा समावेशः इति संशये 'इयं वै समिध्यमानवती असौ समिद्धवती, यदन्तरा तद्धाय्या' इत्यर्थवादे समिध्यमानवतीसमिद्धवत्योरन्तराल एव धाय्याशब्दशब्दितानां निवेशकथनात्तदनुसारेण तत्रैव निवेशो धाय्याशब्दवाच्यानाम् । इतरासां त्वन्ते इति निर्णीतं पञ्चमद्वितीये। इध्यमानऋक् 'समिध्यमानोऽध्वरे' इति इध्यमानपदघटिता प्राकृतसामिधेनीषु ऋक्षु नवमीऋक् । इयमेव च समिध्यमानवती । 'समिद्धो अग्न आहुत देवान् यक्षि स्वध्वर' इति समिद्धपदघटिता सामिद्धवती दशमी ॥ (५-३-३)

यत्त्वत्र न्यायमालायामस्मिन्नधिकरणे 'समिध्यमानो अध्वरे' इत्यसावृगष्टमी । 'समिद्धो अग्न आहुत' इत्यसौ नवमी इति पाठ उपलभ्यते स लेखकप्रमादकृत इत्यभ्युपगन्तव्यम् ।

३. 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः'इत्यर्थवादे ऋणत्रयसङ्कीर्तनादेव तदपा-

(१)द्वयोः प्रणयनं मध्यपर्वणोरुपसमोदितम् ।
(२)अर्थवादगतैर्लिङ्गैः प्रकृतित्वं तथाष्टमे ॥
(३)स्थानापत्तिरिरादीनां (४)चरुरोदनवाच्यपि ।
(५)उत्तराणां त्रयाधिक्य(६)मृत्विक्च ब्राह्मणो भवेत् ॥

करणरूपाणां सोमयागस्य विद्यायाः प्रजोत्पादनस्य च नित्यत्वमुक्तं षष्ठद्वितीये । (६-२-११)

१. चातुर्मास्येषु 'द्वयोः प्रणयन्तीति' श्रुतम् । तच्चाग्निप्रणयनं कयोर्द्वयोः पर्वणोरिति संशये 'ऊरू वा एतौ यज्ञस्य यद्वरुणप्रघासाः साकमेधाश्च' इत्यनन्तरोदितार्थवादे वरुणप्रघाससाकमेधाख्यमध्यमपर्वणोः स्तवनाद्विधिस्तुत्योरेकवाक्यतासम्पत्त्यर्थं तयोरेव मध्यमयोः प्रणयनमिति निर्णीतं सप्तमतृतीये । (७-३-८)

२. इष्टिपशुसोमादीनां प्रकृतिविकृतिभावस्तत्र तत्र श्रुतार्थवादबलादेव निर्णीतोऽष्टमे ।

३. "यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे । प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्," इति मन्त्रे "इरं कृत्वोद्गेय" मितीरापदविधानं कुत्रेति संशये "न गिरागिरेति ब्रूयात्" इति निषेधानुवादबलाद्गिरापदकार्य एवेरापदविधानमिति निर्णयः कृतो नवमप्रथमान्त्ये । (९-१-१७)

४. "आदित्यः प्रायणीयः पयसि चरुः" इत्यत्र चरुशब्दस्स्थालीवाची ? उतौदनवाची ? इति संशये 'अदितिमोदनेने'ति वाक्यशेषविवरणात् चरुशब्द ओदनवाचीति राद्धान्तितं दशमे ।(१०-१-१०)

५. "वाग्यतास्तिस्रो दोहयित्वा विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयेत्" इति विहितमुत्तरासां गवां दोहनम् । ताश्च गावः कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवस्यन्ति ? उताधिकसंख्याका दोग्धव्या ? इति संशये–"नास्यैतां रात्रिं कुमाराश्च न पयो लभन्ते, नाग्निहोत्रं जुहोति"त्यर्थवादे साकल्यप्रतीतेर्न त्रित्वनियमः, किन्तु यावत्स्वं दोहनमिति निरधार्येकादशप्रथमे । (११-१-७)

६. सर्वं वैदिकं कर्म त्रैवर्णिकाधिकारिकमित्युक्तम् । तत्रार्त्विज्येऽपि त्रैवर्णिकानामधिकारः ? उत ब्राह्मणानामेवेति संशये "एते

अर्थवादप्रमाणत्वे सर्वं तदुपपद्यते ॥

सर्वसाधारणं तु—पूर्वपक्षे प्रकारान्तरेणापि प्ररोचितमनुष्ठितमभ्युदयकारि, सिद्धान्ते त्वर्थवादप्ररोचितमेव (१)तदिति द्रष्टव्यम् ॥ १८ ॥

इत्यर्थवादप्रामाण्याधिकरणं प्रथमम् ॥ १ ॥

अथ द्वितीयमौदुम्बराधिकरणम् ॥

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥१-२-१९॥

(विषयसंशयसङ्गतयः)

(२)"औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुध्यै" इत्यादिषु विधायकत्वेन वा प्रामाण्यं (३)स्तावकत्वेनैव वेति सन्देहः । पादाध्यायसङ्गती स्पष्टे । आक्षेपिकी त्वनन्तरा । ऊर्जा अन्नरूपेणौदुम्बरेण साधनेन, अस्मै यजमानाय, ऊर्जम् अन्नरूपान पशून्, आप्नोत्यध्वर्युः । अतः पशुरूपान्नसमृद्ध्यै औदुम्बरो यूपो भवतीति वाक्यार्थः ।

वै देवा अहुतादो यद्ब्राह्मणाः, यदन्वाहार्यमाहरन्ति तानेव तेन प्रीणाति" इत्यर्थवादे अन्वाहार्यादिदक्षिणायां ब्राह्मणानामेवाधिकारसङ्कीर्तनात्तदनुसारेण वैदिकेषु कर्मसु ब्राह्मणानामेवार्त्विज्येऽधिकार इत्युक्तं द्वादशान्ते (१२-४-१४) सर्वमिदमर्थवादप्रामाण्याभ्युपगम एव सिध्यतीति ।   १. मन्त्रवदिति. क. पु. ।

२. तै. सं. २-१-९ सोमापौष्णं त्रैतमालभेत पशुकामः" इति वाक्यविहितकाम्यपशुयागसन्निधौ श्रुतमिदं वाक्यम । याऽजा त्रीन् वत्सान् युगपत् प्रसूते तत्रैकैकोऽपि त्रैत इत्यभिधीयते ।

३. स्तावकत्वेन वेति. क. ग. पु. ।

(पूर्वपक्षः)

तत्र श्रौतप्रथमापेक्षितानन्यलभ्यप्रधानभूतविधिपरत्वे सम्भवति न लाक्षणिकविध्यवगमोत्तरापेक्षितसम्भावितान्यलाभगुणभूतस्तुतिपरत्वमुपपत्तिमत् । नचास्य विधित्वप्रयोजनवत्तरत्वमपि । अतो विधिरेवायम् । तत्र 'पशूनाप्नोती'ति द्वितीयया पशूनां साध्यत्वमात्रावगमेऽपि योग्यतया ईप्सितत्वस्याप्यवगमाद्भाव्यत्वसिद्धिः । यस्य तु मते (१)ईप्सितत्वमेव द्वितीयार्थस्तदा कामशब्दादिकं विनैव भाव्यत्वावगमे नैव किञ्चिद्बाधकमस्ति ।

वस्तुतस्तु "ऊर्जोऽवरुद्ध्या" इति तादर्थ्यचतुर्थ्या(२)'रन्धनाय स्थाली'(३) 'सर्वेभ्यो दर्शपूर्णमासा' वित्यादिवत्कामपदाद्यभावेऽपि भाव्यत्वावगमः स्पष्टः । ततश्च पशूनां भाव्यानां साधनापेक्षत्वात्सन्निधानाद्विनैव तृतीयया यागादिवदौदुम्बरत्वजातिस्साधनत्वेन सम्बध्यते । साध्यसाधनसम्बन्धस्य च क्रियागर्भत्वाद्दण्डेन घटो भवतीतिवच्च भवनक्रियासम्बन्धे पुरुषव्यापाराविषयत्वेन वचनवैयर्थ्यापत्तेर्लक्षणयाऽन्तर्णीतणिजर्थकल्पनया वा भवतेः पुरुषव्यापारपरत्वम् । तिपैव वा लक्षणया शक्त्यैव वा भावनाप्रतीतिः । धातुस्तु साधुत्वार्थमित्यपि वक्तुं शक्यम् । तदयमर्थः- औदुम्बरत्वेन पशून् भावयतीति । साध्यसाधनसम्बन्धज्ञानादेव च प्रवृत्तिसिद्धेर्नार्थो विधिना । यदि तु विध्यभावे सन्निहिताया औदुम्बरताया एव भावनोद्देश्यत्वापत्तेर्विध्याग्रहः, तदा भवतीत्ययं पञ्चमलकारस्सन् विध्यर्थको

१. ईप्सितत्वमपीति. क. पु. ।

२. रन्धनं-पाकः, ।

३. अपेक्षितसर्वफलार्थं दर्शपूर्णमासयागौ कर्तव्यावित्यर्थः ।

भविष्यति ।

न च फलविधिपक्षेऽर्थवादसमभिव्याहाराभावे पश्वलङ्कारत्वनिश्चायकाभावः, विध्येकवाक्यत्वं विनाऽर्थवादत्वानिश्चयेन तस्य तदनिश्चायकत्वात् । अतः "कपिञ्जलानालभेत" इतिवदप्राप्तार्थकत्वेनैव तन्निश्चयः । अस्तु वाऽर्थवादस्यैव तन्निश्चायकत्वं, तथापि 'ऊर्ग्वा उदुम्बर' इत्यादेः 'ऊर्जैवास्मा' इत्यन्तस्य स्तावकत्वाङ्गीकाराददोषः । न चाश्रयाभावाद्विधानं; फले औदुम्बरतायाः, "सोमापौष्णं त्रैतमालभेत पशुकामः" इति प्रकृतयागस्याश्रयत्वोपपत्तेः । यद्यपि च जातेस्साक्षाद्यागसाधनत्वासम्भवः तथापि व्रीहिद्रव्यादिवदेव तदाक्षिप्तकाष्ठस्य (१)प्रदेयत्वेन साधनत्वाविघातः । काम्यत्वादेव चोत्पत्तिशिष्टपशुबाधकत्वमविरुद्धम् । यूपशब्दस्तु "उपशयो यूपो भवती" तिवदर्थप्राप्तच्छेदनादिधर्मवत्तयैवानुवादः, यूपधर्मातिदेशार्थो वा ।(२) गुणफलविधौ च भावनान्तरस्वीकारादुभयविशिष्टभावनाविधानादवाक्यभेद इति द्रष्टव्यम् । अथवाऽतिदेशप्राप्ता यूपोत्पत्तिरेवाश्रयत्वेनान्वेति । न च प्रकरणेनैवाश्रयोपस्थितिः(३)कार्येति नियमस्समस्ति, अतिदेशेनापि तदुपस्थापनसम्भवात । तस्माद्विधायकत्वेनैवैवंजातीयकस्य प्रामाण्यम् । सूत्रं व्याख्यातम् ॥ १९ ॥

लोकवदिति चेत ॥१–२–२०॥

---

१. 'प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः' इत्यत्र कृष्णलानामनदनीयानामपि यथा यागीयद्रव्यत्वं तद्वदत्रापि भवितुमर्हतीति हृदयम् ।

२. द्वितीयद्वितीये (२. २. १३.) इन्द्रियकामाधिकरणे निपुणतरमुपपादितमिदम् । ३. कर्तव्येति. पा. ।

ननु-यत्रापि लोके बुद्धिपूर्वकारिणो मात्रामपि निष्प्रयोजनां न प्रयुञ्जते, तत्रापीयं गौः क्रेतव्येत्यस्य बहुक्षीरा(१)ऽव्यपत्येत्यादिना स्तुतिरेव दृष्टा, न तु फले विधानं, अतः कथं स्तुत्यपेक्षया विधेरर्थवत्तरत्वमिति चेत् ॥ २० ॥

न पूर्वत्वात् ॥ १–२–२१ ॥

युक्तं लोके बहुक्षीरत्वादीनां विदितपूर्वत्वात्क्रियाजन्यत्वाच्च फलविध्यसम्भवेनागत्या स्तुतिपरत्वम्, वेदे त्वविदितफलजनकत्वविधिसम्भवे विधिबलेनैव सम्भवल्लाक्षणिकस्तुतिपरत्वकल्पनं को नामाश्रयेत् ! ॥ २१ ॥

(इति पूर्वपक्षः ।)

उक्तं तु वाक्यशेषत्वम् ॥ १–२-२२ ॥ (सि)

(सिद्धान्तः)

सत्यं फलपरत्वं युक्तं, न तु तत्सम्भवः । तथाहि–यद्यपि तावत्पशूनां भाव्यत्वं गम्येत तथापि भावनायां विधिसमभिव्याहृतायामपि सन्निहितेप्सितयूपपदार्थस्यैव "खादिरो यूपो भवती" तिवद्भाव्यत्वोपपत्तौ न विप्रकृष्टानां पशूनां तत्कल्पनं युक्तम्, यूपभवनाक्षिप्तायां भावनायां यूपस्यैव भाव्यत्वौचित्याच्च । एवं सत्यपि यदीन्द्रियकामादिपदवदनन्यपरं फलश्रवणं भवेत् ततः सन्निहितातिलङ्घनमप्याश्रीयेत । न तु पशूनां भाव्यत्वे प्रमाणमस्ति । (२)न हि द्वितीया भाव्यत्वाभिधायिनी,

---

१. जीवदपत्येति. क. पु. ।

२. इदं च द्वितीयाध्यायद्वितीयपादे सम्मार्गाधिकरणे ग्रन्थकृता स्पष्टीकृतम् ।

जन्यत्वमात्राभिधायित्वात् । यद्यपि चेप्सितत्वाभिधायिनी, तथापि "पशूनाप्नोती" ति वर्तमाननिर्देशाद्वर्तमानफलस्य चानुपलब्ध्या बाधाद्भविष्यदर्थकल्पनाऽऽवश्यकी । न च रात्रिसत्रवत्तदङ्गीकारेऽप्यदोषः, औदुम्बरत्वादेर्यूपार्थत्वेनैव नैराकाङ्क्ष्येण रात्रिसत्रवत्फलानपेक्षत्वादिति(१)र्णमय्यधिकरणे वक्ष्यामः। न चैवं पुनरुक्तता, अनेन फलमात्रपरत्वनिराकरणेन स्तुतिपरत्वे स्थिरीकृते तत्र रात्रिसत्रवदर्थवादस्यैव सतः फलपरत्वमाशङ्क्य निराकरिष्यते ।

यत्तु–"सर्वेभ्यो दर्शपूर्णमासा" वित्यादिवत्तादर्थ्यचतुर्थी फलप्रतिपादिकेत्युक्तम् , तदपि तादर्थ्ये सति–'देवाय पुण्यं, 'ब्राह्मणाय दुग्ध' मितिवत्प्राधान्यमात्रावगमेऽपि भाव्यत्वानवगमादसाधकमिति भवदेवेनोक्तम् । "सर्वेभ्यो दर्शपूर्णमासा"वित्यादौ त्वगत्या लक्षणया भाव्यत्वावगतिः ।

किञ्च आश्रयालाभादपि न गुणफलसम्बन्धोपपत्तिः । तथा हि–न तावत्पशुयाग आश्रयः । तत्र हि प्रदेयपरिच्छेदकत्वेन वा गुणस्य सम्बन्धः प्रकारान्तरेण वा ? (२)न तावदन्त्यः, अयोग्यत्वात् । आद्ये यूपग्रहणानर्थक्यम् । न च यूपपदं धर्मातिदेशकम् । तथा सति यूपधर्मवानुदुम्बरप्रकृतिक इत्यर्थावगमेऽपि विशेष्याश्रवणेन साकाङ्क्षत्वप्रसङ्गात् । अध्याहृतविशेष्यस्यैव गुणद्वयविशिष्टस्य विधौ (३)गौरवाच्च । न च प्रधानभूतयागस्याश्रयत्वासम्भवे '(४)आनर्थक्यतदङ्ग' न्यायेन यूपेऽवतारः, आश्रयत्वस्य 'आनर्थक्यतदङ्ग'न्यायाविषयत्वेन (५)रेवत्यधिकरणे

१. ४–३–१. २. नान्त्य इति. क. पु. ।
३. गौरवप्रसङ्गाच्चेति क. पु. ।
४. आनर्थक्यात्तदङ्गेषु० इति न्यायः तृतीयप्रथमे नवमाधिकरणे।
५. २–२–१४

स्थापयिष्यमाणत्वात् । सत्यपि विषयत्वे यूपमात्रावतारे प्रमाणाभावाच्च । नापि यूपोत्पत्तिः पशुनियोजनं वाऽऽश्रयः, तयोरातिदेशिकत्वेनाप्रकृतत्वात् । अतिदेशस्य सर्वाङ्गसाधारणस्यैकत्वेन तयोर्विशिष्योपस्थित्यभावाच्च । साधारणोपस्थित्या चाश्रयत्वाङ्गीकारे जुह्वादीनामप्याश्रयत्वापत्तिः । इष्टापत्तौ च यूपपदवैयर्थ्यतादवस्थ्यम् । अनेनैव च वाक्येन यूपस्याश्रयत्व उच्यमाने वाक्यभेदः । तेनाश्रयाभावादपि न गुणफलसम्बन्धः । तेनातिदेशप्राप्तयूपोद्देशेनैवौदुम्बरत्वविधिः । तत्स्तुतिश्च सर्वोऽयमर्थवादः । अत उक्तरीत्या वाक्यशेषत्वमेव युक्तमिति सूत्रार्थः ॥ स्तुत्यालम्बनं च पूर्णाहुतिवत्प्रधानफलानुवादाद्द्रष्टव्यम् ॥ २२ ॥

विधिश्चानर्थकः क्वचित्तस्मात्स्तुतिः प्रतीयेत तत्सामान्यादितरेषु तथात्वम् ॥ १-२-२३ ॥

किञ्च—तुल्यन्यायत्वात्सर्व एव फलविधिसरूपवद्द्रव्यदेवतागुणक्रियाविधिसरूपास्त्वया विधायकत्वेनाऽऽशङ्कनीयाः, यथा—(१)"यजमानः प्रस्तरः" इत्यादयो द्रव्यस्य, "आग्नेयो वै ब्राह्मणः" इत्यादयो देवतायाः, (२)"यो विदग्धस्स नैर्ऋतः, योऽशृतस्स रौद्रः" इत्यादयो गुणस्य,(३)"निवीतं मनुष्याणाम्" (४)"इति ह स्माह बर्कुर्वार्ष्णिर्माषान्मे पचत" (५)"वायुर्वै क्षेपिष्ठा देवता" (६)"अप्सुयोनिर्वा अश्वोऽप्सुजो वेतसः" इत्यादयः क्रियायाः । तत्र यद्यपि निवीतादिक्रियाविधिषु शक्यार्थविषयत्वं,तथापि वायुवेतसादीनां क्षेपिष्ठत्वाब्जन्यत्वस्य स्वभावादेव सिद्धेरश्वादौ च तस्य प्रयत्नेनाप्यनिष्पत्तेरनर्थको विधिः । तस्मात्स्तुतिः प्र-

---

१. तै. सं. २. ६.५. २. तै सं. २. ६.३. ३. २. ५.११.
४. शत. ब्रा. १. १. २. ५. तै. सं. २. १.१. ६. तै ब्रा. ३.८.१९

तीयेत । स्तुतिप्रकारश्च वायूदाहरणे पूर्वमेव प्रदर्शितः । वेतसाश्वयोस्त्वेवम् "अप्सु योनिर्वा अश्वोऽप्सुजो वेतसः स्व एवैनं योनौ प्रतिष्ठापयति" इत्ययं(१) "वैतसे कटेऽश्वं चिनोति" इत्यस्यविधेश्शेषः । तत्र वेतसे ऽब्जन्यत्वस्य प्रत्यक्षत्वादश्वस्यापि पुराणेष्वब्जन्यत्वप्रसिद्धेः, कार्यकारणयोरभेदोपचारेण वेतसप्रकृतिभूतास्वप्सु चयनादश्वस्य स्वयोनौ प्रतिष्ठापनं कृतं भवतीति चयनस्तुतिः ।

यद्यपि च—स्वयोनिप्रतिष्ठापनमात्रेण न काचित्स्तुतिबुद्धिः, तथापि(२) "आपो वै शान्ताः" इत्यर्थवादान्तरेऽपां शान्तत्वेन यजमानकष्टशमयितृत्वावगमादेवंविधप्राशस्त्यवतीष्वप्सु प्रतिष्ठापनेन चयनस्य स्तुतिः प्रत्येतव्या । अतश्च तत्सामान्यादितरेष्वपि सर्वविधिस्वरूपेषु तथात्वं द्रष्टव्यम् । नचैवं (३)'तत्सिद्धि' सूत्रादावपि विध्यर्थवादविचारस्य करिष्यमाणत्वात्पौनरुक्त्यम् , तत्सिद्धिसूत्रस्य तावद्गुणवादनिमित्तमात्रकथनपरत्वेनात्रत्यस्यैव विध्यर्थवादविचारस्य तदर्थस्मारणात् । (४)निवीताद्यधिकरणानि तु कृत्वाचिन्तात्वेन व्याख्येयानि । अर्थवादत्वकथनं तु तत्र कृत्वाचिन्तोद्घाटनम् । एवं षाष्ठमपि (५)माषपाकाधिकरणं व्याख्येयम् । सूत्रं व्याख्यातम् ॥ २३ ॥

प्रकरणे च सम्भव(६)न्नपकर्षः कल्प्येत विध्यानर्थक्यं हि तं प्रति ॥ १-२-२४ ॥

किञ्च—'यो विदग्ध" इत्यादौ यदि तावद्यच्छन्दानुरोधेन

१. तै ब्रा. ३.८.१९. २. तै. सं. ५. ४.४. ३. पू. मी. १.४.२३, ४. पू. मी. ३. ४. १. ५. पू. मी. ६- ६. ११.

६. यद्यपि अपकर्षो न कल्प्येत इ सेव सर्वत्र पाठस्समुपलभ्यते, तथापि हस्तलिखितकौस्तुभपुस्तकयोर्नञ्रहितस्यैव पाठस्यदर्शनात् तथैव ग्रन्थकृता व्याख्यातत्वाच्च स एव पाठो निवेशितो मया ।

दर्शपूर्णमासप्रकरणस्थविदग्धत्वे निमित्ते निर्ऋत्यादिदेवतान्तरविधिः, तदा स्तावकत्वेन गतिसम्भवे नित्यस्याप्युत्पत्तिशिष्टदेवतान्तरस्य बाधाख्योऽपकर्षः कल्प्येत । अथैतद्दोषभयाद्व्यवहितकल्पनयापि 'यो नैर्ऋत' इति तद्धितान्तपदलक्षितनिर्ऋतिदैवत्ययागीयद्रव्योद्देशेन विदग्धत्वविधानं, तदा(१) "पूषा प्रपिष्टभाग" इति वत्प्रकरणादपकर्षः कल्प्यः । दर्शपूर्णमासप्रकरणे निर्ऋतिदेवताभावेन दर्शपूर्णमासकर्म प्रति विध्यानर्थक्यात् । न च प्रकरणे एव कर्मान्तरविधिश्शङ्क्यः, यत्तच्छब्दान्वयानुपपत्तेः । "अविदहता श्रपयितव्य" इति विध्येकवाक्यत्वसम्भवे वाक्यभेदाङ्गीकारायोगाच्च । तथाचोत्तरसूत्रे वक्ष्यति—"विधौ च वाक्यभेदस्स्यात्" इति । तस्मात्स्तावकत्वमेव युक्तम् ॥
सूत्रं व्याख्यातम् ॥ २४ ॥

विधौ च वाक्यभेदस्स्यात ॥ १-२-२५ ॥

इदं सूत्रम् स्तुतिपरस्यापि "ऊर्जोऽवरुद्ध्यै" इत्यस्य फलपरत्वे शङ्क्यमाने—यदि तावत् श्रूयमाणस्यैवोभयपरत्वम् , तदा तात्पर्यानेकत्वनिमित्तो वाक्यभेदः । रात्रिसत्रन्यायेन श्रुतस्य शब्दस्य स्तुतिमात्रपरत्वेऽपि विहितस्यौदुम्बरत्वस्य फलापेक्षायां कल्पितेन शब्देन फलविधौ शङ्क्यमाने तु गौरवलक्षणो वाक्यभेदः । यद्यपि चेयं शङ्का पर्णमय्यधिकरणे निराकरिष्यते, तथाप्यत्रापि प्रसङ्गान्निराकृतेति मूले व्याख्यातम् । वस्तुतस्तु—अनन्तरसूत्रानुगुण्याद्विदग्धादिवाक्येष्वेव कर्मान्तरशङ्कानिराकरणार्थं वेदितव्यम् । निराकरणप्रकारश्च पूर्वमेव दर्शितः ॥ २५ ॥

इति द्वितीयमौदुम्बराधिकरणम् ॥ २ ॥

(विधिवन्निगदाधिकरणम्)

---

१. तै. सं. २. ६. ८.

अथ तृतीयं हेतुवन्निगदाधिकरणम् ॥

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ १-२-२६ ॥ (पू)

(विषयसंशयसङ्गतयः)

चातुर्मास्येषु-(१)"शूर्पेण जुहोति, तेन ह्यन्नं क्रियते"इति श्रुतम् । तत्र 'तेन ह्यन्नं क्रियत' इत्यस्य हेतुविधायित्वेन प्रामाण्यं स्तावकत्वेन वेति सन्देहः । पादाध्यायसङ्गती(२) स्पष्टे । अनन्तरा तु पूर्वत्र कामपदाद्यभावात्फलपरत्वं निराकृतम्, इह तु हेतुप्रतिपादक'हि'शब्दश्रवणाद्धेतुविधित्वसम्भव इति पूर्वपक्षोत्थानात्पूर्वाधिकरणसिद्धान्तहेतुप्रत्युदाहरणरूपा । अत एव न पौनरुक्त्यमपि ।

(पूर्वपक्षः)

तत्र हिशब्दश्रुत्याऽन्नकरणत्वस्य हेतुत्वमुच्यते । हेतोश्च साध्यापेक्षायां सन्निधानाल्लाघवाच्च होमसाधनत्वं साध्यत्वेन सम्बद्ध्यते ।

यद्यपि च पूर्वं व्याप्त्यवगममन्तरेण लोके प्रायशो न हेतुत्वावगमः, तथाप्यनवगतव्याप्तेरपि पुंसो धूमो वह्नेर्हेतुरित्याप्तोपदेशादेव व्याप्त्यनुमानवद्वेदावगतहेतुत्वान्यथानुपपत्त्या व्याप्तिवचनं कल्प्यते—यद्यदन्नकरणं तेन तेन होतव्यमिति । अस्ति च दर्वीपिठरशूर्पादीनामन्नकरणत्वम्; पाकादिरूपव्यापारवत्त्वात्, विप्रकृष्टलाङ्गलाद्यपेक्षया साधकतमत्वाच्च ।

अत्र च तच्छब्देन शूर्पपरामर्शेऽपि न तस्य हेतौ प्रवेशः, हिश-

१. चातुर्मास्यान्तर्गतवरुणप्रघासाख्ये द्वितीये पर्वण्याम्नातमिदम्।
२. सङ्गतिस्स्पष्टेवेति० क. ख. पु. ।

ब्देोपात्तहेतुत्वविधावुद्देश्यस्य तृतीयोपात्तस्य करणत्वस्य प्रातिप-दिकोपात्तेन शूर्पेण विशेष्टुमशक्यत्वात्। शूर्पस्य पक्षत्वेन तद्वृत्तित्वस्य हेतुतावच्छेदकत्वानुपपत्तेश्च। अत्र च 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इत्युभयत्रापि वर्तमाननिर्देशाद्धोमसमानकालीनान्नक्रियाप्रतीतेस्तादृश्याश्चासम्भवेन तन्निरूपितकरणत्वस्य होमसाधनत्वं प्रति हेतुत्वासम्भवात् 'क्रियते' इत्यत्र कृञा स्वार्थविषयिणी शक्तिर्लक्ष्यते—तेन कर्तुं शक्यत इति। अन्नक्रियाजनकशक्तेश्च सर्वदा वर्तमानत्वान्न लटोऽनुपपत्तिः।

वस्तुतस्तु शक्तिं प्रति तृतीयोपात्तस्य करणत्वस्यानन्वयापत्तेश्शक्तिव्यतिरिक्तकरणत्वाभावाच्च शक्तिलक्षकत्वानुपपत्तेर्लट एव भूतत्वे भावित्वे वा लक्षणा। आवश्यकी चेयं लक्षणा स्तुत्यालम्बनार्थं सिद्धान्तिनोऽपि। तेन तादृशान्नक्रियाकरणत्वस्य हेतुत्वोपपत्तिः। अत्र च होमस्य (१)"करम्भपात्राणि जुहोति" इत्युत्पत्तिवाक्येनैव प्राप्तत्वात्तदनुवादेनान्नकरणत्वहेतुकमन्नकरणमात्रस्य दर्वीपिठरादेस्साधनत्वं श्रुतानुमितैकदेशनिष्पन्नवाक्येन विधीयते। शूर्पपदं चा(२)वयुत्यानुवादोऽन्नकरणमात्रोपलक्षणं वा। दर्वीपिठरादीनामपि होमसाधनत्वसिद्धिश्च व्याप्तिकल्पकस्य हेतोः प्रयोजनमिति नानर्थक्यम्। नचैवं प्राशस्त्यसमर्पकाभावः, विधेरेवाप्राप्तिबललब्धप्राशस्त्यलाभोपपत्तेः।

---

१. का. श्रौ. सू. ५. ५. १०. दक्षिणाग्नौ यवानीषद्भर्जयित्वा तान् पिष्ट्वा (चूर्णीकृत्य) जलेन संयुत्य तेन पिष्टेन यजमानस्य यावत्यः प्रजाः स्युः तत एकाधिकानि पात्राणि क्रियन्ते। तानि करम्भपात्राणि। तानि च नवीने शूर्पे निक्षिप्य तत् शूर्पं पत्नी स्वशिरसि निक्षिप्य यजमानान्वारब्धा दक्षिणेऽग्नौ जुहुयात्। एष सम्प्रदायः॥

२. अवयुत्य समुदायात् पृथक्कृत्यानुवादः।

हेतुसमर्पकस्यैव वा(१)रात्रिसत्रवदुभयपरत्वकल्पनया प्राशस्त्य-परत्वोपपत्तिः । तस्माद्धेतुविधिरेवायम् "न ह्यत्रानूयाजान्यक्ष्यन् भवती" तिवत् ॥ सूत्रं व्याख्यातम् ॥ २६ ॥

(इति पूर्वः पक्षः)

स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य ॥१-२-२७॥(सि)

(सिद्धान्तः)

नैवम्; प्रथमोपस्थितविध्युद्देशवर्त्यनन्यप्रयोजनशूर्पपदवैयर्थ्यप्रसङ्गात् । अतश्शूर्पं तावदवश्यं विधेयम् । तेन प्रत्यक्षश्रुतेन शूर्पेणाऽऽनुमानिकैर्दर्व्यादिभिर्न विकल्पः, न वा तस्य तैर्बाधः । समुच्चयोऽपि शूर्पस्य नैरपेक्ष्यबाधादयुक्तः । तथा हि —"(२)समर्थः पदविधिः" इति सूत्रेण तावत्पदमात्रसम्बन्धिविधौ सामर्थ्यं विधीयत इति निर्विवादम् । (३)न चैतस्य समासप्रकरणस्थत्वात्पदमात्रे न सामर्थ्यविधायकत्वम्, एतस्य परिभाषारूपत्वेन प्रकरणेनानियमात् । अन्यथा तद्धितविधावप्यस्य प्रवृत्त्यनापत्तेः । न च तत्र "(४)समर्थानां प्रथमाद्वा" इति सूत्रेण सामर्थ्यापेक्षत्वविधिः, अस्य सूत्रस्य 'समर्थानां पदाना' मित्यनूद्य 'प्रथमाद्वा प्रत्ययोत्पत्ति' रित्येतद्विधिपरत्वात् ।

वस्तुतस्तु नास्य समासप्रकरणस्थत्वम् । अतस्समासवत्पदस्य सतो विधिरित्यर्थासम्भवेऽपि प्रातिपदिकादनुशिष्टस्यापि तद्धितस्य पदसम्पादकत्वात्, उभयसाधारण्येन पदस-

१. रात्रिसत्रे स्तावकस्यार्थवादस्य फलपरत्वमपि यथा कल्प्यते तद्वदुभयपरत्वमिति भावः ।   २. पा. सू. २. १. १. ।

३. न च तस्येति ख. पु. ।   ४. पा. सू. ४. १. ८२ ।

म्बन्धिविधिमात्रम् । पदविधिशब्दार्थो महाभाष्ये प्रसिद्धः । एवं च सुप्तिङ्विधेरपि धातुप्रातिपदिकादनुशिष्टत्वेन पदसम्बन्धित्वात्सामर्थ्यापेक्षत्वमविरुद्धम् । अतश्शूर्पेणेत्यत्रापि सामर्थ्यापेक्षत्वादन्यापेक्षत्वे च सामर्थ्यभङ्गापत्तेर्न समुच्चयः ।

ननु–"समर्थः पदविधिः" इत्यत्र महाभाष्यकारेण द्विविधं सामर्थ्यमुक्तम्—व्यपेक्षालक्षणमेकार्थीभावलक्षणं च । तत्र यदि तावदन्योन्यापेक्षत्वरूपं व्यपेक्षालक्षणम्, यथा 'राजपुरुष' इत्यत्र राजपदस्योत्थिताकाङ्क्षत्वं पुरुषपदस्य चोत्थाप्याकाङ्क्षत्वम्, तथा सति शूर्पेणेत्यत्र द्रव्यान्तरसाकाङ्क्षत्वेऽपि प्रकृतिप्रत्यययोः परस्परसापेक्षत्वान्न विरोधः । न चैवमृद्धपदसाकाङ्क्षत्वेऽपि राजपुरुष इति समासापत्तिः, "सविशेषणानां वृत्तिर्नेष्यते" इति वार्तिकेन तन्निषेधात् ।

अथ तु सूत्रवार्तिकयोरेकवाक्यतया पदान्तरसापेक्षत्वेऽप्यसामर्थ्यं स्यात्, तथापि शाब्दान्वयसापेक्षत्व एव तत्, नत्वर्थान्तराकाङ्क्षत्वेऽपि । व्रीह्यादीनामवघाताद्यपेक्षत्वेऽपि सामर्थ्याविघातात् । अथैकार्थीभावलक्षणं तत्; तथापि समासवच्छूर्पकरणत्वयोर्विशेषणविशेष्यभावमात्रेणैकार्थ्योपपत्तेर्न द्रव्यान्तरसापेक्षत्वेऽपि सामर्थ्यभङ्ग इति चेन्न; विशेषणत्वस्यान्ययोगव्यावृत्तिं विनाऽसम्भवेन द्रव्यान्तरसापेक्षत्वे विशेषणत्वस्यैवानुपपत्तावेकार्थीभावलक्षणसामर्थ्यानुपपत्तेः ।

यद्यपि चायोगव्यावृत्तिरूपनियमफलकत्वेनापि विशेषणत्वोपपत्तिः, तथापि शूर्पस्याविशेषाद्धोमीयसकलद्रव्याधारत्वेन विधानात्तत्र चायोगव्यावर्तनरूपस्य नियमस्य द्रव्यान्तरव्यावृत्तिमन्तरेणासिद्धेर्न समुच्चयोपपत्तिः ।

एवञ्च यद्यपि "समर्थः पदविधि" रित्यनेन पदमात्रविधौ

सामर्थ्यविधिर्न स्यात्, तथापि द्रव्यविधेर्नियमविधित्वात्तस्योक्तविधया द्रव्यान्तरव्यावृत्तिमन्तरेणासिद्धेर्व्यावृत्तितात्पर्यावगतेस्समुच्चये च तदसिद्धेर्न पुरुषेच्छामात्रेण समुच्चयोपपत्तिः । आवृत्त्यापादनेन तु समुच्चयपक्षो गुणानुरोधेन प्रधानावृत्त्ययोगादयुक्तः । विस्तरेण चैतदुपपादितम्—

(१)"समासस्सति सामर्थ्ये तच्चापीष्टं विशेषणे ।
विशेषणं व्यवच्छेत्तृ विशेष्यव्यापि चोच्यते ॥"

इत्यादिना रथन्तरचरणे वार्त्तिककृता । तस्मान्न समुच्चयोऽपि ।

अतश्च प्रत्यक्षश्रुतेन शूर्पेणैव होमस्य निराकाङ्क्षत्वात् नानुमानिकानां दर्वीपिठरादीनामन्वयः ।

न च शूर्पासम्भवेऽनुकल्पत्वेनान्वयश्शंक्यः, हिशब्दश्रुतेरपेक्षितस्तुतिमात्रपरत्वसम्भवेऽनपेक्षितहेतुपरत्वकल्पने प्रामाण्याभावेन दर्वीपिठराद्यन्वयविधायिव्याप्तिकल्पने गौरवात् ।

न च स्तुतिपरत्वे लक्षणापत्तिः, अपेक्षानुरोधेन तस्या अप्याश्रयणीयत्वात् ।

वस्तुतस्तु हिशब्दो हेतुत्वमेव वदन् विधिं प्रति हेतोरनपेक्षितत्वात् आनर्थक्यतदङ्गन्यायेन स्तुतिं प्रत्याश्रीयते—अन्नकरणत्वात्प्रशस्त इति । अतो विधिशब्दापेक्षापूर्वकत्वात् स्तुतिरेव न्याय्या, यतोऽन्नकरणत्वस्य हेतुत्वेऽपि दर्वीपिठरादेः साधकतमत्वाभावेनाकरणत्वात्, साधकतमस्य च पाकादेः होमसाधनत्वायोगात्, अचोदनेत्येव सूत्रार्थः ॥ २७ ॥

व्यर्थे स्तुतिरन्याय्येति चेत ॥ १-२-२८ ॥

नन्वेवं शूर्पेऽपि साधकतमत्वाभावात् स्तुत्यालम्बनरूपार्थरहिते स्तुत्यनुपपत्तिः ॥ २८ ॥

---

१. तं. वा. पृ. ५७९ ।

अर्थस्तु विधिशेषत्वाद्यथा लोके ॥ १-२-२९ ॥

अस्मत्पक्षे त्वेतस्य विधिशेषत्वेनानुवादकत्वात्, अनुवादस्य च यथाप्राप्ति वर्णनीयत्वात्, यादृशं लोके शूर्पस्य विप्रकृष्टलाङ्गलाद्यपेक्षयाऽन्तरङ्गत्वादन्नं प्रति साधकतमत्वं दृश्यते, तादृशस्यैव स्तुत्यालम्बनार्थमनुवादो नानुपपन्नः। एवमेव वर्तमाननिर्देशोऽपि अनुवादत्वादुक्तरीत्या करोतेश्शक्तिलक्षकत्वेन लटो वा भूतभविष्यत्काललक्षकत्वेन व्याख्येयः। अनुवादत्वादेव च लक्षणापि न दोषः। प्रत्युत स्तुत्युपपादकत्वाद्गुण एव। न हि भूते भाविनि वा तादृशी प्रीतिर्यादृशी वर्तमाने। न वा वर्तमानशक्तिके तादृशी यादृशी फलोपहिते। अतो वर्तमानशक्तिकं हेतुं कृतं करिष्यमाणं वा स्तोतुमस्मत्पक्षे 'क्रियत' इति निर्देशोपपत्तिः। हेतुविधिपक्षे तु प्रमाणान्तरसिद्धार्थानुवादकत्वाभावाद्यथाश्रुतादीषदप्यन्यथात्वकल्पनं दोष एव।

अत एव यत्र हेतुविधिपक्षेऽपि न लक्षणा। यथा -(१)आतिथ्यायां "चतुर्गृहीतान्याज्यानि भवन्ति, न ह्यत्रानूयाजान्यक्ष्यन्भवति" इत्यत्र। तत्र हेतुरेवानूयाजाभावः चतुर्गृहीतत्रित्वविधिफलीभूताष्टगृहीतगतग्रहणचतुष्कनिवृत्तौ। अतश्च तत्र हेतुबलेन व्याप्तिकल्पनायामातिथ्याव्यतिरिक्तायामपि खण्डेष्टावनूयाजाभावे सति चतुर्गृहीतत्रित्वप्राप्तेरष्टगृहीतानिवृत्तिसिद्धिः। प्रकृतौ च "अष्टावुपभृति गृह्णाति" इत्यत्र चतुष्कद्वयलक्षणाद्योतनार्थत्वादेतस्य प्रयाजार्थं जुह्वां समानयने नियोगतोऽर्द्धमेव समानेतव्यमिति लभ्यते। अन्यथा हि प्रयाजानूयाजयोर्मिलित्वा पञ्चसंख्याकत्वात्

---

१. सोमयागे दीक्षानन्तरदिने सोमक्रयणानन्तरं क्रियमाण इष्टिविशेष आतिथ्या।

(१)'समं स्यादश्रुतत्वा' दितिन्यायेन प्रयाजद्वयार्थं किञ्चिदधिक· स्रुवत्रयस्यैवानयनं प्रसज्येत । यथा च न प्रकारान्तरेण चतु· ष्कद्वयसिद्धिः, तथा चतुर्थे(२) उपपादयिष्यते । अतश्च तत्र लक्षणाभावाद्धेतुविधित्वमेव, प्रकृते तु लक्षणाप्रसङ्गात् स्तुति-परत्वाङ्गीकारः ॥ २९ ॥

(३)यदि च हेतुरवतिष्ठेत निर्देशात् ॥ १-२-३० ॥

यद्यपि चायं हेतुविधिस्स्यात् , तथापि शूर्पगतस्यैवान्नकर-णत्वस्य हेतुत्वमवतिष्ठेत, न दर्वीपिठरादिगतस्यापि, शूर्पस्यैव होमसाधनत्वनिर्देशात् । न च शूर्पगतहोमसाधनत्वे साध्ये ऽन्य· गतान्नकरणत्वस्य(४) हेतुता सम्भवति, सामानाधिकरण्याभा· वात् । सन्निहितपरामर्शिसर्वनामोत्तरतृतीयाश्रवणेन पदश्रु· त्या तद्गतस्यैवान्नकरणत्वस्याभिधानाच्च । न चान्नकरणत्वस्य हेतुत्वं प्रत्युद्देश्यत्वात्तद्विशेषणाविवक्षा, अन्नकरणत्वस्य स्वरू· पतो लोकावगतस्यापि सोमादिवद्विधेयत्वेनानुद्देश्यत्वात् ।

यत्तु धूमादिवत्पक्षवृत्तित्वेन हेतोराविशेषणमित्युक्तम् । तन्न, धूमादौ विशेषधर्मेण व्याप्त्यनवगमाद्युक्ता धूमत्वादिना सामा· न्येन हेतुता । वेदे तु प्रमाणान्तरेण व्याप्त्यनवगमात् , विशेष-तश्श्रुतहेतुत्वान्यथानुपपत्तेर्विशेषव्याप्तिकल्पनयाऽप्युपपत्तौ न श्रुतप-रित्यागे प्रमाणमस्ति । दृष्टं च लोकेऽपि विशेषतस्तृणधूमदर्श· नात् तृणाग्नेरनुमानम् । अतो यद्यदन्नकरणं शूर्पं तेन तेन होत·

---

१. जै. सू. १०-३-५३.

२. चतुर्थप्रथमान्त्याधिकरणे 'तदष्टसंख्य'मित्यत्र ।

३. इतस्सूत्रत्रयमेकसूत्रतया परिगणितं भाष्यादौ ।

४. त्वस्यापि. क. पु. ।

व्यमिति व्याप्तिकल्पनादसमर्थशूर्पव्याप्त्याप्तिः परं भवेत्, न तु दर्व्यादिप्राप्तिः । इदं च वस्तुतो लक्षणाप्रसंगेन स्तुतिपरत्वस्यैवोक्तत्वादभ्युपेत्यवादेनैवोक्तम् । तत्प्रयोजनं च नानूयाजाभावमात्रस्य हेतुत्वम्, किन्तु बहुवचनश्रवणात् बह्वनूयाजाभावस्यानूयाजसामान्याभावरूपस्य । अतोऽवभृथे बर्हिरनूयाजमात्राभावेऽपि न व्यभिचारः ॥ ३० ॥

सामान्यादिति चेत् ॥ १-२-३१ ॥

ननु—अविशेषप्रवृत्ततृतीयारूपप्रत्ययश्रुत्यनुरोधेन पदश्रुतिबाधादन्नकरणसामान्यस्यैव हेतुत्वं स्यादिति चेत् ?-॥ ३१ ॥

अव्यवस्था विधीनां स्यात् ॥ १-२-३२ ॥

प्रत्ययश्रुत्यंगीकारे हि यद्यद्गृहीतं तस्य तस्य काचिदन्ननिमित्तताऽस्त्येवेत्यनवस्थितत्वाद्यत्किञ्चित् द्रव्यं होमे प्रसज्येत । तादृशस्य च होमाक्षेपादेव प्राप्तत्वादनर्थकोऽन्नकरणशब्दः । अतश्च प्रत्ययश्रुतेरानर्थक्यप्रतिहतत्वाद्दुर्बलश्रुत्यनुरोधो न दोषाय॥३२॥

इति तृतीयं हेतुवन्निगदाधिकरणम् (हेत्वधिकरणम्)

अथ चतुर्थं मन्त्राधिकरणम् ॥

तदर्थशास्त्रात् ॥ १-२-३३ ॥ (पू)

(विषयसंशयसङ्गतयः)

'मन्त्रानर्थक्य'मित्यन्तस्य एकसूत्रत्वेऽपि व्याख्यासौकर्यार्थं खण्डशः प्रत्येकं पञ्चम्यन्तसूत्रावयवोपन्यासः । इह मन्त्रानुदा-

ह्वत्य किं तेषां धर्मे प्रामाण्यमुत नेति-विचारः । अत्र पादाध्यायसङ्गती पूर्ववत् ॥

(पूर्वपक्षः)

तत्र यद्यप्यर्थवादवदेवाऽध्ययनविधिनाऽध्ययनसंस्कार्यता मन्त्राणामवगता, तथापि मन्त्राणामुपयोगापेक्षायां न तावत् विधिवत्स्वतो विधायकत्वेनोपयोगसम्भवः, विधिविहितार्थानुवादकत्वात्; यच्छब्दादिना विधिशक्तिप्रतिबन्धाच्च । नापि स्तावकत्वेन, अर्थवादवत्प्रदेशान्तरविहितस्तुत्यसम्भवात्। तथा हि—मन्त्राणां स्तावकत्वमर्थवादवत्पदैकवाक्यतया वा ? वाक्यैकवाक्यतया वा ? नाद्यः ; प्रदेशान्तरस्थत्वात् । नान्त्यः; पदार्थविधया लक्ष्यस्तुतिमात्रप्रतिपादनेऽपि अर्थवादवदेव स्वार्थबोधे समाप्त्यभावात् । अतो न स्तावकत्वम् । विस्तरेण चैतत्(१)द्वितीये द्वयमपि निराकरिष्यते । अत एवार्थवादप्रामाण्यहेतुप्रत्युदाहरणरूपेण पूर्वपक्षोत्थानादर्थवादविचारसङ्गतिः । अनन्तराधिकरणद्वयस्य त्वाक्षेपसमाधानार्थत्वेनार्थवादाधिकरणशेषत्वादव्यवधायकत्वम् । प्रकरणान्तरत्वेन चानन्तरसङ्गत्यभावेऽपि न दोषः ।

नापि स्मारकत्वेन; तथाङ्गीकारेऽप्यनधिगतार्थगन्तृत्वरूपस्य प्रमाकरणत्वरूपस्य वा प्रामाण्यस्य तावदयोगस्तदवस्थ एव । किञ्च इदं स्मरणमपि यत्किञ्चित्स्वार्थमात्रविषयकम् ? कर्मसमवेतानुष्ठेयार्थविषयकं वा ? नाद्यः, अनुपयोगात् ; साम्नां मन्त्रत्वस्य(२)द्वितीये वक्ष्यमाणत्वात्तेषां चार्थाभावेनाव्यापकत्वाच्च । नान्त्यः, अनुष्ठेयार्थस्मरणस्य ध्यानादिनाप्युपपत्तौ

१. पू. मी. २. १. ७. २. पू. मी. २. १. १२.

मन्त्रवैयर्थ्यात्; वाचकमन्त्रशब्दस्मरणस्यार्थस्मरणाधीनत्वेन वैपरीत्याच्च ।

किञ्च—प्रोत्साहनानुमन्त्रणादिमन्त्राणां (१)"अगन्म सुव" रित्यादीनां कर्मसमवेतार्थाभिधायित्वेऽप्यननुष्ठेयार्थकत्वान्न स्मरणोपयोग इत्यव्यापकत्वं तदवस्थमेव । जपादिमन्त्राणां तु कर्मासमवेतार्थाभिधायित्वमपि प्रायशो लक्ष्यते । एवं यत्रापि करणमन्त्रे समवेतार्थाभिधायित्वं तत्रापि द्वित्राणामेव निर्वापादिपदानां तत्, न तु (२)'देवस्य त्वा' दिपदानाम् । साममन्त्राणां तु गीत्यात्मकत्वेनाऽवाचकत्वान्नार्थाभिधायित्वमपि । अतः स्मारकत्वेनाप्युपयोगासंभवात्, अध्ययनसंस्कृतानां चोपयोगापेक्षायां प्रकरणपठितानामनारभ्याधीतानां च यथासम्भवं श्रुतिवाक्याधिकाराख्यप्रकरणक्रमसमाख्यादिभिः प्रधानाङ्गत्वेनावगतानां प्रधानविधिना मन्त्रस्वरूपमेवाङ्गीक्रियते, न तु ब्राह्मणवाक्यवदर्थोऽपि, अनुपयोगात् । मन्त्रस्वरूपस्य च स्वतोऽक्रियारूपत्वाद्यद्यपि नेतिकर्तव्यतात्वेनान्वयो योग्यः, नापि स्वरूपेण प्रधानोपकारकत्वसम्भवः, तथापि प्रमाणान्तरावगतमन्त्रस्वरूपाङ्गत्वनिर्वाहायोच्चारणक्रियाद्वारेण व्रीह्यादिवत्कारकत्वेनान्वयोऽङ्गीक्रियते । प्रायशश्च वेदे मन्त्रेणा 'मित्याहो' पनिबद्धत्वादुच्चारणक्रिया श्रुतैव । यत्रापि (३)"बर्हिर्देवसदनं दामी" त्यादौ सा न श्रुता, तत्रापि परिशेषात्सैव कल्प्या । न हि (४)प्रत्यायनस्य पुरुषकृत्यसाध्यस्य व्यापारत्वं (५) घटते । अत उच्चारणमेव व्यापारः । तस्य चोक्तविधया दृष्टप्रयोजनासम्भवाददृष्टार्थत्वम् ।

१. तै. सं. १. ६. ६. २. तै. सं. ४. १. १. ३. मै. सं. १. १. २.
४. अर्थप्रत्यायनस्येति ख. पु. ५. सम्भवति इति ग. पु.

नचैवमर्थपरत्वाभावे स्वाध्यायाध्ययनविधेरदृष्टार्थतापत्तिः, हुंफडाद्यध्ययनवन्मन्त्राध्ययनस्यापि कर्मकालीनोच्चारणप्रयोगप्राशुभावसिद्ध्यर्थत्वेन दृष्टार्थत्वात् । अत उच्चारणक्रियाद्वारेण मन्त्राणां प्रधानभावनाग्रहणम् ।

न च मन्त्राणामशाब्दत्वाच्छाब्दक्रतुभावनानन्वयः, क्रमादिकल्पितया अनेन मन्त्रेणास्य प्रधानस्योपकुर्यादित्येवंविधया श्रुत्या मन्त्राणामपि शाब्दत्वात् । एवंचार्थप्रत्यायनार्थत्वाभावाल्लिङ्गेन तत्तदवान्तरकार्ये बर्हिर्लवनादौ विनियोगायोगाद्दर्शपूर्णमासादिप्रकरणपठितानां सर्वेषां मन्त्राणां यत्रक्वचित्प्रयोगे प्राप्ते केषाञ्चिन्मन्त्राणां क्रियाविशेषानुष्ठानकालीनोच्चारणविधायिशास्त्रस्याप्युपपत्तिः, अन्यथा हि लिङ्गादेवानुष्ठेयक्रियाङ्गत्वसिद्धेः पुनस्तदङ्गत्वप्रतिपादकस्य शास्त्रस्य वैयर्थ्यमेव स्यात् । यथा (१)"अभ्रिरसि नारिरसी" त्यादयोऽग्निप्रकरणाम्नाताश्चत्वारो मन्त्रा लिङ्गादेवाग्न्यङ्गेष्टकार्थमृत्खननसाधनीभूताभ्र्यादाने प्राप्ता इति (२)'तां चतुर्भिरादत्त' इति वचनं व्यर्थम् ।

न च चतुस्सङ्ख्याविधानार्थं तत्; सा ह्यादानोद्देशेन वा विधीयते मन्त्रोद्देशेन वा ? न तावदाद्यः, सङ्ख्याया (३) 'स्तिस्र आहुती' रितिवत्कर्मसामानाधिकरण्याभावेन साक्षादादानसबन्धायोगात् । न चारुणैकहायनीन्यायेन मन्त्रसामानाधिकरण्योपपत्तिः । तत्रैकहायन्या अप्राप्तत्वेन विधेयत्वात्तत्परिच्छेदकापेक्षायां युक्तः पार्ष्ठिक आरुण्येन सम्बन्धः । मन्त्राणां तु लिङ्गादेव विकल्पेनैकसङ्ख्यानां प्राप्तत्वेन परिच्छेदकानपेक्षत्वान्न ग्रहैकत्ववद्युक्तश्चतुस्सङ्ख्यायास्सम्बन्धः । नान्त्यः, स्वरूपेणैव मन्त्राणां चतुस्सङ्ख्यात्वेन वचनवैयर्थ्यात् । आदान-

१. तै. सं. ४. १. १. २. तै. सं. ५. १. .१ ३. तै. सं. २. ३. ९.

विशिष्टमन्त्रोद्देशेन सङ्ख्याविधौ विशिष्टोद्देशे वाक्यभेदः। उभयाविशिष्टादानविधिपक्षस्तु आदानस्यार्थप्राप्तत्वान्मन्त्राणां लिङ्गादेव प्राप्तेरनाशङ्क्य एव। अतो न सङ्ख्याविधिः।

नापि समुच्चयविधिः, तद्वाचकशब्दाद्यभावात्। अस्मत्पक्षे तु चतुस्सङ्ख्याकमन्त्रोच्चारणस्याऽऽदानाङ्गत्वसिद्ध्यर्थो विधिरर्थवान्।

तथाग्निचयनप्रकरणाम्नात एव मन्त्रः (१)"इमामगृभ्णन्रशनामृतस्य" इत्ययं लिङ्गादेव तत्रत्याश्वरशनाग्रहणे प्राप्त इति पुनस्तत्र "(२)इत्यश्वाभिधानीमादत्त" इति वचनं व्यर्थम्; न ह्यत्र पूर्ववत्किञ्चिद्विधेयान्तरमप्याशङ्कितुं शक्यम्, आदानस्य स्वरूपेणाश्वाभिधानीसंस्कारार्थत्वेनार्थान्मन्त्रस्य च लिङ्गादेव प्राप्तेः। न च मन्त्रस्याश्वाभिधान्यादान इव लिङ्गाविशेषेण गर्दभरशनादानेऽपि प्राप्तेस्तत्परिसङ्ख्यार्थं वचनमर्थवद्भविष्यतीति वाच्यम्। परिसङ्ख्या हि प्राप्त्युत्तरकालं शाब्दी वा स्यात्? लैङ्गिकप्राप्तेः पूर्वमेवाश्वाभिधान्यादाने मन्त्रविधौ कृते पश्चाद्विधेः फलत्वेन वा? आद्येऽप्यादानविषयिणी मन्त्रविषयणी वा? नाद्यः, गर्दभरशनादानाभावे गर्दभबन्धनासम्भवेन रशनावैयर्थ्यप्रसङ्गात्। अश्वाभिधानीसम्बन्ध्यादानस्य श्रौतस्य सामर्थ्यादेव प्राप्तेरविधेयत्वात्स्वार्थस्य विधेयत्वहानिः, गर्दभाभिधान्यादाननिवृत्तेश्च लक्षिताया विधेयत्वात् परार्थस्य विधेयत्वकल्पना, अर्थाक्षेपप्रमाणेन प्राप्तस्य गर्दभरशनादानस्य बाधः, इति त्रैदोष्यापत्तेश्च। त्रैदोष्यापत्त्यैव गर्दभाभिधानीतो मन्त्रविषयपरिसङ्ख्यापक्षोऽपि निराकार्यः।

अथ लिङ्गस्यार्थाक्षेपस्य वा श्रुतिकल्पकत्वेन मन्थ-

१. तै. सं. ४. १. २. २. तै. सं. ५. १. २.

रप्रवृत्तित्वात्ततः पूर्वमेवाश्वाभिधान्यङ्गत्वेन मन्त्रविधौ मन्त्रविशिष्टादानविधौ वा स्वार्थस्यैव विधेयत्वात्, परार्थे चाकाङ्क्षाविरहेण लिङ्गस्य श्रुत्यकल्पकत्वेन गर्दभरशनायां मन्त्रस्य प्रापकप्रमाणाभावेऽर्थसिद्धत्वेनाविधेयत्वात् । अत एव प्राप्त्यभावेन प्राप्तबाधस्याप्यभावात्, त्रैदोष्यानापत्तेः फलतः परिसङ्ख्यापक्षो युक्त इति चेत्

अश्वाभिधान्यङ्गत्वेन मन्त्रविशिष्टादानविधावप्यश्वाभिधानीस्वरूप आनर्थक्यप्रसङ्गेनापूर्वसाधनत्वलक्षणायां रशनाद्वयस्याप्येकया प्रणाड्या एकापूर्वसाधनत्वा(१)द्यवेष्विवावघातादेर्मन्त्रस्य गर्दभरशनायामपि प्राप्तेर्दुर्वारत्वात् । अतो द्विविधाया अपि परिसङ्ख्याया असम्भवान्मन्त्रस्य लिङ्गविनियोज्यत्वे वचनवैयर्थ्यापत्तिः; अस्मन्मते तु सत्यपि रशनाद्वयसाधारण्ये रशनाद्वयादानाङ्गत्वेनैव मन्त्रविधिरर्थवान् । तथा दर्शपूर्णमासप्रकरणाम्नातः (२) "उरुप्रथस्वोरु ते यज्ञपतिः प्रथता" मित्ययं मन्त्रः लिङ्गादेव तत्रत्यपुरोडाशप्रथने प्राप्त इति पुनः "इति पुरोडाशं प्रथयती" ति वचनं व्यर्थम् । न ह्यत्र पूर्ववन्मन्त्रस्यान्यनिवृत्तिश्शक्यते शङ्कितुम्; । लिङ्गेनान्यत्र प्राप्त्यभावात् ।

ननु अत्र प्रथनमेव विधीयते, न मन्त्रः, लिङ्गादेव प्राप्तेः । न च पुरोडाशान्यथानुपपत्त्या प्रथनमपि प्राप्तमेव । त्वराविशेषेणाऽप्रथितस्यापि पिष्टपिण्डरूपपुरोडाशस्य निष्पत्तिदर्शनादिति भवदेवेनोक्तत्वात् । अतः प्रथनमात्रविधायके वाक्ये लिङ्गप्राप्तमन्त्रोपादानं (३) "यज्ञपतिमेव तत्प्रजया पशुभिश्च

---

१. "व्रीहीनवहन्ती"त्यनेन विहितोऽवघातो दर्शपूर्णमासापूर्वरूपैकापूर्वसाधनीभूतेषु यवेष्वपि यथा प्राप्नोति तद्वदित्यर्थः ।

२. तै. सं. १. १. ८. ३. तै. ब्रा. ३. २. ८.

प्रथयती" त्यर्थवादकृतयज्ञपतिप्रथनफलकत्वरूपप्रथनस्तुत्यालम्बनोपपादनार्थम्। मन्त्रे हि पुरोडाशं प्रत्यध्वर्युर्ब्रूते—उरु ते यज्ञपतिः प्रथतामिति, यश्चैवं ब्रूते स प्रथयत्येव। अतोऽध्वर्योराशीर्दानकर्तृत्वं यज्ञपतिप्रथनोत्पादनकर्तृत्वेनोपचर्यते। अतः पुरोडाशप्रथनस्तुतिसिद्धिः। तेन मन्त्रपुनश्श्रवणस्यार्थवादार्थत्वान्न वैयर्थ्यमिति चेन्न; मन्त्रोपादानाभावेऽपि लैङ्गिकविनियोगेन मन्त्रस्य तावत्प्राप्तत्वात्त्वदभिप्रेतस्तुतिसिद्धेः। पुरोडाशप्रथनस्याप्यर्थप्राप्तत्वेनाविधेयत्वाद्विधिशेषत्वायोगेनार्थवादत्वस्यैवानुपपत्तेश्च।

न च भवदेवोक्तविधया प्रथनविधिश्शङ्क्यः, अष्टाकपालादिशब्दैरेवाष्टसङ्ख्यावच्छिन्नकपालाधिकरणसंस्कारसंस्कृतद्रव्यविधानात् "कपालेषु पुरोडाशं श्रपयती" ति च तादृशस्यैवाधिकरणत्वस्यानुवादात्कपालाधिकरणत्वस्यैव प्राप्तेः, तस्य च प्रथनमन्तरेणायोगात्प्रथनस्य प्राप्तत्वेन विध्यनुपपत्तेः। न च पिष्टस्य द्रवतरत्वे सति स्वत एव प्रथनसम्भवात् तदनुकूलकर्तृव्यापारविधानम्। तदा हि तादृशमेव पिष्टं क्रियते येन प्रथयितव्यं भवतीति वाच्यम्। कपालोपरि निधानात्पूर्वमेव "(१)मखस्य शिरोऽसीत्याह यज्ञो वै मखः, तस्यैतच्छिरः, यत्पुरोडाशः" इति वाक्येन समन्त्रकपिष्टपिण्डरूपपुरोडाशकरणस्योक्तत्वात्, द्रवतरकरणे च पिण्डासम्भवात् स्वतः प्रथनासम्भवेन यावत्कपालाधिकरणतासम्पत्त्यै प्रथनकर्तव्यताया अपि नित्यप्राप्तत्वात्। अतो विधेयाभावेन तदर्थवादत्वस्यैवायोगात्तदर्थत्वेनानर्थवन्मन्त्रपुनश्श्रवणमिति दुर्घटम्। अस्मन्मते तु प्रथनानुवादेनापूर्वस्य मन्त्रस्य विधेयत्वात् स्तुतित्वेन चार्थवादत्वस्योपपत्तेः न

१. तै. ब्रा. ३. २. ८.

किञ्चिदनर्थकम् । अतश्च मन्त्रप्रामाण्ये तेषां विनियोजकरूपार्थशास्त्रवैयर्थ्यप्रसङ्गादुच्चारणमात्रद्वारेण च प्रधानोपकारकत्वोपपत्तेरप्रामाण्यमेव युक्तमाश्रयितुम् ॥ ३३ ॥

वाक्यनियमात् ॥ १-२-३४ ॥

(१)"अग्निर्मूर्धा दिवः ककु" दित्यादौ नियतक्रमकपदसमूहरूपवाक्याम्नानमुच्चारणार्थत्वपक्षे व्युत्क्रमे उच्चारणजन्यादृष्टप्रमाणाभावादर्थवत्, अर्थप्रत्यायनार्थत्वपक्षे तु व्युत्क्रमेऽपि मूर्धाग्निरित्युच्चारणादर्थप्रत्ययस्याविशेषान्नियतक्रमकपदसमूहरूपवाक्याम्नानमनर्थकम् । न चार्थपराणामपि प्रकृतिप्रत्ययसमासादिपदानां यजेत, इन्द्राग्नी, नीलोत्पलं, राजपुरुषः, निष्कौशाम्बिरित्यादीनां क्रमनियमो दृश्यत एवेति वाच्यम् । तेषु विपर्ययेऽपशब्दत्वप्रसङ्गात् । तथा हि—

प्रत्ययस्य तावत्परत्वं "(२)प्रत्ययः परश्च" इत्यनेनैव प्रसिद्धम् । इन्द्रशब्दस्य च "(३)अजाद्यदन्त" मित्यनेन पूर्वनियमः । नीलशब्दस्य च विशेषणत्वात् '(४)विशेषणं विशेष्येण बहुल' मित्यनेन च प्रथमानिर्दिष्टस्य विशेषणस्य "(५)प्रथमानिर्दिष्टं समास उपसर्जन" मित्यनेनोपसर्जनसंज्ञायां कृतायां, "(६)उपसर्जनं पूर्व"मिति पूर्वनिपातः। राजशब्दस्य च षष्ठ्यन्तत्वात् "(७)षष्ठी" त्यनेन प्रथमानिर्दिष्टस्य पूर्ववदेव निपातः । चित्रशब्दस्य विशेषणत्वात् "(८)सप्तमीविशेषणे बहुव्रीहा"वित्यनेन पूर्वनिपातः । निरादीनाञ्च "(९)निरादयः क्रान्ताद्यर्थे पञ्चम्ये" त्यनेन

---

१. तै. सं. ४. ४. ४. २. पा. सू. ३. १. १. ३. पा. सू. २. २. ३३.
४. पा. सू. २. १. ५७. ५. पा. सू. १. २. ४३. ६. पा. सू. २. २. ३०.
७. पा. सू. २. २. ८. ८. पा. सू. २. २. ३५. ९. वा १. ४. १७.

प्रथमानिर्दिष्टानां पूर्वनिपातः । अतस्सर्वत्र विपर्ययेऽपशब्द-त्वापत्तेः क्रमनियमाश्रयणम् । यस्तु "अग्नीन्द्रा" वित्याश्वलाय-नसूत्रे प्रयोगः, स इन्द्रशब्दस्योक्तरीत्या पूर्वनिपातस्मरणात् "(१)देवताद्वन्द्वे चे" ति स्मृतस्यानङोऽप्यदर्शनाच्छान्दस एव । राजपुरुषादिषु त्वर्थान्यत्वादपि क्रमनियमाश्रयणम् । निष्कौ-शाम्बिरित्यादौ च विपर्यये ऽर्थशून्यत्वादपि तत् । "अग्निर्मूर्द्धे" त्यादौ तु विपर्ययेऽप्यसाधुत्वादीनामभावात्क्रमनियमानर्थक्यम् ।

न चेहापि क्रमान्यत्वे अमन्त्रत्वापत्तिः; नियमार्थवतां मते हि मन्त्रस्याखण्डत्वात्क्रमान्यत्वेऽमन्त्रत्वं स्यात् । तव तु ज्ञानार्थत्वान्मनोतेर्मन्यतेर्वा "(२)गुधृवीपचिवचियमिमनितनि-सदिच्छदिक्षिदिभ्यस्त्रः" इत्यौणादिके 'त्र' प्रत्यये कृते मन्त्रशब्दव्युत्पत्तिरूपान्वाख्यानानुरोधेनार्थज्ञापकत्वातिरिक्तस्य मन्त्रत्वस्याभावात्, विपर्ययेऽपि च तदनपायादमन्त्रत्वाना-पत्तेः क्रमानर्थक्यम् । न च क्रमनियमाददृष्टं कल्प्यते । तथा सति मन्त्रनियमाददृष्टस्याप्यर्थप्रत्यायनार्थत्वपक्षेऽत्र कल्प्यत्वेन द्विरदृष्टकल्पनापत्तेः । अस्मन्मते तु नियतक्रमोच्चारणादेकमेवा-दृष्टमिति लाघवम् ॥ ३४ ॥

बुद्धशास्त्रात् ॥ १-२-३५ ॥

(३)"अग्नीदग्नीन्विहर" इत्यादावाग्नीध्रेण स्वकर्तव्येष्वग्नि-विहरणादिषु प्रयोगाद्बहिरेवावधारितेषु पुनः प्रैषशास्त्रं पिष्टपेष-णन्यायेनानर्थकम् । न चाविद्वाद्विषयत्वेन प्रैषस्यार्थवत्ता(४)"न

१. पा. सू. ६. ३. २६. २. पा. उ. सू. ६१६.
३. तै. सं. ६. ३, १. ४. जै. सू. ३. ८ १८.

ह्यविद्वान्विहितोऽस्ती" त्यनेन न्यायेन यजमानस्येव ऋत्विजामप्यविदुषामनधिकारात् ।

न च प्रयोगाद्बहिरवबुद्धानामपि प्रयोगान्तस्स्मरणार्थं प्रैषोपयोगः, ब्राह्मणाभ्यासजनितसंस्कारादेव पूर्वपदार्थसमाप्त्युद्बुद्धात्स्मरणोपपत्तेः, अस्मत्पक्षे तु नैतद्दोषप्रसक्तिः ॥ ३५ ॥

अविद्यमानवचनात् ॥ १-२-३६ ॥

(१)"चत्वारि शृङ्गा त्रयो अस्य पादा" इत्यादौ चतुश्शृङ्गत्वादिमतः कर्मणः तत्सम्बन्धिनो वा द्रव्यादेः प्रकृतौ विकृतौ वाऽप्रसिद्धेर्न तत्प्रकाशनार्थत्वेनास्यार्थवत्तासम्भवः । यद्यपि च गौण्या वृत्त्या होत्रादीनामेव यज्ञशृङ्गत्वाद्युपचर्य यज्ञाभिधानं, तथापि गौणरूपस्यानुष्ठेयत्वाभावान्न स्मृत्या कार्यम् । यज्ञप्रकाशनेऽपि च प्रधानमात्रप्रकाशनस्य याज्यादिनैव सिद्धत्वात् प्रयोगप्रकाशने च प्रयोगस्य विततत्वेनास्मिन्प्रदेशेऽस्य प्रयोग इत्यनवधारणात् । प्रयोगोपक्रमस्य च कामनाद्यनुरोधेनैव बुद्धिस्थत्वेन स्मारकानपेक्षत्वात् सर्वदोच्चारणशङ्कानुपपत्तेः पाठक्रमानुरोधेनैवास्योच्चारणापत्तेर्नानुष्ठेयार्थप्रकाशनार्थत्वोपपत्तिः। एवम् "मा मा हिँसी" रित्याद्यप्यप्रसक्तायां हिंसायां हिंसाप्रतिषेधानर्थक्यादविद्यमानार्थकमुदाहर्तव्यम् ॥ ३६ ॥

अचेतनेऽर्थबन्धनात् ॥ १-२-३७ ॥

न खलु(२) "ओषधे त्रायस्वैनं"(३) "शृणोत ग्रावाणः" इत्यादीनां पशुत्राणविषये अचेतनस्य दर्भस्य (४)प्रातरनुवाक-

१. ऋ. सं. ३. ८. १०. २. तै. सं. १. २. १. ३. तै. सं. १. ३. १३

४. ज्योतिष्टोमे प्रातस्सवने होत्रा पठ्यमानश्शास्त्रविशेषः।

श्रवणविषये चाचेतनानां ग्राव्णामाभिमुख्यासम्भवेन सम्बोधनानर्हत्वात्प्रैषरूपत्वमर्थविवक्षायामुपपत्तिमत् ॥ ३७ ॥

अर्थविप्रतिषेधात् ॥ १-२-३८ ॥

(१)"अदितिर्द्यौरदितिरन्तरिक्ष"मित्यादावदितेर्देवताया अशब्दरूपत्वेनैव तावद्द्युत्वादि विप्रतिषिद्धम्। पुनश्चैकस्या एव द्युत्वमन्तरिक्षत्वं च तथा। न च स्तुत्यर्थत्वेनाविरोधः, आर्थवादिकस्तुतिवन्मान्त्रवर्णिक्याः स्तुतेः प्रदेशान्तरस्थत्वेन विधिनाऽग्रहणस्य (२)द्वितीये वक्ष्यमाणत्वात्, स्वतन्त्रायास्स्तुतेश्चानुपयोगात्॥ ३८॥

स्वाध्यायवदवचनात् ॥ १-२-३९ ॥

स्वाध्यायाध्ययनकाले हि यत् कर्मण्युपयुक्तं तस्याभ्यासः कार्यः, नान्यस्य। तद्यद्यर्थप्रकाशनस्य उपयोगः, तदा तदेवाभ्यस्येत। अक्षराणामेवेत्थमभ्यासात्तदुच्चारणमेवोपयोगीति निश्चीयते ॥३९॥

अविज्ञेयात् ॥ १-२-४० ॥

(३)"अम्यक् सा त इन्द्र ऋष्टिरस्मे" इत्यादौ सामान्यत इन्द्रस्तुतिरूपवाक्यार्थावगमेऽप्यम्यगादिपदार्थाज्ञानात् विशेषतो वाक्यार्थाज्ञानम्। (४)"सृण्येव जर्भरी" त्यादौ सामान्यतोऽपि वाक्यार्थानवगमात्। अर्थप्रत्यायनार्थत्वपक्षे किमेते अभिदध्युः? ॥४०॥

अनित्यसंयोगान्मन्त्रानर्थक्यम् ॥१-२-४१॥

(५)"किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तप-

---

१. ऋ. सं. १. ६. १६ २. पू. मी. २. १. ६. अधिकरणे।
३. ऋ. सं. २. ४. ८. ४. ऋ. सं. ८. ६. २. ५. ऋ. सं. ३. ३. २१.

न्ति घर्मम् । आ नो भर प्रमगन्दस्य वेदो नैचाशाखम्मघवन्र-न्धया नः" इत्यादावनित्यार्थप्रतिपादनात्, तस्य चाकर्माङ्गत्वात्प्रतिपादनमनर्थकम् । तथाहि—एतस्य हि विश्वामित्र ऋषिः । तेन किल इन्द्रः प्रार्थितः,—भो मघवन्! कीकटेषु देशविशेषेषु, या गावस्ताः ते तव, किं कृण्वन्ति ? यतः आशिरं सोमसंस्कारार्थं पयः, न दुह्रे, न च घर्मं तपन्ति, अतः प्रमगन्दस्य राज्ञः, नैचाशाखं नाम नगरं, वेदः धनं च, नः अस्माकं, आभर, इत्येतन्नो मघवन्, रन्धय साधयेति । दीर्घश्छान्दसः । अत्र नैचाशाखप्रमगन्दादीनामनित्यानां संयोगान्मन्त्रानर्थक्यमिति पूर्वः पक्षः ॥ ४१ ॥

(इति पूर्वः पक्षः)

अविशिष्टस्तु वाक्यार्थः ॥ १-२-४२ ॥(सि)

(सिद्धान्तः)

सिद्धान्तस्तु—नोच्चारणार्था मन्त्राः । तथाहि—उच्चारणं प्रति मन्त्राणां विषयतासम्बन्धेन कारणत्वात् उच्चारणस्य मन्त्रजन्यत्वेऽपि तस्य क्रत्वनपेक्षितत्वेनादृष्टार्थत्वापत्तेः, दृष्टे सम्भवत्यदृष्टकल्पनस्यान्याय्यत्वाच्च, उच्चारणस्य द्वारत्वानुपपत्तेः मन्त्राणां च श्रुत्यादिबोधितक्रत्वङ्गभावानां साक्षाद्व्यापारं विना क्रत्वङ्गत्वानुपपत्तेः, व्यापारापेक्षायामर्थाभिधानमेव व्यापारत्वेनाङ्गीक्रियते । उच्चारणस्य पुंव्यापारत्वेन मन्त्रनिष्ठत्वाभावान्मन्त्रनिष्ठस्यार्थाभिधानस्यैव तद्व्यापारत्वकल्पनौचित्याच्च । अतश्चानुष्ठेयार्थप्रतिपादकानां करणमन्त्राणां तावदनुष्ठानहेतुभूतस्मृतिजनकत्वात् कर्मौपयिकार्थाभिधानस्य तेषु व्यापारत्वं सुलभमेव ।

यत्रापि मन्त्रात्स्वरसतो नानुष्ठेयार्थावगतिः, इतिकरणादिना च मन्त्रो विनियुज्यते (१)"इषे त्वेति शाखामाच्छिनत्ति" (२)"चतुर्होत्रा पौर्णमासीमभिमृशेत्" "याज्यया यजती"त्यादौ तत्रापि शब्दस्यार्थाभिधानद्वारं विना दृष्टविधयाऽन्यद्वारा करणत्वासम्भवादध्याहारादिनाऽप्यर्थाभिधानस्यैव व्यापारत्वम् ।

क्रियमाणानुवादिषु तु(३) "युवा सुवासा" इत्यादिषु यद्यप्यर्थाभिधानं न स्वरसतः कर्मविध्यपेक्षितम् , तथाऽपि यूपपरिव्याणादिक्रियाया अनेकक्षणव्यासक्तत्वेन कदाचिन्मध्येऽपि बुद्धिविच्छेदे सति स्मृतिसिध्यर्थं स्मारकापेक्षोपपत्तेः, अनाकाङ्क्षितत्वेऽपि वा मन्त्राकाङ्क्षयैव कर्मणामप्याकाङ्क्षोत्थापनसम्भवात् कर्मणोऽप्याकाङ्क्षां परिकल्प्यानुष्ठीयमानकर्मस्मृतिदार्ढ्यहेतुत्वेन दृष्टविधयैव मन्त्रान्वयोपपत्तौ अदृष्टार्थोच्चारणार्थत्वकल्पनानुपपत्तेरर्थाभिधानस्यैव व्यापारत्वम् ।

अत एव "युवा सुवासाः परिवीत आगादित्याह" त्याहशब्दस्य ब्रूञादेशत्वेन वच्यपरपर्यायब्रूञर्थपरिभाषणरूपार्थाभिधानपरत्वादाहशब्देन विनियोगोऽप्यवकल्पते । अत एवानुमन्त्रणजपादिमन्त्रेष्वपि वेदे प्रायश आहशब्दोपबन्धादर्थाभिधानव्यापारकत्वसिद्धिः । अतएवोक्तं(४) तन्त्रसारे—

---

१. आप. श्रौ १. १. ११. आपस्तम्बश्रौतसूत्रस्यार्थतोऽनुवादोऽयम्।
२. आप. श्रौ. २. ११. ५. ३. ऋ. सं. ३. १. ३.
४. ग्रन्थोऽयं न्यायसुधाकारेण भट्टसोमेश्वरेण रचित इति तत्र तत्र ग्रन्थेषूल्लेखनादवगम्यते । परं तु अनुपलम्भदोषदूषितः ।

"इत्याहोपनिबन्धश्च मन्त्राणां दृश्यते विधिः ।
ब्रूयादेशश्चाहशब्दस्सोऽभिधानाभिधायक" इति ॥

(१)न्यायसुधायामपि—

"सर्वसाधारणत्वेन विचारस्य प्रयोजनम् ।
कर्मकाले ऽनुसन्धेयो मन्त्रार्थोऽर्थपरत्वत" इति ॥

तत्रानुमन्त्रणमन्त्रेषु तावत् कृतस्यापि यागादेरकृतत्वशङ्कायां (२)"यदेव श्रद्धया करोति" सेतद्वाक्यविहितश्रद्धाभावनिमित्तवैगुण्यापत्तेस्तन्निवृत्त्यर्थं कृतप्रत्यवेक्षापेक्षत्वात् । अनपेक्षत्वेऽपि वा पूर्ववदाकाङ्क्षोत्थापनेनानुष्ठितकर्मस्मृतिदार्ढ्यहेतुत्वकल्पनात् दृष्टविधयैवार्थाभिधानव्यापारकत्वम् । अत एव—

"मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरन् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम्" ॥

इति तल्लक्षणमपि सङ्गच्छते ।

एवं च यत् तन्त्ररत्नेऽनुमन्त्रणमन्त्राणामदृष्टार्थत्वमुक्तं पञ्चमे, तदनादरादिति(३)तत्रैवोपपादयिष्यामः ।

एवं यत्रापि प्रमाणान्तरेण करणमन्त्रादीनामपि समुच्चयावगमः, तत्राऽप्येकेन स्मृतिसिद्धावन्येषां पूर्ववदाढ्यार्थत्वकल्पनादृदृष्टविधयैवाभिधानव्यापारकत्वम् ।

एवं प्रोत्साहनार्थानामपि (४)"अगन्म सुव" रित्यादीनां श्रद्धाजननार्थमननुष्ठेयस्यापि कर्मसमवेतस्य फलादेस्स्मृतेरपेक्षितत्वात्तदर्थत्वेन दृष्टविधयैवोक्तव्यापारसिद्धिर्नवमे(५)भाष्य एवो-

१. न्याय सु. पृ. ९८. २. छा. उ. १. १. १०.
३. भाट्टदीपिकायां पञ्चमप्रथमस्य तृतीयाधिकरणे ।
४. तै. सं. १. ६. ६. । ५. पू. मी. ९. १. ३.

पपादिता। उपस्थानमन्त्रेषु तु अभिधानार्थत्वं (१)सप्तम एवोपपा-
दयिष्यते।

एवं स्तोत्रशस्त्रमन्त्राणामपि गुणरूपस्तुत्यङ्गत्वेन क्रमादि-
नाऽवगतानां स्पष्टमेवाऽभिधानार्थत्वम्। अभिधानरूपयोः स्तो-
त्रशस्त्रयोः परमारादुपकारकत्वं (२)द्वितीये साधितमित्यविरोधः।

नचैवं "सूक्तं शंसती"त्यादौ सूक्तस्याभिधानं प्रति कर्म-
त्वासम्भवात्, अतएव शक्त्या अर्थप्राप्त्यभावेन सक्त्वादिव-
ल्लक्षणया विनियोगभङ्गशङ्कानुपपत्तेरगत्या शंसतेरुच्चारण-
लक्षकत्वावसायात्, उच्चारणे च सूक्तादीनां कर्मत्वोपपत्तेरु-
च्चारणार्थत्वमेव युक्तमिति वाच्यम्। 'गां दोग्धि पय' इत्यादिवत्

"दुह्याच्पच्दण्ड्रुधि प्रच्छि चि ब्रूञ्शासु जि मथ्मुषाम्।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्"॥

इति महावार्तिकात् (३)"अकथितं चे"ति सूत्राच्च, दुहादिधातू-
नां कर्मकारकेण युक्तस्याऽप्यपादानादिकारकविशेषैरविवक्षितस्य
कर्मसंज्ञास्मरणात्, "अर्थनिबन्धनेयं संज्ञे" ति स्मरणाच्च ब्रूञ्स-
मानार्थकस्य शंसतेरपि कर्मकारकेण गुणेन युक्तस्य सूक्तादेः
कर्मसंज्ञोपपत्तेर्द्वितीयाविरोधाभावात्।

न च सूक्तस्यास्मिन्वाक्ये करणत्वरूपकारकविशेषस्य विव-
क्षितत्वात् कर्मसंज्ञानुपपत्तिः; सूक्तस्य क्रमादिप्रमाणान्तरेण
शास्त्राङ्गत्वस्य सिद्धत्वादस्मिन्वाक्येऽविवक्षायामपि बाधका-
भावात्। शंसतेरुच्चारणलक्षकत्वे "देवताश्शंसती" त्यत्र
देवतानामुच्चारणकर्मत्वस्य कथमप्यनुपपत्तेश्च। अत उपपन्नं

१. पू. मी. ७. ३. १२. २. पू. मी. २. १. ६. ३. पा. सू. १. ४. ५१.

स्तोत्रशस्त्रमन्त्राणामप्यर्थाभिधानार्थत्वम् ॥

जपादीनां तु "वैष्णवीमृचमनूच्य वाचं यच्छती"त्यत्रानूच्येति वच्यर्थाभिधानार्थत्वस्य स्फुटमवगमात्, "याः पुरस्तादिति जपे" दित्यादावपि "जपव्यक्तायां वाची" त्यनेन वच्यर्थाभिधानार्थत्वावगमात्, अर्थस्य च कर्मासमवेतत्वेऽपि तदभिधानस्यादृष्टार्थत्वोपपत्तेः, न मन्त्राणामुच्चारणार्थत्वं कल्पनीयम्। अत एव(१)"मन्त्रो हीनस्स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह" इत्यादीनि स्वरयुक्तजपादिमन्त्राणामप्यर्थपरत्वलिङ्गानि सामान्यतः प्रवृत्तानि न सङ्कोचितानि भवन्ति।

यत्तु (२)द्वादशे जपादीनामदृष्टार्थत्वमुक्तम्, तन्मन्त्रसाध्यार्थाभिधानस्यादृष्टार्थत्वाभिप्रायेण। अस्तु वा जपादीनां कर्मासमवेतार्थाभिधायिनामुच्चारणमात्रार्थत्वम्, नैतावता कर्मसमवेतार्थाभिधायिनामपि करणमन्त्रादीनां दृष्टविधयोपयोगसम्भवेऽदृष्टार्थोच्चारणार्थत्वकल्पना युक्ता। न चानुष्ठेयार्थस्मृतेर्ध्यानाद्युपायान्तरेणापि सिद्धेर्मन्त्रानर्थक्यम्। मन्त्राम्नानानुपपत्त्या मन्त्रेणैव स्मर्तव्यमिति नियमकल्पनात्। तस्य चावघातनियमस्येव दृष्टासम्भवेनादृष्टार्थत्वकल्पनोपपत्तेरुपायान्तरानिवृत्तिसिद्धेः। यथा च क्रियाजन्यादृष्टकल्पनापेक्षया नियमादृष्टकल्पने लाघवं तथा(३)द्वितीय उपपादयिष्यामः।

यत्तु वाचकमन्त्रस्मरणस्यार्थस्मरणाधीनत्वेन वैपरीत्यमुक्तम्, तत् पूर्वपदार्थस्यैव मन्त्रस्मारकत्वोपपत्तेर्नावश्यमर्थस्मरणाधीनत्वमिति परिहर्तव्यम्।

---

१. पा. शि. ५२. २. पू. मी. १२. ४. १. ३. पू. मी. २. १. ३.

यदपि करणमन्त्रे द्वित्राणामेव पदानां कर्मसमवेतार्थाभिधायित्वेऽपीतरेषां "देवस्यत्वे" त्यादीनामुच्चारणार्थत्वमावश्यकमिति तदपि "देवस्यत्वे" त्यादिपदानामेवोच्चारणमात्रार्थत्वे भिन्नप्रयोजनकत्वेन "निर्वपामि" पदैकवाक्यताभङ्गापत्तेस्तद्वशाद्देवस्यत्वेत्यादिपदार्थविशिष्टनिर्वापप्रकाशनस्यैवाभ्युदयकारित्वकल्पनया तेषामपि स्वार्थाभिधायकत्वस्य(१)नवमे वक्ष्यमाणत्वादकिञ्चित्करम् । तेन सिद्धं मन्त्राणामर्थप्रत्यायनार्थत्वम् ।

नचैवं मन्त्राक्षरानुसन्धानमात्रेणैव मन्त्रार्थानुसन्धानसिद्धेः कर्मकाले मन्त्रोच्चारणानापत्तिः, मन्त्राणां तदनुसन्धानस्य वा स्वतः पुरुषव्यापाराविषयत्वेन मन्त्रविनियोजकविधिविषयत्वायोगात् विधिविषयत्वसिद्ध्यर्थं मन्त्रविषयोच्चारणस्यावश्यं कल्पनीयत्वात् ।

नचैवमनुसन्धानानुकूलव्यापारस्यैव विधिविषयत्वं कल्प्यतां किमुच्चारणेनेति वाच्यम् ? उच्चारणस्य मन्त्रविषयत्वात्, मन्त्रविषयकानुसन्धानजनकव्यापारापेक्षया प्रत्यासन्नत्वेन तस्यैव मन्त्रविनियोजकविधिविषयत्वौचित्यात् । उच्चारणविधानाभावे उच्चारणैकान्तिकोच्चैष्ट्वादिस्वरविध्यनुपपत्तेश्च ।

अत एव(२) "मिथ्या प्रयुक्त" इति प्रयोगरूपोच्चारणानुवादोऽप्युपपद्यते । तेन कर्मकाले उच्चारणसंस्कृतानामेव ऋगादिमन्त्राणामुपयोग इति सिद्धम् ।

साममन्त्राणां तु गीत्यात्मकत्वेनार्थाभावात्तदभिधानद्वारोपयोगासम्भवेऽपि ऋगक्षराभिव्यक्तिद्वारा गुणाभिधानरूपस्तोत्रकरणत्वात् दृष्टविधयैवोपयोगसम्भवे नादृष्टार्थोच्चारणप्रयोजनकत्वकल्पना युक्तेति(३)नवमे निरूपयिष्यते । अतएव

---

१. पू. मी. ९. १. १२. २. 'मन्त्रो हीन' इत्यस्य खण्डोऽयम् ।
३. पू. मी. ९. २. २.

"साम्ना स्तुवीते" ति तृतीयया साम्नः स्तोत्रं प्रति करणत्वमुक्तम्।

न चैवं साम्नस्सन्ध्यक्षरेषु विश्लेषरूपऋगक्षराभिव्यक्तिजनकत्वेऽपि तदभाव एव सन्ध्यक्षरैर्गुणाभिधानरूपस्तोत्रजननात् कथं स्तोत्रकरणत्वं साम्न इति वाच्यम्? प्रगीतमन्त्रसाध्यगुणसम्बन्धाभिधानव्यक्तेरेवाभियुक्तप्रसिध्या स्तोत्रपदवाच्यत्वात्। अन्यथा शस्त्रादावपि गुणाभिधानस्य सत्वेन स्तोत्रपदप्रयोगापत्तेः। तादृशस्य च गीतिरूपसामाभावेऽनिष्पाद्यमानत्वेन करणत्वोपपत्तेः। अतश्चार्थाभिधानविशेषकरणत्वं साम्नामप्यव्याहतमेव।

यश्चाऽत्र(१)स्तोभाक्षराधिरूढो गीत्यंशः, तस्यार्थाभिधानकरणत्वासम्भवाददृष्टार्थत्वम्। अतश्च रथन्तरादिसाम्नामाश्रयिकर्मवदुभयार्थत्वम्। यानि त्वनृक्कानि प्रजापतिहृदयादीनि, तेषां स्तोभाक्षराधिरूढत्वात्, स्तोभाक्षराणां चाभिधेयशून्यत्वस्य नवमे(२) वक्ष्यमाणत्वात् नाऽर्थाभिधानरूपस्तोत्रकरणत्वमित्यगत्या सामविनियोगानुसारेणोच्चारणमात्रद्वाराऽदृष्टार्थत्वमेव।

न च तत्राऽपि स्तोभाक्षराभिव्यक्त्यर्थत्वेन साम्नो दृष्टार्थत्वमेव, स्तोभाक्षराणामेव परमुच्चारणद्वाराऽदृष्टार्थत्वकल्पनाऽस्त्विति वाच्यम्; स्तोभाक्षराणां गीतिकालपरिच्छेदकत्वेन दृष्टार्थत्वस्य (३)नवमे वक्ष्यमाणस्य सामान्तरेष्विवाऽनृक्सामस्वपि सम्भवेनाऽदृष्टार्थत्वकल्पनायां प्रमाणाभावात्। न च विनिगमनाविरहः, अनृक्साम्नां चयनादिकर्मणि विनियोगस्यैव विनिगमकत्वात्। अन्यथा हि स्तोभानामेव विनियोगः क्रियेत न साम्नां, अर्थसिद्धत्वात्। तत्सिद्धं सर्वमन्त्राणां प्रयोजनवत्त्वम्।

---

१. स्तोभलक्षणं नवमे (९-२-१०.) द्रष्टव्यम्। २. ३. पू.मी.९.२.९.
१० मी० कौ०

नन्वेवं प्रयोजनवत्त्वे सिद्धेऽपि कथं प्रामाण्यम् ? न तावदनधिगतार्थगन्तृत्वलक्षणम्, विधिनाऽधिगतस्यैवाऽर्थस्य स्मरणात् । अत एवानुभावकत्वाभावान्न प्रमाकरणमिति चेत्—

अत्र भवदेवः—न प्रतिवेदवाक्यमनाधिगतार्थगन्तृत्वमुपपादनीयम् । (१)"य एवं विद्वान् पौर्णमासीं यजत" इत्यादावनुवादकत्वेन तदभावात् । किं तर्हि धर्मप्रमित्युपयोगित्वम् ? तच्च विद्वद्वाक्यस्येव मन्त्राणामप्युक्तविधया सम्भवत्येवेति नाप्रामाण्यशङ्केति । तत्र यद्यपि मन्त्रब्राह्मणसमुदायात्मके ग्रन्थविशेषे वेदत्वमेकं न प्रत्येकवाक्यवृत्ति, तथाऽपि न तदनाधिगतार्थगन्तृत्वप्रयोजकम्; अपि तु लौकिकवाक्यवद्वाक्यत्वमेव । अतश्च तस्य प्रत्येकवृत्तित्वाद्विधिवाक्यस्याऽनधिगतार्थगन्तृत्वसिद्धावपि मन्त्रवाक्यस्य तदासिद्धेरप्रामाण्यप्रसङ्गः । (२)"वेदोऽखिलो धर्ममूल" मित्यादिस्मृत्या अखिलवेदस्य धर्ममूलत्वस्मरणानुपपत्तिश्च ।

किञ्च मन्त्रजन्यस्मरणस्य धर्मोत्पत्त्युपयोगित्वेऽपि न धर्मप्रमोत्पत्त्युपयोगित्वम्, तदभावेऽपि विधिवाक्याद्धर्मप्रमोत्पत्तेर्जायमानत्वात् । अतो मन्त्राणां न परम्परयाऽपि धर्मप्रमोत्पत्त्युपयोगित्वम् । विद्वद्वाक्यस्य परम्परया धर्मप्रमोत्पत्त्युपयोगित्वेऽपि साक्षादप्यनधिगतार्थगन्तृत्वं समुदायप्रतीतेरनन्यलभ्यत्वादस्तीति वैषम्यम् ।

(३)सोमेश्वरस्तु—'बर्हिर्देवसदनं दामी' त्यादावपूर्वसाधनीभूतबर्हिर्लवनाङ्गत्वं मन्त्रसामर्थ्यादेवावगम्यत इति मन्त्रः स्वाङ्गत्वबोधे प्रमाणम् । क्वचिच्च मान्त्रवर्णिकद्रव्यदेवतायागादिकल्पनेऽपि प्रमाणम् । तच्च तत्र तत्राऽधिकरणे स्पष्टीभविष्यति ।

१. तै. सं. १. ६. ९. २. मनु. २. ६. ३. न्यायसु. पृ. ९८.

सर्वसाधारण्येन तु मन्त्रार्थाऽनुसन्धानकर्तव्यताविषये प्रामाण्यम्। मन्त्र एव हि स्वाङ्गत्वसिध्यर्थं स्वनिष्ठमर्थाभिधानाख्यं व्यापारं कल्पयतीति तत्र प्रामाण्यमित्याह ।

तदपि न, अर्थाऽनुसन्धानजनकत्वेन वा मन्त्राणां प्रामाण्यं मन्यसे ? अर्थाऽनुसन्धानरूपव्यापारकल्पकत्वेन वा ? नाद्यः ; अनुसन्धानस्य जपमन्त्रेष्वनधिगतविषयत्वेऽपि करणादिमन्त्रेष्वधिगतविषयत्वात् स्मृतिरूपत्वेन तज्जनकस्य प्रमाणत्वानुपपत्तेः । नान्त्यः; लिङ्गादिविनियुक्तेषु स्वयं तत्कल्पकत्वेऽपि स्तोत्रशस्त्रादौ 'आहे' त्येवं विनियुक्तेषु च त्वयैवाभिधानस्य क्लृप्तत्वाभिधानेनाऽव्यापकत्वात् । किञ्च साममन्त्रेष्वेवमप्यव्याप्तिर्दुर्वारा। तेषामर्थाभावेन तदनुसन्धानाजनकत्वात् । अथ तेषामपि प्रगीतमन्त्रसाध्यगुणाभिधानरूपस्तोत्रलक्षणशाब्दप्रमाजनकसामग्र्यन्तर्गतत्वेन प्रामाण्यं, ततोऽप्यनृक्साम्नां तदभावादप्रामाण्यापत्तिस्तदवस्थैव ।

एतेन मन्त्राणां स्मारकत्वेनानुभावकत्वघटितप्रमाकरणत्वरूपप्रामाण्याभावेऽपि यथार्थज्ञानकरणत्वलक्षणं प्रामाण्यं सम्भवत्येवेति कैश्चिदुक्तमपास्तम्; अनृक्सामसु तस्याप्यसम्भवात् ।

अत एवं वाच्यम्—सर्वत्र गामानयेत्यादौ संसर्गविषयकशाब्दबोधं प्रति यथा शब्दः करणं, पदार्थज्ञानमवान्तरव्यापारः तथा पदार्था एव करणम्, तज्ज्ञानमवान्तरव्यापारः । शब्दस्तु पदार्थज्ञानं प्रति करणत्वेनोपक्षीण इत्यपि मतान्तरमाचार्यैस्तर्कपादे

(१)पदार्थानां तु मूलत्वं युक्तं तद्भावभावतः'

१. श्लो. वा. अ. ७. श्लो. १११. पृ. ८७७.

इत्यादिनोपपादितम् । न च भूतभाविपदार्थानां नियतपूर्ववृत्तित्वाभावात्करणत्वानुपपत्तिः, भूतभाविपदार्थानां स्वरूपेणाऽविद्यमानानामपि ज्ञानविषयत्वेन सत्वाज्ज्ञाततायामिव शाब्दबोधं प्रत्यपि करणत्वोपपत्तेः ।

अत एवोक्तं न्यायसुधाकृता—'अतीतानागतयोरत्यतिक्रान्तदिवसादिगतसङ्ख्यादिवज्ज्ञाततायां करणत्वोपपत्ति'रिति । नैयायिकमते मौनिवाक्यस्थले शब्दस्याऽप्यविद्यमानत्वाच्च । अतश्च यथा ज्ञानविषयत्वेनैव शब्दस्य करणत्वोपपत्तिः, तथा मन्मतेऽप्युपपत्तिः । तेन पदार्थानामपि शाब्दप्रमितिकरणत्वात्सर्वमन्त्राणाञ्च स्वविनियोगविधौ प्रयोगविधौ च पदार्थत्वेनान्वयाद्धर्मविषयकशाब्दप्रमाकरणत्वोपपत्तेर्युक्तं प्रामाण्यम् ।

न चैवं व्रीह्यादीनामपि पदार्थविधया प्रामाण्यापत्तिः, इष्टापत्तेः । न च (१)'चोदनालक्षणोऽर्थो धर्म' इत्यस्मिन् सूत्रे धर्मे चोदनारूपस्य वेदशब्दस्यैव प्रामाण्यमिति नियमकरणात् व्रीह्याद्यर्थस्य प्रामाण्याङ्गीकारे च तद्भङ्गापत्तिरिति वाच्यम् । तत्रत्यचोदनाशब्दस्य (२)'चोदनेति क्रियायाः प्रवर्तकं वाक्यम्' (३)'चोदनाचोपदेशश्च विधिश्चैकार्थवाचिन' इति भाष्यवार्तिकस्वरसाद्विधिमात्रवचनत्वेन तस्मिन् सूत्रे ईदृशानियमाकरणात् । अत एव तत्सूत्रं न प्रथमाध्यायार्थप्रतिज्ञापरम्, अपि तु प्रथमपादव्युत्पाद्यविधिप्रामाण्यप्रतिज्ञापरमेवेति(४) स्मृत्यधिकरणे वक्ष्यामः। नियमोऽपि तेनेदृश एव क्रियते—धर्मे एव प्रमाणं चोदनेति । यद्यपि च चोदनैव प्रमाणमित्यपि नियमः क्रियेत, तथाऽपि प्राधान्येन सैव प्रमाणमित्येवंपरो द्रष्टव्यः । न त्वेतावताऽन्येषां

---

१. जै. सू.१. १. २. २. शा. भा. पृ. ३. पं. ९.
३. श्लो. वा. अ. ५. श्लो. ११. पृ. २११. ४. पू. मी. १. ३. १.

प्रामाण्यनिषेधः । तस्मात्सिद्धं पदार्थविधया सर्वमन्त्राणां प्रामाण्यमिति ।

अस्तु वा मन्त्राणां प्रमाजनकत्वाभावेऽप्युक्तविधया प्रयोजनवत्त्वमात्रेणैवोपयोगो धर्मे, तावतैवाध्ययनविधेरुपपत्तेरुपयोगविशेषविचार एव मन्त्राधिकरणशरीरम् । अर्थवादोपयोगप्रसङ्गाच्चाध्यायासङ्गतोऽप्यर्थो नासङ्गत इति द्रष्टव्यम् । साङ्गवेदोपयोग एव वा जिज्ञासितत्वादध्यायार्थ इत्यपि सुवचम् । उपयोगोऽपि मन्त्राणां प्रायशो धर्म एव, नत्वधर्म इत्यपि च ध्येयम् ।

सूत्रं तु—यथैव लोके वाक्यस्य वाक्यार्थप्रमापकत्वं दृष्टं, तथा तन्मन्त्रेष्वप्यविशिष्टमिति व्याख्येयम् ।

यत्तु लिङ्गादेव विनियोगोपपत्तौ पुनः क्वचित्तद्विषये विनियोजकशास्त्रवैयर्थ्यमिति तन्न; (१)तत्र शास्त्रस्य मन्त्रविनियोजकत्वानभ्युपगमात् ॥ ४२ ॥

ननु तर्हि(२) "तां चतुर्भिरादत्त" इत्यत्रादानस्यार्थप्राप्तत्वात्, मन्त्राणां च तत्र लिङ्गादेव प्राप्तेः, सङ्ख्यायाश्चादाने मन्त्रे वा विधातुमशक्यत्वस्य (३)पूर्वमेवोक्तत्वात्, विधेयाभावेन पुनश्श्रवणानर्थक्यमिति चेत्—

गुणार्था वा पुनश्श्रुतिः ॥ १-२-४३ ॥

श्रुतार्थानुपपत्तिरूपस्याक्षेपस्य श्रुतिकल्पनाधीनप्रामाण्यस्य लिङ्गस्य वा प्रत्यक्षश्रुत्यपेक्षया मन्थरप्रवृत्तित्वात्, ततः पूर्वमेव प्रत्यक्षश्रुत्या मन्त्रसङ्ख्योभयविशिष्टादानविधानोत्तरं(४)अरुणैकहायनीन्यायेन मन्त्रसङ्ख्ययोः पार्ष्ठिकान्वयोपपत्तावर्थात्स-

१. तत्रेति नास्ति. ख. पु.   २. तै. सं. ५. १. १.
३. अस्मिन्नेवाधिकरणे 'तदर्थं' सूत्र इत्यर्थः ४. पू. मी. ३. १. ६.

मुख्यसिद्धेः एतद्विध्यभावे(१)चाक्षेपमन्त्रलिङ्गाभ्यामादानम-न्त्रयोः प्राप्तिसम्भवे तद्विषये विधिप्रवृत्तिफल आलोच्यमानेऽन-न्यलभ्यसङ्ख्याविधानार्थं तच्छ्रवणमिति फलावधारणात् वस्तुतो विशिष्टविधिरूपत्वेऽपि फलतो गुणविधानार्था पुनः-श्श्रुतिः। न चात्र "चतुर्भि" रिति तृतीयया चतुर्णामपि म-न्त्राणां करणमन्त्रत्वावगतेराद्यमन्त्रत्रयजन्यस्मृतेश्च नष्टत्वेना-न्तिममन्त्रोच्चारणानन्तरक्रियमाणक्रियां प्रति करणत्वानुपपत्तिः। (२)"तुषपक्वा भवन्ती"त्यादौ परम्परयाऽपि करणत्वस्य बहुशो दृष्टत्वेनाऽऽद्यानां त्रयाणां संस्कारद्वाराऽपि करणत्वोपपत्तेः ॥४३॥

परिसङ्ख्या ॥ १-२-४४ ॥

"इमामगृभ्णन्" नित्यादेश्च परिसङ्ख्यार्थत्वेन न वैयर्थ्यम्। न च परिसङ्ख्यायां(३) त्रैदोष्यं, अप्राप्तपरिसङ्ख्याङ्गीकारात्। तथाहि—यावल्लिङ्गेन श्रुतिं कल्पयित्वा मन्त्रस्य रशनाद्वयादा-नाङ्गत्वमवगम्यते, तावदश्वाभिधान्यङ्गत्वेन प्रत्यक्षया श्रुत्या म-न्त्रस्य विनियोगान्न तावत्स्वार्थस्य विधेयत्वहानिः; अश्वाभि-धान्यङ्गत्वस्य प्रागवचनादस्मादप्राप्तेः। अत एव गर्दभाभिधान्य-ङ्गत्वनिवृत्तिरूपपरार्थस्य विधेयत्वं न कल्प्यम्, तस्याः प्रापकप्र-माणाभावादेव सिद्धेः। अत एव प्राप्त्यभावान्न प्राप्तबाधोऽपि। अतोऽत्राश्वाभिधान्युद्देशेनैव मन्त्रो विधीयते। आदानं त्वर्थप्रा-प्तमनूद्यते। अतश्च पूर्ववद्विधिप्रवृत्तेः फल आलोच्यमाने लिङ्ग-कल्प्यश्रुतिप्रतिबन्धद्वारा गर्दभरशनानिवृत्तेः फलत्वकल्पनात् फलतः परिसङ्ख्येति भाष्यकाराभिप्रायः।

---

१. भावेऽपि चेति. ख. पु. २. तै. सं. ५. २. ४. निर्ऋतिदेवताकाः तिस्र इष्टकास्तुषैः पक्वा भवेयुरित्यर्थः। ३. त्रैदोष्यापत्तिरिति. ख. पु.

वार्तिककारास्तु–याव(१) दादानमपि प्राप्यते तावत्प्रत्यक्षया श्रुत्या मन्त्रविशिष्टादानस्यैवाश्वाभिधान्यङ्गत्वेन विध्युपपत्तौ न धातुपारार्थ्यम् । कारकयोश्च मन्त्राऽश्वाभिधानीरूपयोरन्योन्यसम्बन्धो युक्तः । न च विशिष्टविधौ षष्ठविधिप्रकारापत्तेर्भाष्यकाररीत्या चतुर्थविधिप्रका(२)राश्रयणमेव युक्तमिति वाच्यम् । आक्षेपतोऽपि पूर्वं शीघ्रप्रवृत्तिकस्याऽऽक्षेपप्रतीक्षायां प्रमाणाभावेन तस्यामवस्थायामादानस्य प्राप्त्यभावेन विशिष्टविधित्वोपपत्तेः अन्यफलकत्वेनाऽस्य विशिष्टविधेर्दोषत्वाभावाच्च । अतो मन्त्रविशिष्टादानस्याऽश्वाभिधानीसंस्कारार्थत्वेन विधानाद्गर्दभाभिधान्यादानेऽप्राप्ते त्रैदोष्याप्रसङ्गात् वस्तुतोऽपूर्वविधित्वेऽपि पूर्ववत् फलतः परिसङ्ख्यात्वव्यपदेशसिद्धिः । अत एव सर्वत्रापूर्वविधित्वेऽपि यत्रैवाप्राप्तप्रापणं विधिप्रवृत्तेः फलं स एवापूर्वविधिशब्देन व्यपदिश्यते । यत्र त्वप्राप्तांशपूरणं तस्याः फलं स नियमविधिपदेना(३)भिधीयते ।

अत एव "व्रीहीनवहन्ती" त्यत्र यावदर्थाक्षेपात्पुरोडाशनिष्पत्त्यर्थं वितुषीभावजनकत्वेन विदलनादिसाधारण्येनावघातः पक्षे प्राप्यते, तावत्पूर्वमेव प्रत्यक्षया श्रुत्याऽवघाते विधीयमाने न तत्प्राप्तिरेव तत्र विधिप्रवृत्तेः फलम् । एतद्विध्यभावेऽर्थाक्षेपादेवावघातस्य प्राप्तिसम्भवात् । किन्तु यथाऽवघातोऽर्थाक्षेपात्प्राप्यते, तथा विदलनादिकमपि विकल्पेन । अतश्च विदलनादिप्राप्तिपक्षेऽवघातस्याऽप्राप्तत्वात् तदप्राप्तांश(४)प्रापणरूपो नियम एव विधेः फलम् । न च विदलनादिनिवृत्तिरेव विधेः फलं किं न स्यादिति वाच्यम् ? अप्राप्तांशप्रापणरूपस्य नियमस्याक-

१. यावदर्थादा इति. क. पु. २. राङ्गीकरणमिति. क. ख. पु.
३. अभिधीयत इति नास्ति. ख. क. पु. ४. पूरण इति. क.ख. पु.

रणे उपायान्तराक्षेपस्य निराकर्तुमशक्यत्वात् । करणे चार्थादेवान्यनिवृत्तेस्सिध्युपपत्तेः फलत्वायोगात्, नियमस्य विधेयावघातगतत्वेन प्रत्यासन्नत्वाच्च ।

यत्र तु प्रत्यक्षविध्यभावे द्वयोश्शेषयोरेकस्मिन् शेषिणि शेषिद्वये वैकस्य शेषस्य नियता प्राप्तिर्दुर्बलप्रमाणेन सम्भाव्यते, यथा गृहमेधीये आज्यभागप्रयाजयोरतिदेशेन, प्रकृतमन्त्रस्य वाऽश्वगर्दभरशनादानयोर्लिङ्गेन, तत्र प्रत्यक्षविधेः (१)प्रवृत्तत्वात् । वस्तुतोऽपूर्वविधित्वेऽपि(२) "आज्यभागौ यजती" त्यनेन विहिताभ्यां क्लृप्तोपकाराभ्यामाज्यभागाभ्यामेव गृहमेधीयाकाङ्क्षानिवृत्तेरतिदेशाकल्पनात् फलतः प्रयाजादिशेषान्तरनिवृत्तिः ।

"इमामगृभ्णन्" न्नित्यस्य च प्रत्यक्षश्रुत्याऽश्वरशनादान एव विनियुक्तस्य निराकाङ्क्षत्वेन लैङ्गिकश्रुत्यकल्पनादर्थाद्गर्दभाभिधानीरूपशेष्यन्तरानिवृत्तिः । अत्र हि विधेयस्य नियतप्राप्तत्वान्नै(३)तत्प्राप्तिर्नियमो वा फलम्, अपित्वन्यनिवृत्तिरेवाऽगत्या फलत्वेनाऽऽश्रीयते । अतः फलतः परिसङ्ख्याङ्गीकरणान्न त्रैदोष्यमित्याहुः ।

यत्र तु प्रापकप्रमाणोत्तरं शास्त्रप्रवृत्तिः यथा(४)"पञ्च पञ्चनखा भक्ष्या" इत्यादौ, तत्र त्रैदोष्यम् । तत्र भक्षणस्य रागप्राप्तत्वात्, ततः (५)पूर्वमेव विधाने फलकल्पनापत्तेः, अभक्ष्यप्रक्रमाच्चाविधेयत्वात् स्वार्थहानिः । पञ्चातिरिक्तपञ्चनखभक्षणस्यापि रागप्राप्तत्वान्निवृत्तेश्शास्त्रमन्तरेणासिद्धेः(६) विधेयत्वकल्पना । अत एव प्राप्तबाधोऽपि । प्रापकप्रमाणोत्तरं प्रवृत्ता-

१. पूर्वप्र. इति. क. ख. पु.
२. मै. सं. १. १०. १५.
३. न तदिति क. पु.
४. वाल्मी. रा. कि. १७. ३९.
५. पूर्वमेव चेति क. ख. पु.
६. विधिविधेयत्व इति. ख. पु.

वपि च यत्र नञादिश्रवणमेवकारो वा, तत्र प्राप्तपरिसङ्ख्यायामपि स्वार्थहानिपरार्थकल्पनयोरभावान्न त्रैदोष्यम् । यथा (१)"नाऽनृतं वदेत्" "अत्र ह्येवाऽऽवपन्ती" त्यादौ ।

यत्तु न्यायसुधायामेवकारस्थले श्रौतो नियम इत्युक्तम्, तत् 'सत्यमेव वदे' दित्यादौ सत्यवदनस्य नियतप्राप्त्यभावादेवकारस्याऽयोगव्यावृत्त्य(२)भिप्रायेण ।

यत्र तु नियता कर्तव्यस्य प्राप्तिस्तत्रायोगव्यावृत्त्यसम्भवादन्ययोगव्यावृत्त्यर्थकत्वमादाय श्रौतपरिसङ्ख्यात्वमावश्यकम् । अत एव विवृद्धस्तोमकेषु "एकविंशेनाऽतिरात्रेण प्रजाकामं याजयेयु" रित्यादिवाक्यविहितेषु क्रतुषु सङ्ख्यायाः पृथक्त्वनिवेशात् तत्सम्पत्तये अनियमेन सर्वस्तोत्रेषु साम्नामृचां चागमेनावापे प्राप्ते "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्, अत्र ह्येवाऽऽवपन्ति, अत एवोद्वपन्ती" त्यनेन गायत्र्यादिष्वेवाऽऽवापो नान्यास्विति परिसङ्ख्या। अतश्च गायत्र्यादीनां पवमानेष्वेव सत्त्वात् तद्विषय एवाऽयमावापः, नान्यस्तोत्रेषु । सोऽपि च साम्नामेव न ऋचां, तासामृगधिकरणत्वस्यासम्भवात् । अतश्च तत्राऽऽगम्यमानसामाधारभूतगायत्र्यादीनामभ्यास एव । स्तोत्रान्तरेषु तु साम्नामपि नाऽऽवापः, किन्त्वभ्यासेनैव सङ्ख्यासम्पत्तिः

यद्यपि नाऽयं सामावापो बहिष्पवमाने सम्भवति, तत्र सामैकत्वस्य प्रत्यक्षशिष्टत्वात् । तथाऽपि माध्यन्दिनपवमानार्भवपवमानयोरेव गायत्र्यादिसत्त्वान्निविशते । बहिष्पवमाने त्वेकस्य साम्नोऽभ्यास एव । ऋचां तु सङ्ख्यायाः (३)पृथक्त्वनिवेशित्वात्तत्सम्पत्तये "पराग्बहिष्पवमानेन स्तुवत" इति परावछ-

१. तै. सं. २. ५. ५. २. वृत्त्यर्थकत्वाभीति. क. ख. पु.
३. पृथक्त्वेन निवेशीति. क. ख. पु.

द्वाच्यानभ्यासविधानाच्चागम एव । स्तोत्रान्तरेषु तु यद्यपि सङ्ख्यासम्पत्तये न्यायेनाऽऽगम एव प्रसक्तः, तथाऽपि बहिष्पवमाने न्यायप्राप्तऋगागमप्राप्तिफलकानभ्यासपुनर्विधिः (१)स्तोत्रान्तरे तदागमपरिसङ्ख्यार्थस्सम्पद्यत इति तेष्वृचामप्यभ्यास एव । तत्सिद्धं "अत्र ह्येवाऽऽवपन्ती" त्ययं स्तोत्रान्तरे सामागमपरिसङ्ख्यार्थ एवकार इति । एवं यत्र विवृद्धस्तोमक्रतुशेषत्वेनौपदेशिकं कौत्सादिसाम विहितम् , तत्र तस्य प्रतिप्रधानं गुणावृत्तिन्यायेन सर्वस्तोत्रेषु प्रकृतसामबाधेनापि निवेशस्य नियमेन प्राप्तत्वादत्र ह्येवावपन्तीत्ययं पवमानद्वयव्यतिरिक्तविषयपरिसङ्ख्यार्थ एव ।

न च कौत्सादेः कण्वरथन्तरादिवत्स्वयोनिष्वेव गेयत्वप्राप्तेः प्राकृतगायत्र्यादिष्वप्राप्तत्वेन परिसङ्ख्यानुपपत्तिः, कण्वरथन्तरयोर्नहि वैश्यस्तोम(२)प्रकरणपठितत्वेन तदङ्गत्वावगमात्प्राकृतऋगाधारत्वानुपपत्तिर्युक्ता । कौत्सादीनां त्वनारभ्याधीतत्वेन सत्यपि वचनेन क्रत्वङ्गत्वावगमे तदाधारभूताया योनेः प्रकरणपाठाभावेनाङ्गत्वानवगमात् प्राकृतऋगाधारत्वस्य(३)दशमे वक्ष्यमाणत्वात् । ये त्वविवृद्धस्तोमकाः क्रतवो यथा(४) "त्रिवृदग्निष्टुदग्निष्टोम" इत्यादयः तेषु सङ्ख्यानुरोधेन प्राकृतसर्वस्तोत्रेषु सर्वसामसु तदाधारभूतासु च ऋक्षु निवृत्तासु यत्तदङ्गत्वेनौपदेशिककौत्सादिसामाम्नातं तन्निवेशार्थमानियमेना(५)प्राकृतसामोद्वापे प्राप्ते 'अत एवोद्वपन्ती' त्यनेन गायत्र्यादिभ्य एवेति नियमकरणात्स एव परं श्रौतो नियमः, न तु 'अत्र ह्येवावपन्ती' त्ययम् , किन्तु श्रौतः परिसङ्ख्याविधिरेवेति सिद्धम् ।

---

१. स्तोत्रान्तरागमेति. क. पु.
२. प्रकरणे पाठेनेति. क. पु.
३. पू. मी. १०. ४. १०.
४. तां. ब्रा. १७. ६. १.
५. यतः कुतश्चित्प्रा. इति. क. ख. पु.

वस्तुतस्त्वेवकारस्यान्ययोग(१)व्यवच्छेदार्थकत्वेन श्रौतपरिसङ्ख्यारूपत्वे तस्या निषेधतुल्यतया(२) "न तौ पशौ करोती" तिवाद्विकल्पापत्तेर्नेयं श्रौती परिसङ्ख्या, अपि तु यावन्न्यायेन सर्वत्र सामागमः प्राप्यते तावत्पूर्वमेव गायत्र्याधारकत्वेन विधीयते । अतश्चाप्राप्तविधिरेवायं परिसङ्ख्याफलको न तु श्रौती परिसङ्ख्या ।

यद्यपि च गायत्र्यादिषु सामावापविधौ कृते न स्तोत्रान्तरेषु तदाकाङ्क्षाशान्तिरिति प्रापकप्रमाणप्रतिबन्धाभावान्नाऽत्र फलतः परिसङ्ख्यात्वं शक्यते वक्तुम् । तथाऽप्यत्रावापविधौ कृते तत्प्रयोजनजिज्ञासायां प्रयोजनान्तरासम्भवेन गमकविधया स्तोत्रान्तरेष्वभ्यासविधिकल्पनेन परिसङ्ख्याफलकत्वोपपत्तिः । अतश्चाऽऽवपन्ती(३)त्यत्र धात्वर्थविधिरपि सम्पद्यते । एवकारस्तु फलप्राप्तानुवादो न तु स्वार्थविधायक इति द्रष्टव्यम् । एवञ्च रागप्राप्त एवाऽर्थे यत्रैवकारस्य नञो वा श्रवणं तत्रैव श्रौती परिसङ्ख्या नाऽन्यत्र । अत एव श्रौतपरिसङ्ख्यायां 'नाऽनृतं वदे' दि(४)त्युदाहरणमुक्तं न्यायसुधाकृता । प्रकृते तु लौङ्गिकप्राप्तेः पूर्वं प्रत्यक्षश्रुतेः प्रवृत्तत्वात् फलतः परिसङ्ख्यैवेत्युक्तम् ।

यत्त्वश्वाभिधान्युद्देशेन मन्त्रविशिष्टादानविधानेऽप्यश्वाभिधानीस्वरूप आनर्थक्यादपूर्वसाधनलक्षणायामेकया प्रणाल्यैकापूर्वसाधनत्वाद्यवेष्विव गर्दभाभिधान्यामपि मन्त्रप्राप्तिरनिवार्येति, तन्न । "व्रीहीन्प्रोक्षती" त्यादौ व्रीहिपदेनाऽपूर्वसाधनत्वे लक्ष्यमाणे प्रकृतापूर्वसाधनत्वमेव लाघवाल्लक्ष्यते, न तु प्रकृतापूर्वसा-

---

१. व्यावृत्त्यर्थ इति. क. ख. पु. २. कौषी. ब्रा. ३. ५.
३. त्ययमिति क. पु. ४. त्येवोदाहरणेति. ख. पु.

धनीभूतव्रीहित्वमपीति युक्ता यवेषु धर्मप्राप्तिः। प्रकृते त्वपूर्वसाधनत्वमात्रलक्षणायां लिङ्गकल्प्यश्रुत्याविशेषेण प्रत्यक्षश्रुतिवैयर्थ्यापत्तेरगत्या प्रकृतापूर्वसाधनीभूताऽश्वाभिधानीत्वलक्षणाश्रयणान्न गर्दभाभिधान्यां मन्त्राप्राप्तिः।

न चात्राऽपि सर्वस्य यजुर्वेदस्याऽऽध्वर्यवसमाख्यानाद्यजुर्वेदाविहितपदार्थानामध्वर्युकर्तृकत्वावगतेः प्रत्यक्षश्रुत्याऽऽदानाविधाने च तदासिद्धेस्तात्सिध्यर्थमर्थप्राप्तादानविधानेन श्रुतेरर्थवत्वोपपत्तेरश्वाभिधानीत्वलक्षणायां प्रमाणाभावाद्गर्दभाभिधान्यां मन्त्रप्राप्तिरनिवार्येति वाच्यम्। रशनाबन्धनस्य प्रत्यक्षश्रुतिविहितत्वेनाध्वर्युकर्तृकत्वे सिद्धे बन्धनार्थादानस्यान्यकर्तृकत्वानुपपत्तेरध्वर्युकर्तृकत्वस्य विधिं विनैव सिद्धेः।

एतेन(१) 'यदि यजुषो यज्ञो आर्तिमियाद्भुव इति दक्षिणे' त्यस्यापि प्रायश्चित्तस्योपक्रमानुसारेण वेदधर्मत्वस्य(२)तृतीये व्यवस्थापयिष्यमाणत्वाद्विध्यभावे अविज्ञातप्रायश्चित्तापत्तेरतत्प्रायश्चित्तप्राप्त्यर्थो विधिरर्थवानिति परास्तम्। आदानविध्यभावेऽपि मन्त्रस्यैव यजुर्वेदपाठितत्वेन एतत्प्रायश्चित्तप्राप्त्युपपत्तेः। आदानभ्रेषे बन्धनभ्रेषस्याप्यवश्यम्भावेन तन्निमित्तमेतत्प्रायश्चित्तस्योपपत्तेश्च। किञ्च यथा(३)"रथन्तरे प्रस्तूयमाने सम्मीलयेत्, बृहति प्रस्तूयमाने समुद्रं मनसा ध्याये" दित्यादौ प्रतिनियतनिर्देशान्यथानुपपत्त्याऽपूर्वसाधनीभूतरथन्तरत्वादिलक्षणापक्षस्याप्याश्रयणान्न धर्माणां साङ्कर्यमिति(४)वक्ष्यते, तथाऽत्रापि(५)"युञ्जाथां रासभं युवमिति गर्दभ" मित्येवं प्रतिनि-

१. श. ब्रा. ११. ५. ८. ६.
२ पू. मी. ३. ३. १.
३. तां. ब्रा. ७. ७. १५.
४. नवमाद्वितीयचतुर्दशे
५. तै. सं. ५. १. २.

यतानिर्देशान्यथानुपपत्त्याऽश्वाभिधानीत्वादेरेव लक्षणेति न मन्त्रसाङ्कर्यम् ।

न च तत्रत्यपस्वरसकारणं कण्वरथन्तरादौ बृहद्रथन्तरधर्मप्रसक्तिरूपमत्रास्ति, अश्वाभिधानीकार्यापन्नस्य विकृतावसिद्धेः । अतो बृहद्रथन्तरस्थल एव परं पृष्ठस्तोत्रजन्यापूर्वैक्येऽपि बृहद्रथन्तरसामाश्रयतत्प्रतिपाद्यगुणाभिधानजन्यापूर्वरूपावान्तरकार्यसाधनलक्षणाश्रयणात्प्रकृतौ (१)धर्मव्यवस्थोपपत्तेः । कण्वरथन्तरे च स्वाश्रयऋग्वाच्यगुणाभिधानस्य प्राकृतगुणाभिधानजन्यापूर्वार्थत्वस्यैव लाघवेन हिरण्यगर्भमन्त्रवत्कल्पनात्प्राकृतकार्यापन्नत्वेन तत्प्रयुक्तधर्मप्राप्त्युपपत्तिः । प्रकृते त्ववान्तरकार्यभेदाभावात्प्रतिनियतनिर्देशबलादश्वाभिधानीत्वलक्षणायामपि न किञ्चिद्बाधकमस्तीति युक्तेयं परिसङ्ख्या ।

अत्र च परिसङ्ख्यादिलक्षणेषु विधिरसायनोक्तदूषणाऽनवकाशार्थमेवं यतितव्यम्—यत्र निषेधापरपर्याया निवृत्तिः शब्दतः फलतो वा शास्त्रतात्पर्यविषयीभूता, स परिसङ्ख्याविधिः । उक्तपरिसङ्ख्योदाहरणेषु लक्षणसमन्वयस्तु स्फुट एव । तत्र निषेधप्रतियोगी विधिविषयः भावरूपोऽभावरूपो वा(२)उपाधिर्यः कश्चिद्बोध्यः । तेनाऽनृतवदनगर्दभाभिधानीप्रयाजादीनां नाऽसङ्ग्रहः । न वाऽनेकाभावप्राप्तावेकाभावपरिसङ्ख्यायाः । अभावस्य परिसङ्ख्यायाश्च तत्र चान्यत्र च प्राप्तिरौत्सर्गिकी, न तु नियता । "नाऽनृतं वदे" दित्यादौ सत्यानृतयोरेकस्मिन्नर्थावबोधे पक्षप्राप्तत्वेन नियतप्राप्त्यभावात् । अत एव सा न लक्षणघटिका ।

---

१. धर्मव्यवस्थाया उप. इति. क. पु.
२. उपाधिरिति नास्ति ख. क. पु.

न चैवं " व्रीहीनवहन्ती " त्यादाववघाताभावव्यावृत्तेरपि तात्पर्यविषयत्वात्परिसङ्ख्यालक्षणस्याऽतिव्याप्तिः, यत्प्रतियोगिकाभावत्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणं, तस्य शास्त्रस्य तत्परिसङ्ख्याविधित्वमिति विवक्षितत्वात् । सर्वत्र हि परिसङ्ख्याविधौ परिसङ्ख्येयप्रतियोगिकाभाव एव तात्पर्यविषयीभूतः । नियमविधौ त्ववघाताभावाभावरूपो नियमः । अत एवाभावाभावत्वस्य तात्पर्यविषयतावच्छेदककोटिप्रविष्टत्वेऽपि पर्याप्त्यधिकरणत्वाभावान्नातिव्याप्तिः । अत एव शब्दतः फलतो वा पाक्षिकायोगव्यावृत्तिरूपो नियमो यस्य शास्त्रस्य तात्पर्यविषयीभूतस्स नियमविधिः । उक्तोदाहरणेषु लक्षणसमन्वयस्स्फुट एव । पाक्षिकायोगश्च तन्मात्रविध्यप्रवृत्तिनिबन्धनो विध्यन्तराप्रवृत्तिसहितैतद्विध्यप्रवृत्तिनिबन्धनश्चेत्यादिप्रकारेण बोध्यः । "व्रीहीनवहन्ती"त्यादौ "उत्तरेऽहन् द्विरात्रस्य गृह्यत" इत्यादौ चाऽऽद्यः । एतद्विध्यभावे आक्षेपेणाऽवघातस्याऽतिरात्रसंस्थाकाद्वितीयद्विरात्राऽहनि च षोडशिग्रहणस्यातिदेशेन पक्षप्राप्तत्वात् । "व्रीहिभिर्यजेते"त्यादौ द्वितीयः । यवविध्यभावसहितैतद्विध्यभावे व्रीहीणामाक्षेपेण पक्षप्राप्तत्वात् ।

न चैवं पाक्षिकायोगभेदेन लक्षणभेदात्परस्पराव्याप्त्यतिव्याप्तिप्रसङ्गेन विधिरसायनोक्तदूषणतादवस्थ्यं, विदलनाद्युपायान्तरप्रसक्तिप्रसञ्जितयत्प्रतियोगिकाभावकूटाभावत्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणं, तस्य तन्नियमविधित्वमिति विवक्षाङ्गीकारेण पाक्षिकत्वभेदस्य लक्षणकोटावप्रवेशात् ।

वस्तुतस्तु अवघातत्वावच्छिन्नप्रतियोगिताकाभावाभावत्व-

मेवोक्त(१)लक्षणे प्रवेश्यत इति कूटाद्यप्रवेशादपि लाघवम् । तथा च यद्धर्मावच्छिन्नप्रतियोगिताकाभावाभाववत्त्वं तादृशावच्छेदकतापर्याप्त्यधिकरणं तस्य तद्धर्मवन्नियमविधित्वमिति निर्गलितोऽर्थः । तावतैव च परिसङ्ख्याविधितोऽपि भेदसिद्धेर्न कूटादिप्रवेशस्यापि प्रयोजनम् ।

एवं च यद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणम्, तस्य शास्त्रस्य तद्धर्मवत्परिसङ्ख्याविधित्वम् । एवं च "व्रीहीनवहन्ती" त्यादौ यच्छब्देनाऽवघातत्वस्य ग्रहणे नियमविधित्वमेव । अवघाताभावत्वग्रहणे तु परिसङ्ख्याविधित्वाङ्गीकारेऽपि न क्षतिः । वक्ष्यमाणविधया साङ्कर्यस्यानिवार्यत्वात् ।

न चैवमपि "व्रीहीन्प्रोक्षती" त्याद्यपूर्वविधावपि प्रोक्षणाभावाभावस्य प्रोक्षणस्यैव तात्पर्यविषयत्वादतिव्याप्तिः । निषेधमुखप्रतीतिकतयाऽभावाभावस्याऽतिरिक्तस्य प्रतियोग्यात्मकत्वानङ्गीकारेणाऽपूर्वविधौ लाघवाच्छ्रुतत्वाच्च प्रतियोगिन एव तात्पर्यविषयत्वाङ्गीकारेणाऽभावस्य तात्पर्यविषयत्वाभावात् । नियमविधौ तु प्रतियोगिनः प्राप्तत्वात्(२) सामान्याभावाभाव एव तात्पर्यविषयीभूतः । यदि तु सामान्याभावाभावोऽप्याक्षेपेण प्राप्त इत्याशङ्क्येत, तदा विदलनाद्युपायान्तरप्रसक्तिप्रसञ्जितसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावत्वं यस्य शास्त्रस्य तात्पर्यविषयतावच्छेदकतापर्याप्त्यधिकरणं, तस्य शास्त्रस्य तद्धर्मावच्छिन्ननियमविधित्वमित्यादिरूपेण बोध्यम् । न तु कूटप्रवेशः । सामान्याभावे ह्यवघाताकरणप्रसञ्जितत्ववद्विदलनकरण-

---

१. विधिलक्ष इति. ख. पु.   २. स्वसामान्येति क. ख. पु.

प्रसञ्जितत्वमप्यस्तीति विशिष्टाभावप्रवेशा(१)न्न कूटप्रवेशः । तावतैव विदलनाद्युपायान्तरप्रसक्तिप्रसञ्जितावघाताभावकूटाभावस्य सिद्धेर्विदलनादिव्यावृत्तिसिद्धेश्च । यदि तु सामान्याभावे विदलनकरणप्रसञ्जितत्वे प्रमाणाभाव इति विभाव्यते; ततः पूर्वोक्तलक्षणमेव साधीयः । माऽस्तु वा नियमविधौ पर्याप्तिविवक्षा ।

यत्तु दृष्टार्थत्वं नियमविधिलक्षणं कैश्चिदुक्तम्, तत् "उत्तरेऽहन् द्विरात्रस्य गृह्यत" इत्यादावव्याप्तत्वादुपेक्षितम् । षोडशिग्रहयागाभ्यासस्याऽदृष्टार्थत्वात् । एवं च नियमपरिसङ्ख्यातिरिक्तफलकविधित्वमपूर्वविधित्वमि(२)ति लक्षणम् । (३)एवं च यद्विषयको विधिरुक्तफलद्वयातिरिक्तफलतात्पर्यकः, तत्त्वं तदपूर्वविधित्वम् । लक्षणसमन्वयस्तु सर्वत्राऽप्यपूर्वविधौ सुधीभिरनुसन्धेयः । तच्च फलं "व्रीहीन्प्रोक्षती" त्यादौ विधेयमेव प्रोक्षणादि, "तमुक्थ्येने" त्यादौ गुणकामप्रवृत्त्यादिविधेयचयनाद्यन्यदिति प्रकारभेदेऽपि न काश्चिद्विरोधः । एतेषां चोपाधीनां क्वचिदुदाहरणे विषयभेदेन वा विषयैक्येन वा साङ्कर्येऽपि न कश्चिद्दोषः ।

न ह्येवंविधलक्षणसाङ्कर्याङ्गीकारे दीक्षितदण्डादन्यो दण्डो मैत्रावरुणकर्तृके प्रैषानुवचने प्रसज्येतेत्यादिदूषणानां प्रसङ्गलेशोऽप्यस्ति । (४)"क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती" त्यस्या(५)भावे दीक्षितदण्डस्य यजमानधारण एव विनियोगाल्लौकिकस्यैव दण्डस्य नियमविधिः, 'दण्डी'

---

१ न कूटप्रवेश इति नास्ति ख. पु

२. इति लक्षणमिति नास्ति. ख.पु. ३. तत्वञ्चेति क. पु.

४. तै. सं. ६. १.४. ५. दण्डीत्यस्य चोभयोर. इति ख. पु

त्यस्यैवाभावे च दीक्षितदण्डस्य मैत्रावरुणाय दत्तस्य प्रयोजनापेक्षायामालम्बनतया कार्यमात्रे समुच्चित्य प्राप्तौ दण्डीत्ययं प्रैषानुवचनातिरिक्तकार्यान्तरपरिसङ्ख्याविधिस्सम्पद्यते । ततश्च तदुभयाङ्गीकारे(१) लौकिकदण्डस्यापि ग्रहणापत्तिरिति हि (२)दूष-

---

१. तत्साङ्कर्याङ्गीकार इति क. ख. पु.

२. दूषणमिदं श्रीमदप्पय्यदीक्षितैर्विधिरसायने 'यद्येकानेकविध्यप्रसृतिमुखभव' इति दशमश्लोके 'दैक्षादन्योऽपि दण्डः प्रकृतिजुषि भवेत्प्रैषकार्ये प्रशास्तु' रित्यादिना दत्तम् । तस्याऽयं पिण्डीभूतोऽर्थः—ज्योतिष्टोमे दीक्षाप्रकरणे 'दण्डेन दीक्षयती' त्यनेन दीक्षाभिव्यञ्जकतया दीक्षितहस्ते दण्डदानं विहितम् । तत्र द्वितीयदिनकर्तव्यसोमक्रयणानन्तरं तस्यैव दण्डस्य मैत्रावरुणाय दानं विहितं 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती'ति । तत्रैव च मैत्रावरुणकर्तृकेषु प्रैषानुवचनेषु दण्डवैशिष्ट्यमपि विहितं 'दण्डी प्रैषानन्वाहे' ति । तथा च दीक्षितेन दत्तं दण्डमवलम्ब्यैव तिष्ठन्मैत्रावरुणः अग्नीषोमीयपश्वादौ प्रैषानुवचनं करोतीति स्थितिः ।

सति चैवं तन्मात्राविध्यप्रवृत्तिदशायां विध्यन्तराप्रवृत्तिसहितैतद्विध्यप्रवृत्तिदशायां वा या पाक्षिकी अप्राप्तिस्तादृशाऽप्राप्तांशपूरको नियमविधिरिति नियमविधिलक्षणमङ्गीकरणीयम् । अतश्चानियमेनैकानेकविध्यप्रवृत्ताविति विवक्षणे 'दण्डी प्रैषानन्वाह' त्यत्र तन्मात्रविध्यप्रवृत्तिविवक्षायां 'क्रीते सोम' इति विधेस्सत्वात्तत्प्रापितस्य मैत्रावरुणदण्डस्य कार्यापेक्षायां सत्यां तत्कर्तृकप्रैषानुवचनवत्कार्यान्तरेष्वपि दण्डस्य समुच्चित्य प्राप्तिसंभवात्तादितरकार्यान्तरव्यावृत्तिरूपपरिसङ्ख्याविधित्वं 'दण्डी प्रैषानि' ति वाक्यस्य प्राप्नोति । 'क्रीते सोम' इति वाक्याप्रवृत्तिसहकृतैतद्विध्यप्रवृत्तिविवक्षणे तु 'दण्डेन दीक्षयती'ति विधिमात्रसत्वेन तत्प्रापितदीक्षितदण्डस्य आन्तं दीक्षितेनैव धारणीयत्वमापतेत् । ततश्च मैत्रावरुणस्य प्रैषानुवचनसमये आलम्बनापेक्षायामनियमेन यस्य कस्यचिदालम्बनप्राप्तौ दण्डस्यैवालम्बनत्वं विदधदयं नियमविधिस्संपद्यते । अतश्चैकस्मिन्नेव वाक्ये नियमपरिसङ्ख्याविधिलक्षणसाङ्कर्यमेकानेकप्रवृत्ति-

णम्; तच्च न युज्यते, तार्किकफलानेकत्वेऽपि वस्तुतः "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती" त्यनेन मैत्रावरुणार्थत्वेन विनियुक्तस्य(१)दीक्षितदण्डस्य प्रयोजनापेक्षायां 'दण्डी प्रैषानन्वाहे' त्यनेन कार्यविधानादन्यस्याऽप्रसक्तेः। एवमन्यत्राप्यूह्यम्। एतानि च लक्षणानि सुधीभिर्विधिरसायनोक्तोदाहरणेषु योज्यानि।

न चान्यत्र सुयोज्यत्वेऽपि(२) 'यदि सोमं न विन्देत् पूतीकानभिषुणुया' दित्यादौ सोमाभावे पूतीकानां मन्दसदृशतया प्राप्त्यभावेन तत्र पूतीकप्राप्तेरेव तात्पर्यविषयत्वात्, तदभावाभावस्य प्रोक्षण इव तात्पर्यविषयत्वे च प्रमाणाभावान्नियमविधित्वानुपपत्तिः, एतद्वचनस्य सुसदृशप्राप्तिन्यायप्रवृत्त्युत्तरप्रवृत्तौ प्रमाणाभावेन पूर्वप्रवृत्तस्याऽस्य पूतीकप्रापकत्वानुपपत्तेः।

यत्र तु(३) "हिरण्यगर्भस्समवर्तताऽग्र इत्याघारमाघारयती" त्यादौ हिरण्यगर्भप्रकाशकस्य मन्त्रस्य ऐन्द्राघारे कथमपि प्राप्त्यसम्भवः, तत्र सत्यपि क्लृप्तनियमादृष्टजनकत्वेनोत्तराघारे मन्त्रविधौ(४) 'औदुम्बरो यूपो भवती' तिवदपूर्वविधित्वेऽपि न क्षतिः।'सर्वे द्रव्यविधयो नियमविधय'इत्यादिवादस्तु(५) हीषा-

---

विवक्षणकृतमापद्यते। किञ्च द्वितीयपक्षे दैक्षे पशौ दीक्षितदण्डादन्यस्यैव लौकिकदण्डस्य प्राप्त्यापत्तिरिति।

१. दीक्षितेति नास्ति ख, पु, २. तां. ब्रा. ९. ५. ३.

३. अग्निचयनाङ्गभूतवायुदेवताकः पशुयागो विहितः। तदङ्गत्वेन प्रकृतित अतिदिष्टयोराघारयोर्द्वितीयाघारे मन्त्रोऽयं विहितः॥

४. तै. सं. २. १. ९.

५. 'सौभरमुक्थ्यानां ब्रह्मसाम भवती'ति वाक्यविहितसौभराख्यसामविशेषस्य वृष्ट्यादिफलोद्देशेन विधानं 'यो वृष्टिकामो योऽन्नाद्यकामो यस्स्वर्गकामस्स सौभरेण स्तुवीते'ति। तस्यैव च तत्तत्फल-

दीनां वृष्ट्यादिफलार्थत्वे अपूर्वविधित्वापत्तेरित्यादिव्यवहारादौत्सर्गिक एव । अत एव सर्वेष्वेव वाक्येषु विषयभेदेन विषयैक्येन वा क्रमेण यौगपद्येन वा अनेकफलतात्पर्यकत्वेऽपि क्वचित्केनचिद्व्यवहारो मूले नाऽनुपपन्नः । तद्यथा—प्रकृतौ 'स्रुवेणाऽऽघारमाघारयती' त्यत्रैवाऽप्राप्तहोमप्रापणमभ्युदयाशिरस्कत्वं, याजुर्वेदिकप्रायश्चित्तप्राप्तिरित्याद्यनेकफलतात्पर्यकत्वादपूर्वविधित्वं, पुनश्च तस्मिन्नेव विषये अध्वर्युकर्तृकत्वादिफलमादाय नियमविधित्वं, पुनश्च स्रुवविषये तदित्यनेकरूपता । न ह्येषां मध्ये एकस्यैव तात्पर्यविषयता नाऽन्येषां, अनुनिष्पन्नत्वादिति वाच्यम् । तात्पर्याभावे तदभावप्रयुक्तवैगुण्यानापत्तेः । अत एवाऽप्राप्तप्रापकविधावपि न तद्विधिजन्यबोधस्याऽऽवश्यकत्वं सर्वेषामिष्टम् । एवं वार्तिकोक्ते "व्रीहीन्प्रोक्षती" त्यत्रापि(१) 'अग्नये वो जुष्टं प्रोक्षामी' त्येतन्मन्त्रकल्प्यविधितः पूर्वप्रवृत्तेरप्राप्तप्रोक्षणप्रापकत्वं, तार्किकतत्प्राप्त्यालोचनोत्तरकालं त्वभ्युदयाशिरस्कत्वं, प्रायश्चित्तप्राप्तिरध्वर्युकर्तृकत्वं, चेत्यादिफलप्रापकत्वादनेकरूपता । 'व्रीहीनवहन्ती' त्यत्राप्याक्षेपतः पूर्वं(२) प्रवृत्ताऽवघातप्रापकत्वादपूर्वविधित्वं, तार्किकतत्प्राप्त्यालोचने तु तन्नियमफलकत्वं, तार्किकतन्मन्त्रवर्णकल्प्यावघातनियमप्राप्त्यालोचने त्वभ्युदयाशिरस्कत्वं, प्रायश्चित्तप्राप्तिं च(३) तद्विषयामङ्गीकृत्याऽपू-

साधनत्वेन विधीयमानस्य हीषादयो नियम्यन्ते 'हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाये'ति । वृष्टिसाधनीभूतसौभरे हीषिति निधनं पठेदिति तदर्थः । प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्यभागपञ्चकात्मनस्साम्नोऽन्तिमो भागो निधनमित्युच्यते ॥

१. तै. सं. १. १. ४.   २. प्रवृत्तावप्राप्तावघातेति. क. ख. पु.
३. तात्पर्यविषयामङ्गीकृत्येति ख. पु.

र्थविधित्वं, अध्वर्युकर्तृकत्वाद्यादाय च नियमविधित्वमित्यादि तत्तद्विधिष्वनेकरूपत्वेऽपि क्वचित्केनचिद्रूपेण व्यवहार इति नाऽत्र रूपान्तरलक्षणातिप्रसङ्गोद्भावनं युक्तम् ।

वस्तुतस्तु 'अवरक्ष' इत्यवघातमन्त्रस्य नाऽवघाते स्फुटं लिङ्गमिति तेन नाऽवघातनियमप्राप्तिः, "अग्नये वो जुष्टं प्रोक्षामी" ति प्रोक्षणलिङ्गमन्त्रस्याऽप्याग्नेयाङ्गभूतदर्भादिसाधारण्यापत्तेर्व्रीहिमात्रविषयतया प्रोक्षणप्राप्त्यनुपपत्तेः "व्रीहीन्प्रोक्षती" त्ययं दर्भादिपरिसङ्ख्यार्थ इत्यपि शक्यते वक्तुमिति ध्येयम् ।

न चैवं प्रोक्षणावघातादिविधीनां यवादिपरिसङ्ख्याफलकत्वस्याप्यापत्तिः, सम्भावितेषु ह्यनेकेषु फलेषु यदेकमनेकं वा प्रामाणिकं फलं तत्रैव शास्त्रस्य तात्पर्यं, न तु प्रमाणबाधितेऽपि । प्रमाणबाधाऽबाधौ च तत्र तत्राऽधिकरणे स्फुटावेव । यत्रापि च न स्फुटौ तत्रापि स्वयमूह्यौ । यथाऽत्रैव यवादिपरिसङ्ख्यायाम् । व्रीहिपदेन ह्यपूर्वसाधनत्वमात्रमेव लाघवाल्लक्ष्यते, न तु तत्साधनीभूत(१) व्रीहित्वजातिरपि, गौरवात् । अतश्च गौरवपरास्तत्वान्न परिसङ्ख्याफलकत्वम् । (२)"इमामगृभ्णन्नि" त्यादौ(३)"युञ्जाथाँ रासभं युवमिति गर्दभ" मिति प्रतिनियतनिर्देशान्यथानुपपत्त्या गौरवाश्रयणेनाऽपि परिसङ्ख्याफलकत्वम् ।

न च लिङ्गादेव 'युञ्जाथामि'ति मन्त्रस्य गर्दभाङ्गत्वसिद्धेर्नाऽयं प्रतिनियतनिर्देश इति वाच्यम्, युवमिति पुरुषाश्वयोरुपादानेन लिङ्गसाधारण्यात् । अतः तत्राऽगत्याऽन्यपरिसङ्ख्याफलकत्वाङ्गीकारेऽपि न प्रकृते तदाश्रयणम् । अत एव यत्र परिसङ्ख्याङ्गीका-

---

१. व्रीहित्वमपीति ख. पु. २. तै. सं. ४. १. २.
३. तै. सं. ५. १. २.

हेऽपि न गौरवं, तत्र वाक्यस्याऽभ्युदयाशिरस्कत्वयाजुर्वेदिकप्रायश्चित्तादिप्राप्तिरूपफलान्तरतात्पर्यकत्वेऽपि परिसङ्ख्याफलकत्वम्। यथा(१) 'आज्यभागौ यजती'त्यादौ। अत एव क्वचिदेव नियमविधित्वसम्भवेऽपूर्वविधित्वानङ्गीकारः, यत्राऽपूर्वविधित्वं गौरवपराहतम् । यथा हीषादौ व्यवस्थार्थत्वसम्भवे गुणफलसम्बन्धस्याऽदृष्टान्तरकल्पनापादकस्य, न तु सर्वत्र। "पुरोडाशं प्रथयती" त्यादावध्वर्युकर्तृकत्वनियमफलकत्वेऽपि याजुर्वेदिकप्रायश्चित्तप्राप्तिफलकत्वेनाऽपूर्वविधित्वविरम्भावात् । अतस्सर्वत्रैव प्रायशः फलसाङ्कर्यसत्वेन मूले क्वचित्केनाचिद्व्यवहारस्यैच्छिकत्वात्तत्रेतरलक्षणातिप्रसङ्गकथनं न युज्यते । अतश्चोक्तलक्षणानां तदुदाहरणानां च वार्तिकाद्युक्तानामनुपपत्त्यभावाद्विधिरसायनोक्तलक्षणाक्षेप उदाहरहणाक्षेपश्च न सङ्गच्छेते । आक्षेपाक्षेपप्रसङ्गेन न्यायशैथिल्यकरणन्तु तत्तदधिकरणप्रसङ्गेन तत्र तत्र प्रायशो निराकारिष्यत इति विधिरसायनोक्तदूषणानामनवकाशः॥४४॥

अर्थवादो वा॥ १-२-४५ ॥

"उरु प्रथस्वेति पुरोडाशं प्रथयती" त्यत्र मन्त्रोपादानं "यज्ञपतिमेवे" त्यर्थवादालम्बनार्थम् । आलम्बनप्रकारश्च पूर्वमेव प्रदर्शितः ।

यत्तु प्रथनस्याप्यर्थप्राप्तत्वेनाऽविधेयत्वाद्विधिशेषत्वाभावेनाऽर्थवादत्वस्यैवानुपपत्तिरिति, तत्प्राप्तस्यापि प्रथनस्याऽध्वर्युकर्तृकत्वार्थं विधानोपपत्तेः परिहर्तव्यम्। तस्माद्यज्ञपतिप्रथनफलकत्वेन पुरोडाशप्रथनं स्तोतुं मन्त्रोपादानम्। न च यज्ञपतिप्रथनस्य पुरो-

१. चातुर्मास्यान्तर्गतगृहमेधीयेष्टिसन्निधिपठितेति ।

डाशप्रथनफलकत्वज्ञापनार्थत्वेन रात्रिसत्रवन्मन्त्रोपादानं विनाऽप्यर्थवादोपपत्तिः, पुरोडाशप्रथनस्य पुरोडाशसंस्कारार्थत्वेन परार्थत्वादर्थवादस्य फलकल्पकत्वानुपपत्तेः।

न च सूक्तवाकन्यायेन मन्त्रादेव फलकल्पनोपपत्तेः मन्त्रोपादानं विनाऽप्यर्थवादोपपत्तिः, वैषम्यात्। तृतीयया इतिकरणेन वा यत्र मन्त्रविनियोगस्तत्र सकलस्य मन्त्रस्य क्रियां प्रति करणत्वावगमादुत्सर्गतस्तावदयमर्थः प्रतीयते—सकलेनापि क्रियैव प्रकाशनीयेति। तदसम्भवे चाऽवगतक्रियासम्बद्धद्रव्यादि, तस्याऽप्यसम्भवे स्वार्थस्य क्रियासम्बन्धकल्पनं, तस्याप्यसंभवे च समवेतमर्थं स्तोतुं स्वार्थस्य तदुपसर्जनत्वकल्पनमिति। तद्यथा "सूक्तवाकेन प्रस्तरं प्रहरती" त्यत्र सकलस्य सूक्तवाकस्य तृतीयावगतकरणतान्यथानुपपत्त्या प्रहरणक्रियाप्रकाशकत्वावगतावपि तदसम्भवेऽवगतक्रिया(१) सम्बद्धं प्रस्तराख्यं द्रव्यं "यदनेन हविषे" त्यादिपदैः प्रकाश्यते, अवशिष्टैश्चाग्न्यादिपदैः(२) आयुरादिपदैश्च स्वार्थस्य फलदेवतात्वेन सम्बन्धकल्पनं, तस्याप्यसम्भवे "इदं द्यावे" त्यादिपदानां समवेतद्रव्यदेवताफलस्तावकत्वमात्रकल्पनमिति। एवं "ममाऽग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं परिगृह्णाती" त्यादावपीतिकरणविनियुक्तेऽप्यन्वाधानस्य वर्चःप्रभृत्यानुषङ्गिकफलकल्पनं द्रष्टव्यम्।

यत्रापि क्रमादिविनियुक्तो मन्त्रः, यथा उपांशुयाजादौ याज्यानुवाक्यारूपः, तत्राऽपि क्रियाप्रकाशनासम्भवे स्वार्थस्य देवतात्वादिना क्रियासम्बन्धकल्पनमिष्टमेव। तत्र त्वेतावान्विशेषः—यत्क्रमादिविनियोज्ये यागापेक्षितं देवताद्येव क्रि-

---

१. सम्बन्धि प्रस्तरेति. ख. पु.। २. आयुरादिपदैरिति नास्ति. ख.पु.

यासम्बन्धित्वेन कल्प्यते न तु सर्वमन्त्रप्रतिपाद्यम् । एकसम्बन्धकल्पनेनाऽपि मन्त्रस्य प्रयोजनाकाङ्क्षा निवृत्तेः, तृतीयादिविनियुक्तवत्सकलमन्त्रकरणत्वानवगमाच्च । प्रकृते तु "उरु प्रथस्वे"त्यस्य लिङ्गविनियुक्तत्वात्प्रथनक्रियाप्रकाशकत्वेनैव मन्त्रनैराकाङ्क्ष्योपपत्तेस्सूक्तवाकादिवत्सकलस्य करणत्वानवगमेन फलकल्पकत्वानुपपत्तिः ।

न चैवं "ममाग्ने वर्च" इत्यस्यापि इन्धाना इति लिङ्गादेव विनियोगात्फलकल्पकत्वानापत्तिः, इन्धाना इति लिङ्गादग्निधारणार्थत्वावगमेऽप्याद्याग्निधारणमात्रार्थत्वस्य "इति पूर्वमग्निं परिगृह्णाती"ति विधिं विनाऽसिद्धेरितिकरणाविनियुक्तत्वेन फलकल्पकत्वोपपत्तेः । न हि(१) पूर्वमिति पदं पूर्वाग्निरूपाहवनीयपरं, गार्हपत्येन्धनेऽस्य विनियोगात् । तत्वेऽपि वा(२) इतिकरणविनियुक्तत्वात्फलकल्पकत्वे न किञ्चिद्बाधकम् । प्रकृते तु लिङ्गविनियुक्तत्वान्न प्रथनफलत्वं यज्ञपतिप्रथनस्य कल्पनीयम् , किन्तु प्रथनफलानुवादकत्वमेव "आयुर्दा अग्ने" इत्यादिव"दुरु ते यज्ञपतिः प्रथता" मित्यस्य द्रष्टव्यम् । तस्मान्मान्त्रवर्णिकफलकल्पनानुपपत्तेरर्थवादालम्बनार्थमुक्तविधया मन्त्रोपादानमर्थवदिति सिद्धम् । यद्यपि च मन्त्रोपादानाभावेऽपि लैङ्गिकविनियोगेन मन्त्रस्य प्राप्तत्वात्तावतैव स्वाभिमतस्तुत्यालम्बनासिद्धिः, तथापि स्पष्टीकरणार्थं मन्त्रोपादानम् ॥ ४५ ॥

---

१. पूर्वपदमिति क. ख. पु.   २. इतिकरणविनियुक्तत्वानपगमेन फलकल्पकत्वोपपत्तेश्चेति क. ख. पु.

अविरुद्धं परम् ॥ १-२-४६ ॥

यत्तु नियतक्रमाम्नानं, तदर्थपरत्वे सति नियमादृष्टकल्पन-याऽप्यविरुद्धम्। आवश्यकी च क्रमनियमाऽदृष्टकल्पना पूर्वपक्षिणोऽपि। क्रमान्यत्वेऽपि (१)मन्त्रोच्चारणे विशेषाऽनवगमेनो-च्चारणादेवाऽदृष्टोत्पत्तौ बाधकाभावात्। प्रयाजादिक्रमवदुच्चा-रणक्रमस्याप्यदृष्टार्थत्वावश्यम्भावात् ॥ ४६ ॥

संप्रैषे कर्मगर्हानुपालम्भस्संस्कारत्वात् ॥ १-२-४७ ॥

या च "अग्नीदग्नीन्विहरे" ति संप्रैषे बुद्धबोधनासम्भ-वादभिधानरूपकर्मगर्हाऽभिहिता, सा स्वाध्यायकालीनज्ञानस्य क्षणिकत्वेन नष्टत्वात्स्मरणाख्यसंस्काररूपबोधसम्भवेन नोपा-लम्भः। प्रैषनियमाच्च नोपायान्तरस्य पूर्वपदार्थसमाप्त्यादे-स्स्मारकत्वम्। न चैवं "विभूरसी" त्यादिमन्त्रान्तरस्याऽपि विहरणाङ्गत्वेनाम्नानात्प्रैषानर्थक्यं, मन्त्रद्वयाम्नानबलात्स्मृ-तिदार्ढ्यहेतुत्वेन प्रैषस्य वा साङ्गाग्निविहरणभावनास्मारकत्वा-"द्विभूरसी" त्यादेश्चाग्निविहरणमात्रस्मारकत्वादग्निविहरणा-ङ्गभूतमन्त्रस्मारकत्वेनैव प्रैषार्थवत्वोपपत्तेः ॥ ४७ ॥

अभिधानेऽर्थवादः ॥ १-२-४८ ॥

(२)"चत्वारि श्रृङ्गे" त्यस्य कर्मसमवेतार्थप्रकाशनार्थं चतस्रो होत्राः, त्रीणि सवनानि, द्वे पत्नीयजमानौ,(३) सप्त छन्दां-

१. मन्त्राक्षरोच्चारणेति क. पु. २. ऋ. सं. ३. ८. १०

३. गायत्र्युष्णिगनुष्टुब्बृहतीपाङ्क्तित्रिष्टुब्जगतीरूपाणि सप्त छन्दांसि।

६४ व्याप्तिपञ्चकरहस्यम् सिंहव्याघ्रलक्षणरहस्यं च । श्रीमथुरानाथतर्कवागीशकृतम् । न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादिर्विभूषितं च । [न्या० वि० ८] रु० ०-१२

६५ सिद्धान्तबिन्दुः । श्रीमधुसूदनसरस्वती विरचितः । श्रीभगवानूशङ्कराचार्य विरचित दशश्लोकव्याख्यारुपः श्रीगौड ब्रह्मानन्दविरचित न्यायरत्नावलीनारायणतीर्थ विरचित लघुव्याख्या टिप्पणीसहितः । [वेदान्त वि० ८] रु० ४—०

६६ अन्त्यकर्मदीपकः आशौचकालनिर्णयसहितः । प्रेतकर्मब्रह्मीभूतयतिकर्मनिरूपणात्मकः महामहोपाध्याय पं० श्री नित्यानन्दपन्तपर्वतीय विरचितः । [कर्मकाण्ड वि० ६] रु० १—८

६७ सांख्यदर्शनम् । श्रीमद्विज्ञानभिक्षुकृत सांख्यप्रवचनभाष्यसमलङ्कृतम् । [सांख्य वि० १] रु० २—०

६८ अनेकार्थसङ्ग्रहो नाम कोशः । आचार्यश्रीहेमचन्द्रेण विरचितः । [कोश वि० २] रु० २—०

६६ शिशुपालवधम् । श्रीमन्माघकविनिर्मितं श्रीवल्लभदेवकृतया सन्देहविषौषधिव्याख्यया महामहोपाध्याय श्रीमल्लिनाथकृतया सर्वङ्कषाव्याख्यया समेतम् । सजिल्द ग्लेज कागज । सम्पूर्णम् । [काव्य वि० ९] रु० ३—०

६९ ,, ,, [संपूर्णम्] रफ मोटा कागज ० २—४

७० जागदीशीपञ्चलक्षणी सिंहव्याघ्रलक्षणं च । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादि विभूषितं च । [न्याय वि० ९] रु० ०—८

७१ ब्रह्मसूत्रशाङ्करभाष्यम् । चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम् ।

एषो ग्रन्थः भागद्वये पूर्णो भविष्यति किन्तु विद्यार्थिनां सौकर्यार्थमस्याद्यो भागो द्वितीयाध्यायस्य द्वितीयपादान्तमस्माभिः संमुद्रय निष्कासितः । (द्वितीयोपि शीघ्रमेव मुद्रयित्वा प्रकाशयिष्यते) । प्रथमोभागः (वेदान्तविभागे ९) रु० २—८

७२-१-सिद्धान्तशिरोमणिः । श्रीभास्कराचार्य विरचितः । गणिताध्यायः वासनाभाष्य सहितः ज्योतिषाचार्य म० म० श्रीद्दमद्वापूदेवशास्त्रिकृतटिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७२-२-सिद्धान्तशिरोमणिः । ,, ,, ,, गोलाध्यायः वासनाभाष्य सहितः । ज्योतिषाचार्य म० म० श्रीद्दमद्वापूदेवशास्त्र कृत टिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७३ काकचण्डीश्वरकल्पतन्त्रम् । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] । [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [अलङ्कार वि० ३] रु० ०—१०

७६ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—०

७८ माथुरीपञ्चलक्षणी । पं० श्रीउमानाथझाकृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्टभेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासा विचारिताः तत्र प्रथमं प्रकरणं मुद्रितं द्वितीय प्रकरणमपि मुद्रित प्रायं शिघ्रमेव भवन्तं दृष्टि पथमधिगमिष्यतीति ।) प्रथमो भागः । (व्या० वि १०) रु० १—८

८१ गणितकौमुदी । (हिन्दीभाषाटीकासहिता) प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम् । [गणितविभागे १] रु० ०—६

८२ छन्दःकौमुदी । (हिन्दीभाषाटीकासहिता) प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दःसंग्रहपुस्तकम् । [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र (१) भोजवृत्तिः, (२) भावागणेशवृत्तिः, (३) नागोजीभट्टवृत्तिः, (४) मणिप्रभा, (५) योगचन्द्रिका, (६) योगसुधाकराख्य टीका षट्कसमेतम् । [योग० विभागे १] रु० २—०

८४ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा पं० ब्रह्मशङ्करमिश्रकृतपरीक्षोपयोगि सुधाऽऽख्यव्याख्यया सहितः । १ से ४ सर्गः मू० १–४–० । १ से ५ सर्गः रु० १–८–० तथा ६ से १० सर्गः १–८–०

८५ योगदर्शनम् । पण्डित बलदेवमिश्रकृतया सटिप्पण्यायोगप्रदीपिकाख्य विवृत्त्या समन्वितम् । (योग विभागे २) रु० १—०

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पण्डित श्रीनारायणशास्त्रीखिस्तेकृत काव्यमीमांसा–चन्द्रिका टीका सहिता । प्रथमाध्यायमारभ्य पञ्चमाध्यायपर्यन्ता प्रथमो भागः । (काव्य विभागे १३) रु० ०—८

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्येति पदवी विभूषितेन पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्या समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । (नाटक विभागे १) रु० १—८

८८ मेघदुतकाव्यम् । महाकवि श्री कालीदासविरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्तेकृत भावप्रबोधिनी व्याख्या टिप्पण्या च सहितम् । (काव्य वि० १४) रु० ०—१०

सर्वविधपुस्तकप्राप्तिस्थानम्—

चौखम्बा संस्कृत सीरिज आफिस,

विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक,

September 1931.

THE
CHOWKHAMBA SANSKRIT SERIES
A
COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.
NO. 405.

मीमांसाकौस्तुभः ॥

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(द्वितीयाध्यायस्य प्रथमः पादः ।)

पूर्वोत्तरमीमांसापारावारपारीण-
श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकेन
वेदविशारदविरुदभाजा
पं० अ. चिन्नस्वामिशास्त्रिणा
तच्छिष्येण श्रीपट्टाभिरामशर्मणा मीमांसाशास्त्रिणा च
संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ।

MIMAMSAKAUSTUBHA

[An exhaustive Commentary of Jaiminisutras]

(I Pada of II Adhyaya)

BY

KHANDADEVA.

Edited by
"VedaVisarada" Pandit A. Chinnaswami Sastri,
Chief Professor of Mimamsa, Benares Hindu University
and his pupil Sri Pattabhirama Sarma M. S.

Vol. III. FASCICULUS II-२.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Vidya Vilas Press North of Gopal Mandir Benares City.

1932

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—४०५

सि यस्य सः, त्रिभिर्वेदैर्बद्धः, कामान्वर्षतीति वृषभः, रोरवीति फलार्थं मह्यं कुरुतेत्यावेदयति, महो देवः, मर्त्यान् मनुष्यान्, अधिकारित्वेन स्वीकृतवानिति गौण्या वृत्त्या यागस्तुतिरिति भाष्यकारेण व्याख्यातम् ।

तद्विनियोगाऽननुसारित्वाद्वार्तिककृताऽन्यथा व्याख्यातम् । अयं हि ऋग्वेदे विषुवत्संज्ञके एकाहे अतिदेशप्राप्तेषु होत्रादीनां चतुर्णामाज्यसंज्ञकेषु शस्त्रेषु मध्ये होतुराज्ये 'आग्नेयं होता शंसती' ति वचनादग्निस्तावके विनियुक्तोऽग्निप्रकाशक इत्यविवादम् । विषुवतश्च "सूर्यदेवत्यं ह्येतदह" रिति श्रुतेरादित्यदेवतात्वेन संस्तवात्तेजस्त्वसामान्यादादित्यरूपेणाऽग्नेः स्तुतिरूपवर्ण्यते—चत्वारो दिवसयामाः, त्रयः शीतोष्णवर्षाकालाः, द्वे अयने, सप्त अश्वाः शृङ्गादिरूपेण यस्य सः, सवनत्रये बद्धः, वृष्टिहेतुत्वाद्वृषभः, रोरवीति गर्जितेन, महो देवो मर्त्यानाविवेश उत्साहकारित्वात् । अतश्च यद्यपि स्तोत्रशस्त्राणामदृष्टार्थत्वान्नाऽस्य कर्मसमवेताऽग्निप्रकाशनार्थत्वं, तथाऽपि 'त्रयो अस्य पादा' इति सर्वनाम्ना सन्निहिताऽग्निपरामर्शेनाऽग्निस्तुत्यर्थत्वेनाऽवधारणान्नाऽऽनर्थक्यम् । एवं(१) "ओषधे त्रायस्वैन" मित्यादावप्यचेतने स्तुत्यर्थं चैतन्याध्यारोपेण सम्बोधनरूपत्वमुपपादनीयम् ॥ ४८ ॥

गुणादविप्रतिषेधस्स्यात् ॥ १-२-४९ ॥

यस्तु(२) "अदितिर्द्यौरदितिरन्तरिक्ष" मित्यादावर्थविप्रतिषेधश्शङ्कितः, स द्युत्वादीनां स्वरूपेणाऽविवक्षितत्वाद्गौण्या वृत्त्या स्तुत्यर्थमेवोपात्तत्वात्, त्वमेव माता त्वमेव पितेत्यादिवन्न

१. तै. सं. १. २. १. २. ऋ. सं. १. ८. १६.

दोषाय ॥ ४९ ॥

विद्याऽवचनमसंयोगात् ॥ १-२-५० ॥

यत्तु स्वाध्यायाऽध्ययनकालेऽर्थप्रकाशनानभ्यासरूपं विद्याया अवचनं, तत्कर्मकाल एवाऽर्थाभिधानस्याऽभ्यासमन्तरेणैव सौकर्यादिति द्रष्टव्यम् ॥ ५० ॥

सतः परमविज्ञानम् ॥ १-२-५१ ॥

यदपि परमर्थाज्ञानाख्यं कारणमुक्तं, तत्सत एवाऽर्थस्य प्रमादालस्यादिनाऽविज्ञेयत्वाद्द्रष्टव्यम्। अर्थसत्ताऽवधारणं तु निगमनिरुक्तव्याकरणप्रकरणऋषिदेवतास्मरणादिना यथासम्भवमुपपादनीयम् । तद्यथा—

"अम्यक्सात इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति ।
अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि"॥

इत्यस्यामृचि (१)छन्दोमद्वितीयेऽहनि विनियुक्तायामगस्त्येन

---

१. द्वादशाहे द्वादश दीक्षाः द्वादशोपसदः द्वादश सुत्याः। तत्र द्वादशसु सुत्यासु प्रथमोत्तमे अहनी वर्जयित्वा मध्यगतानां द्वादशानामह्नां क्लृप्तिरेवमाम्नाता—'पृष्ठ्यष्षडहस्त्रयश्छन्दोमाः अविवाक्यं दशममह' रिति। अस्याऽयमर्थः—यष्षडहस्स पृष्ठ्यः, पृष्ठस्तोत्रसाधनीभूतरथन्तरादिविशिष्टः। माहेन्द्रस्तोत्राख्यं यत्पृष्ठस्तोत्रं तत्प्रथमदिने रथन्तरेण साम्ना कर्तव्यं, द्वितीयदिने बृहता, तृतीयदिने वैरूपेण, चतुर्थदिने वैराजेन, पञ्चमदिने शाक्वरेण, षष्ठादिने रैवतेनेति यावत्। ततस्त्रयश्छन्दोमाः। यदीयास्तोमाः गायत्रीबृहत्यनुष्टुप्छन्दोगतसङ्ख्याभिर्मीयन्ते ते छन्दोमा इत्युच्यन्ते। गायत्र्यादिसमसङ्ख्याकस्तोमविशिष्टान्यहानीति यावत्। तेषां त्रयाणामह्नां मध्ये यद्द्वितीयमहः अर्थाद्द्वादशाहीयनवमहस्तत्रेत्यर्थः ॥

ऋषिणा इन्द्रो मरुत्वान् धनं प्रार्थितः । अत एव (१)"त्वंनून इन्द्र तं रयिं दा" इति वक्ष्यमाणेन सम्बन्धात्प्रथमतृतीयपादयोर्द्वितीयचतुर्थपादयोश्च सम्बन्धादयमर्थोऽवगम्यते—हे इन्द्र ! ते, या ऋष्टिः आयुधविशेषः, अभ्यक् अमा सह अञ्चतीत्यभ्यक्, नित्यं सहचारिणी अतिवल्लभाऽपि सा, त्वत्प्रसादेन अस्मे अस्माकमेव । येऽपि मरुतो मेघाः, सनेमि पुराणं, अभ्वं तोयं, जुनन्ति क्षिपन्ति, तेऽप्यमी त्वत्प्रियसखाः, अस्मे अस्माकमेव । कीदृशी ऋष्टिः ? अतसे शुष्कतृणे, शुशुकान दीप्तवान्, अग्निरिव । हि स्म प्रसिद्धौ, चिदित्युपमार्थः । कीदृशाश्च मेघाः ? नेत्युपमार्थे । आपो यथा द्वीपं पुलिनं प्रति, प्रयांसि अन्नाद्यानि, दधति धारयन्ति, तथेति । एवं साधारणद्रव्ये भवानस्माकं, रयिं धनं, दाः देहि, इति ॥ एवं—

"सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु" ॥

इत्यस्यामृचि भूतांशेन ऋषिणा जरामरणनिवृत्त्यर्थमाश्विनौ स्तुताविति(२) "आभूतांशो अश्विनोः काममप्राः" इत्युपसंहारादवगम्यते । सृणिः अङ्कुशः, तत्र साधू सृण्यौ, अर्थात्कुञ्जरौ, ताविव जर्भरी जृम्भमाणौ, तुर्फरीतू हिंसितारौ, नितोशनं वधः, तत्कारिणौ नैतोशौ योद्धाराविति यावत् । ताविव, तुर्फरी त्वरमाणौ, पर्फरीका शोभायुक्तौ, उदन्या पिपासा, सा च चातकस्य विवक्षिता । तत्काले प्रावृषि जातौ चातकौ यथा जेमना उदकवन्तौ सन्तौ उदकलाभेन मदेरू मत्तौ भवतः, तथा यौ मदेरू मत्तौ, तौ, मे, जरायु मरायु जरामरणधर्मकं शरीरं, अजरं अमरं च कुरुतमित्यध्याहारः ॥ ८१ ॥

---

१. ऋ. सं. २. ४. ८.   २. ऋ. सं. ८. ६. २.

उक्तश्चाऽनित्यसंयोगः ॥ १-२-५२ ॥

यश्च "किन्ते कृण्वन्ती" त्यत्राऽनित्यसंयोगश्शङ्कितस्सः (१)"परन्तु श्रुतिसामान्यमात्र" मित्यत्र परिहृत एव। कीकटाः कृपणाः, प्रमगन्दः कुसीदवृत्तिः, तस्य वेदः धनं, नीचाशाखः षण्डः, तदीयं धनं नैचाशाखं, तच्चोभयमपि (२)न कर्माऽर्हं, तेषां कर्मण्यनधिकारात्; अतस्तदस्माकमाहरेति। एवं हि गौण्या वृत्त्या प्रमगन्दादिशब्दानामर्थे क्रियमाणे सर्वेषां प्रवाहानित्यत्वान्नास्त्यनित्यसंयोगः ॥ ५२ ॥

लिङ्गोपदेशश्च तदर्थवत् ॥ १-२-५३ ॥

किञ्च "आग्नेय्याऽऽग्नीध्रमुपतिष्ठत" इत्यर्थाभिधानलिङ्गेनोपस्थानोपदेशोऽर्थाभिधानपरत्व एवोपयुज्यते, नोच्चारणार्थत्वे। आग्नेय्येति देवतातद्धितोऽयम्। देवतात्वञ्चाऽत्र प्राधान्येन मन्त्रजन्यस्तुतिभाक्त्वम्, न त्वभिधीयमानत्वमात्रं, एकदेवत्येऽपि मन्त्रेऽनेकदेवतान्तरपदप्रयोगे सति तद्देवत्यव्यपदेशाभावात्। न च प्राधान्यमर्थपरत्वं विना सम्भवतीत्यर्थपरत्वनिश्चयः ॥५३॥

ऊहः ॥ १-२-५४ ॥

तथा ऊहदर्शनं "न माता वर्द्धते न पिते" त्यादिकमप्यर्थपरत्व एवाऽर्थवत्। न ह्यनेन(३)पितृमात्रादीनां स्थौल्यादिरूपा वृद्धिः प्रतिषिध्यते, प्रत्यक्षविरोधात्। अतश्शब्दवृद्धिः प्रतिषेद्धव्या। सोऽपि च न वर्णान्तरोपजननेन, न वा स्थूलोच्चारणेन। वर्णान्तरोपजनने पदान्तरत्वापत्तेः प्रकृतिप्राप्तप-

---

१. जै. सू. १. १. ३१. २. अकर्माऽर्हमिति. ख. पु.
३. पशुमात्रादीति. ख. पु.

दवृद्ध्यसम्भवात् । स्थूलोच्चारणस्य च नादधर्मत्वेन शब्दवृत्तित्वाऽसम्भवात् । अतो द्विवचनबहुवचनान्तत्वेनाऽर्थगताधिक्यद्वारा शब्दवृद्धिरूहात्मिका तेन वचनेन प्रतिषिध्यत इति वक्तव्यम् । प्रतिषेधश्च प्राप्तिसापेक्षः । प्राप्तिश्च पशुगणे सर्वत्र मात्रादीनामभिधाने कर्तव्येऽवकल्पते नाऽन्यथा । अतश्चाऽयं प्रतिषेधः यथाऽध्रिगुप्रैषस्याऽर्थपरत्वे लिङ्गं तथाऽन्यमन्त्राणामप्यर्थपरत्वे । सत्यां हि सर्वत्राऽर्थपरत्वेन ऊहप्राप्तौ क्वचित्तन्निषेधोऽवकल्पते नाऽन्यथा ।

यद्यपि च नाऽयं निषेधविधिः, इडानिगदगतयज्ञपतिशब्दवन्मात्रादीनां पशुविशेषणानां (१)परार्थत्वेनोहाविषयत्वात् । (२)अर्थपरत्वेऽपि च पशुभेदेऽपि यत्रैकमात्रादिजन्यत्वं तत्रोहस्याऽप्रसक्तत्वादेव निषेधानुपपत्तिः । यत्र तु मात्रादीनां भेदस्तत्राऽपि मातृत्वादीनां स्त्रीत्वादिसमानाधिकरणजनकत्वादिरूपाणां ससम्बन्धिकत्वात्प्रतिसम्बन्धिपशुभेदप्रतीत्यैव मात्रादिभेदप्रतीतिसिद्धेर्न मात्रादिभेदप्रतीतिसिध्यर्थमूहप्रसक्तिः, तथाऽपि न्यायसिद्धानूहानुवाद एवाऽन्यत्र मन्त्रान्तरे न्यायसिद्धोहोपोद्बलकत्वादर्थपरत्वविवक्षायां लिङ्गमित्यविरोधः । तथा "यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्ये" ति वचनमपि वायव्यादिपशौ ऊहनिषेधकमन्यत्र ऊहप्राप्तलिङ्गमुदाहृतं वार्तिककृता । इदं हि (३)"त्वं ह्यग्ने प्रथमो मनोते" ति मनोतासूक्तस्याऽग्नीषोमीयाद्वायव्यादिपशावतिदेशेन प्राप्तस्योहप्रसक्तौ आग्नेय्येव कार्येत्येवमूहप्रतिषेधार्थं वचनम् ।

वस्तुतस्तु अस्य सूक्तस्य केवलाग्निप्रकाशकस्योभयदेव-

---

१. अर्थपरत्वेनेति. ख. पु. २. अपाराथ्र्येऽपीति. क. ख. पु.
३. ऋ. सं. ४. ४. ३५.

त्येऽग्नीषोमीये लिङ्गनाऽविनियोगादुत्कर्षे प्राप्ते, ज्योतिष्टोमप्रकरणबहिर्भूतकेवलाऽग्निदेवत्ये पशुयागे च सामान्यसम्बन्धबोधकप्रमाणाऽभावेनोत्कर्षाऽयोगेऽपि ज्योतिष्टोमप्रकरणादस्य सूक्तस्य केवलज्योतिष्टोमसम्बन्धावगतेः, साक्षाच्च(१) 'मनोतायै हविषोऽवदीयमानस्याऽनुब्रूही'ति प्रैषवशेनाऽवदीयमानपश्वाख्यद्रव्यसम्बन्धित्वेनाऽवगतस्य मनोतासूक्तस्य ज्योतिष्टोमसम्बन्धाऽयोगादानर्थक्यतदङ्गन्यायेन ज्योतिष्टोमाङ्गभूतकेवलाग्निदेवत्यसवनीयपशुयाग उत्कर्षः प्रसक्तः, तन्निवृत्त्यर्थत्वेन प्रकृतावेवैतस्य वचनस्योत्कर्षनिवृत्त्यर्थत्वेनोपपत्तौ न वायव्यादिपशावप्रसक्तऋगूहनिवृत्त्यर्थत्वकल्पनमुपपत्तिमत् । न हि मनोतास्थाऽग्निशब्दस्यैव ऐन्द्रीन्यायेनाऽग्नीषोमीयदेवतालक्षकत्वात्प्रकृतावन्यायनिगदस्य वायव्यादिपशावूहप्रसक्तिरस्ति ।

नन्वेतस्याऽग्निपदस्य प्रकृताऽपूर्वसाधनीभूतदेवताप्रथमाधिष्ठानप्रकाशकत्वेन मुख्यार्थत्वोपपत्तौ ऐन्द्रीन्यायानुपपत्तेरस्यैव सोमापौष्णयागादौ प्रथमाधिष्ठानप्रकाशनार्थमूहप्रसक्तिः, न च "पूयति वा एतदृचोऽक्षरं यदेनदूहती"ति ऋगक्षरोहनिषेधादप्रसक्तिः, अक्षरोहनिषेधेऽपि प्राकृत्या ऋचोऽसमर्थत्वेन निवृत्तायाः प्रथमाधिष्ठानप्रकाशनरूपोपकारस्य जनकापेक्षायां ऋगन्तरागमरूपस्योहस्य दुर्निवारत्वादिति चेन्न, अग्निपदस्य मनोतापदसमानाधिकरणत्वेनैन्द्रीन्यायेन प्रकृतापूर्वसाधनीभूतदेवतालक्षकस्यैवाऽङ्गीकारात् । मनोतापदं हि 'मनोतायै हविषोऽवदीयमानस्ये'ति प्रैषे अवदीयमानयागीयपश्वाख्यद्रव्योद्देश्यत्वरूपदेवतात्ववाचिचतुर्थीयोगादेवतापरम् । तदुद्देशेन च मनोतानुवचनस्य प्रैषबलेन विध्यवगतेर्मनोतामन्त्रो देवताप्रकाशनार्थं

१. आप. श्रौ. ७. २४. १.

एव । अतस्तत्समानाधिकरणमग्निपदमपि मन्त्रे देवतालक्षणार्थमेव । लक्षणाऽपि च नाऽग्न्यधिष्ठानकत्वसम्बन्धेन, यतो धान्यशब्दवद्वायव्यादिपशौ सम्बन्धाभावादूहः प्रसज्येत । तस्य त्वव्याप्यवृत्तित्वाद्व्याप्यवृत्तिसम्बन्धेन लक्षणासम्भवे चाऽव्याप्यवृत्तिसम्बन्धेन तदयोगाद'ग्निमुखा वै देवा' इत्यर्थवादानुसारेणाऽग्निमुखत्वसम्बन्धेन लक्षणाश्रयणम् । अतश्च तस्य वायव्यादिपशौ सम्भवेन "तस्यै श्रृत" मित्यादिवदनूहः । अत एवाऽऽग्नेय्येवेत्यत्राऽग्निपदलक्ष्यदेवतातद्धितोपपत्तिः । विस्तरेण चैतद्दशमे(१) वक्ष्यते । अतोऽन्याय्यनिगदत्वादूहाप्रसक्तेरलिङ्गमिदम् ।

एवं 'छागस्य वपाया'मिति मन्त्रस्य गोपशावतिदेशप्राप्तस्याऽनेकैर्गोपर्यायैरूहप्रसक्तौ 'उस्राया वपाया' इति मन्त्रविशेषाम्नानं नियममात्रकरणलाघवायाऽर्थपरत्वमेव ज्ञापयति ॥५४॥

विधिशब्दश्च ॥ १-२-५५ ॥

ब्राह्मणाख्यविधिशब्दश्च 'शतं हिमा' इति मन्त्रगतहिमाशब्दव्याख्यार्थः 'शतं वर्षाणी'त्याद्यर्थवादरूपो मन्त्राणामर्थप्रत्यायनार्थत्व एवाऽवकल्पते, नाऽन्यथा । प्रयोजनं तु—

(२)अग्निहोत्रपदं नाम, (३)आघारे यागकल्पनम् ।

---

१. पू. मी. १०. ४. १४.

२. 'अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहे' ति मन्त्रस्य विवक्षितार्थत्वे सत्येवा 'ग्निहोत्रं जुहोती' त्यत्राऽग्निहोत्रपदस्य कर्मनामधेयत्वं सिध्यति । एतच्च १-४-४ अधिकरणे विचारितम् ॥

३. 'इन्द्र ऊर्ध्वोऽध्वर' इत्याऽऽघाराङ्गत्वेन विहितेन मन्त्रेण देवतायाः प्रापितत्वाद्द्रव्यदेवतासम्बन्धान्यथाऽनुपपत्त्या यागकल्पने द्वितीयोक्तं (२-२-५) सङ्गच्छते ॥

(१)मुख्यार्थे विनियोगोऽयं (२)आमिक्षा पय एव च ॥
(३)मन्त्रक्रमबलीयस्त्वं (४)छागस्य नियमस्तथा ।
(५)अग्नौ पृष्ठपदं मन्त्रलक्षणार्थं वदिष्यते ॥
(६)अभिमर्शनमन्त्राणां विकल्पस्सौर्य इष्यते ।
(७)ऊहोऽथ नवमे यस्तु(८)आघारे मन्त्रबाधनम् ॥

---

१. मन्त्राणामर्थवत्त्वे सत्येव 'बर्हिर्देवसदनं दामी' त्यादिमन्त्राणां मुख्ये कुशलवनरूप एवार्थे विनियोगः न पुनरुलपराजिलवनादाविति तार्तीयीको निर्णयः (३-२-१) सङ्गतो भवति ॥

२. 'जुषन्तां युज्यं पयः' इति मन्त्रस्याऽर्थप्रकाशकत्वे सत्येव तत्प्रतिपादितं पय एवाऽऽमिक्षापदवाच्यं न तु दध्यपीति चातुर्थिको निर्णयः (४-१-९) उपपद्यते ॥

३. आग्नेयाऽग्नीषोमीययोः ब्राह्मणपाठक्रमस्याऽन्यथात्वेऽपि मन्त्रपाठक्रमादेव तयोः क्रमः । ब्राह्मणपाठापेक्षया अन्तरङ्गत्वेन मन्त्रपाठस्य प्राबल्यादिति पाञ्चमिको (५-१-९) निर्णयः मन्त्राणां विवक्षितार्थत्व एव घटते ॥

४. एवमग्नीषोमीयपशुयागाङ्गभूतमन्त्रे 'छागस्य वपाया मेदस' इत्यस्मिञ्छागपदश्रवणाद्यागीयः पशुरज एवेति निर्णीतं षष्ठाष्टमान्त्याधिकरणे ॥

५. पृष्ठैरुपातिष्ठत' इति चयनप्रकरणे श्रुते वाक्ये पृष्ठशब्दः पृष्ठस्तोत्रसाधनरथन्तराद्याधारभूतऋग्लक्षक इत्युक्तं सप्तमतृतीयाऽन्त्याधिकरणे ॥

६. 'चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्राऽमावास्या' मिति पौर्णमास्यमावास्याकालिकयागीयहविरभिमर्शनाङ्गत्वेन विहितयोः 'पृथिवी होते' त्यादिमन्त्रयोः सौर्येष्टौ विकल्पेन प्राप्तिः । तस्योभयकालिकाग्नेयद्वयविकृतित्वादित्युक्तमष्टमप्रथमषष्ठे ॥

७. नवमे मन्त्राणां प्रकृतौ पठितानां प्राकृतकार्यभिन्नकार्यप्रकाशकत्वेन विकृतावूह उक्तः ॥

८. वायव्यपशौ 'हिरण्यगर्भस्समवर्तताऽग्र इत्याघारमाघारयती'ति विहितस्य वैशेषिकमन्त्रस्य प्राकृते 'न्द्र ऊर्ध्वोऽध्वर' इति मन्त्रबाधकत्वमुक्तं दशमतृतीयद्वितीयाधिकरणे ॥

(१)मन्त्रावृत्तिर्दीक्षितस्याऽभिवृष्ट्यादिदर्शने ।
(२)तथा करणमन्त्राणां विकल्पो द्वादशेऽपि यः ॥
सर्वमेतत्तदा सिध्येन्मन्त्रार्थश्चेद्विवक्षितः ।
तस्मादर्थप्रत्यायनार्था मन्त्रा इति सिद्धं प्रामाण्यम् ॥९९॥

इति मन्त्राधिकरणम् ॥ ४ ॥

मीमांसाम्बुनिधिं प्रमथ्य विविधैर्न्यायोच्चयैर्निर्जरैः
कृत्वा जैमिनिसूत्रमन्दरममुं वेदं तथा वासुकिम् ।
यद्धालाहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः ॥
श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसाकौस्तुभाख्या प्रथमेऽध्याये द्वितीयाङ्घ्रेः ॥

इति पूर्वोत्तरमीमांसापारावारपारीणश्रीरुद्रदेवसूनोः
खण्डदेवस्य कृतौ मीमांसाकौस्तुभे प्रथमाध्याये
द्वितीयः पादः समाप्तः ॥

---

१. दीक्षितस्य प्रयाणमध्ये वृष्ट्यादिसम्भवे पठनीयत्वेन विहितस्य मन्त्रस्य प्रतिनिमित्तमावृत्तिरित्युक्तमेकादशे ॥

२. 'भगो वां विभजत्वि' त्यादिकरणमन्त्राणां व्रीहियववद्विकल्प इति द्वादशतृतीयत्रयोदशाऽधिकरणे निर्णीतम् ।

सर्वमेतन्मन्त्राणां विवक्षितार्थत्व एव साधु सङ्गच्छते । अविवक्षितार्थत्वे तु प्रतिपादनीयस्यैवाऽर्थस्याऽभावात्सर्वमिदं दत्तजलाञ्जलि स्यादिति भावः ॥

॥ श्रीः ॥

मीमांसाकौस्तुभः ॥

(द्वितीयाध्यायस्य प्रथमः पादः ।)

अथ प्रथमं प्रतिपदाधिकरणम् ॥ १ ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ २-१-१ ॥

(विषयसंशयौ)

एवमुक्तेषु धर्मप्रमाणेष्वधुना प्रमेयभूतं धर्मस्वरूपं निरूप्यते । तत्राऽपि धर्मप्रमाणेषूक्तेषु अर्थादेतत्प्रमाणप्रतिपाद्यो धर्म इत्येव सामान्यतो धर्मस्वरूपावगतावपि कार्त्स्न्येन तदनवगमादिदानीं धर्मस्वरूपस्य विशेषतोऽवगत्यै तद्गतानेकत्वरूपो भेदो निरूप्यते। अतश्चोत्सर्गापवादाभ्यां भेद एवाऽध्यायार्थः । तत्राऽपि प्राधान्येन भावनाभेदो निरूप्यते । धात्वर्थभेदस्तु तत्सिध्यर्थम् । अवच्छेदकीभूतधात्वर्थभेदेन तदवच्छिन्नभावनाया भेदस्य(१)शब्दान्तराधिकरणे वक्ष्यमाणत्वात् । इदं च प्रायिकम् । अत एव धात्वर्थभेदाभावेऽपि गुणादिप्रमाणेनाऽऽपतन्भावनाभेदोऽपि गुणफलाधिकारेऽङ्गीक्रियत एवेति वक्ष्यते । अपूर्वभेदस्तु भावनाभेदानुनिष्पादितया । सति हि व्यापाररूपभावनाभेदे(२) फलभेदाधीनत्वाद्व्यापारभेदस्य फलभूतापूर्वभेदसिद्धिः

---

१. पू. मी. २. २. १. २. फलभेदव्याप्यत्वादिति. क. पु.

सुलभैव । अतश्च धात्वर्थभेदापूर्वभेदयोर्भावनाभेदसिध्यर्थत्वा-त्फलत्वरूपत्वेऽपि प्राधान्येन भावनाभेदस्यैव शब्दान्तरादिभिः षड्भिः प्रमाणैः प्रतिपाद्यत्वात् स एवैकोऽध्यायार्थः ।

तत्र च 'मानाधीना मेयसिद्धि' रिति न्यायेन प्रमाणनिरूपण-स्य धर्मस्वरूपनिरूपणं प्रति हेतुत्वात्(१) तदनन्तरमेतदारम्भोना-ऽयुक्तः । अङ्गत्वादिनिरूपणस्याऽपि प्रमाणाधीनत्वे सत्यपि भेदा-पेक्षत्वस्याऽप्याधिकत्वादयमेव भेदनिरूपणावसरः । तत्र च(२) प्रतिपाद्यस्य भावनाभेदस्याऽपूर्वभेदाधीनत्वात् अपूर्वस्य च सा-क्षाद्भावनाजन्यत्वाभावेन द्वारीभूतधात्वर्थादिजन्यत्वप्रतीतेः त-द्भेदादेव भेदोऽवसीयते, नाऽन्यथा; व्यापकाभावे व्याप्याभा-वस्य नियतत्वात् । धात्वर्थादीनां चाऽपूर्वजनकता फलकरण-त्वाधीनेति प्रथमं फलसम्बन्ध एव किं धात्वर्थस्य ? उत सोमा-दिद्रव्यस्य ? इति विचार्यते ।

यद्यपि च "व्रीहीनवहन्ति, व्रीहीन्प्रोक्षाती" त्यादेः द्वि-तीययैव व्रीह्यादेः कर्मत्वावधारणात् परिशेषेणैव धात्वर्थस्य क-रणत्वावगतेः, "दध्ना जुहोति' "दध्नेन्द्रियकामस्य जुहुयादि" त्यादेश्च होमस्य प्राप्तत्वेनाऽविधेयत्वात् विधेयस्य गुणस्यैव क-रणत्वावगतेस्सन्देहाभावेन नोदाहरणत्वम्, अत एव एतदधि-करणापवादभूते(३) "तानि द्वैध" मित्यादौ(४) इन्द्रियकामाधि-करणे च तयोरुदाहरणत्वमिष्टम्, तथाऽपि "सोमेन यजेत"(५) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इत्यादौ किं होमादीनां फलभावनाकरणत्वं ? उत धात्वर्थस्यैव तदिति विचार्यते ।

---

१. तदनन्तरमेव तदारम्भ इति. क. पु.
२. प्रतिपाद्यभावनेति. क. पु.
३. जै. सू. २. १. ६.
४. पू. मी. २. २. १०.
५. तै. सं. २. ३. २.

(सङ्गतिः)

अत्र चाऽपूर्वभेदोपयोगिचिन्तनस्य पादार्थत्वादपूर्वभेदस्य चाऽध्यायार्थभूतभावनाभेदफलत्वात् पादाध्यायसङ्गती स्पष्टे। अनन्तरा तु स्रुवाद्यवदानानां कार्यविशेषे निरूपिते सम्प्रति स्वर्गादिरूपकार्यस्य कारणविशेषनिरूपणाद्द्रष्टव्या। एतद्विचारोपोद्घातत्वेनाऽपि किं सर्वेषामेव फलभावनाकरणत्वं, उत इतरपदार्थविशेषितस्यैकस्यैवेति चिन्तनीयम्।

(पूर्वपक्षः)

तत्र प्राथमिकभावनासम्बन्धस्य हि तावत्सर्वेषामेव पदानां सिद्धान्तिनोऽपि सम्मतत्वात् पार्ष्ठिकः फलान्वयोऽपि सर्वेषामेवाऽगृह्यमाणविशेषत्वाद्वक्तुमुचितः, न त्वेकस्यैव फलान्वयः, इतरेषां तु तदर्थत्वमिति। न हि गृह्यते विशेषो यदेकस्यैव, करणत्वं नेतरेषामिति। समानपदश्रुत्या धात्वर्थस्य, कारकश्रुत्या सोमादीनामपि चाऽविशेषेण फलभावनाकरणत्वप्रतीतेः, सति सम्भवे प्रधानान्वयस्य न्याय्यत्वाच्च। एकस्य फलान्वयिनः फलगुणान्वये वैरूप्यस्य मत्वर्थलक्षणाया वा प्रसङ्गापत्तेश्च।(१)अतश्च सर्वेषां फलसाधनत्वादेकेनाऽपि वाक्येन तत्तत्करणभेदभिन्नभावनाविधानोपपत्तेः सत्रे एकैकस्य फलभोक्तृत्ववदेकैकस्य प्रत्येकमेव फलसाधनता। तावत्फलार्थिनस्तु सहप्रयोगेऽपि न क्षतिरिति केचित्। भिन्नप्रयोगविधिविहितानां सहप्रयोगे प्रमाणाभावेन(२)एकार्थत्वेन काम्यकर्मणामिव विकल्प एवेत्यन्ये।

वस्तुतस्तु द्रव्यक्रियादिरूपेण करणानां भेदेऽपि तेषां परस्परसापेक्षत्वात् भावनाभेदकत्वानुपपत्तेरेकस्यां च भावनायां तृतीयादिबलेन करणानां नैरपेक्ष्यावगमेऽप्यरुणैकहायन्योरिव

१. अतश्चेति नास्ति. क. पु. २. एकार्थानेककाम्येति. क. पु.

द्रव्यक्रिययोः परस्परापेक्षत्वस्वाभाव्येन तृतीयाद्यवगतनैरपेक्ष्यस्य(१)चोपादेयतावत्करणातिरिक्तविषयत्वाभ्युपगमात् दर्शादिवच्चैकपदोपादानाभावेऽप्येकवाक्योपादानात् साहित्यप्रतीतेस्तस्य चोपादेयगतत्वेन विवक्षितत्वात्समुच्चितसाधनत्वाभावेऽपि साधनानां समुच्चयोपपत्तिरिति प्राप्ते—

(सिद्धान्तः)

अनेकादृष्टकल्पनापत्तेर्न सर्वेषां फलसम्बन्धः । तथा हि—फलतद्भावनाभेदाङ्गीकारे तावत् पक्षद्वयेऽप्यदृष्टभेदस्स्पष्ट एव । भावनैक्याङ्गीकारेऽपि च सत्यपि परमापूर्वैक्ये तत्तत्करणजन्योत्पत्त्यपूर्वभेदावश्यम्भावादनेकादृष्टकल्पना । न च करणानां परस्परसापेक्षत्वेन क्रमिकत्वाभावादेकमेवोत्पत्त्यपूर्वं कल्प्यतामिति वाच्यम्, तृतीयादिनाऽवगतस्याऽन्योन्यानिरपेक्षकरणत्वस्य कार्यनिरूपितत्वावश्यम्भावात् फले फलापूर्वे वा तदसम्भवेनोत्पत्त्यपूर्वनिरूपितत्वावगतेस्तद्भेदस्याऽपरिहार्यत्वात् । अत एव दधिपयोयागयोः क्रमिकत्वाभावेऽपि व्युत्पत्तिवाक्यावगतनैरपेक्ष्यबलादेवोत्पत्त्यपूर्वभेदोऽङ्गीकृतः श्रीगुरुचरणैः । अतोऽनेकादृष्टकल्पनापत्तेरगत्या प्रधानसम्बन्धत्यागो मत्वर्थलक्षणाङ्गीकरणं च न विरुध्यते । तेन धात्वर्थविशिष्टसोमादिविधानं सोमादिविशिष्टधात्वर्थविधानं वा नाऽनुपपन्नम् । तथा हि—

धात्वर्थात्फलपक्षे तस्मादेवाऽपूर्वम्, सोमादीनां तु दृष्टविधयैव धात्वर्थाङ्गत्वम् । एवं सोमादिभ्यः फलपक्षे तेभ्य एवाऽपूर्वम्, धात्वर्थस्तु निर्व्यापाराणां सोमादीनां फलजनकत्वानुपपत्तेराश्रयत्वेन दृष्टविधयैव सोमाद्युपकारकः । विशिष्टविधिना सोमाद्यङ्गत्वस्वीकाराच्चाऽऽश्रयस्य प्राकरणिकत्वाभावेऽपि न क्षतिः ।

१. चोपादेयेति नास्ति. क. पु.

तेनाऽनेकादृष्टकल्पनाभावादितराविशिष्टस्यैकस्यैव फलसम्बन्धः ।

न च विनिगमनाविरहात्सर्वेषामेव फलसम्बन्धसिद्धेरनेकादृष्टकल्पनमपि फलमुखत्वान्न दोषमावहतीति वाच्यम्, भावार्थाधिकरणे वक्ष्यमाणरीत्या विनिगमकस्य सत्त्वात् । तस्मादेकस्यैव फलसम्बन्ध इति सिद्धम् ॥

इति प्रथमं प्रतिपदाधिकरणम् ॥ १ ॥

अथ द्वितीयं भावार्थाधिकरणम् ॥ २ ॥

(**संशयः**)

यदा चैकस्य तदा किं धात्वर्थस्य ? उत उपपदार्थस्य ? इति विचार्यते ।

(**पूर्वपक्षः**)

तत्र फलस्य साध्यत्वात्सिद्धरूपसाधनापेक्षायां योग्यत्वात्सोमादेरेव करणत्वेनाऽन्वयो न त्वसिद्धस्य धात्वर्थस्य । साध्यस्य साध्येन(१)तत्त्वेनाऽसम्बन्धात् । अतश्च योग्यतारूपलिङ्गात्तावत्सोमादेरेव करणत्वम् ।

न च शब्दगतप्रत्यासत्त्या धात्वर्थस्यैव कथञ्चित्स्वकारकसम्पादनेन योग्यतामापन्नस्य करणत्वावगतेः पदश्रुत्या लिङ्गं बाध्येतेति वाच्यम्। फलपदापेक्षया द्वयोरपि पदान्तरोपात्तत्वेन फलसम्बन्धे पदश्रुत्यभावात् । प्राथमिकभावनासम्बन्धे विद्यमानाया अपि तस्या विरोधाभावेन सोमाद्यन्वये बाधकत्वाभावाच्च । न हि प्राथमिको भावनान्वयस्सोमादीनां सिद्धा-

---

१. समत्वेनेति. क. पु.

न्तिनोऽनभिमतः, सप्तमाद्याधिकरणे सर्वेषां भावनान्वयस्य व्युत्पाद्यमानत्वात् ।

न च यस्य यस्य भावनासम्बन्धे यद्यत्प्रमाणं तद्गतबलवत्त्वेनैव पार्ष्ठिकफलसम्बन्धे निर्णयाङ्गीकरणात् धात्वर्थस्य च पदश्रुत्या भावनान्वयात् तस्यैव फलसम्बन्धोपपत्तेर्लिङ्गबाधोपपत्तिरिति वाच्यम् । तर्हि सोमाद्यन्वयबोधिकायाः कारकश्रुतेः पदश्रुत्यपेक्षयाऽपि प्रबलत्वेन तया लिङ्गोज्जीवनात् । तथा हि—

पदश्रुतिर्हि सन्निधानत्वात् स्थानरूपा भवेत् एकवाक्यगतसन्निधानत्वाद्वाक्यरूपा वा, उभयथाऽपि श्रुत्यपेक्षया दौर्बल्यम् । अस्तु वा एकपदत्वात् श्रुतिरूपत्वम् । न ह्यत्र संसर्गोऽन्यसंसर्गवत्संसर्गविधया भासते । तथा सति 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत' इति साहित्यरूपसंसर्गांशेऽनुशासनवैयर्थ्यापत्तेः । अपि तु पदार्थविधयैव शक्त्या निरूढलक्षणया वा । अतश्च यद्यपि एकपदस्थले सामान्यतोऽन्वयस्याऽप्युपात्तत्वाच्छ्रुतिरूपत्वं, तथाऽपि सोमादौ करणतारूपविशेषस्य तृतीयया शक्त्यैवोपात्तत्वात्कारकश्रुतेर्बलवत्त्वमिष्टमेव । अतश्च तदुपजीवितेन लिङ्गेन सोमादीनामेव पार्ष्ठिकफलसम्बन्धावगमाद्धात्वर्थो यथैव(१)स्वर्गकामाधिकरणन्यायेन भाव्यत्वात्प्रच्यावितस्तथैव करणत्वादपीति पदश्रुत्या इतिकर्तव्यतांशे निपततीति सिद्धं धात्वर्थविशिष्टस्य सोमादेरेव फलकरणत्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—न सोमादेः फलसम्बन्धः । स हि भावनान्वयनैरपेक्ष्येण वाऽभ्युपगम्यते ? उत तदन्वयोत्तरकालं वा ? नाऽऽद्यः, कारकाणां परस्परान्वयानङ्गीकारात् । भावनावाचिनः

१. पू. मी. ६. १. १.

क्त्वो हि सम्बन्ध्यर्थके ण्वुलादिप्रत्यये कृते कारकादिशब्दव्युत्पत्तेः क्रियासम्बन्धित्वमेव कारकत्वम् । तदसति क्रियासम्बन्धे बाध्येत । अतो न कारकाणां परस्परसम्बन्धः । सोमादिपदानां फलपदान्वये फलपदस्य च भावनापदान्वये फलपदातिरिक्तसुबन्तार्थप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति फलपदजन्योपस्थितिः कारणं, फलप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति च प्रत्ययजन्योपस्थितिरित्यनेककार्यकारणभावकल्पनागौरवापत्तेश्च । अतो लाघवात्सर्वेषां कारकाणां भावनायामेवाऽन्वयान्न तावत्सोमादेस्तदन्वयनैरपेक्ष्येण फलान्वयोऽभ्युपगन्तुं युज्यते । तेन भावनान्वयोत्तरं पार्ष्ठिकः फलान्वयो वाच्यः । स चाऽसौ भावनावच्छेदकीभूतस्य धात्वर्थस्यैव वक्तुमुचितो न तदनवच्छेदकीभूतानां द्रव्यगुणादीनाम् । अतो धात्वर्थस्यैव फलसम्बन्धो युक्तः ।

सूत्रं तु–ये भावनावच्छेदार्थाः कर्मशब्दाः धात्वर्था इति यावत् । तेभ्य एव, अपूर्वोत्पत्तिरूपा वा फलोत्पत्तिरूपा वा क्रिया, प्रतीयेत । कुतः? एष ह्यर्थो विधेयफलभावनावच्छेदकत्वेन सम्बध्यते, न तु द्रव्यगुणादिरूपः इति व्याख्येयम् ॥ १ ॥

सर्वेषां भावोऽर्थ इति चेत् ॥ २-१-२ ॥

ननु धात्वर्थस्याऽपि न कारकत्वातिरिक्तसम्बन्धेन भावनावच्छेदकता, पचति पाकं करोति पाकेन करोत्योदनमित्येवंप्रकारेणैव विवरणात् । तच्च कारकत्वं द्रव्यगुणादिष्वप्यविशिष्टमिति भावनावच्छेदकत्वाविशेषात्सर्वेषामेव फलसम्बन्धप्रसक्तौ योग्यतारूपलिङ्गाद्द्रव्यादेरेव फलसम्बन्धोपपत्तिरिति चेत् ॥ २ ॥

येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि, तस्मात्तेभ्यः पराऽऽकाङ्क्षा, भूतत्वात्स्वे प्रयोगे ॥ २-१-३ ॥

येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि, तस्मात्तेभ्यः प्रतीयेत ॥ २-१-४ ॥

न सोमादेः फलसम्बन्धः, तथात्वे प्रतिपदाधिकरणोक्तस्याऽनेकादृष्टकल्पनप्रसङ्गस्याऽनिवारणात् । तथा हि—सोमाद्यावदेकमपूर्वमावश्यकम् । यागस्याऽपि न दृष्टविधया सोमोपकारकत्वमिति ततोऽप्यपरं कल्प्यम् । यागस्याऽऽश्रयत्वेन दृष्टविधयैव सोमोपकारकत्वमिति चेत्, किमिदमाश्रयत्वं नाम ? अवान्तरव्यापाररूपत्वं वा, जन्यत्वमात्रं वा, संस्कारकत्वं वा? नाऽऽद्यः; तथा सति यागस्याऽपि फलजनकत्वावश्यम्भावात् तस्य चाऽपूर्वमन्तरेणाऽनुपपत्तेः । न हि यागसोमयोरेकापूर्वजनकत्वं सम्भवति । अपूर्वस्य शक्तिरूपत्वेन शक्तिमद्भेदे भेदस्याऽऽवश्यकत्वात् ।

न द्वितीयः; यागानुष्ठानस्य निष्प्रयोजनत्वापत्तेः । न ह्यस्येन्द्रियकामादिहोमवत्प्रयोजनान्तरं क्लृप्तमस्ति । अतश्च तस्य फलान्तरकल्पने पुनरदृष्टान्तरकल्पना तदवस्थैव ।

नाऽपि तृतीयः; यागस्याऽवघातादिवत्संस्कारकत्वायोगेन प्रोक्षणादिवददृष्टद्वारकत्वावश्यम्भावात् । अतश्च यागस्य फलसम्बन्धे तस्मादेवाऽपूर्वम् । सोमादेस्तु सत्यपि प्राथमिके भावनाकरणत्वे पार्ष्ठिकफलसम्बन्धाङ्गीकारे अपूर्वान्तरकल्पनापत्ते-

दृष्टविधया यागसम्बन्ध एव पार्ष्ठिकोऽङ्गीक्रियते । तेनाऽदृष्टकल्पनालाघवार्थं धात्वर्थस्यैव फलसम्बन्धः ।

अयमेव चाऽर्थो धातूपपदार्थस्वरूपनिरूपणद्वारेण(१)सूत्रकृतोक्तः । येषामुच्चारण एव स्वे वाच्ये निष्पन्नरूपस्योपलब्धिः, तानि नामानि । तस्मात्तेभ्यस्साधनाकाङ्क्षा, परा दूरे । नाऽस्तीति यावत् । तदुच्चारणकाल एव तदर्थानां सिद्धत्वप्रतीतेः । अतस्तत्साधनत्वेन यागादिविधानं न दृष्टविधयोपयुज्यत इत्यदृष्टं कल्प्यम् ।

येषांतूत्पत्तौ उच्चारणकाले, स्वेऽर्थे प्रयोगो न विद्यते, स्वार्थो न विद्यत इति यावत् । तान्याख्यातानि । तस्मात्तदर्थेभ्यो निष्पन्नरूपत्वेन प्रतीयमानेभ्यस्साधनाकाङ्क्षा झटिति प्रतीयेत । अतस्तत्साधनत्वेन विधीयमानं सोमादि दृष्टविधयैवोपयुज्यत इत्यनेकादृष्टकल्पनाभावाद्धात्वर्थादेव फलमिति भावः ॥ ३, ४ ॥

ननु सम्भवत्यपूर्वाख्यावान्तरव्यापारद्वारा सोमादेः फलकरणत्वे क्रियारूपाश्रयव्याप्यत्वं विना फलकामनायां सत्यां स्वत एवाऽपूर्वोत्पत्तिद्वारा फलोत्पत्तिप्रसङ्गेन विधिवैयर्थ्यप्रसङ्गादाश्रयाकाङ्क्षोपपत्तेराश्रयस्याऽपि च गुणनिष्ठकृतिफलजनकतानिर्वाहार्थत्वेन दृष्टविधयैवेन्द्रियकामहोमवत्फलान्तराभावेऽपि सोमाद्यङ्गत्वोपपत्तेर्नाऽनेकादृष्टकल्पना । सत्यामपि चाऽनेकादृष्टकल्पनायां, सत्यपि गुणनिष्ठकरणता(२)निरूपकयागनिष्ठकरणत्वकल्पनाकृते गौरवे सोमादीनामपि भावनावच्छेदकत्वाविशेषात्प्रथमसूत्रोक्तं धात्वर्थस्यैव भावनावच्छेदकत्वं नैवोपपादितमि-

---

१. मुखेनेति. क. पु.   २. निर्वाहकेति. ख. पु.

त्यत आह—

आश्रितत्वात्प्रयोगस्य ॥ २-१-५ ॥

यद्यपि(१)तावत्प्राथमिकभावनासम्बन्धवेलायां सोमादेरपि करणत्वमविशिष्टं, तथाऽपि पार्ष्ठिकः फलसम्बन्धो यद्गतं प्राथमिकभावनासम्बन्धबोधकप्रमाणबलवत्त्वं, तस्यैव वक्तुमुचितो नाऽन्यस्य । धात्वर्थस्य च तत् । तथा हि—यद्यपि तावत्सोमादेः करणत्वं श्रुत्या, लक्षणया च धात्वर्थस्य, तथाऽपि प्रत्ययार्थस्य भावनायाः प्रकृत्यर्थं प्रति "तयोस्तु प्रत्ययः प्राधान्येने" ति स्मृत्या प्राधान्यस्याऽनुशासितत्वात् 'व्रीहीनवहन्ती'तिवत्प्राधान्येऽवगते यागस्य श्रुत्यैव तदङ्गत्वोपपत्तिः ।

न च प्राधान्यस्याऽनुशासनेऽपि प्रत्ययस्य भावनामात्र एव शक्तिकल्पनेन तत्प्राधान्यस्य लक्षणादिनाऽपि भानोपपत्तौ तत्र शक्त्यकल्पनान्न 'व्रीहीनवहन्ती'तिवत्प्राधान्यस्य श्रौतत्वेनाङ्गस्य श्रौतत्वमिति वाच्यम् । सत्यपि प्राधान्यस्य लाक्षणिकत्वे 'परिपूर्णं पदं पदान्तरेणाऽन्वेती'ति न्यायेन सोमादिपदानां भावनापदान्वये तस्य परिपूर्णत्वापेक्षणात्ततः पूर्वमेव यागादेरङ्गत्वावगतेः तदुत्तरभाविनस्सोमाद्यङ्गत्वस्य दौर्बल्यात् । अतश्च यथैवाऽऽग्नेयादिवाक्येऽष्टाकपालादीनां करणत्वस्य लाक्षणिकत्वेऽपि उपजीव्यत्वेन पूर्वभावित्वात्तदुत्तरभाविश्रौतमपि 'व्रीहिभिर्यजेत' त्यादौ व्रीहीणां करणत्वं परम्परासम्बन्धेनैव निर्वाह्यते, एवं सोमादेरपीति सिद्धं धात्वर्थस्यैव फलसम्बन्धस्सोमादीनां तदर्थतेति ।

प्रयोजनं तु—सर्वेषां फलसम्बन्धपक्षे विहितयोः क्रिया-

१. तावदिति नास्ति. क. पु.

द्रव्ययोरसम्भवे काम्ये सङ्कल्पोत्तरं, नित्ये ततः पूर्वमपि न प्रतिनिध्युपादानम् । उभयोरदृष्टार्थत्वेन प्रयाजादिवत्प्रतिनिध्यभावात् । प्रारब्धप्रयोगापरिसमापननिमित्तदोषपरिहारार्थं तु यत्किञ्चिदनियतद्रव्याक्रियोपादानेन प्रयोगसमापनमिष्टमेव । न चैतावता तस्य प्रातिनिधित्वम्, सदृशानियमे प्रमाणाभावेन प्रतिनिधित्वानुपपत्तेः । एवं सोमादेः फलसम्बन्धपक्षेऽपि तस्याऽदृष्टार्थत्वात्तदपचारे न तत्प्रतिनिध्युपादानम् । प्रक्रान्तसोमप्रयोगस्तु यत्किञ्चिदसदृशमपि द्रव्यं गृहीत्वा समापनीय एव । न च प्रधानाभावे कथं प्रयोगसमाप्तिः? शिष्टविगर्हणान्यथानुपपत्त्या प्रयोगसमाप्तिं प्रति कामनादिवत्प्रयोगप्रक्रमस्याऽप्यनुष्ठापकत्वस्य (१)षष्ठे वक्ष्यमाणत्वेन प्रधानसत्त्वासत्त्वयोरकिञ्चित्करत्वात् । न ह्यत्र प्रधानफलं स्वर्गाद्युत्पद्यते यत्प्रधानासत्त्वे नोत्पद्येतेत्याशङ्क्येत । तस्य तु साङ्गादेवोत्पत्तेर्नैतादृशे विषये उत्पत्तिसम्भवः ।

यत्तु नित्यस्थले प्रसवाद्यध्वंसादि, तत्काम्यं प्रधानाभावे नोत्पद्यताम् । न त्वेतावता शिष्टविगर्हणान्यथानुपपत्तिकल्पितदोषपरिहारार्थं प्रयोगो न समापनीयः, प्रयोगारम्भस्यैवाऽनुष्ठापकस्य सत्त्वात् । अतो यत्किञ्चिद्द्रव्यमुपादाय प्रयोगसमापनं युक्तमेव । न चैतावता प्रतिनिधित्वम्, सदृशानियमे प्रमाणाभावेन तत्त्वानुपपत्तेः । सिद्धान्ते तु सोमादेर्दृष्टार्थत्वेन युक्तस्तदपचारे प्रतिनिधिः ।

यत्तु मूले श्येनोद्भिदादिपदानां नामतासिद्धिरपि विचारप्रयोजनम् । श्येनादिपदार्थस्य फलसम्बन्धे धात्वर्थसामानाधिकरण्या(२)सम्भवान्न श्येनादिपदानां नामत्वम् । अत एव तद्विचारोऽप्यार्थादेतदधिकरणोत्तरं द्रष्टव्य इत्युक्तं, तदनादरात् ।

---

१. पू. मी. ६. २. ३. २. सामानाधिकरण्याभावादिति. क. पु.

तथा हि—न तावद्गुणविधित्वनिराकरणार्थानां मत्वर्थलक्षणादिहेतूनामेतदधिकरणात्पूर्वमसम्भवः। एतदधिकरणपूर्वपक्षिणोऽपि यागवता सोमेनेत्येवं मत्वर्थलक्षणाया, विशिष्टविधिगौरवादेश्च सोमादिवाक्ये अवश्याङ्गीकार्यत्वेन तद्भिया उद्भिदादिवाक्ये उद्भित्पदार्थस्याऽपि यागरूपत्वाङ्गीकारौचित्यात्। अतश्चोद्भित्पदार्थस्यैव फलभावनाकरणत्वम्, याजिपदं (१)त्वर्थविशेषग्राहकमित्येवंविधः परं पूर्वपक्षोऽस्तु। न त्वेतावता नामत्वसिद्धिः, मत्वर्थलक्षणादिदोषस्य सिद्धान्तवत्पूर्वपक्षेऽप्यविशेषात्। ये तु धातुपरार्थ्यवाक्यभेदतत्प्रख्यतद्व्यपदेशादिहेतवः ते न धात्वर्थकरणत्वापेक्षा इति तन्निरूपणोत्तरमिव ततः पूर्वमप्युद्भावयितुं शक्या एव।

यदपि धात्वर्थस्य करणत्वासिद्धौ तृतीयान्तनामपदानां धातुसामानाधिकरण्याभावान्न तन्निमित्तनामधेयत्वोपपत्तिरित्युक्तं, तदुक्तहेतुभिः गुणविधित्वासम्भवे सिद्धे 'अग्निहोत्रं जुहोती' तिवत्समभिव्याहारमात्रेणैव नामत्वेऽवगते सामानाधिकरण्यार्थं तात्पर्यग्राहकस्य यजेः करणत्वलक्षकत्वाङ्गीकारादुपेक्षणीयम्।

तस्मात्पूर्वोक्तमेव प्रयोजनं ज्यायो न तु सूत्रकृतश्शून्यहृदयतापादिका नामत्वसिद्धिरपीति सिद्धम्॥

सूत्रं तु—प्रयोगस्य प्रयुज्यमानाया भावनायाः, समानपदोपात्तेन धात्वर्थेनैव पूर्वं, आश्रितत्वात् फलान्वयोऽप्यौत्तरकालिकः तस्यैव स्यादित्येवं व्याख्येयम्॥

ननु सर्वमिदं धात्वर्थातिरिक्तभावनासद्भावे समञ्जसम्। न तु तस्यामेव प्रमाणं पश्यामः। तथा हि—पच्यादिधातवस्तावद्वि-

---

१. त्वर्थविशेषतात्पर्यग्राहकमिति क. पु.

क्लृत्यादिरूपे फले तज्जनकव्यापारे च शक्ताः, न तु फलमात्रे तज्जनकव्यापारमात्रे वेत्यविवादम् । अन्यथा ग्रामो गमनवानि-त्यादिप्रतीत्यापत्तेः । फलानुकूलव्यापारारम्भेऽपि फलानुत्पाद-दशायां पाको भवतीति प्रयोगानापत्तेश्च ।(१) व्यापारापगमेऽपि फलसत्त्वादशायां पाको विद्यत इत्यस्याऽप्यापत्तेश्च । न च घञ-न्तधातोः फलानुकूले व्यपारे शक्तिः, अन्यस्य फलमात्र इति कल्पनान्नोक्तदोषापत्तिरिति वाच्यम्, अनेकशक्तिकल्पनापत्तेः । न च तर्हि घञ एव व्यापारे शक्तिः, धातोस्तु फल एवेति वाच्यम् । घञो भावप्रत्ययत्वेन धात्वर्थातिरिक्तार्थवाचित्वानुपपत्तेः । पच्य-र्थो विद्यते इत्यादिप्रयोगस्यैवंकल्पनायामपि निवारयितुमशक्य-त्वाच्च । अतो न तावत्फलमात्रं धात्वर्थ इति मण्डनमतं युक्तम् ।

नाऽपि व्यापारमात्रे, त्यजिगम्योः पर्यायत्वापत्तेः । अतो विक्लृत्यादिफले तज्जनकव्यापारे च तत्तद्धातूनां शक्तिः । साऽपि च न फलविशिष्टव्यापारे एका । तथात्वे फलस्य पदार्थै-कदेशत्वात्पदार्थान्तरेणाऽन्वयानुपपत्तेः । अपि तु प्रत्येकमेव । तयोस्तु साध्यसाधनभावस्संसर्गबललभ्य इति न तत्राऽप्यति-रिक्ता शक्तिः। शक्ततावच्छेदकञ्च तत्तद्धातुत्वम् । शक्यतावच्छेद-कमपि तत्तत्फलत्वं, तत्तद्व्यापारत्वं च । यथा पचतीत्यत्र विक्लृ-त्तिः फलं तदनुकूलव्यापारश्चोभयं पच्यर्थः । व्यापारश्चाऽत्रात्म-निष्ठः । प्रयत्नोऽधिश्रयणफूत्कारादिकञ्च शरीरगतम् । सर्वस्य विक्लृत्यनुकूलत्वेन व्यापारत्वाविशेषात् । शक्तिश्च फूत्कारत्वा-धस्सन्तापनत्वयत्नत्वादिना प्रत्येकमेव । न तु सर्वानुगता । अवच्छेदकमन्तरेण तस्य निर्वक्तुमशक्तेः ।

न चैवं सर्वकारकव्यापाराणां तत्त्वेन पच्यर्थत्वे नानार्थ-

१. व्यापारविगमेऽपीति क. ख. पु.

कत्वापत्तिः, तदाश्रयत्वेन च सर्वकारकाणां कर्तृत्वापत्तेस्तृतीयाद्यनापत्तिश्चेति वाच्यम्। सत्यपि नानार्थत्वे तदादाविव बुद्धिस्थत्वस्य वक्तृविवक्षाया एव नियामकत्वात्। अतश्च यत्कारकव्यापारो यदा पच्यर्थत्वेन विवक्षितस्तदा तदाश्रयस्य कर्तृत्वं विवक्षितम्। अत एव काष्ठं पचति, स्थाली पचतीत्यादिप्रयोगोऽपि सङ्गच्छते। यदा तु तद्व्यापारो न विवक्षितः, तदा तदाश्रयस्य काष्ठादेर्धातूपात्तव्यापारजनकत्वेन करणत्वस्य विवक्षितत्वात् काष्ठैः पचतीत्यादिप्रयोगोऽपि नाऽसङ्गतः। अतस्सिद्धं पच्यादिधातूनां फलतद्व्यापारवाचित्वम्।

किञ्च यत्राऽप्यस्ति, भवति, विक्लिद्यतीत्यादौ फलमेव स्पष्टं प्रतीयते न तु तज्जनको व्यापारः, तत्राऽपि व्यापारवाचित्वं धातोरव्याहतमित्युक्तं, 'अस्त्यादावपि कर्त्रंशे भाव्येऽस्त्येव हि भावने' इत्येवंवदद्भिर्वैयाकरणैः, वार्तिककृता च, तदा कथं शक्तस्सर्वजनानुभवसाक्षिकतया पच्यादौ प्रतीयमानस्य व्यापारसमूहस्य वाच्यत्वकल्पनामपह्नोतुम्? अतश्च सर्वस्याऽपि फलानुकूलस्य यत्नादेर्धातुनैवोक्तत्वादाख्यातार्थत्वासम्भवेन प्रत्ययवाच्याया धात्वर्थातिरिक्तभावनाया असम्भवः।

न चैवं तिङर्थाभावः। फलव्यापाराश्रयस्यैव कर्मकर्त्रादिरूपस्य तिङर्थत्वात्। तत्राऽपि फलव्यापारयोर्धातुलभ्यत्वादाश्रयत्वमेव लाघवाच्छक्यतावच्छेदकम्। एवमेकत्वादिसङ्ख्याऽपि (१) तिङाद्यर्थः। वर्तमानादिकालश्च लडाद्यर्थः। प्रवर्तना च लिङाद्यर्थः। तत्र फलं व्यापारं प्रति विशेषणम्। कर्म च फलं प्रति। कर्ता व्यापारं प्रति। सङ्ख्या कर्तृकर्मविशेषणम्। कालादिकं तु व्यापार एव, तथैवाऽनुभवात्। अतश्च सर्वत्र व्यापारविशे-

१. तिबाद्यर्थ इति. ख. पु.

ध्यक एव बोधः ।

न चैवं "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने" ति स्मृत्या प्रत्ययार्थस्य(१)प्राधान्यावगतेः कथं प्रकृत्यर्थस्य व्यापारस्य विशेष्यतेति वाच्यम् ? (२) "भावप्रधानमाख्यातमि"ति निरुक्तस्मृत्या भावशब्दवाच्यव्यापारस्य प्राधान्यावगतेः, तस्य च "धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयत" इति वैयाकरणस्मृत्या धातुवाच्यत्वावगतेः, विशेषस्मृत्यनुरोधेन सामान्यरूपायाः प्रत्ययार्थप्राधान्यस्मृतेस्सुबादिविषयत्वेन व्याख्यानात् ।

वस्तुतस्तु नेयं प्रत्ययार्थप्राधान्यस्मृतिः प्रत्ययार्थत्वावच्छेदेन प्राधान्यनियामिका, लिङ्गसङ्ख्यादेः प्रत्ययार्थत्वेऽपि प्राधान्यानङ्गीकारात् । नाऽपि प्रधानस्य सतः प्रत्ययार्थत्वनियमपरा, (३)"सत्त्वप्रधानानि नामानी" ति स्मृत्या लिङ्गसङ्ख्यादीन्प्रति प्रधानस्याऽपि प्रातिपदिकार्थस्य प्रत्ययार्थत्वाभावात् । किन्तु यत्रैव प्रमाणान्तरेण सुबर्थस्य करणत्वादेः प्रातिपदिकार्थं प्रति प्राधान्यं प्रसिद्धं, तदनुवादमात्रमियं स्मृतिरिति नाऽनया व्यापारस्य धात्वर्थत्वेऽपि विशेष्यताप्रतिबन्धः । एवं च पचतीति कर्त्राख्यातस्थले एकाश्रयको विक्लृत्यनुकूलो वर्तमानो व्यापार इति बोधः । पच्यत इति कर्माख्यातस्थले च एकाश्रयिका या विक्लृत्तिस्तदनुकूला भावनेति । पचति देवदत्तः, पच्यते तण्डुल

---

१. विशेष्यत्वावगतेरिति. ख. पु.

२. भावो भावना । प्रधानं प्राधान्येन मुख्यविशेष्यतया प्रतिपाद्यं यस्य तादृशमाख्यातमिति यास्कवचनस्याऽर्थः॥(निरु.अ.१.खं.१.सू.९.)

३. सत्त्वं द्रव्यं प्रधानं विशेष्यतया प्रतिपाद्यं येषां तानि सत्त्वप्रधानानि ॥ (निरु. अ. १. खं. १. सू. ९.)

इत्यादौ देवदत्ततण्डुलयोः प्रथमान्तयोर्यथाक्रममाख्यातोपात्ताभ्यां कर्तृकर्मभ्याममेदान्वयः। इतरकारकाणां तु यथायोगं साक्षात्परम्परासम्बन्धेन व्यापाररूपे धात्वर्थ एवाऽन्वय इति ध्येयम्।

चैत्रेण स्थीयत इत्यत्र भावाख्याते तु कर्तृकर्मणोरप्रतीतेः सङ्ख्याऽनान्वितैव, धात्वर्थान्विता वा। न चैवं धात्वर्थस्य द्वित्वादिविवक्षायां द्विवचनाद्यापत्तिः, अनुशासनबलेनैकवचनस्यैव साधुत्वात्। यत्तु उष्ट्रासिका आस्यन्त इति भावेऽपि बहुवचनं, तद्भाष्यकारवचनादत्रैव साध्वित्यवगन्तव्यम्। अतश्च क्वचिदप्याख्यातस्य भावनावाचित्वाभावात्कथं तस्यां समानपदश्रुत्या करणत्वावगतिरिति चेत्-न; धातोः फले तदनुकूलव्यापारे च शक्तिकल्पनायामपि धात्वर्थातिरिक्ताया आख्यातवाच्याया भावनाया अनपह्नवात्।

तथा हि—अनुकूलव्यापारो धात्वर्थ इति वदतोऽनुकूलत्वं किं जनकत्वमात्रमभिप्रेतम्? प्रयोजकत्वसाधारणं वा? नाऽऽद्यः, विक्लृत्तिरूपफलजनकीभूतशरीरगतक्रियाविशेषजनकस्याऽऽत्मगतस्य प्रयत्नादेः(१)उपक्षीणस्य फलाजनकत्वेनाऽसङ्ग्रहापत्तेः। न च तस्य पचतीत्यतोऽननुभवादेव तदसङ्ग्रहोऽप्यदोषः, पचति पाके यतत इत्येवंविधविवरणादेवाऽनुभवस्याऽपह्नोतुमशक्यत्वात्।

न द्वितीयः, कृष्यादीनामप्यत्यन्तव्यवहितानां विक्लृत्तिप्रयोजकत्वेन सङ्ग्रहापत्तेः। न च फलकारणतत्कारणीभूतव्यापारयोरेव ग्रहणमित्यत्राऽपि किञ्चिन्नियामकमस्ति, उभयमत्रेशस्य गौरवग्रस्तत्वात्।

न च फलानुकूलत्वस्य शक्यतावच्छेदकत्वानङ्गीकरणात्

१. उपक्षीणत्वेन फलाजनकस्येति क. ख. पु.

यत्नत्वाधःसन्तापनत्वादीनां तत्त्वेन शक्यतावच्छेदकत्वाङ्गीकाराद्यावत्सु व्यापारेषु पचेः प्रयोगप्रतीतिस्तावतामेव वाच्यत्वकल्पनान्नाऽतिप्रसङ्ग इति वाच्यम् । एवं तर्हि पचति पाके यतते, पाकं करोति, पाकं भावयतीत्यादिविवरणाद्यत्नादीनां पाकात्पृथक्करणेन यत्नादीनां पचौ सङ्ग्रहानुपपत्तेः ।

न च घञादिसमभिव्याहृतपच्यादेः फलमात्रबोधकत्वकल्पनादेव व्यापारस्य पृथग्विवरणोपपत्तिरिति वाच्यम् । तथात्वे व्यापारबोधकसामग्रीतो व्यापारबोधप्रसक्तौ तद्बोधं प्रति घञादिसमभिव्याहारस्य प्रतिबन्धकत्वकल्पने गौरवापत्तेः । तिबादिसमभिव्याहृतधातुत्वस्यैव व्यापारशक्ततावच्छेदकत्वकल्पने च कार्यकारणभावद्वयकल्पनस्य, शक्ततावच्छेदकगौरवस्य चाऽऽपत्तेश्च । घञादिसमभिव्याहृतधातुतो व्यापारानुभवापलापापत्तेश्च ।

न च विवक्षितस्यैव कारकव्यापारस्य पचिनोपादानाद्यत्नादीनां विवक्षाविरहादेव पृथक्करणोपपत्तिरिति वाच्यम् । देवदत्तः पचति, देवदत्तःपाके यतत इत्यत्र देवदत्तनिष्ठयत्नादेर्विवक्षावश्यम्भावात् । अन्यथा भवन्मते धातूपात्तव्यापाराश्रयत्वाभावाद्देवदत्तस्य प्रथमान्तत्वानुपपत्तेः । न च देवदत्तनिष्ठव्यापारान्तरविवक्षया तदुपपत्तिः, तथा सति पचतीत्यत्र भवन्मते यत्नबोधकशब्दाभावेन विवरणवेलायां यत्नानुवादानुपपत्तेः ।

अतोऽवश्यं पचतीत्यत्र भासमानोऽपि यत्नादिर्न पच्यर्थ इत्यभ्युपगन्तव्यम् । कस्तर्हि पच्यर्थ इति चेत् ? फलावच्छिन्नो व्यापार विशेष एव, यो वस्तुतः फलजनकः । फले तज्जनकव्यापारविशेषे च त्वदुक्तरीत्यैव वा अतिरिक्ता शक्तिः । तयोस्तु जन्यजनकभावसंसर्गबललभ्यः । अस्मिंश्च पक्षद्वये द्वितीयार्थः फलाश्रयत्वं, न तु फलमपि । तस्य धातुनैव लाभात् ।

अथवा व्यापारविशेष एव धातोश्शक्तिः, न तु फलेऽपि, गौरवात्। द्वितीयायास्तु फलमर्थः, न त्वाश्रयत्वमपि, तस्य प्रकृतिप्रत्ययसमभिव्याहारादेव बोधोपपत्तेः। नन्वेवं त्यजिगम्योः पर्यायत्वापत्तिः, संयोगानुकूलं हि कर्म गमेरर्थः, विभागानुकूलं त्यजेः। तद्यदि कर्ममात्रं धात्वर्थः, फलसामान्यं च द्वितीयार्थस्तदा त्यजिगम्योः(१) पर्यायत्वापत्तिः। तथा च ग्रामं गच्छतीति वक्तव्ये ग्रामं त्यजतीति प्रयोगापत्तिरिति चेत्--गमिधातुसमभिव्याहृतद्वितीयायास्संयोगरूपफलविशेषबोधकत्वं, त्यजिसमभिव्याहृतायाश्च विभागबोधकत्वमिति व्युत्पत्तिकल्पनेनोक्तातिप्रसङ्गनिरासात्।

वस्तुतस्तु विजातीयफलानुकूलतावद्व्यापारविशेषनिष्ठा फलानुकूलान्तिमव्यापारनिष्ठा वा (२)यागत्वादिजातिरखण्डोपाधिरेव वा तत्तत्फलजनकतावच्छेदकतया सिद्धा तत्तद्धातुशक्यतावच्छेदिका सती तत्तद्धात्वर्थः। एवं कर्मत्वकर्तृत्वादिकमपि क्रियाजन्यफलशालित्वादिसमनियतं जातिरूपमखण्डोपाधिरूपं वा सामान्यमङ्गीकृत्य तस्यैव(३) द्वितीयार्थताऽवगन्तव्या। अत एव व्यासङ्यवृत्तिकर्तृत्वं देवतात्वं चेति सिद्धान्तोऽपि सङ्गच्छते। अन्यथा आश्रयभेदेन प्रतिव्यक्तिभेदस्याऽऽवश्यकत्वात्कर्तृत्वैक्योपपादनानुपपत्तेः। तस्य च ससम्बन्धिकत्वाङ्गीकारान्निरूपकापेक्षायां करणादिना निरूपकेणाऽन्वयोऽपि नाऽनुपपन्नः। अस्मिंश्च पक्षे फलानुकूलव्यापारार्थकेषु(४) पच्यादिषु प्रयोज्यव्यापाररूपस्य फलस्य नाऽवश्यं शब्देनैव भानापेक्षा। पा-

---

१. पर्यायतापत्तिरिति क. ख. पु. २ पाकत्वयागत्वादिरिति ख. पु.
३. द्वितीयाद्यर्थताऽधिगन्तव्येति. क. पु.
४. पच्यादिधातुष्विति. क. पु.

कत्वादिसमनियतस्य विक्लृत्यनुकूलत्वादिधर्मस्याऽऽक्षेपेणैव भानोपपत्तेः ।

एवं प्रयोज्यव्यापाररूपफलवाचिष्वपि धातुषु भवति विक्लिद्यतीत्यादिषु वाच्येन(१)विक्लृत्तित्वादिसामान्येन स्वसमनियतस्य प्रयोजकव्यापारजन्यत्वस्याऽऽक्षेपेणैव बोधोपपत्तेर्न तदंशे(२)शब्दव्यापारकल्पना युक्ता । अत एवोभयत्र विवरणेन(३) नियमेन तेषामुल्लेखः । न हि पचतीत्यस्य विक्लिद्यतीत्यस्य वा कृत्या विवरणं क्वचिन्नियतं दृश्यते । तस्मात्प्रयोज्यप्रयोजकव्यापारयोरन्यतरवाचिषु धातुष्वितरप्रतीतिराक्षेपेणैवेति न तस्मिन्नपि शब्दव्यापारकल्पनावसरः । अत एवोक्तं वार्तिककृता(४) 'कदाचिदभिधीयमानकर्मशक्त्याक्षिप्तप्रयोज्यव्यापारो वा स्वयमेवाऽऽक्षिप्तप्रयोज्यव्यापारो वा केवलं प्रयोजकव्यापार एव विवक्ष्यते-घटं करोत्योदनं पचतीति। कदाचिदाक्षिप्तप्रयोजकव्यापारं प्रयोज्यव्यापारमात्रं-घटो भवति विक्लिद्यन्ति तण्डुला' इति । तत्सिद्धं फलानुकूलयावद्व्यापारविशेषवर्ति अन्तिमव्यापारवर्ति वा पाकत्वयागत्वादिजातिरखण्डोपाधिर्वा तत्तद्धातुशक्यतावच्छेदकम् । शक्ततावच्छेदकं च तत्तद्धातुत्वमिति ।

अतश्च फलानुकूलव्यापारसमूहस्य पच्यर्थत्वेऽपि तदनुकूलस्य यत्नादेर्धात्वर्थात्पृथक्(५)विव्रियमाणस्य धात्वर्थत्वायोगात्, विवरणवेलायाञ्च भासमानस्य भानकारणजिज्ञासायां धातोरन्यत्र व्यापृतत्वात्, पारिशेष्यात्तिबादेरेव तद्बोधकत्वमिति निश्चीयते । तत्र च पचति पाकं भावयतीत्यनुकूलव्यापारवा-

---

१. भवनाविक्लृत्तित्वेति ख. पु. २. शब्दस्य व्यापारेति ख. पु.
३. विक्लृत्यनुकूलत्वादिना नियमेनेति. ख. पु.
४. तं. वा. पृ. ३४३ पं. २४. ५. क्रियमाणस्येति ग. पु.

चिणिजन्तभूधातुना विवरणात्सङ्ग्राहकलाघवाच्चाऽनुकूलव्यापार एव तिङर्थो न तु यत्नमात्रम्, रथो गच्छतीत्यादौ रथे यत्नासम्भवेनाऽव्यापकत्वात् । अतस्सर्वसाधारण्येनाऽनुकूलव्यापार एव तिङर्थः । न च पाकं करोतीति यत्नार्थकेन कृञा विवरणात्तिङोऽपि यत्नार्थकत्वम्, करोतेर्भावयतिपर्यायत्वेन यत्नार्थकत्वासिद्धेः । यथैव हि घटो भवतीत्यादौ भवनकर्तृत्वं प्रतिपन्नस्य घटस्य तमपरो भावयतीत्यादौ भावयतिकर्मत्वं, एवं तमपरः करोतीत्यत्र करोतिकर्मत्वमपि । अतश्च भवत्यर्थ(१)कर्तृकर्मकत्वाविशेषात्करोतिर्भावयतिपर्यायो न यत्नार्थकः । अत एव रथो गच्छतीत्यत्राऽपि करोतिना विवरणमविशिष्टम् ।

किञ्च यत्नार्थकत्वे करोतेर्यततेरिवाऽकर्मकतापत्तिः । अतश्च सकर्मकत्वाकर्मकत्वरूपधर्मभेदान्न करोतियतत्योः पर्यायत्वं, अपि तु भावयतिपर्यायत्वमेवेति तद्विवरणमप्यनुकूलव्यापारवाचित्व एव तिङस्साधकम् ।

यत्तु पचति पाके यतत इत्येवं यत्नेन विवरणं, तल्लाक्षणिकम् । सङ्ग्राहकलाघवानुरोधेनाऽनुकूलव्यापारे शक्तौ गृहीतायां यत्नत्वेन तद्बोधस्य लक्षणयाऽङ्गीकारात् । वरं च सामान्यवाचकस्य पदस्य लक्षणयाऽपि क्वचिद्विशेषपरत्वम्, न तु यत्नादिविशेषवाचकस्य रथादिनिष्ठविशेषलक्षकत्वम्, जहत्स्वार्थलक्षणापत्तेः । अतो विक्लित्तिरूपफलोद्देश्यकः पाकानुकूलो व्यापारसमूह एव तिङर्थः । तत्र च सर्वानुगतस्याऽन्योत्पादकव्यापारत्वस्यैव शक्यतावच्छेदकत्वात्(२) तेन रूपेणाऽऽख्यातात्बोधेऽपि तत्तद्विशेषरूपेण तत्तदितिकर्तव्यताविधिभ्यो बोधान्न

१. कर्तुः कर्मत्वाविशेषादिति. ख. पु. २. तत्त्वेन रूपेणेति क. ख. पु.

तेषामपि वैयर्थ्यमिति पार्थसारथिमतानुयायिनः ।

वस्तुतस्तु(१) तत्तज्जन्यभेदेन तत्तदुत्पादकभेदेन च(२) व्यापारत्वभेदादेकशक्यतावच्छेदकाभावेन सर्वानुगतैकशक्तिकल्पनानुपपत्तेस्तत्तद्विशेषविषयकतत्तच्छक्तिकल्पने च तत्तदितिकर्तव्यताविधीनां वैयर्थ्यापत्तेस्तेषां तात्पर्यग्राहकताङ्गीकारे चाऽनेकशक्तिकल्पनस्य तावदवश्यम्भावाल्लाघवादेकत्रैव शक्तिरन्येषां लक्षणादिना, विध्यन्तरेण वा बोध इत्यङ्गीक्रियते । न च क्व शक्तिः क्व लक्षणेत्यत्र नियामकाभावः । पचति पाके यतते, पाकं करोतीत्यादिविवरणस्यैव यत्नशक्तिग्राहकत्वात् । न च सङ्ग्राहकलाघवानुरोधेनाऽनेकशक्तिकल्पना युक्ता, गङ्गापदस्याऽपि तीरे तद्रापत्तेः । यत्राऽपि गुरुभूतैकशक्यतावच्छेदकानुरोधेनैकशक्तिकल्पनं, तत्राऽपि लघुभूतैकशक्यतावच्छेदकसम्भवे सङ्ग्राहकलाघवार्थं गुरुभूतावच्छेदकाङ्गीकरणमन्याय्यमेव । सङ्ग्राह्याणामवच्छेदकप्रतीत्युत्तरप्रतीतिकत्वेन तन्निष्ठगौरवस्य फलमुखत्वेनाऽप्रामाणिकत्वात् । अतश्च यत्नत्वस्य जातिरूपत्वेन लघुत्वाच्छक्यतावच्छेदकत्वम् । न च यत्नत्वेन रूपेण भानाभावः, पचति पाके यतते, पाकं करोतीति विवरणस्याऽनुभविकत्वात् ।

यत्तु कृञो न यत्नार्थकत्वं, भावयतिपर्यायत्वादित्युक्तं तन्न, आख्यातवत्करोतेरपि यत्नार्थकत्वस्यैव लाघवेनाऽङ्गीकारात् । न च शक्यतावच्छेदकस्य पदादप्रतीयमानस्य कल्पयितुमशक्यत्वात्कथं करोतेर्यत्नार्थकत्वम् ? प्रयत्नाभावे वातरोगादिना स्पन्दमाने चैत्रे स्पन्दानुकूलविजातीयवायुसंयोगरूपव्यापारवत्यपि नाऽयं स्पन्दं करोतीति प्रयोगदर्शनाद्यत्नार्थकत्वप्रतीतेः । व्यापारजन्यत्वाविशेषेऽपि यत्नजन्यत्वाजन्यत्वाभ्यामेव घटाङ्कुरयोः कृता-

१ तत्तदन्यभेदेनेति. क. ख. पु. २. व्यापारत्वानामिति. ख. पु.

कृतव्यवहारदर्शनाच्च । न च बीजेनाऽङ्कुरः कृतः, रथो गमनं करोति, स्थाली पाकं करोतीत्यादावचेतनेऽपि प्रयोगादनुकूलव्यापारवाचित्वम् । उभयविधव्यवहारसत्वे शक्यतावच्छेदकलाघवस्यैव नियामकत्वात् । अचेतने कृत्याश्रयत्वव्यवहारस्तु अनुकूलव्यापारे लाक्षणिकः । अत एव चैत्रत्वाद्यप्रतीतावपि शोभनः पाकं करोतीत्यादौ शोभनाश्रितः पाकानुकूलो यत्न इत्येव प्रतीयत इति कैश्चिदुक्तम् । अतो यत्न एव कृञर्थः ।

यत्तु कृञो यत्नार्थकत्वे यततेरिवाऽकर्मकतापत्तिः । फलव्यधिकरणव्यापारवाचकत्वं हि धातोस्सकर्मकत्वम् । यथा पच्यादौ फलस्यौदननिष्ठत्वात्, व्यापारस्य च देवदत्तादिनिष्ठत्वात् । अकर्मके तु शयनासनादौ क्रियाफलयोरेकवृत्तित्वान्न सकर्मकत्वम् । अतश्च यत्नजन्यफलस्य कर्मण्यभावाद्यथैव यततिरकर्मकः, तथैव कृञोऽपि (१)स्यात् । अथ ज्ञानजन्यस्य ज्ञातताख्यफलस्येव कृतिजन्यस्याऽप्युत्पत्तिरूपस्य(२)तस्य कर्मणि स्वीकाराज्ज्ञाधातुवदेव कृञोऽपि सकर्मकत्वम्, ततो यततेरपि तदापत्तिः । ततश्च देवदत्तेन क्रियते घट इतिवद्यततिधातोरपि कर्मणि लकारापत्तिः । यततिवद्वा कृञोऽपि तदनापत्तिः । घटं करोतीत्यादौ घटे द्वितीयानापत्तिश्च । कृञोऽप्यकर्मकत्वाङ्गीकारे(३) "कर्मवत्कर्मणा तुल्यक्रियः" इत्येतत्सूत्रविहितयगाद्यनापत्तेः क्रियते घटः स्वयमेवेत्यनापत्तिश्च । तद्वदेव वा यततेरपि तदापत्तिश्चेत्युक्तम्, तन्न । वस्तुतो यः फलव्यधिकरणो व्यापारस्तद्वाचित्वं धातोस्सकर्मकत्वमभिप्रेतम् ? किं वा फलव्यधिकरणत्वेन व्यापारवाचकताऽभिप्रेता ? नाऽऽद्यः, पच्यादेरपि

---

१. तत्स्यादिति क. ख. पु. २. तस्येति नाऽस्ति ख. पु.
३ पा. सू. ३. १. ८७.

फलाविवक्षायामकर्मकत्वाङ्गीकारात्तत्र च फलव्यधिकरणत्वस्य वस्तुतस्सत्त्वादतिव्याप्तेः । न च वैवक्षिकाकर्मकत्वसत्त्वेऽपि स्वाभाविकाकर्मकत्वानङ्गीकारात्स्वाभाविकसकर्मकत्वलक्षणाव्याहतिः । एवमपि (१)यतत्यादौ स्वाभाविकाकर्मके उत्पत्तिरूपस्य फलस्य यत्नव्यधिकरणत्वेनाऽतिव्याप्तेरनिवारणात् ।

न च धात्वर्थभूतफलसामानाधिकरण्यवैयधिकरण्ये एव तत्प्रयोजके । उत्पत्तिश्च न यततेरर्थः, अपि तु फलसमानाधिकरणक्रियैवेति वाच्यम् । तथात्वे करोतेरप्युत्पत्तिवाचित्वेन फलभेदोपपत्त्या उक्तदोषाप्रसङ्गेन यत्नवाचित्वे बाधकाभावात् । आसनशयनादीनामपि कालादिकर्मयोगेन स्वाभाविकसकर्मकत्वस्य चैत्रेणाऽऽस्यते मास इत्यादिप्रयोगसिध्यर्थमङ्गीकृतत्वात्तत्र च फलव्यापारयोरेकनिष्ठत्वादुक्तलक्षणाव्याप्तेश्च ।

अत एव न द्वितीयोऽपि । फलव्यधिकरणत्वस्य वस्तुस्वभावबललभ्यत्वेन वाच्यताङ्गीकारे गौरवाच्च । अतो नेयं सकर्मकाकर्मकत्वयोर्निरुक्तिः । किन्तु अविवक्षाविरहविशिष्टकर्माकाङ्क्षधातुत्वं सकर्मकत्वम् । अस्ति चेदं घटं करोतीत्यादौ, कृञो नियमेन विवक्षायां सत्यां कर्मपदसाकाङ्क्षत्वात् । न तु पर्यायत्वेऽपि यततेः । आकाङ्क्षायाश्शब्दविशेषधर्मत्वेन पर्यायत्वाबाधकत्वात् । अतश्च यथैव कर्मत्वमित्येतत्पदं नाऽऽनयातिपदापेक्षं, किन्तु समानार्थकत्वेऽपि द्वितीयैव तत्साकाङ्क्षा, तथा पर्यायत्वेऽपि कृञ एव कर्माकाङ्क्षा न यततेः । अत्र च कर्माविवक्षायां पच्यादेरकर्मकत्वमविवक्षाविरहवैशिष्ट्याभावादव्याहतम् । आसनादीनां च कालादियोगविशिष्टानां कर्माकाङ्क्षत्वादाविरुद्धं सकर्मकत्वम् ।

एवं यत्रैक एव धातुरर्थान्तरे सकर्मकोऽर्थान्तरे चाऽकर्म-

---

१. यत्नादाविति. क. ख. पु.

कः तत्राऽप्येकस्यैव तत्तदर्थप्रतिपादकत्वरूपधर्मपुरस्कारेण कर्मसाकाङ्क्षत्वतदनाकाङ्क्षत्वे द्रष्टव्ये । यथा(१)ग्रन्थधातोः ग्रथनार्थकस्य ग्रथ्यमानव्यापारवाचित्वेऽकर्मकत्वं, ग्रथितृव्यापारवाचित्वे च सकर्मकता। अत एव यत्र कर्मद्वयसाकाङ्क्षत्वं तत्र द्विकर्मकत्वमपीति प्राञ्चः ।

वस्तुतस्तु द्वितीयकर्मणो मुख्यकर्मत्वाभावेऽपि कर्मकारकसम्बन्धित्वविवक्षायामपादानादिकारकान्तरत्वाद्यविवक्षायां च पारिभाषिककर्मत्वस्य व्याकरणे प्रतिपादनान्न तस्याऽऽद्यकर्मतुल्यत्वमिति द्रष्टव्यम् ।

अतश्च कृञो यत्नपर्यायत्वेऽपि सकर्मकत्वात्क्षतेर्युक्तस्तन्निमित्तद्वितीयाकर्मलकारादियोगः, 'कर्मवत्कर्मणे'ति सूत्रविहितयगादियोगश्च । तत्र त्वयं विशेषः—यत्प्राप्यकर्मातिरिक्तकर्मान्तराकाङ्क्षत्व एव सः, न तु प्राप्यकर्मण्यपि । अत एव जायते घटः स्वयमेवेत्येवं न भवति, भवति च स्वयमेव क्रियते घट इति । न त्वेतावता यततेरपि कर्मकर्तरि प्रयोगः, तस्य शब्दस्वाभाव्येनैव कर्मानाकाङ्क्षत्वात् । शब्दस्वभावेन कर्माकाङ्क्षादेव धातोः कर्मत्वाविवक्षापूर्वकं तस्यैव कर्तृत्वविवक्षायां यगादिविधानात् ।

नन्वेवमपि "कर्मवत्कर्मणा तुल्यक्रिय" इति सूत्रेण कर्मनिष्ठव्यापार एव कर्तृत्वविवक्षायां यगादिविधानात् यत्नस्य च देवदत्तनिष्ठत्वेन ओदननिष्ठत्वाभावात् पच्यते ओदनस्स्वयमेवेति प्रयोगानुपपत्तिरिति चेत्—न; तादृशस्थले कृञादेरप्युत्पत्त्यादिरूपफललक्षकत्वाङ्गीकारात् । लक्षणां विनाऽप्युपपत्तिमग्रे निरूपयिष्यामः ।

१. श्लोकधातोरिति. क. ख. पु.

तत्सिद्धं कृञो यत्नवाचित्वात्तेन यततिना च विवरणादाख्यातस्य यत्नवाचित्वम्। अत एव न्यायसुधाकारोऽप्यमुमेव पक्षं सङ्क्षेपेणाऽनुसृतवान्।

यत्तु पचति पाकं भावयतीत्यनुकूलव्यापारवाचिणिजन्तभूधातुना विवरणं, तच्छक्यतावच्छेदके गौरवापत्तेर्लाक्षणिकार्थविषयं व्याख्येयम्।

एवं रथो गच्छति, चैत्रो जानति, इच्छति, करोतीत्यादावनुकूलव्यापारे गमनाद्याश्रयत्व एव वा लक्षणेत्यपि द्रष्टव्यम्। नश्यतीत्यादौ तु प्रतियोगित्व इत्यपि। शक्यतावच्छेदकं च करोतिसमानाधिकरण(१)तिप्त्वादिकम्। अतश्च घटो भवतीत्यादौ तदभावाद्यत्नाभानेऽपि सङ्ख्यादिभानार्थमेव तिङादिप्रयोग इति मूलानुयायिनः।

वस्तुतस्तु लाघवात्तिप्त्वादिकमेव शक्ततावच्छेदकम्। अतश्च घटो भवतीत्यादावपि भावनाश्रयत्व एव लक्षणा। न चाऽऽश्रयत्वस्य सम्बन्धविधयैव भानोपपत्तेर्लक्षणावैयर्थ्यम्, नामार्थधात्वर्थयोर्भेदान्वयस्याऽव्युत्पन्नत्वात्। अन्यथा चैत्रः पचति तण्डुलः, चैत्रः पच्यते तण्डुल इत्यादावन्वयबोधापत्तेः। क्वचिद्धात्वर्थे कारकान्वयः, क्वचिच्चाऽऽख्यातार्थ इति व्युत्पत्तिवैचित्र्यकल्पनापत्तेश्च। आख्यातेनाऽऽश्रयत्वलक्षणायां तु तत्रैव भावनावत्कारकान्वयोपपत्तेर्न व्युत्पत्तिवैचित्र्यम्। अत्र तिप्त्वादिकमेव शक्ततावच्छेदकं, न तु स्थानिभूतलट्त्वादि। तस्य साधुत्वबोधनार्थं कल्पितत्वेन स्वतोऽविद्यमानत्वात्, प्रतिव्याकरणं तेषामननुगतत्वाच्च। यत्र तु गच्छेत्यादौ तिङो लोपस्तत्र शबादिविकरणस्यैव तद्वाचकत्वम्। न च तिङादिलोप-

१. तिङ्त्वादिकमिति. क. ख. पु.

ज्ञानं तद्बोधकम्, तज्ज्ञानाभावेऽपि तद्बोधस्याऽऽनुभाविकत्वात्। तत्सिद्धमाख्यातस्य यत्नो वाच्य इति।

स च यत्नः कृञ्धात्वभिहित इवाऽऽख्याताभिहितोऽपि नित्यं कर्मसाकाङ्क्ष एव प्रतीयते। विशेषेण तु विध्यादिसमभिव्याहारे सतीप्सितकर्मकः। अत एव 'स्वास्थ्यकामश्शयीत' इत्यादौ शयनादेरकर्मकत्वेऽपि स्वास्थ्यस्य भावनाकर्मत्वोपपत्तिः। अतश्चाऽऽख्याताभिहितस्य यत्नस्य वस्तुतः फलभावनानुकूलव्यापारत्वाद्भावनापदवाच्यत्वोपपत्तिः। सा च सकलकारकान्वयित्वादसति बाधके मुख्यविशेष्यतयैव प्रतीयते।

तथा हि—न तावत्प्रथमान्तं प्रति भावनायास्सङ्ख्यावद्विशेषणत्वाभ्युपगमेन प्रथमान्तस्य मुख्यविशेष्यत्वम्। (१)तथा च सति भावनाप्रकारक(२)शाब्दबुद्धित्वावच्छिन्नं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति नियमः फलितः। न चाऽसौ सम्भवति; काष्ठैः पचति, 'दध्नेन्द्रियकामस्य जुहुया' दित्यादौ प्रथमान्तपदाभावेन व्यभिचारात्। न चाऽध्याहारेण तत्सम्पादनम्, अध्याहारापेक्षयाऽऽनुशासनिकानिरूढलक्षणाया लघुत्वेनाऽऽख्यातेनैव कर्तृकर्मलक्षणौचित्यात्। न ह्यत्र 'दध्ना जुहोती'तिवत्स्वर्गकामपदानुषङ्गश्शङ्कितुं शक्यते, येन लक्षणातोऽपि लाघवमाशङ्क्येत, इन्द्रियकामपदस्याऽनन्वयापत्तेः। यस्त्वत्राऽऽख्यातेनाऽध्वर्युः कर्ता लक्ष्यते, नाऽसौ पूर्वं प्रथमान्तपदोपात्तः, योऽनुषज्येत। अतो लक्षणैवाऽऽख्यातेन कर्तृकर्मणोः। तत्रैवाऽभेदान्वयश्चैत्रादिपदानाम्। युक्तं चैतत्, सङ्ख्यायास्समानपदश्रुत्यैव कर्त्राद्यन्वयोपपत्तेः। इतरथा भिन्नपदोपात्तचैत्राद्यन्वये गौरवात्।

---

१. तदा हीति. क. ख. पु. २. शाब्दत्वावच्छिन्नमिति. ख. पु.

किञ्च विभावय मृगो धावतीत्यादौ (१)महाभाष्यकाराभ्युपेतैकवाक्यतायां साधुताऽपि प्रथमान्तविशेष्यकत्वे नाऽवकल्पते । तथा हि—न तावदत्र मृगस्य विभावनं प्रति कर्मत्वम्, द्वितीयान्तत्वापत्तेः । न च द्वितीयान्तपदाध्याहारेण कर्माकाङ्क्षापूर्तिः, वाक्यभेदापत्तेः । अतो धावनभावनाया एव कर्मत्वं वाच्यम् । तच्च तदोपपद्यते, यदि तस्य नाऽन्यत्र प्रकारतयाऽन्वयः । अन्यथा सकृदुच्चारितायाः उभयत्राऽन्वयानुपपत्तेः । भावनायाः प्रथमान्तं(२)प्रति विशेष्यत्वे तु कर्मतासंसर्गेण तस्या विभावनभावनां प्रत्यन्वयोपपत्तिः । न च तदाऽपि तत्र द्वितीयापत्तिश्शङ्क्या, स्वादिविभक्तीनां प्रातिपदिकपरत्वस्य नियतत्वेनाऽऽख्यातपरत्वशङ्कानुपपत्तेः ।

न च मृगात्मगतयत्नस्य नित्यानुमेयत्वेन भवन्मतेऽपि साक्षात्काररूपविभावनकर्मत्वानुपपत्तेः कथमेकवाक्यत्वोपपत्तिरिति वाच्यम्? विभावनस्य साक्षात्कारघटितत्वाभावेन नित्यानुमेयकर्मकत्वस्याऽप्युपपत्तेः । घटितत्वेऽपि वा धावनाश्रयत्वरूपाख्यातलक्ष्यार्थस्यैव विभावनकर्मत्वोपपत्तेः । अतोऽस्मन्मते एकवाक्यत्वोपपत्तिरिति मुख्यविशेष्यैव भावना । एतेन भावनाया मुख्यविशेष्यत्वे पाकभावना जायत इत्यस्मिन्नर्थे पचति भवतीति प्रयोगापत्तिरिति दूषणमिष्टापत्त्यैव निरस्तम् । (३)अत एवोक्तं वाक्य-

---

१. महाभाष्यकाराभ्युपेतायामिति. क. पु. २. प्रत्ययपीति. क. ख. पु. ।

३. येऽपि अपाक्षीत्, भवति, पक्ष्यति, भवतीत्यादयः प्रयोगास्तेषु भूधातुनाऽयुक्तत्वाभावस्योक्तत्वात्तस्य च लटा वर्तमानत्वोपपत्तेर्भूतभाविपाकानुकूलकृतिवृत्तिवर्तमानायुक्तत्वाभावाश्रयत्वमिति शाब्दबोधाङ्गीकारान्नाऽयुक्ताः । अस्ति च भूधातोरयुक्तत्वाभावेऽपि प्रयोगः, पण्डितो भवतीत्यादौ । अत एव पचन्ति भवन्तीत्यादयो न प्रयोगाः पचति भवतीत्यादयश्च प्रयोगाः इत्यधिकमुपलभ्यते 'क' पुस्तके ।

पदीये "बहुष्वपि तिङन्तेषु सकाङ्क्षेष्वेकवाक्यता"(१) इति ।

किञ्च भवन्मते सर्वकारकाणां धात्वर्थे, तस्य कालादेश्च भावनायां, सङ्ख्याभावनयोश्च प्रथमान्तपदोपस्थाप्येऽन्वयस्वीकाराद्व्युत्पत्तिवैचित्र्यकल्पनापत्तिः । तद्वरं वक्ष्यमाणरीत्या सर्वेषां भावनान्वयाङ्गीकारादेकैव व्युत्पत्तिर्युक्ता कल्पयितुम् । एतेन प्रथमान्तपदोपस्थाप्यभावनान्वयानङ्गीकारेऽप्याख्यातलक्ष्ये कर्तरि कर्मणि वा तदन्वय इति न भावनाया मुख्यविशेष्यत्वमित्यपास्तम् , व्युत्पत्तिवैचित्र्यतादवस्थ्यात् ।

किञ्चाऽस्मिन्पक्षे "भावप्रधानमाख्यात" मिति स्मृतिविरोधः । तथा हि—न तावादियं स्मृतिः भावशब्दवाच्यभावनाप्राधान्यं प्रकृत्यर्थापेक्षया विधत्ते, तस्य 'प्रकृतिप्रत्ययावि'ति स्मृत्यैव सिद्धेः । किन्तु यदाख्यातं शक्तिलक्षणासाधारण्येन भावनासङ्ख्याकालकर्त्रादिपरं तत्र भावनायाः प्राधान्यं, न तु कर्त्रादेरित्येवं परम् । अत एव "धात्वर्थः केवलश्शुद्धो भाव इत्यभिधीयत" इति व्याकरणस्मृत्या धात्वर्थस्य भावपरिभाषणेऽपि नाऽस्यां निरुक्तस्मृतौ भावशब्देन तद्ग्रहणम् । तथा सति धातोरेव भावप्रधानत्वापत्त्या आख्यातशब्दस्य(२)भावप्रधानत्वानुपपत्तेः । किन्तु णिजन्तस्य भुवोऽजन्तत्वव्युत्पत्त्या आख्यातार्थभावनायाः । वैयाकरणपरिभाषणं तु तच्छास्त्रविहितकृत्यविषयं, न निरुक्तविषयमपि, तस्य परिभाषारूपत्वेनाऽन्यत्राऽप्रवृत्तेः । तदपि च (३)'नपुंसके भावे क्त'इत्यादौ शुद्धधात्वर्थग्रहणमेव, न तु त्वनलाद्यर्थभावग्रहणमित्येतदर्थम् । नाऽपि भावपदशक्यनियमार्थं, प्रवृत्तिनिमित्तादेस्तदनुपपत्तेः ।

१. वाक्य. कां. २. श्लो. ४५० २. भावाभिधानेति क. ख. पु.
३. पा. सू. ३. ३. ११४.

न च(१) "सर्वमाख्यातजं नामे"ति निरुक्तकारेणाऽभिधानादाख्यातशब्देन धातुरेवोच्यत इति वाच्यम्। कृदन्ते धातावाख्यातपदप्रयोगाभावेनाऽऽख्यात(२)पदस्य धातुवाचित्वानुपपत्तेः। निरुक्ते नामनिर्वचने त्वाऽऽख्यातशब्देन लक्षणयाऽऽख्यातान्तस्य धातोर्ग्रहणं नाऽनुपपन्नम्। अत एव(३) 'तान्याख्यातानी' ति जैमिनिसूत्रेऽपि चाऽऽख्यातशब्देन(४)लक्षणयाऽऽख्यातान्तधातोर्ग्रहणम्। एतावांस्तु विशेषः—यज्जैमिनिसूत्रे आख्यातान्तकत्वं विशेषणं, तेन तिङन्तस्यैव धातोर्ग्रहणम्। निरुक्ते तूपलक्षणम्, तेन तत्राऽतिङन्तस्य धातुस्वरूपस्यैव। न त्वेतावता आख्यातशब्दस्य धातुवाचित्वं, कृदन्ते धातौ पाक इत्यादौ तत्पदप्रयोगाभावेन तद्वाचित्वानुपपत्तेः। अपि तु तिङ्वाचित्वमेव। अतोऽऽख्यातप्रतिपाद्यानेकपदार्थविषये कस्य प्राधान्यमिति जिज्ञासायां भावनाप्राधान्यमनया स्मृत्या नियम्यते।

एवं "सत्वप्रधानानि नामानी"त्यत्राऽप्यनेकार्थप्रतिपादकेषु प्रातिपदिकापरनामधेयेषु नामसु पाचको लावक इत्यादिषु विभक्त्युपात्तसङ्ख्यान्वययोगिनस्सत्वपदाभिधेयस्य कर्तुरेव प्राधान्यं, न तु पाककृतेरित्ययमर्थोऽवगम्यते। नामत्वाविशेषेऽपि च यत्र घटादिपदे घटघटत्वरूपयोरुभयोरप्यर्थयोर्विभक्त्युपात्तसङ्ख्यान्वययोगित्वरूपा सत्वता तत्रोभयोरपि शब्दतः प्राधान्यम्। अत एव आकृत्यधिकरणेऽभिहितं यत्तृतीयादौ जातेरेव सङ्ख्याकारकान्वयः, अन्यत्र तु लक्षितव्यक्तेः जातिव्यक्त्योश्च न वैशिष्ट्यावगाह्येको बोधः, किन्तु बोधद्वयं शक्तिलक्षणाजन्यमिति। अतस्तत्रोभयोस्सत्वभूतत्वादुभयोरपि प्राधान्यम्।

---

१. निरु. अ. १. खं. १३. सू. ५. २. पदलक्ष्यधातुवाचित्वेति ख.पु.
३. जै. सू. २. १. ३. ४ ४. लक्षणयैव धातोर्ग्रहणमिति क. ख. पु.

तदेवमाख्याते नामसु चाऽनेकार्थप्रतिपादकेष्वनया स्मृत्या प्राधान्यं नियम्यते । सुबादिषु त्वनेकार्थप्रतिपादकेषु प्रधानभूतक्रियान्वयित्वात्कारकादेरेव प्राधान्यं, न तु लिङ्गसङ्ख्यादेः । कारकस्यैव प्रधानभूतक्रियान्वयित्वम् । क्रियान्वयित्वाविरहे कारकत्वव्याघातात् । क्रियायाः प्रधानत्वं च क्रियापदं विना कारकाणां नैराकाङ्क्ष्यादर्शनात् । अतः प्रधानभूतक्रियान्वयित्वात्सुबर्थे कारकादेरेव प्राधान्यम् । लिङ्गसङ्ख्यादेस्तु समानाभिधानश्रुत्या तदन्वयित्वम् । तच्च साक्षादयोग्यमिति पदश्रुतेर्योग्यतारूपलिङ्गाच्च पार्ष्ठिकः प्रातिपदिकार्थान्वय इति प्रातिपदिकार्थस्याऽपि लिङ्गसङ्ख्ये प्रति प्राधान्यम् । अत एव विभक्त्युपात्तसङ्ख्यान्वययोग्यत्वरूपा सत्वताऽप्यस्य पार्ष्ठिकान्वयमादायैव निर्वाह्या । सर्वं चैतत्(१) पश्वेकत्वाधिकरणे वक्ष्यते ।

प्रातिपदिकार्थस्तु प्रधानभूते कारकरूपे प्रत्ययार्थेऽन्वेति । 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने' ति स्मृत्या प्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्यावगमात् । सामान्यस्मृतिरपीयं प्रमाणान्तरानुसारात्कारकादिविषयैव, न तु सङ्ख्यादिविषयाऽपि । अन्यथा प्रातिपदिकार्थस्य सत्वसमाख्यानुपपत्तेः । कारकादिरूपस्सुबर्थस्तु प्रधानभूते प्रत्ययार्थे भावनायामन्वेति, न तु धात्वर्थे प्रत्ययार्थान्तरे वा । तेषामुपसर्जनत्वात्, प्रधानान्वयस्य चाऽभ्यर्हितत्वात्, कारकाणां धात्वर्थे, तस्य च भावनायामन्वय इति व्युत्पत्तिद्वयकल्पनापत्तेश्च । अतो लाघवात्सर्वेषां भावनायामेवान्वयो युक्तः । स च यद्यपि साक्षादयोग्यः, तथाऽपि पार्ष्ठिकान्वयलभ्यधात्वर्थद्वारक इति निश्चीयते ।

एवं प्रथमान्तस्याऽपि चैत्रादिपदस्याऽभिहितकर्तृकर्मकार-

१. पू. मी. ४. १. ५.

कवाचिनी प्रथमेति मते कर्तृकर्मवाचकत्वात्कर्तृत्वादेर्युक्त एव भावनान्वयः। प्रातिपदिकार्थे प्रथमेति मते तु प्रातिपदिकार्थस्यैव कर्तृत्वकर्मत्वाधिकारित्वान्यतमसंसर्गेण भावनायामन्वयो नाऽनुपपन्नः। एवं सम्बोधनान्तस्याऽपि द्रष्टव्यम्। एवं निमित्तादेः कारकत्वाभावेऽप्यनुष्ठापकत्वावगमाद्विधिवदेवाऽनुष्ठेयायां भावनायामेवाऽन्वयः। एवं क्त्वाप्रत्ययादीनां क्रियासम्बन्धसापेक्षाणां क्रियाभ्यावृत्तिविहितानां च कृत्वसुजादीनां(१)भावनायामेवाऽन्वयः, पार्ष्ठिकान्वयः परं धात्वर्थादौ। इदं च तत्र तत्रोपपादयिष्यते।

षष्ठ्यास्तु सम्बन्धसामान्याभिधायिन्याः कारकविभक्तित्वाभावाद्भावनां विनाऽप्यन्येन सम्बन्धो न विरुध्यते। अतश्च तस्या धात्वर्थकारकादिभिरप्यन्वयो नाऽनुपपन्न इति मूलानुयायिनः।

वस्तुतस्तु तत्राऽपि साक्षात्परम्परासाधारण्येन भावनायामेवाऽन्वयः, प्रधानान्वयस्याऽभ्यर्हितत्वात्। धात्वर्थस्य तु भावनायामेवाऽन्वयः, प्रकृत्यर्थत्वात्, कारकत्वेन(२)विवरणाच्च।

किञ्च धात्वर्थस्याऽप्यत्र कारकत्वेनाऽन्वयाभावे तृतीयान्तानां ज्योतिष्टोमादीनामनन्वयापत्तिः। न च साधुत्वार्था अभेदलक्षणार्था वा तृतीयेति वाच्यम्। करणत्वरूपश्रौतार्थाविवक्षायां कारणाभावात्। अभेदलक्षणार्थायास्तृतीयाः(३) छन्दसि क्वाऽप्यदर्शनाच्च। (४)धान्येन धनवानित्यादावपि च न

---

१. नञश्च भावनायामिति. ख. पु.

२. विवरणाच्चाऽविवाद एवेति. क. ख. पु.

३. छन्दसीति नाऽस्ति. क. ख. पु.

४. धान्येन धनी भवतीति क. ख. पु.

धान्याभिन्नधनवानित्यर्थः । धान्यस्य धनसम्बन्धोत्पत्तिं प्रति करणत्वोपपत्तेर्दण्डेन घटो भवतीतिवल्लक्षणायां प्रमाणाभावात् । अत एव भासमानोऽपि धनधान्याभेदः पार्ष्ठिकान्वयलभ्य एवेति न तदर्थमपि लक्षणा । अतो लक्षणायाः क्वाऽप्यदर्शनात्तृतीयान्तनामधेयानुरोधेनाऽपि धात्वर्थस्य करणत्वमवश्यमङ्गीकर्तव्यम् । अत एव (१)चाऽन्यकरणत्वस्य पदार्थविधया भासमानत्वाद्धात्वर्थस्याऽपि करणत्वं न संसर्गबललभ्यम्, अपि तु धातुलभ्यमेव । अतश्च धात्वर्थो यागादिः करणत्वेनाऽन्वेति । तच्च कारकत्वाद्भावनायामित्यपि द्रष्टव्यम् ।

एवं लडादिवाच्यः कालोऽपि (२)पार्ष्ठिकान्वयलभ्यधात्वर्थद्वारा वा साक्षात्सम्बन्धेनैव वा भावनान्वयी । एवं विधिरपि प्रवर्तनारूपः प्रधानभूतायां तस्यामेव भावनायामन्वेति(३)जनकत्वसम्बन्धेन । सङ्ख्यायास्तु प्रतीत्यनुरोधादनुशासनानुरोधाच्च भावनाक्षिप्तकर्तृत्वकर्मत्वान्यतरयोगित्वम् । भावना हि कर्तृत्वकर्मत्वे अखण्डोपाधिरूपे आक्षिपति । ते च स्वाश्रयमाक्षिपतः । कर्तृत्वकर्मत्वयोश्चाऽऽक्षेपलभ्ययोरपि शाब्दत्वसिध्यर्थं लक्षणा, न तु तदाश्रयस्याऽपि । सर्वं चैतद्विस्तरेण (४)कर्त्रधिकरणे निरूपयिष्यते ।

तत्र शबादिविकरणस्थले तिङ्वाच्या सङ्ख्या कर्तृत्वान्विता । यगादिविकरणस्थले क्वचित्कर्मत्वान्विताऽपि । न तु तत्तदाश्रयान्विता, तस्याऽशाब्दत्वात् । अत एव दर्शपूर्णमासादावाश्रयभेदेऽपि कर्तृत्वैक्यादेकवचनम् । 'क्षौमे वसाना'वित्यत्र तु

१. नाम्नि करणत्वस्येति क. पु. २. पार्ष्ठिकान्वयेन धात्वर्थेति. क.पु.
३. प्रयोज्यत्वसम्बन्धेनेति. क. पु. ४. पू. मी. ३. ४. ८.

प्रमाणान्तरानुसारादधिष्ठानलक्षणामङ्गीकृत्य सङ्ख्यान्वय आश्रय एवेति विशेषः । अतस्सङ्ख्यायाः कर्तृकर्माख्यातस्थले तावत्तत्रैवाऽन्वय इति मूलानुयायिनः ।

वस्तुतस्तु प्रधानान्वयस्याऽभ्यर्हितत्वात्सुबभिहितसङ्ख्याया इवाऽस्या अपि पार्ष्ठिकान्वयलभ्यकर्तृत्वद्वारकः कर्मत्वद्वारको वा परम्परासम्बन्धेन भावनायामेवाऽन्वयः । भावाख्यातस्थले तु भावनायामेवाऽन्वयस्सङ्ख्यायाः। यथा चैत्रेण सुप्यते, स्थीयत इत्यादौ । अत्र हि स्वापादिकृतिस्तिङर्थः, अखण्डोपाधिरूपं कर्तृत्वं तु तृतीयार्थः । अत एव चैत्रेण किं क्रियत इति प्रश्ने सुप्यत इत्युत्तरं सङ्गच्छते । अतः प्रतीत्यभावान्नाऽत्र कृतिस्तिङर्थ इति परमतमपास्तम् । अतस्तत्र भावनायां साक्षात्सम्बन्धेनैव सङ्ख्यान्वयः ।

न चैवं तस्या द्वित्वादिविवक्षायां द्विवचनापत्तिः, एकवचनस्यैव तत्र साधुत्वस्मृतेः तेनैव विवक्षितसङ्ख्यालक्षणोपपत्तेः । न चैवं साक्षात्सम्बन्धेन विभक्त्युपात्तसङ्ख्यायोगित्वरूपसत्त्वतापत्तेर्भावप्राधान्यानापत्तिः, सत्वतास्वीकारेऽपि भावत्वानपायात् । अस्यां हि स्मृतौ भावस्य प्राधान्यमिति नियमः क्रियते, न तु सत्वातिरिक्तस्येति, सङ्ख्यादेरपि प्राधान्यप्रसङ्गात् । अतो भावत्वानपायात्सङ्ख्यान्वयेऽपि न प्राधान्यक्षतिः । अस्तु वा कर्तृकर्मान्वयवद्धात्वर्थान्वयः पार्ष्ठिकस्सङ्ख्यायाः। अतो भावाख्यातस्थले साक्षात्सम्बन्धाभावेऽपि धात्वर्थद्वारैव भावनान्वयोपपत्तिः ।

यत्र तु गगनेन स्थीयत इत्यादौ यत्नस्य बाधः, तत्र घटो भवतीत्यादौ प्रथमान्तपदान्वयस्येवाऽऽश्रयत्वलक्षणायां कारणाभावाद्धात्वर्थ एव सङ्ख्यान्वयोऽनन्वितता वा सेति केचित् ।

वस्तुतस्तु 'भावप्रधानमि'ति स्मृत्या आख्यातत्वावच्छेदेन भावनाप्राधान्यस्य विहितत्वात्तदन्यथानुपपत्तिरेवाऽत्राऽऽश्रयत्व-लक्षणाबीजम् । एवं कारकान्वयेऽप्यवैरूप्यं भविष्यति । इतरथा क्वचिद्धात्वर्थे क्वचिदाख्यातार्थ इति व्युत्पत्तिद्वयकल्पनापत्तेः । अस्मन्मते तु वृत्त्याऽऽख्यातपदगम्ये सर्वत्र कारकान्वय इत्यवै-रूप्यम् । कर्तृत्वकर्मत्वयोस्तु भावनायामेवाऽन्वयः। तत्र कर्तृत्वस्य भावनायामन्वयोऽविवाद एव । कर्मत्वस्य तु कर्माख्यातस्थले यत्नवाचिना तिङा यत्नप्रयोज्यफललक्षणात्तत्राऽन्वय इति मूला-नुयायिनः । एवं कर्मकर्तृस्थलेऽपि पच्यते ओदनस्स्वयमेवेत्यादौ कर्मण एव स्वव्यापारे कर्तृत्वविवक्षणात्फललक्षणा द्रष्टव्या ।

केचित्तु कर्माख्यातस्थले फलमात्मनेपदशक्यं, न तु कृतिः, शबादिसमभिव्याहृततिङ एव तत्र शक्तिग्रहात् । अतस्तत्र भा-समाना कृतिः परं तृतीयार्थः, ओदनस्तु फल एवाऽन्वेती-त्याहुः । तन्न; लाघवेन तिप्त्वस्यैव शक्ततावच्छेदकत्वौचि-त्यात् । ओदनान्वयार्थं फलस्य लक्षणयाऽपि बोधोपपत्तेश्च । तृतीयाया अपि कर्तृत्वरूपाखण्डोपाधावेव शक्तिर्न तु कृतौ । तथात्वे तत्राऽपि कारकान्वयापत्तेः ।

वस्तुतस्तु कर्माख्यातेऽपि न फललक्षणा, कृतावेवाऽखण्डो-पाधिरूपस्य कर्मत्वस्य स्वसमानाधिकरणफलप्रयोजकत्वसम्बन्धे-नाऽन्वयाङ्गीकारात् । अत एव कर्मकर्त्राख्यातस्थलेऽपि कर्मत्वरूपा-ऽखण्डोपाधेरविवक्षणात्कर्तृत्वरूपाखण्डोपाधेरवौदननिष्ठस्योक्तपर-म्परासम्बन्धेन(१) कृतावऽन्वयोपपत्तेर्न फललक्षणा । न चैवमेता-दृशस्थले देवदत्तस्य साक्षात्सम्बन्धेन(२) कर्तृत्वाभावेन प्रथमाना-

१. कृतावेवाऽन्वयेति. क. पु. २. कर्तृत्वाभावेनेति नास्ति 'ग' पुस्तके

पत्तावपि तृतीयापत्तिस्स्यादेवेति वाच्यम् । देवदत्तानिष्ठकर्तृत्वस्य तिङाऽनभिधानेऽपि कृतिनिरूपितकर्तृत्वस्य तिङभिहितत्वादनभिहिताधिकारविहित(१)तृतीयाया आपादयितुमशक्यत्वात् । न च प्रथमैव तर्ह्याऽऽपद्येत, प्रथमायास्तिङुपात्तसङ्ख्यान्वयित्वाचित्वव्याप्तत्वेन व्यापकाभावे आपादयितुमशक्यत्वात् । अतस्सम्बन्धसामान्यवाचिनी षष्ठ्येव तत्र युक्ता ।

तदेवं सर्वकारकाणि प्रति भावनायाः प्राधान्ये तिङुपात्तकर्त्रादि प्रति सुतरां प्राधान्यापत्तेः, तदनङ्गीकारे 'भावप्रधानमाख्यातमि'ति स्मृतिविरोधस्य दुष्परिहरत्वाद्भावनाया एव मुख्यविशेष्यत्वमिति सिद्धम् । अत एव भावप्राधान्यस्मृत्या भावनायाः प्राधान्यावगमादप्रधानभूतयोः कर्तृकर्मणोस्तल्लक्ष्यत्वम् । अन्यथा ते कृदन्तवदेव तद्वाच्ये स्याताम्, न तु तल्लक्ष्ये । तथा हि—

यत्रैकस्मात्पदादनेकार्थप्रतीतिस्तत्राऽनेकशक्तिकल्पनागौरवभिया एकत्रैव शक्तिरपरत्र लक्षणेत्यवश्यमभ्युपगन्तव्यम् । तत्र च नियामकापेक्षायां प्रथमं तावत्प्रधानस्य लोके वेदे च गुणभूताक्षेपकत्वदर्शनात्प्राधान्यमेव शक्तिनियामकमवसीयते । तदिह भावनायाः प्राधान्यपक्षे तदपेक्षितयोर्गुणभूतयोः कर्तृकर्मणोराक्षेपेणैव बोधोपपत्तेर्नाऽतिरिक्तशक्तिकल्पनावसरः । अत एव यत्र व्यभिचारान्नाऽऽक्षेपकत्वशक्तिः, यथैकत्वादौ, तत्राऽनेकशक्तिकल्पनमपि । यदि तु तयोरेव प्राधान्यं ततस्तयोरेव शक्यत्वापत्तेर्भावनायाश्च गुणभूतायास्ताभ्यामेवाऽऽक्षेपसम्भवान्न तस्या वाच्यत्वं युज्येत । अत एव कृदन्तस्थले पाकः, पक्वमित्यादौ पचिधातोः पाकमात्रवाचित्वेऽपि प्रत्ययस्य कृतिकर्त्रादि-

१. कर्तृतृतीयाया इति. क. पु.

रूपानेकार्थबोधकस्य क्व शक्तिरिति नियामकापेक्षायां, 'सत्त्वप्रधानानि नामानी'ति सत्त्वरूपस्य कर्त्रादेरेव प्राधान्यावगमात्, तत्र शक्तावनवधारितायां गुणभूतायाः कृतेराक्षेपेणैव बोधोपपत्तेर्नाऽतिरिक्तशक्तिकल्पनम् ।

न चैवं तस्या अशाब्दत्वेन पाकादिरूपकारकान्वयानापत्तिः, आख्याते एकत्वान्वयार्थं कर्तृकर्मणोरिव कृदन्तस्थले कारकान्वयार्थं कृतेर्लक्षणाङ्गीकारात् । न चैवमपि लाघवात्कृतावेव शक्तिरस्तु, लाघवस्याऽव्यङ्गनिष्ठस्य(१) दीक्षणीयामुख्यत्वस्येवाऽङ्गगुणविरोधन्यायेनाऽकिञ्चित्करत्वात् । प्रधानस्य पुरस्फूर्तिकत्वेन तत्र शक्तावनवधारितायामनवच्छिन्नायाश्शक्तेरयोगादवच्छेदकापेक्षायां तद्गतगौरवादेरुत्तरकालप्रतीतिकत्वेन फलमुखत्वाच्च ।

अत एवाऽनेकार्थप्रतिपादकेऽपि घटादिपदे यत्राऽन्यतरार्थप्राधान्यनियामकाभावस्तत्रैव लाघवस्य आकृत्यधिकरणव्युत्पादितस्य (२)नियामकत्वम् । न हि घटघटत्वयोः प्राधान्यनियामकं किञ्चिदस्ति, पूर्वोक्तविधयोभयोरपि सत्त्वभूतत्वेन स्मृ-

---

१. 'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वे'त्यनेनेष्टिपशुसोमाः पर्वदिने कर्तव्यत्वेन विहिताः । तत्र पञ्चदिनसाध्यकसोमयागे प्रथमदिने अङ्गभुता दीक्षणीयेष्टिरनुष्ठीयते, पञ्चमदिने च सोमयागः । तदत्र निरुक्तवाक्येनोभयोरपि पर्वकालकर्तव्यत्वस्य विरोधे सति किं पर्वण्यङ्गमनुष्ठीयताम् ? उत प्रधानमिति सन्देहे–अङ्गभुताया अपि दीक्षणीयेष्टेः पाठतोऽनुष्ठानतश्च प्रथमोपस्थितत्वेन मुख्यत्वात्तस्या एव पर्वण्यनुष्ठानमिति पूर्वपक्षयित्वा, पाठतोऽनुष्ठानतश्च जघन्यस्याऽपि सोमयागस्य प्रधानतया, अङ्गानां च तत्साद्गुण्यार्थत्वेन दीक्षणीयामुख्यत्वस्याऽकिञ्चित्करत्वात्सोमयागस्यैव पर्वकालकत्वमिति द्वादशद्वितीयनवमे सिद्धान्तितम् ।

२. 'नाऽगृहीतविशेषणा बुद्धिर्विशेष्यमुपसङ्क्रामती'ति न्यायस्य नियामकत्वमिति (१.३.१०) अधिकरणे स्पष्टम् ।

तेरनियामकत्वात् , उभयोरपि क्रमिकत्वेन बोधद्वयाङ्गीकारेण वैशिष्ट्यानवगाहनात्प्रतीतेरप्यनियामकत्वाच्च । कृत्सु तु पूर्वोक्तविधया प्राधान्यस्यैव नियामकत्वाद्युक्ता कर्त्रादौ शक्तिः, न तु कृतौ । भावकृत्सु तु पाक इत्यादौ पाकपदमात्रेण कृतिप्रतीतौ पाकः क्रियत इति पृथक्कृतिवाचकपदसमभिव्याहारानुपपत्तेर्धात्वर्थमात्रप्रतीतावपि कारकान्वयार्थं काष्ठैरोदनस्य पाक इत्यादावपि जायते, क्रियत इति वा क्रियापदाध्याहारेण वाक्यपूरणं द्रष्टव्यम् । (१)युक्तश्चैतत् । धात्वर्थस्याऽपि स्वजनकीभूतव्यापाराक्षेपकत्वं सम्बन्धात् । अतः कृदन्तस्थले कृतिप्राधान्याभावादवाच्यत्ववत्तिङन्तस्थलेऽपि भावनाप्राधान्याभावे अवाच्यत्वापत्तिः । न चेष्टापत्तिः, भावप्राधान्यबोधकस्मृतिविरोधापत्तेरुक्तत्वात् ।

किञ्चाऽस्मन्मते निपातोपसर्गप्रातिपदिकातिरिक्तशब्दगम्यो यस्सुबुपात्तलिङ्गसङ्ख्याव्यतिरिक्तोऽर्थः, तत्प्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति लिङ्गानन्वयिभावनाविशेष्यतासम्बन्धेन पदजन्योपस्थितिः कारणमित्येकयैव व्युत्पत्त्या बहूनां सङ्ग्रहाल्लाघवम् । अन्यथा हि तत्तत्कारकादीनां धात्वर्थे, तस्य च कालादीनां च भावनायां, तस्यास्साङ्ख्यायाश्च प्रथमान्त इत्यनेकव्युत्पत्तिकल्पनाद्गौरवम् ।

अत्र च कार्यतावच्छेदके निपातोपसर्गाणां समभिव्याहृतार्थान्वयं विना स्वार्थबोधकत्वादाद्यं विशेषणम् । अत एव तेषु क्रियासमभिव्याहारे सति तथैवाऽन्वयः, यथा निषेधेषु नञः । अन्यसमभिव्याहारे त्वन्येनाऽपि । प्रातिपदिकार्थस्याऽपि घटघटत्वादेस्सुबर्थे प्रत्येवाऽन्वयाद्द्वितीयम् ।

---

१. युक्तश्च धात्वर्थस्याऽपीति. क. ख. पु.

यत्र तु दधि इत्यादौ सुब्लोपस्तत्र(१) प्रातिपदिकलक्ष्यस्यैव दधिकर्मत्वादेर्व्युत्पत्त्यन्तरेणैव भावनान्वयेऽपि न क्षतिः। अत्र च 'आग्नेयोऽष्टाकपाल' इत्यादौ तद्धितोपात्तस्य देवतात्वरूपस्य कारकस्य तद्धितोपात्तद्रव्यान्वयं(२)विनाऽपि क्रियान्वयिनः प्रातिपदिकार्थत्वेऽपि व्युत्पत्त्यन्तरेण तदङ्गीकारान्नोक्तव्युत्पत्तिभङ्गः। अत एव कारकत्वातिरिक्तसम्बन्धेन यत्र तद्धितसमासादिवृत्तिः, यथा उपगवः, राजपुरुष इत्यादौ, तत्र क्रियान्वयाभावेऽपि पुरुषादावन्वयो नाऽनिष्टः।

यत्र तु कारकत्वसम्बन्धेन वृत्तिः, यथा 'आग्नेय' इत्यादौ तत्र प्राथमिकक्रियान्वयं विना कारकत्वायोगात्, वृत्तेश्च पार्ष्ठिकसम्बन्धेनाऽपि निर्वाहोपपत्तेर्नाऽऽदावेवाऽष्टाकपालसम्बन्धः, अपि तु भावनासम्बन्धद्वारक एवाऽसौ। विचारिष्यते चेतत्(३) पौर्णमास्यधिकरणे वाक्यभेदोपपादनार्थम्। सुबुपात्तालिङ्गसङ्ख्ययोस्सुबर्थकरणत्वाद्यन्वयिनोरुक्तविधशब्दगम्यत्वात्तन्निवृत्त्यर्थं तृतीयम्। प्रथमान्तस्थले च प्रातिपदिकार्थस्याऽपि प्रथमोपस्थितस्यैवाऽन्वयाङ्गीकारान्नाऽतिप्रसङ्गः। एवं (४)षष्ठ्यादीनामपि कारकत्वातिरिक्तेनाऽपि सम्बन्धेन निमित्तवत्(५)भावनान्वयाङ्गीकारादतिप्रसङ्गो निराकर्तव्यः। अर्थपदं च पदजन्योपस्थितिविशेष्यपरम्। तेन यागादेः करणत्वान्वयिनो भावनानन्वयेऽपि न क्षतिः। कारणतावच्छेदकेऽपि कारकाणां भावनापदोपस्थापितभावनान्वयापत्तेस्तद्व्या-

१. प्रातिपदिकान्वयस्यैवेति. ग. पु. २. विहायाऽपीति. क. ख. पु.
३. पू. मी. २. २. ३. ४. षष्ठीकत्वान्तादीनामिति. क. ख. पु.
५. भावनान्वयेऽपि न क्षतिरिति. क. पु.

वृत्त्यर्थं लिङ्गानन्वयीति विशेषणम्। अत एवोदनं भुक्त्वा व्रजतीत्यादौ क्त्वाप्रत्ययोपात्तभावनायामोदनादेरसम्बन्धेऽपि तस्या लिङ्गानन्वयित्वात् नोक्तव्युत्पत्तिविघातः।

न चैवमेकस्मिन्वाक्ये भावनाद्वयसत्त्वात्कस्यां केषां कारकाणामन्वय(१)इत्यत्राऽपि नियामकाभावः, योग्यताया आसत्तेस्तात्पर्यस्य च नियामकत्वात्। एवं गच्छेत्यादौ(२)प्रत्ययार्थस्याऽपि शबादिविकरणार्थभूतायामेव तस्यामन्वयः। तस्मादेकयैव व्युत्पत्त्या बहूनां सङ्ग्रहाल्लाघवम्। अस्तु वा प्रकारीभूततत्तदर्थभेदेन व्युत्पत्तिभेदः। तथाऽपि 'परिपूर्णं पदं पदान्तरेणाऽन्वेती'ति न्यायेन प्रथमावगतयागादिव्युत्पत्तिवेलायां भावनाविशेष्यत्वस्योपस्थितत्वात्तत्रैव विशेषणज्ञानरूपसामग्रीसत्त्वेन स्वर्गादिपदार्थान्तराणामपि प्रकारतया अन्वयव्युत्पत्तिकल्पना, न त्वन्यत्र। अन्यगतमुख्यविशेष्यत्वस्याऽनुपस्थितत्वेन विशेषणज्ञानाभावात्। अत एवंविधलाघवादपि भावनायामेव साक्षात्परम्परया वा योग्यतानुसारेण सर्वेषामन्वयः। परम्परासम्बन्धस्थले तु पार्ष्ठिको धात्वर्थादिसम्बन्ध इति न कोऽपि(३) दोषः।

न च पार्ष्ठिकबोधस्याऽपि श्रुतशब्दजन्यत्वाद्व्युत्पत्त्यन्तरकल्पनातादवस्थ्यम्, पार्ष्ठिकबोधस्य योग्यतत्तत्समस्तपदकल्पनयाऽनुमितपदजन्यत्वेन व्युत्पत्त्यन्तरकल्पनानापत्तेः। निरुक्तपदाध्याहारं प्रति श्रुतशब्दस्य कारणत्वं तु तवाऽपि सम्मतमेव। इतरथा अयं घटोऽस्ति, जलमानेयमित्यतो घटकरणकजलानयनमित्येवंविधार्थप्रतिपादकपदाध्याहारानापत्तेः। पदान्तरकल्पनाकृतं तु गौरवं कार्यकारणभावकल्पनाभावात्फलमुखत्वाच्च न

१. इत्यत्र विनिगमकाभाव इति. क. ख. पु.
२. प्रत्ययलोपेऽपीति. क. ख. पु. ३. विरोध इति क. पु

दोषमावहति । तत्राऽप्याकाङ्क्षायोग्यतातात्पर्यादिवशात्तत्तत्पदार्थ एव पार्ष्ठिकान्वयस्तत्तत्पदार्थस्येति नाऽव्यवस्थाऽपि । स्पष्टश्चाऽयमर्थो भावार्थाधिकरणादौ तत्र तत्र ।

न चैवं राजपुरुषोऽस्तीत्यत्र क्रियान्वयोत्तरं पार्ष्ठिकस्तात्पर्यादिसत्त्वे राजपुरुषयोस्स्वस्वामिभावादिरूपो भेदसम्बन्धोऽपि बुध्येतेति वाच्यम् । अनुभवानुरोधेन नामप्रयोज्यतदर्थप्रकारकतदर्थविशेष्यकान्वयबोधस्याऽभेदविषयत्वमिति नियमाङ्गीकारात् । राजपुरुषयोः पार्ष्ठिकान्वयबोधस्याऽप्यस्मन्मते नामजन्यत्वाभावेऽपि स्वजन्यशाब्दबोधानुमेयशब्दजन्यत्वेन नामप्रयोज्यत्वमस्तीति युक्तं तस्या भेदविषयत्वम् । वरं च नामार्थयोः (१)तदभेदान्वयव्युत्पत्तिकल्पनापेक्षया निरुक्तव्युत्पत्तिकल्पनम् प्रयोज्यत्वस्य जन्यत्वापेक्षया लघुत्वात् ।

राज्ञः पुरुषोऽस्तीत्यादौ तु षष्ठ्यर्थनामार्थयोरन्वयस्य पार्ष्ठिकत्वान्नाऽभेदविषयत्वप्रसङ्गः । अत एव तत्राऽभेदस्य बाधितत्वादेव षष्ठ्यर्थो नाऽभेदसम्बन्धेन पुरुषेऽन्वेति, अपि तु भेदसंसर्गेणैव । अभेदभ्रमदशायां परं तादृशवाक्यात्पार्ष्ठिकाभेदबोधवारणार्थं सुप्प्रयोज्यतदर्थप्रकारकनामार्थविशेष्यकबोधस्य भेदसंसर्गविषयत्वम्, स्तोकं पचतीत्यादावभेदबोधार्थं च सुप्प्रयोज्यतदर्थप्रकारकधात्वर्थविशेष्यकबोधस्याऽभेदविषयत्वम्, दधि पश्यतीत्यादौ भेदसंसर्गबोधार्थं च शुद्धप्रातिपदिकप्रयोज्यतदर्थप्रकारकधात्वर्थविशेष्यकबोधस्य भेदविषयत्वमित्याद्यनुभवानुसारेण कल्प्यम् ।

न चैवंविधव्युत्पत्तिकल्पनावश्यंभावे किमिति शाब्दबोधविषयत्वमेव परेषामिव नाऽङ्गीक्रियत इति वाच्यम् । संसर्ग-

---

१. अभेदान्वयेति क. पु.

विशेषनियामकव्युत्पत्तीनां तुल्यत्वेऽपि तत्तद्विशेष्यतानिरूपितप्रकारतानियामकव्युत्पत्तीनां भेदाभावेनाऽस्मन्मतस्य लघुत्वात् ।

न च भवन्मतेऽपि पार्ष्ठिकान्वये प्रकारतानियमार्थं तत्कल्पनावश्यंभावः, इतरथा सोमं प्रति यागस्य, आरुण्यं प्रत्येकहायन्या वा प्रकारतापत्तेरिति वाच्यम् । यस्य यद्बोधाव्यवहितपूर्वबोधे साक्षात्सम्बन्धेन विशेष्ये प्रकारता, तस्य निराकाङ्क्षत्वादेव तदुत्तरबोधेऽन्यं प्रत्यप्रकारत्वम् ।

अत एव यस्य यद्बोधाव्यवहितपूर्वबोधे परम्परासम्बन्धेन विशेष्ये प्रकारता, तस्यैव (१)परम्पराघटकतावगत्यै तदुत्तरबोधेऽन्यं प्रति प्रकारत्वम् । यागैकहायन्यादेर्हि स्वर्गक्रयौ प्रति द्वितीयबोधे साक्षादेव प्रकारत्वान्न तृतीयबोधे सोमारुण्ये प्रति प्रकारता । अपि तु सोमारुण्ययोरेव परम्परया (२)भावनां क्रयं प्रति च प्रकारयोः परम्पराघटकावगत्यै यागमेकहायनीं वा प्रति प्रकारत्वम् । तयोश्च तद्बलादेव विशेष्यत्वम् । इतरथा सोमारुण्यादिगतपरम्परासम्बन्धानिर्वाहात् । अत एव यस्य प्रकारस्य विशेष्यान्वये यो वस्तुतः परम्परा(३)सम्बन्धरूपः संसर्गस्तस्यैव तत्त्वेनाऽवगत्यै तद्घटकपदार्थेन पार्ष्ठिकोऽन्वयः(४)शब्देनाऽवगम्यते, न तु योग्यत्वेऽप्यन्येन ।

अत एव राज्ञः पुरुषोऽस्तीत्यत्र प्रातिपदिकार्थभूतस्य राज्ञष्षष्ठ्यर्थे निरूपकतासंसर्गेण प्रकारतयाऽन्वितस्य नाऽयोग्यतानिश्चयाभावदशायां पुरुषेणाऽभेदान्वयः पार्ष्ठिकः, निरूपकतासंसर्गस्याऽभेदाघटितत्वात् । अत एवाऽऽरुण्यकरणत्वस्य द्रव्य-

१. परम्परावगत्यै इति. क पु. २. भावनायां क्रये चेति. क. पु.
३. सम्बन्धरूपस्तस्यैवेति. ग. पु. ४. अनुमितशब्देनेति. क. पु.

परिच्छेदद्वारैव क्रयं प्रति प्रकारत्वात्तस्यैवैकहायनीं प्रति पार्ष्ठिकोऽन्वयः, न त्वारुण्यस्य समवायसम्बन्धेनैकहायनीं प्रति, तस्य स्ववृत्तिकरणत्वं प्रत्याधेयतासम्बन्धेनाऽन्विततया करणत्वनिरूपिताधेयताया एकहायनीसमवायाघटितत्वात् । अत एव तादृशस्थलेऽऽरुण्यस्यैकहायनीसमवेतत्वबोधः परमनुमानादिना, न तु तदर्थे तद्वाचकशब्दानुमानम् ।

यदि तु न प्रकारतानियामकव्युत्पत्तितस्संसर्गनियामकव्युत्पत्तीनां भेदेन कल्पनं, अपि तु सुबर्थप्रकारकभेदसंसर्गकशाब्दत्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन धातुपदजन्योपस्थितिः कारणमित्येवमादिक्रमेणैकैवेत्याऽऽशङ्क्येत, तथाऽपि धात्वर्थस्य, भावनायाः, कालस्य, विधेश्च पृथक्कार्यकारणभावाकल्पनादस्मन्मत एव लाघवमिति । (१)इष्यते च परैरपि क्लृप्तव्युत्पत्तितः श्रुतशाब्दबोधे वृत्ते पश्चात्तन्निर्वाहार्थमर्थान्तराविषयमनुमानम् । यथा—तिङर्थेषु सामान्यसाधनत्वविशेषणीभूते इष्टे प्रथमान्तपदोपस्थाप्यस्वर्गकामविशेषणीभूतस्वर्गाभेदस्य । न हि नैयायिकमते स्वर्गसाधनत्वं लिङर्थः, अपि त्विष्टसामान्यसाधनत्वमेव । न वा कामशब्दविशेषणं स्वर्गपदमिष्टाभेदं प्रतिपादयितुमलम् । अतश्चेष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्गकाम इति शाब्दबोधे वृत्ते पश्चादेव स्वर्गाभिन्नेष्टसाधनं याग इत्यनुमानमिति, ममाऽपि श्रुतशाब्दबोधे लघुव्युत्पत्तितो वृत्ते पश्चादेव यथाऽनुभवं पार्ष्ठिको बोधोऽनुमितशब्दादनुमानाद्वेति न कश्चिद्विरोधः । तत्सिद्धं सर्वकारकाणां भावनायामन्वयात्तस्या मुख्यविशेष्यत्वमिति ।

न चैवं द्वितीयान्तस्याऽपि भावनायामेवाऽन्वयाद्धातोस्सक-

---

१. उच्यते चेति. म. पु.

र्मकत्वाकर्मकत्वव्यवस्थानापत्तिः, यद्धात्वर्थस्य पार्ष्ठिकान्वये कर्मण आकाङ्क्षा तद्धातोस्सकर्मकत्वाङ्गीकारात् । पार्ष्ठिकान्वयलभ्यधात्वर्थकर्मत्वमादायैव चोदनादौ द्वितीयोत्पत्तिः, न तु भावनाकर्मत्वमादाय । अन्यथा 'स्वास्थ्यं शयीते'त्यपि प्रयोगापत्तेः । पार्ष्ठिकान्वयलभ्यसकर्मकत्वादिव्यवहारवदेव 'स्तोकं पचती'त्यादौ क्रियाविशेषणानामपि भावनारूपक्रियासम्बन्धोत्तरकाललभ्यो धात्वर्थेनाऽभेदान्वयो द्रष्टव्यः । तस्मात्सिद्धा धात्वर्थातिरेकिणी प्रत्ययवाच्या मुख्यविशेष्या प्रयत्नरूपा भावनेति ।

तत्र च पूर्वोक्तन्यायेन(१) कर्माकाङ्क्षत्वाद्विधिसमभिव्याहाराच्च तस्यां (२)स्वर्गकामाधिकरणन्यायेनेप्सितं जन्यं स्वर्गादि भाव्यत्वेनाऽन्वेति । भावार्थाधिकरणन्यायेन च यागादिः करणत्वेन । न च तस्य यत्नरूपभावनाजन्यत्वात्कथं तस्यामेव करणत्वमिति वाच्यम् ? भावनाफलजनकत्वेन पारिभाषिकस्यैव भावनाकरणत्वस्याऽङ्गीकारात् । तस्याश्च स्वजन्यकरणेन फले जन्यमानेऽनुग्राहकापेक्षायां (३)प्रकरणाधिकरणन्यायेन प्रयाजादि इतिकर्तव्यतात्वेनाऽन्वीयते । अत एव निर्व्यापारस्य द्रव्यस्याऽनुग्राहकत्वायोगात् व्यापारानाविष्टं द्रव्यमपि नेतिकर्तव्यतात्वेन ज्ञायते । व्यापारसम्बन्धोत्तरं तु तस्येतिकर्तव्यतात्वेन बोध इत्यपि तत्र तत्र वक्तव्यं भविष्यति ।

पार्थसारथिमते तु व्यापारसामान्यस्यैव भावनात्वात्प्रयाजादीनां च तद्विशेषाणां व्यापारविशेषाकाङ्क्षारूपेतिकर्तव्यताकाङ्क्षया तत्त्वेनाऽन्वयो न त्वनुग्राहकत्वेन । अत एव व्यापारानाविष्टस्य द्रव्यस्य तद्विशेषत्वायोगान्न तत्त्वेन ग्रहणमिति विशेषो-

---

१. नियमेन कर्माकाङ्क्षेति. क. ख. पु. २. पू. मी. ६. १. १. ३. पू. मी. ३. ३. ४.

ऽपि प्रकरणाधिकरणे निरूपयिष्यते । न चैवं भावनायां साध्यसाधनेतिकर्तव्यतान्वयेऽपि समानप्रत्ययोपादानश्रुत्या शुद्धायामेव तस्यां विध्यन्वयात्तदुत्तरकालीनस्य तदंशत्रयस्य विधिसंस्पर्शाभावेन ग्रहैकत्ववदविवक्षापत्तिः, अंशत्रयान्वयोत्तरं तद्विशिष्टायां भावनायां विध्यन्वयाभ्युपगमे तु 'परिपूर्णं पदं पदान्तरेणाऽन्वेती'ति न्यायभङ्गापत्तिरिति वाच्यम्। शुद्धस्य यत्नस्य विधिविषयत्वानुपपत्तेः, सामान्यतो यत्किञ्चिदाक्षिप्तांशत्रयोपेतभावनायामेव विधिसम्बन्धाभ्युपगमेन च पर्यवसानोपपत्तेः, पश्चान्निर्धारणापेक्षायां तत्तत्पदैर्विशेषनिर्धारणोपपत्तेः ।

तस्मात्सिद्धा अंशत्रयान्विता प्रत्ययवाच्या भावना । अतश्च तस्यां धात्वर्थस्यैव करणत्वं शीघ्रं प्रमितमिति पार्ष्ठिकफलसम्बन्धवेलायां तस्यैवाऽन्वयो न तु द्रव्यादेरिति सिद्धम् । ततश्च फलसम्बन्धनिर्वाहार्थं कल्प्यमानमपूर्वमपि तत एवेत्यपि सिद्धम् ॥

द्रव्यत्यागाद्धुतवहमुखक्षेपणाच्चाऽऽतिशस्ता
निष्प्रत्यूहं विधिपरिचिता भावनेयं चकास्ति ।
यस्यास्सङ्गादतिशयफलप्रापि यागादिजातं
तामद्याऽहं मुररिपुपदद्वन्द्वपद्मेऽर्पयामि ॥

इति द्वितीयं भावार्थाधिकरणम् ॥ २ ॥

अथ तृतीयमपूर्वाधिकरणम् ॥ ३ ॥

चोदना पुनरारम्भः ॥ २-१-६ ॥

(विषयसंशयसङ्गतयः)

एवं तावदपूर्वं सिद्धं गृहीत्वा तज्जनकं विचारितम् । तत्सद्भाव एव त्वधुना विचार्यते—किमस्त्यपूर्वम् ? उत नेति ?। अत्र चाऽऽपूर्वसद्भावस्याऽप्यपूर्वभेदोपयोगित्वात्पादाध्यायसङ्गती पूर्ववदेव । आक्षेपिकी त्वनन्तरा ।

(पूर्वपक्षः)

तत्र प्रमाणाभावान्नाऽपूर्वमस्ति । तथा हि—न तावदत्र प्रत्यक्षादिकं प्रवर्तते, यागस्वर्गसाध्यसाधनभाव इवाऽपूर्वेऽपि तस्याऽप्रवृत्तेः । नाऽपि शब्दः, तदनुपलम्भात् । न(१) च श्रुतयागस्वर्गसाध्यसाधनभावान्यथानुपपत्तिरेव तत्कल्पिका । न ह्यन्यथा क्षणिकयागस्य कालान्तरभावि स्वर्गसाधनत्वमुपपद्यते । अतः प्रमाणान्तराभावेऽपि श्रुतार्थापत्तिरेवाऽपूर्वसद्भावे प्रमाणमिति वाच्यम् । साध्यसाधनभावस्याऽन्यथानुपपत्तावप्यपूर्वस्य तदुपपादकत्वाभावात्कल्पनानुपपत्तेः । न ह्यपूर्वे कल्पिते तेनैव स्वर्गजननादपूर्वोत्पत्तिं प्रत्यन्यथासिद्धस्य यागस्य स्वर्गजनकता सम्भवति । न चाऽपूर्वस्य शक्तिरूपत्वादवान्तरव्यापारत्वाद्वा ज्वालादिभिरिव न तेन यागस्याऽन्यथासिद्धिः, शक्तिव्यापारयोऽशक्तिमद्व्यापारवन्निष्ठत्वनियमेन शक्तिमति व्यापारवति च यागे नष्टे शक्तिव्यापारयोरवस्थानानुपपत्तेः ।

न चाऽपूर्वस्य फलबलकल्प्यस्य याग(२)निष्ठत्वासम्भवेऽपि यागाश्रयभूतात्मनिष्ठत्वकल्पनेनाऽपि शक्तिव्यापारत्वोपपत्तिरि-

१. नाऽपि चेति. ख. पु. २. निष्ठत्वासंभवेनेति. क. ख. पु.

ति वाच्यम् । गुरुभूतापूर्वकल्पनां विनाऽपि यागस्वर्गसाध्यसाधनभावस्योपपन्नतरत्वेनैतादृशकल्पनायां प्रमाणाभावात् ।

तथा हि—यद्यपि तावत्क्षणिको यागस्साक्षादेव कालान्तरभाविस्वर्गजननाय नाऽलम्, तथाऽपि स्वजन्यध्वंसद्वारा समर्थ एव । तस्य हि यागजन्यत्वसद्भावयोः क्लृप्तत्वात्केवलं फलजनकत्वमात्रं कल्प्यमित्यवान्तरव्यापारत्वं सुलभम् । अपूर्वस्य तु सद्भावः, स्थायित्वं, यागजन्यत्वं, स्वर्गजनकत्वं चेत्यनेकपदार्थकल्पनान्न तत्सुलभम् । (१)यागस्य विनाशित्वप्रतिसन्धानोत्तरकालमेव च द्वारकल्पनेन विनाशस्योपस्थितत्वाच्च ।

नन्वेवं ध्वंसस्यैव व्यापारत्वे तस्य नित्यत्वेन कीर्तनप्रायश्चित्तादिना नाशानुपपत्तेः,(२) 'धर्मः क्षरति कीर्तनात्' 'प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपी'त्यादिशास्त्रविरोधः । न ह्यनयोर्ज्योतिष्टोमब्रह्महत्यानाशकत्वसम्भवः, तयोराशुतराविनाशित्वेन नाशकारणानपेक्षत्वात् । नाऽपि तज्जन्यसुखदुःखनाशकत्वम्, तयोरनुत्पन्नत्वेन नाशायोग्यत्वात् । अतः कीर्तनप्रायश्चित्तादिनाश्यं यागादिजन्यमपूर्वमावश्यकमिति चेत्, क्लृप्तध्वंसस्यैव व्यापारत्वेऽवधारिते कीर्तनादीनां फलोत्पत्तिप्रतिबन्धकत्वस्यैव स्वजन्यध्वंसद्वारा साक्षादेव वा कल्पनात् ।

अत एव यागध्वंसस्य नित्यत्वेन स्वर्गोत्पत्त्यनन्तरमपि स्वर्गान्तरोत्पत्तिप्रसङ्ग इत्यप्यपास्तम्, स्वर्गध्वंसस्याऽपि तत्प्रतिबन्धकत्वकल्पनात् । न च कीर्तनादिध्वंसस्य प्रतिबन्धकत्वकल्पने प्रयोगान्तरजन्यस्याऽपि फलस्य प्रतिबन्धापत्तिः, तद्यागव्यक्तिकीर्तनजन्यध्वंसस्य तद्यागव्यक्तिजन्यफलप्रतिबन्धकत्वकल्पनात् । न चैवं गौरवापत्तिः, तस्य फलमुखत्वात् । अपूर्वपक्षेऽ-

१. यागगतविनाशित्वेति. क. ख. पु. २. कर्मनाशाजलस्पर्शादित्यादिः ।

पि समानत्वाच्च।

अथ वा न कीर्तनध्वंसस्य प्रतिबन्धकत्वं कल्प्यते, गौरवात्, अपि तु कीर्तनात्यन्ताभावविशिष्टज्योतिष्टोमव्यक्तित्वेन कारणत्वकल्पनान्न कीर्तनस्थले यागध्वंसमात्रात्फलसिद्धिः। अत्र च तद्व्यक्तित्वान्तमवश्यं विवक्षणीयम्, अन्यथा एकव्यक्तिकीर्तने व्यक्त्यन्तरेभ्योऽपि फलानिष्पत्तिप्रसङ्गात्।

न च कीर्तनवाक्ये कीर्तनमात्रश्रवणात् ज्योतिष्टोमवाक्ये च तन्मात्रश्रवणादुक्तविधकारणतावच्छेदकबोधकाभावः, तस्य वाक्यैकवाक्यतोत्तरमनुमानविधया बोधोपपत्तेः। न हि ज्योतिष्टोमादिवाक्येऽपि ज्योतिष्टोमत्वादिरूपस्य कारणतावच्छेदकस्य वाक्येन बोधः, कार्यतावच्छेदकबोधं विना कारणतावच्छेदकबोधानुपपत्तेः। न ह्यत्र स्वर्गत्वं कार्यतावच्छेदकम्, अपि तु विजातीयस्वर्गत्वम्। न च वैजात्यस्य वाचकं पदमत्राऽस्ति। स्वर्गपदेनैव तल्लक्षणायां प्रमाणाभावात्। अतो वाक्येन सामानाधिकरण्येनैव जन्यजनकभावे बोधिते, पश्चादेवाऽनुमानविधया विजातीयस्वर्गत्वस्य कार्यतावच्छेदकत्वे कल्पिते, पश्चादेव ज्योतिष्टोमत्वादेरिवोक्तविधस्याऽपि कारणतावच्छेदकस्य कल्पयितुं शक्यत्वात्। अतो युक्तं ध्वंसस्यैव व्यापारत्वं, न त्वक्लृप्तस्याऽपूर्वस्य।

एतेन(१) "तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयती" त्यर्थवादोपात्तस्य देवताप्रसादस्यैव (२)रात्रिसत्रन्यायेन द्वारत्वोपपत्तेर्नाऽनुपस्थितापूर्वकल्पनं युक्तमिति वेदान्तिमतमपि प्रत्युक्तम्, ततोऽप्युपस्थिततरध्वंसद्वारकत्वेनैव नैराकाङ्क्ष्ये रात्रिसत्रन्यायानवतारात्। देवताप्रसादस्याऽपीच्छाविशेषरूपस्य क्षणिक-

१. तै. सं. २. ५. ४. २. पू. मी. ४. ३. ६.

त्वेन व्यापारान्तरापेक्षणाच्च । तस्य ध्वंसद्वारकत्वाङ्गीकारे च तस्याऽन्तर्गडुकत्वापत्तेर्वरं यागध्वंसस्यैव व्यापारत्वकल्पनम् ।

न च ध्वंसस्य फलकारणत्वे यागस्य कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वापत्तिः, यस्मिन्नभावे संसर्गाभावत्वेन कारणता तादृशाभावप्रतियोगित्वस्यैव प्रतिबन्धकत्वाङ्गीकारात् । प्रकृते तु ध्वंसत्वेन कारणता, न तु संसर्गाभावत्वेनेत्यदोषः ।

न च ध्वंसस्याऽभावरूपत्वात्कथं फलजनकत्वम् ? अभावस्य क्वाऽपि कारणत्वादर्शनादिति वाच्यम् । अभावस्याऽपि कारणत्वाङ्गीकारे बाधकाभावात् । अत एवाऽनुपलब्धेरभावरूपाया एव घटाद्यभावग्राहकत्वमङ्गीकृतम् । एवं सन्ध्यावन्दनाद्य(१)भावस्य च प्रत्यवायजनकत्वम् ।

यत्तु वार्तिके नैवाऽभावस्य क्वचिदपि कारणत्वं दृष्टम्, यदि तु सन्ध्यावन्दनादौ क्वचिदुद्भाव्येत, तत् निमेषादिरूपस्य तत्कालक्रियमाणस्य भावस्यैव कारणत्वकल्पनादप्रयोजकमित्युक्तम्, यच्च न्यायसुधाकृता अभावस्य कारणत्वेऽपि भावसहकृतस्यैव तस्य कारणता, न शुद्धस्य, क्वचिदपि तथा अदर्शनात् । सन्ध्यावन्दनाकरणस्याऽपि च विध्यवज्ञारूपभावान्तरसहकृतस्यैव प्रत्यवाय(२)जनकत्वादित्युक्तम्, तदतिशयार्थम्, शुद्धस्याऽभावस्याऽपि कारणत्वाङ्गीकारे बाधकाभावात् । अतोऽभावस्याऽपि कारणत्वाङ्गीकाराद्युक्तं ध्वंसस्याऽपि द्वारत्वम् ।

यत्तु वार्तिके यागध्वंसविशिष्टादात्मन एव फलोत्पत्त्युपपत्तेर्नाऽपूर्वकल्पना युक्तेति पक्षान्तरमुपन्यस्तम्, तदात्मनो नित्यत्वेनाऽवान्तरव्यापारत्वायोगाद्विशिष्टस्य व्यापारत्वाङ्गीकारेऽपि वा लाघवेन ध्वंसस्यैव व्यापारतोपपत्तेरात्मनोऽपि व्यापारान्तः-

---

१. करणस्येति. क. पु. २. जनकत्वाङ्गीकारादिति. क. पु.

प्रवेशे गौरवादुपेक्षितम् । सर्वथा नाऽस्त्यपूर्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—फलं तावत्प्रधानकालान्तरभावीति निर्विवादम् । न हि 'यन्न दुःखेने' त्यादिवाक्यशेषावगतनिरतिशयसुखदुःखरूपयोस्स्वर्गनरकयोरस्मिञ्जन्मन्युपभोगस्सम्भवति । ऐहिकस्याऽपि वृष्टि(१)पश्वादेस्साङ्गप्रधानजन्यस्य न प्रधानमात्रोत्तरमुत्पत्तिसम्भवः । अतः कालान्तरभाविफलोत्पत्तिर्न क्षणिकात्कर्मणो व्यापारमन्तरेण सम्भवतीति व्यापारापेक्षायां न तावत् ध्वंसस्य (२)व्यापारत्वं सम्भवति । स एव हि व्यापारः कल्पनीयो यश्श्रुताविरोधी । तदिह यथैव निरतिशयसुखरूपे स्वर्गाख्ये फले श्रुते, तस्येह जन्मन्यसम्भवेऽपि जन्मान्तरीयत्वमेव कल्प्यते, न तु पुत्राद्यपेक्षयाऽऽपेक्षिकं निरतिशयत्वमादाय सार्वभौमत्वादिकं गृह्यते । स्वर्गशब्दस्यौपचारिकत्वाङ्गीकरणे कारणाभावात्, जन्मान्तरीयत्वकल्पनस्य च फलमुखत्वेनाऽदोषत्वात् । तद्वदिहाऽपि 'धर्मः क्षरति कीर्तनात्' 'प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपी'ति कीर्तनप्रायश्चित्तादीनां नाशकत्वश्रवणान्नाशार्हं किञ्चिदवश्यं कल्पनीयम् । न च यागः, तद्ध्वंसः, तत्फलं वा सम्भवति ।

न च नाशशब्दस्य फलोत्पत्तिप्रतिबन्धे, कारणीभूतावच्छेदकघटकीभूतात्यन्ताभावे वा लक्षणेति वाच्यम् । लक्षणायां प्रमाणाभावात् । अतश्च क्लृप्तध्वंसद्वारकत्वकल्पनापेक्षयाऽपूर्वकल्पनस्य गुरुभूतत्वेऽपि तस्य फलमुखत्वादवश्यं प्रायश्चित्तादिना-

---

१. पशुपुत्रादेरिति ख. पु. २. व्यापारत्वसम्भव इति क. पु.

श्यमपूर्वमेव कल्प्यम् । तेन यथैव(१) निषादस्थपतिपदे लक्षणापादकसमासानङ्गीकरणेन श्रौतकर्मधारयमेवाऽङ्गीकृत्य पश्चादापद्यमानं विद्या(२)तदुपायाक्षेपकत्वं फलमुखत्वादङ्गीकृतम्, तथैव नाशपदस्य श्रौतार्थलिप्सयाऽपूर्वमङ्गीकर्तव्यमेव ।

किञ्च कीर्तनादेः फलप्रतिबन्धकत्वाङ्गीकारे तावत् प्रतिबध्यतावच्छेदकस्य तद्व्यक्तित्वस्याऽप्रसिद्धत्वादेवाऽनुपपत्तेः । विजातीयस्वर्गत्वादिना प्रतिबध्यताङ्गीकारे च प्रयोगान्तरतोऽपि फलानापत्तिप्रसङ्गः । कीर्तनात्यन्ताभावविशिष्टज्योतिष्टोमव्यक्तित्वेन कारणताङ्गीकारे गौरवं, अनेककार्यकारणभावकल्पनापत्तिश्च । अस्मन्मते तु सत्यपि तत्कीर्तनत्वेन तद्व्यक्तिजन्यापूर्वनाशत्वेन कार्यकारणभावानेकत्वे कारणतावच्छेदके गौरवाभावात् 'धर्मः क्षरति कीर्तनादि'ति शास्त्रोन्नीतत्वेन प्रामाणिकत्वाच्च न दोषः ।

किञ्च ध्वंसस्य प्रधानव्यापारत्वे तुल्यन्यायत्वादङ्गेष्वपि स एव व्यापारोऽङ्गीकर्तव्यः । ततश्च तस्य नित्यत्वाद्विकृतिप्रयोगवेलायामपि सत्त्वाद्विकृतीनां पशुपुरोडाशवत्प्रासाङ्गिकत्वोपपत्तेः प्रयोगभेदेऽपि तज्जन्यस्योपकारस्य लब्धत्वान्न पृथगङ्गानि कर्तव्यानि स्युः । तथा च विकृतौ (३)'प्रयाजे प्रयाजे कृष्णलं जुहोती'ति दर्शनानुपपत्तिः । अस्मन्मते त्वङ्गापूर्वाणां प्रधानापूर्वोत्पत्त्यनन्तरं नाशाद्विकृत्यपूर्वसिध्यर्थं पुनरङ्गकरणोपपत्तिः । अपि चाऽस्मिन्पक्षे काऽङ्गानामुपयोगः ? न तावत्प्रधाने, तस्य प्रयाजाद्यजन्यत्वात् । नाऽपि तद्ध्वंसे, तस्य तानि विनाऽपि जायमानत्वात् । नाऽपि फले, प्रधानत्वापत्तेः । अतोऽवश्यम-

१. विचारोऽयं षष्ठप्रथमान्तिमाधिकरणे विशदः ।

२. तद्गुणाक्षेपकत्वमिति· क. पु. ३. तै. सं. २. ३. २.

ङ्गप्रधानव्यवस्थासिद्ध्यर्थमप्यपूर्वं कल्पनीयम् । तदा हि प्रधानेनाऽपूर्वे जननीये अङ्गानामपि सहकारित्वकल्पनात्प्रधान एव वा योग्यताविशेषजननादस्ति तेषामुपयोगः । तस्मादवश्यं यागस्य ध्वंसातिरिक्तो व्यापारो वाच्यः ।

न च यागस्यैव तर्हि फलं यावत्स्थायित्वं लाघवादस्तु, किं व्यापारकल्पनयेति वाच्यम् ? तृतीयादिक्षणे प्रत्यक्षतापत्तेः । तद्यागव्यक्तिप्रत्यक्षे तद्यागव्यक्तिद्वितीयक्षणस्य कारणत्वकल्पने चाऽनन्तकार्यकारणभावकल्पनापत्तिः । न चैतस्य फलमुखत्वम् , विषयप्रत्यक्षयोः कार्यकारणभावस्य लोकसिद्धत्वेन स्वर्गसाधनत्वज्ञानानपेक्षत्वात् । कीर्तनापूर्वव्यक्त्योर्नाश्यनाशकभावानेकत्वकल्पना तु 'धर्मः क्षरती'ति शाब्दबोधोत्तरकालीनत्वात्फलमुखेति विशेषः । अतोऽवश्यं व्यापारो वाच्यः । सोऽपि च न देवताप्रसादरूपः, तस्य देवतानिष्ठत्वेन फलव्यधिकरणस्य फलजनकत्वानुपपत्तेः, देवतायाश्चैतन्यं, विग्रहः, प्रसादः, तस्य च स्थायित्वमित्यनेकार्थकल्पनापत्तेश्च । विशिष्य चाऽयं (१)नवमे निराकरिष्यते । अतः(२)परिशेषादपूर्वमेव कल्प्यम् । तच्च 'यागेनाऽपूर्वं कृत्वा स्वर्गं कुर्यादि'ति(३)श्रुतार्थापत्तिकल्पितवैदिकशब्दगम्यत्वादेव नाऽप्रामाणिकम् । न चैवं श्रुतयागस्वर्गसाध्यसाधनभावव्याघातः, अपूर्वस्य शक्तिरूपत्वेन व्यापाररूपत्वेन वा कल्प्यमानत्वाच्छक्तिव्यापाराभ्यां च ज्वालादिवच्छक्तिमतो व्यापारवतो वा साधनत्वाविघातात् ।

न चैवं शक्तिमति व्यापारवति वा यागे नष्टे तन्निष्ठापूर्व-

---

१. पू. मी. ९. १. ४.   २. पारिशेष्यादिति क. ख. पु.

३. श्रुतं शब्दः तत्कल्पकार्थापत्तिरिति व्युत्पत्त्या यत्राऽनुपपद्यमानः शब्दः शब्दान्तरं कल्पयति सा श्रुतार्थापत्तिरित्यर्थः ॥

स्याऽपि नाशापत्तिः, अपूर्वस्य यागीयत्वेऽपि(१)फलबलकल्प्य त्वेन यागनिष्ठत्वाकल्पनात् । यथैव ह्यनुभवव्यापारस्याऽपि संस्कारस्य नाऽनुभवानिष्ठत्वं, किन्तु फलबलेन स्मृतिसमानाधिकरणत्वसिध्यर्थमात्मनिष्ठत्वमेव, तथाऽत्राऽप्यपूर्वस्य फलसमानाधिकरण्यासिध्यर्थं फलबलेन फलभोक्तृनिष्ठत्वमेव कल्प्यत इति न विरोधः । अत एव गयाश्राद्धादौ यत्र पितुः पुत्रस्य च फलभोक्तृत्वं शास्त्रान्तरप्रमितम्, तत्रोभयनिष्ठापूर्वद्वयकल्पनम् अपूर्वद्वयमपि च तत्र(२)कीर्तननाश्यमेव । एवं दम्पत्योरुभयोरपि भोक्तृत्वादुभयनिष्ठमपूर्वद्वयम् । तत्राऽपि तत्तन्निष्ठकीर्तनस्यैव तत्तन्निष्ठापूर्वनाशकत्वम् ।

(३)यत्रान्यतरस्यैव रोगादिनिवृत्त्यर्थं दर्शपूर्णमासाद्यनुष्ठानं, तत्र सत्यपीतरस्य व्यासज्यवृत्तिकर्तृत्वे फलभोक्तृत्वाभावान्न तन्निष्ठापूर्वान्तरकल्पनम्, अपि तु भोक्तृनिष्ठमेव । अत एव तत्रेतरस्य सत्यपि कर्तृत्वे फलभोक्तृत्वाभावान्न तत्र फलिसंस्कारा वपनादयः । एवं जातेष्ट्यादौ पुत्रस्यैव फलभोक्तृत्वम्, न तु पितुः,(४)न तत्राऽपूर्वं फलिसंस्कारो वा । याज्ञिकास्तु पितर्यपि फलिसंस्काराननुतिष्ठन्त्येव ।

न चैवं पुत्रस्य भोक्तृत्वसत्त्वात्तत्र फलिसंस्कारा अप्यपूर्ववदभ्युपगम्येरान्निति वाच्यम् । वपनादीनां कर्तृनिष्ठफलाधानयोग्यताजननार्थत्वात्पुत्रस्य कर्तृत्वाभावेन वपनादिप्राप्त्यभावात् । वपत इत्यादिषु हि आत्मनेपदानुरोधेन पुरुषप्राधान्येऽवगते वपनादेरवघातादिवत्संस्कारत्वावगमाद्वपनेन प्रधानफलाधारत्व-

१. फलबलेनेति. क. ख. पु. २. कर्तृकीर्तनेति. क. ख. पु.
३. यत्रेतरस्येति. क. पु.
४. तत्राऽपि, न तत्र अपूर्वमिति. क. ख. पु.

योग्यतासम्पादनद्वारा पुरुषं संस्कुर्यादित्यर्थावगतेः, संस्कार्यस्य च भूतभाव्युपयोगापेक्षायां कर्तृत्वद्वारेण यागापूर्वसम्बन्धावगतेरपूर्वजनकयागकर्तारं यागजन्यफलाधारत्वयोग्यतासम्पादनद्वारा वपनेन संस्कुर्यादित्यर्थः प्रतीयते। अतश्च पुत्रस्य कर्तृत्वाभावादप्राकृतकार्यकारिणि तस्मिन्न वपनादिधर्मप्राप्तिः।

न च संस्कार्यस्याऽपूर्वजन्यफलाश्रयत्वसम्बन्धेनैवाऽपूर्वसम्बन्धोपपत्तेर्नाऽवश्यं कर्तृत्वेनैव स विवक्षणीय इति वाच्यम्। वपत इत्यात्मनेपदेन वपनकर्तरि वपनजन्यफलोत्पत्त्यभिधानाद्वपनस्य चाऽङ्गत्वेन प्रधानविधिविधेयस्य प्रधानकर्त्रैव कर्तृनिरूपणाद्वपनवाक्ये कर्तृतासम्बन्धस्यैव शीघ्रोपस्थितिकत्वात्। विस्तरेण चाऽयमर्थः (१)तृतीये निरूपयिष्यते। तस्माज्जातेष्टिस्थले फलिसंस्काराभावेऽपि पुत्रनिष्ठमेवाऽपूर्वं न पितृनिष्ठम्। तस्मिंस्तु निमित्तबलादकरण एव दुःखजनकीभूतं प्रत्यवायरूपमपूर्वमिति विशेषः। तत्सिद्धं नष्टेऽपि प्रधाने फलबलेनाऽत्मनिष्ठापूर्वकल्पनम्।

एवमङ्गानामपि प्रधानगतफलजननयोग्यतासम्पादनफलकानामनेकेषां युगपद्योग्यतासम्पादकत्वानुपपत्तेरवान्तरव्यापाररूपापूर्वकल्पनान्नष्टेष्वप्यङ्गेष्वात्मगतापूर्वसिद्धिः। तत्र च परम्परासम्बन्धेन प्रधानगतयोग्यताया अपि सत्त्वात्फलसामानाधिकरण्यलाभः। तत्र त्वयं विशेषः—आरादुपकारकाणां तावत्समिदादीनां प्रकरणाद्यवगतयागाङ्गभावानामपि प्रधानयागस्वरूपस्य तदजन्यत्वात्तत्रोपयोगकल्पनानुपपत्तेः, तज्जन्योत्पत्त्यपूर्वाणां च प्रधानाव्यवहितोत्पत्तिकानां प्रधानापूर्वोत्तरकालवर्तिभिरारादुपकारकैरुत्पत्त्यसम्भवात्तत्राऽनुपयोगेऽपि तेष्वेव तज्जन्या-

१. पू. मी. ३. ७. २.

पूर्वजननानुकूला योग्यता जन्यते ।

न चोत्तराङ्गानामेव परमापूर्वजननानुकूलयोग्यतासम्पादकत्वमस्तु । पूर्वाङ्गानां तूत्पत्त्यनुकूल(१)योग्यताजनकत्वमेवाऽस्त्विति वाच्यम् । लाघवादारादुपकारित्वावच्छेदेनैव परमापूर्वोपयोगित्वस्य कल्पनात् । न चोत्पत्त्यपूर्वेष्वनुपयोगेऽपि प्रधानापूर्वैः परमापूर्वे जननीयेऽङ्गानामपि स्वस्वावान्तरापूर्वद्वारा सहकारिकारणत्वमस्त्विति वाच्यम् । तथा सति फल इव परमापूर्वेऽपि जनकत्वाविशेषेण प्रधानतुल्यतापत्तेः । अतो योग्यतासम्पादनमेव तैरुपत्त्यपूर्वेषु क्रियते । योग्यैश्च तैः परमापूर्वादिजननमिति द्रष्टव्यम् । अत एव प्रधानापूर्वानेकत्वे क्रमेण सर्वेषु तेषु तैरेवाऽपूर्वैर्योग्यतासम्पादनमिति द्रष्टव्यम् । अतश्चाऽन्तिमप्रधानापूर्वनिष्ठयोग्यताजननानन्तरमेव तेषां नाशः । योग्यता चेयमुत्पत्त्यपूर्वाव्यहितापूर्वजननानुकूला । तच्च क्वचिद्वक्ष्यमाणरीत्या समुदायापूर्वम्, क्वचिच्च परमापूर्वमिति विशेषः ।

अत एव प्रकृतौ समुदायापूर्वस्याऽव्यवहितस्य सौर्यादावभावेऽपि परमापूर्वस्यैवाऽव्यवहितत्वात्तदनुकूलैव योग्यता । सुत्याकालीनाङ्गानां च प्रकृतावव्यवहितपरमापूर्वानुकूलयोग्यताजनकानां द्वादशाहे अव्यवहिततत्तत्सुत्यासमुदायापूर्वानुकूलयोग्यताजनकत्वम् । युक्तं चैतत् । कारणस्याऽनुग्रहापेक्षारूपेतिकर्तव्यताकाङ्क्षाख्यप्रकरणादिनाऽवगताङ्गभावानां प्रयाजादीनां साक्षात्प्रधानतदपूर्वार्थत्वयोरसम्भवे तदव्यवहितापूर्वार्थत्वस्यैव कल्पनात् । अतश्चोत्पत्त्यपूर्वाव्यवहितापूर्वजननानुकूलयोग्यतासम्पादनमुत्पत्त्यपूर्वनिष्ठमारादुपकारकाणां स्वावान्तरापूर्वद्वारा फलमिति सिद्धम् ।

---

१. प्रधानयोग्यतेति. क. ख. पु.

यत्र तु "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इत्यादौ बृहस्पतिसवादीनां वाजपेयेनेति तृतीयाबलेन बृहस्पतिसवव्यतिरिक्तसर्वाङ्गयुक्तवाजपेयानुष्ठानेन तज्जन्यपरमापूर्वनिष्पत्त्यनन्तरं क्रियमाणानां न परमापूर्वनिष्पत्तावप्युपयोगसम्भवः, तत्र परमापूर्वस्यैव बृहस्पतिसवाकरणे नाशकल्पनात्परमापूर्वस्थापकत्वम्, वैमृधस्य च पौर्णमासीसमुदायापूर्वस्थापकत्वमिति मूलानुयायिनः।

वस्तुतस्तु बृहस्पतिसवापूर्वं वाजपेयपरमापूर्वावस्थानं यावत् स्थायि, न वा? आद्ये प्रसङ्ग(१)सिध्यापत्तेर्वाजपेयप्रयोगान्तरे पुनर्बृहस्पतिसवकरणानापत्तिः। नाऽन्त्यः; बृहस्पतिसवापूर्वनाशे वाजपेयापूर्वस्याऽवस्थानानुपपत्तेः। न च बृहस्पतिसवापूर्वानुत्पत्तेरेव तन्नाशकत्वकल्पनात्(२) न दोष इति वाच्यम्। प्रयाजाद्यपूर्वानुत्पत्तेरपि दर्शाद्यपूर्वोत्पत्तिप्रतिबन्धकत्वकल्पनापत्त्या तस्याऽपि स्थायित्वानापत्तौ पशुपुरोडाशेऽपि प्रसङ्गसिध्वनापत्तेः।

अथ अपूर्वानुत्पत्तेरश्रुताया गुरुभूतायाश्च कारणत्वाकल्पनात्प्रयाजाद्यपूर्वाणां प्रधानापूर्वनिष्पत्तिपर्यन्तं स्थायित्वं कल्प्यते, ततो बृहस्पतिसवाकरणस्याऽपि नाशकारणत्वाकल्पनान्न स्थापकत्वसिद्धिः। अतो वाजपेयपरमापूर्व एव वाजपेयफलानुकूलयोग्यतासम्पादनं बृहस्पतिसवापूर्वेण क्रियत इति वेदितव्यम्। एवं (३)परिधानीये कर्मण्यपि सादनादिपात्रप्रतिपत्त्यपूर्वस्याऽप्यव्यभिचरितक्रतुसम्बन्धोपस्थापितामुष्मिकफलसाधनक्रतुजन्यपरमापूर्वनिष्ठयोग्यतां फलानुकूलां प्रत्येव जनकत्वं बोध्यम्।

---

१. सिध्यापातेनेति. क. ख. पु. २. नोक्तदोषापत्तिरिति. क. ख. पु.
३. 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चे'ति वाक्यविहितान्त्येष्ट्याख्ये कर्मणीत्यर्थः॥

न चाऽविशेषप्रवृत्तप्रतिपत्त्यनुरोधेन कारीर्यादिजन्यवृष्टेरप्यामुष्मिकत्वकल्पना,(१) ऐहिकाग्निजनकपवमानेष्ट्यनुरोधेन प्रतिपत्तेरैहिकातिरिक्तक्रतुविषयत्वस्याऽऽवश्यकत्वेनैवंविधकल्पनस्याऽन्याय्यत्वात् । अत एव पवमानेष्ट्यनन्तरमेव मरणे न (२)दक्षिणहस्तादिनियमः। याज्ञिकास्तु सादनस्य दाहाङ्गत्वमभिप्रेत्य तमनुतिष्ठन्ति । दाहस्य तु संस्कारेषु पाठादामुष्मिकं फलोपयोगिसंस्कारं प्रत्यपि जनकत्वात्पवमानेष्ट्यनन्तरं करणेऽपि न विरोधः । आहिताग्निशरीरप्रतिपत्तिस्तु आनुषङ्गिकीति तदभावेऽपि न क्षतिः ।

न चैवं दर्शाद्युत्पत्त्यपूर्वेष्वेव फलजननानुकूलयोग्यताया उत्तराङ्गैस्सम्पादनोपपत्तेस्समुदायापूर्वपरमापूर्वयोः कल्पनानुपपत्तिः, तत्र वा तत्कल्पने वाजपेयेऽपि परमापूर्वजन्यापूर्वान्तरस्वीकारापत्तिरिति वाच्यम् । अपूर्वान्तरस्वीकारे मानाभावात् । यथा च समुदायापूर्वपरमापूर्वयोः कल्पनोपपत्तिस्तथोत्तरत्र निरूपयिष्यामः । तत्सिद्धं आरादुपकारकाणामुपयोगः ।

सन्निपत्योपकारकाणां तु श्रुत्याद्यवगतव्रीह्याद्यङ्गभावानां व्रीह्यादिस्वरूपे आनर्थक्यप्रसङ्गेन तण्डुलादिपरम्परया प्रधानपर्यन्तं गमनात्तत्राऽप्यानर्थक्यप्रसक्तेरुत्पत्त्यपूर्वजननानुकूलतद्गतयोग्यतासम्पादनमेव फलमवसीयते । अत एव तत्तदुत्पत्त्यपूर्वजननानुकूलतत्तत्प्रधानगततत्तद्योग्यतासम्पादनपर्यन्तं प्रोक्षणादिजन्यावान्तरापूर्वस्याऽवस्थानम् ।

---

१. आहिताग्निजनकेति. ग. पु.

२. 'दक्षिणे हस्ते जुहूमासादयति, दक्षिणपूर्वं अहवनीयमि'ति वाक्यविहितदक्षिणहस्तादिनियमः । अयं च (११-३-१३) अधिकरणे विचारित इति द्रष्टव्यम् ॥

न च व्रीहिगतयोग्यताजननमेव प्रोक्षणादेः फलमस्तु, किं प्रधानगतयेति वाच्यम् ? व्रीहिगता हि योग्यता किं तण्डुलादिजनिका वा स्यात् ? अपूर्वजनिका वा ? नाऽऽद्यः; तण्डुलाद्युत्पत्तेर्लोकसिद्धत्वेन प्रोक्षणाद्यजन्यत्वात् । अवघातजन्यत्वेऽपि तन्नियमाजन्यत्वस्य तुल्यत्वाच्च । नाऽऽन्त्यः; व्रीहीणामपूर्वाजनकत्वात् । परम्परासम्बन्धाङ्गीकारेऽपि(१) विवक्षितरीत्या प्रधानतदपूर्व(२)जनकस्यैवाऽदृष्टोपायापेक्षितत्वेन तत्रैव प्रोक्षणादीनां योग्यताजनकत्वस्य कल्पनीयत्वात् । अत उत्पत्त्यपूर्वजनकप्रधानगतयोग्यतासम्पादनफलकानां प्रोक्षणादीनां साक्षात्तत्फलकत्वायोगादवान्तरोपकारद्वारेण तदित्याश्रीयते । स चाऽवान्तरोपकारः क्वचिददृष्टरूपो यथा–प्रोक्षणादिषु । क्वचिद्दृष्टरूपो यथा–अवघातादिषु । यत्राऽपि दृष्टरूपस्तत्राऽपि नियमांशेऽदृष्टरूपोऽस्त्येवेति (३)वक्ष्यते । उभयविधोपकारश्चाऽयं व्रीह्यादिगताक्रियाजन्यातिशयशालित्वरूपकर्मत्वनिर्वाहाय व्रीह्यादिगत एव कल्प्यते, न तु प्रयाजादिवदात्मनिष्ठः ।

अत एव वपनादिजन्यस्याऽदृष्टस्याऽऽत्मगतत्वेऽपि संस्कार्यत्वादात्मनः कर्मत्वाविघातः । दृष्टरूपस्य तु वितुषीभावादेर्व्रीह्यादिनिष्ठत्वं प्रत्यक्षसिद्धमेव । अवघातादिनियमादृष्टस्याऽपि 'यदर्था क्रिया तदर्थो नियम' इति न्यायेन व्रीह्यर्थतावधारणाद्व्रीहिनिष्ठत्वमेव । न चैवं व्रीह्यादिनाशे तन्नाशापत्तिः, व्रीहिनाशेऽपि तददृष्टस्य व्रीह्यवयवनिष्ठत्वकल्पनात् । अतः पुरोडाशवृत्तिप्रोक्षणादिजन्यमपूर्वं विषयतासम्बन्धेन पुरोडाशवृत्तियागे उत्पत्त्यपूर्वानुकूलां योग्यतामादधातीति सिद्धम् ।

---

१. विवक्षितगत्येति. क. ख. पु. २. जन्यजनकभावस्येति. क. ख. पु.
३. अनन्तराधिकरणे स्पष्टमिदम्.

ननूक्तन्यायेनाऽवघातनियमादृष्टस्योपयोगसम्भवेऽपि दधिव्रीह्यादिनियमादृष्टानां न तत्सम्भवः, तद्धि यागे कृते नियमेनोत्पद्येत । अतश्च प्रथमक्षणे यागोत्पत्तिः, द्वितीयक्षणे अदृष्टं, तृतीयक्षणे च तेन योग्यता, तेन चतुर्थक्षणे यागस्य नष्टत्वात् नाऽपूर्वोत्पादकत्वसम्भव इति चेत्—न; नियमादृष्टं हि न नियमजन्यं, किन्त्ववघातजन्यमेव । वितुषीभावे तूद्देश्यताऽप्याधिकेति परं (१)वक्ष्यते । अतश्च तुल्यन्यायत्वाद्दध्यादिभिर्यागे जन्यमाने तस्मिन्नेव क्षणे तैरदृष्टमपि, द्वितीयक्षणे तेन यागे योग्यता, तृतीयक्षणे च योग्येन तेनोत्पत्त्यपूर्वं यागनाशश्चेति न किञ्चिदनुपपन्नम् ।

अत एव तददृष्टस्य न दध्यादिनिष्ठता, तस्य यागसमानकाल एव प्रक्षिप्यमाणत्वेन तन्नाशे नाशापत्तेः । अपि तु यागनिष्ठता आत्मनिष्ठता वा । येषां तु प्रधानसमकालानां तदुत्तरभाविनां वा प्रक्षेपस्विष्टकृदादिभक्षाणां प्रतिपत्तित्वेन नोत्पत्त्यपूर्वोत्पत्त्युपयोगिप्रधानगतयोग्यताजनकत्वसम्भवः, तेषामपि परमापूर्वजननानुकूलोत्पत्त्यपूर्वगतयोग्यताजनकत्वेन वा उत्पत्त्यपूर्वस्थापकत्वेनैव वोपयोगो द्रष्टव्यः। अत एव तन्नियमापूर्वमप्यात्मगतमेव कल्प्यते, न तु संस्कार्यत्वेऽपि द्रव्यगतम् , तस्य प्रतिपत्तिनाश्यत्वेनाऽपूर्वाधारत्वानुपपत्तेः । संस्कार्यत्वं च तत्र दृष्टरूपसंस्काराश्रयत्वादेवोपपन्नमिति न कश्चिद्विरोधः । तदेवमङ्गानां प्रकारभेदे सत्यपि सर्वेषां साक्षात्परम्परया वा करणानुग्राहकत्वात्तादितिकर्तव्यतात्वोपपत्तिः ।

तत्सिद्धं नष्टेऽपि व्यापारिणि फलबलेनाऽऽश्रयान्तरकल्पनोपपत्तेरपूर्वव्यापारेणैव यागादीनां फलजनकत्वमिति । तद्यत्र एकमेव प्रधानं पूर्वोत्तराङ्गविशिष्टं फलसाधनं तत्र प्रधानानन्तर-

१. अनन्तराधिकरणे स्पष्टमिदम् .

क्षणे एकमपूर्वमपरं च सर्वाङ्गसमाप्त्युत्तरं परमापूर्वम् । एवं यत्र प्रधानान्यनेकानि तत्राऽपि तावन्त्युत्पत्त्यपूर्वाणि, एकं परमापूर्वमित्युत्सर्गः । यत्र तु दर्शपूर्णमासादौ पौर्णमास्यां दर्शे च साङ्गत्रिकद्वयानुष्ठानम्, तत्रैकैकस्मिन्समुदाये उत्पत्त्यपूर्वत्रयेण सर्वाङ्गकरणात्तैरेकैकं समुदायापूर्वं जन्यते । ततश्च समुदायद्वयान्ते ताभ्यामेकं परमापूर्वमिति विशेषः । अत एवाऽऽरादुपकारकाङ्गानामपि तत्तत्समुदायापूर्व एवोपयोगकल्पनात्समुदायद्वयेऽपि पुनः पुनरनुष्ठानमङ्गानां न विरुध्यते ।

न च द्विरङ्गानुष्ठानस्य परपूर्व एवोपयोगसम्भवात्समुदायापूर्वकल्पने मानाभावः, "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेते"ति वाक्यद्वयावगतकरणत्रयसाहित्यस्यैव मानत्वात् । यद्यपि चोत्पत्तिवाक्ये प्रत्येकमेव करणत्वादत्राऽपि न(१)त्रिकानिष्ठं व्यासज्यवृत्त्येकं तत्, तथाऽपि करणतात्रयसाहित्यस्योपादेयगतस्यैककार्यनिरूपितत्वमावश्यकम्, अन्यथा चित्रासौर्यादाविव साहित्यव्यवहारानुपपत्तेः । अत एव समुच्चित्यैककार्य(२)कारित्वमेव साहित्यपदार्थः । इदं च न फलनिरूपितम्, करणषट्कसाहित्यस्यैव तदङ्गत्वात् । अत एव न परमापूर्वनिरूपितम् । नाऽप्युत्पत्त्यपूर्वनिरूपितम्, तस्यैककरणजन्यत्वात् । अतस्तत्तद्वाक्ये करणत्रयसाहित्यस्याऽपि कार्यापेक्षायां समुदायापूर्वद्वयसिद्धिः । अत एव सान्नाय्ये दधिपयसोरसम्प्रतिपन्नदेवताकत्वेन सहानुष्ठानादेकमेवाऽपूर्वमस्त्वित्यपास्तम् । तत्तदुत्पत्तिवाक्ये निरपेक्षकरणत्वस्य निरूपकापेक्षायामन्यासम्भवेनैवाऽपूर्वद्वयसिद्धेः । एवमग्निहोत्रचातुर्मास्यादिष्वपि सायं प्रातरादिवाक्येषु करणत्वेन प्रयोगाविधानात्समुदा-

१. त्रिषु व्यासज्येति, क. ख. पु.   २. जनकत्वमेवेति. क. पु.

यापूर्वसिद्धिः ।

अग्निहोत्रे तु सत्यपि कर्मैकत्वे देवतासमुच्चयाद्यनुरोधेनाऽभ्यासादुत्पत्त्यपूर्वभेदावगमात्कालभेदेन समुदायापूर्वभेदात्तदुत्तरं परमापूर्वोत्पत्तिरिति द्रष्टव्यम् । सोमे तु सत्यप्यभ्यासादुत्पत्त्यपूर्वभेदे समुदायापूर्वाभावात्तदुत्तरमेव परमापूर्वोत्पत्तिः । द्वादशाहादौ तु तत्तदहर्वाक्यगतकरणत्वबलेन तत्तत्सुत्यापूर्वाण्यपि तत्तद्ग्रहयज्याभ्यासोत्पत्त्यपूर्वजन्यानि कल्प्यन्त इति तैरेव परमापूर्वसिद्धिः ।

ननु कल्प्यन्तां तत्र तत्रोत्पत्त्यपूर्वाणि, करणत्वबलेन वा समुदायापूर्वाणि, परमापूर्वं तु नैव किञ्चित्प्रमाणं पश्यामः । तथाहि—यत्र तावदस्ति समुदायापूर्वं, तत्राऽऽरादुपकारकाणां तत्रैवोपयोगान्नाऽतिरिक्तापूर्वान्तरकल्पनायां प्रमाणमस्ति। यत्राऽपि च न समुदायापूर्वं, तत्राऽप्युत्तराङ्गैरुत्पत्त्यपूर्वेष्वेव फलजननानुकूलयोग्यतासम्पादनोपपत्तेर्नाऽतिरिक्तापूर्वकल्पनम् । यत्र नैवाऽऽरादुपकारकाण्युत्तराङ्गानि सन्ति, तत्र परमापूर्वकल्पनायां किं प्रमाणम् ? यदि चाऽङ्गवैयर्थ्यानुपपत्त्या परमापूर्वं कल्प्येत, ततो विकृतिषु परमापूर्वकल्पनाभावेन द्वारलोपान्नाऽङ्गानि प्राप्नुयुः । अतः किं परमापूर्वसद्भावे प्रमाणमिति चेत्—न; दर्शपूर्णमासादौ तावत्फलवाक्ये साहित्यविशिष्टानां षण्णां यागकरणतानां फलनिरूपितत्वावगमात्तस्य च व्यापारमन्तरेणाऽनुपपत्तेः(१) तदपेक्षायां परमापूर्वकल्पनोपपत्तेः । न हि तत्रोत्पत्त्यपूर्वाणां समुदायापूर्वयोर्व्यापारत्वं सम्भवति, तेषां षट्साहित्यावच्छिन्नजन्यत्वाभावात् । फलनिरूपकतावच्छेदकावच्छिन्नजन्यस्यैव व्यापारत्वौचित्यात् । यद्यपि चाऽत्र प्रतियागं करणताभेदः, तदवच्छेदकानि चाऽऽग्नेयादीनि भिन्नान्येव, तथाऽपि सर्वासु करणतास्वेका फलनिरूपकता,(२)फलस्यैक्यात् । तदवच्छे-

१. तदपेक्षायामेवेति. क. ख. पु. २. फलस्यैकत्वादिति. ख. पु.

दकश्च षट्साहित्यम् । न च तदवच्छिन्नजन्यत्वमुत्पत्त्यपूर्वादीनां सम्भवति । अतस्तेषां व्यापारत्वायोगात्परमापूर्वसिद्धिः ।

न चैवं समुदायादिवाक्येष्वपि करणत्वश्रवणात्तस्य च कार्यनिरूपितत्वात्कार्यरूपापूर्वकल्पनवद्व्यापारापेक्षायां व्यापाररूपाणामप्यपूर्वान्तराणां कल्पनापत्तिः, अनेकापूर्वकल्पना(१)भिया समुदायादिवाक्येषु साधकतमत्वापरपर्यायानन्तरकार्योत्पादकत्वरूपस्यैव करणत्वस्य विवक्षितत्वात् । अनुशिष्टैव हि तादृशकरणतायां तृतीया पाणिनिनाऽपि । फलवाक्ये तु फलस्य कालान्तरभावित्वेन तादृशकरणत्वस्य बाधाद्व्यापारवदसाधारणकारणत्वरूपा करणता वाच्या । न चाऽसौ व्यापारमन्तरेण सिध्यतीत्युक्तविधया परमापूर्वसिद्धिः ।

एवमङ्गानामपि परस्परसाहितानामेव प्रयोगविधिबलेन प्रधानोपकाररूपफलजनकत्वावगमात्तस्य चाऽव्यवधानेनाऽनुत्पत्तेर्व्यापारापेक्षयामवान्तरोपकारकाणां साहित्यावच्छिन्नाजन्यत्वेन व्यापारत्वायोगात्परमापूर्वस्थानापन्नमेकमपूर्वं व्यापारत्वेन कल्प्यते । (२)पार्थसारथेस्त्वेतदानिच्छतः परमापूर्वमपि न सिध्येदिति ध्येयम् ।

यत्र त्वेकमेव प्रधानं पूर्वोत्तराङ्गविशिष्टफलजनकत्वेन

---

१. गौरवभियेति. क. ख. पु.

२. मिश्राणामयमाशयः—आग्नेयादिषु प्रधानेषु फलाकाङ्क्षाया उत्कटत्वात् फलस्य च कालान्तरजन्यत्वात् कथमस्माभिः कालान्तरजन्यं स्वर्गरूपं फलं साधनीयमिति सर्वसाध्यैकपरमापूर्वकल्पकजिज्ञासोदयात्तत्र तत्कल्प्यते । तथा सर्वेष्वप्यङ्गेषु अन्वाधानादिब्राह्मणतर्पणान्ताङ्गानुष्ठानाव्यवहितोत्तरमेव तज्जन्यस्य क्रतूपकारस्योत्पत्तेः, कथमस्माभिः कालान्तरभाविक्रतूपकारस्सम्पाद्य इति जिज्ञासा नोदेति, किन्तु कथं साहित्यमस्माकमित्येव जिज्ञासा । सा च तत्तत्प्रातिस्विकापूर्वकल्पनामात्रेणैव शाम्यतीति न परमापूर्वस्थानापन्नमेकमपूर्वं कल्प्यत इति ॥

श्रूयते, तत्र फलस्य कालान्तरभावित्वेन व्यापारापेक्षायां कल्पितस्याऽपूर्वस्याऽपि साङ्गप्रधानोत्तरकालोत्पत्तिकत्वावगतेर्युक्ता तत्राऽपि परमापूर्वसिद्धिः ।

न च तत्राऽऽवश्यकत्वेनोत्पत्त्यपूर्वेणैव फलसिध्युपपत्तेरपूर्वान्तरकल्पने गौरवमिति वाच्यम् । (१)साङ्गस्य फलजनकत्वश्रवणान्यथानुपपत्त्या कल्पितस्याऽप्यपूर्वस्य साङ्गप्राधानानन्तरमेवोत्पत्तिसम्भवेन गौरवस्याऽपि प्रामाणिकत्वात् ।

न च औत्तरकालिकेनाऽपि गौरवप्रतिसन्धानेन पूर्वप्रमितस्याऽपि साङ्गप्रधानानन्तर्यस्य बाध एव किं न स्यादिति वाच्यम् ? तथात्वे श्रुतायास्साङ्गफलकरणताया एव बाधापत्तेः ।

अस्तु वा तादृशस्थले उत्पत्त्यपूर्वादेव फलम्, अङ्गानां च फलानुकूलयोग्यताजनकत्वम् । न चैवं विकृतिषु परमापूर्वाभावादतिदेशानापत्तिः, प्रकृतावुत्पत्त्यपूर्वगताव्यवहितकार्यजननानुकूलयोग्यताजनकत्वस्यैवाऽऽरादुपकारकाङ्गकार्यत्वेन विवक्षितत्वात् । तच्चोत्पत्त्यपूर्वा(२)व्यवहितं क्वचित्समुदायापूर्वं, क्वचित्परमापूर्वं, क्वचित्फलमेवेति युक्तोऽतिदेशः । उक्तश्चाऽयमपि पक्षो वार्तिककृता 'केचिदाहु' रित्यादिना । अत एव दर्शपूर्णमासादिष्वपि परमापूर्वं विनैव क्लृप्तापूर्वैरेव फलसिद्धेर्न तत्कल्पनमित्यपि सुवचम् । सर्वथा सिद्धमपूर्वम् ।

अस्य चाऽधिकरणस्याऽऽक्षेपसमाधानरूपत्वान्न स्वातन्त्र्येण प्रयोजनकथने यतितव्यम् । सूत्रं तु—आरभ्यत इति आरम्भः अपूर्वं, तत्पुनः उत्पाद्यते यागेन । यतो यागस्वर्गसाध्यसाधनभावस्य वाक्येन चोदनेति व्याख्येयम् ॥ ६ ॥

इति तृतीयमपूर्वाधिकरणम् ॥ ३ ॥

१. यागस्येति. क. पु. २. व्यवहितं कार्यमिति. क. ख. पु.

अथ चतुर्थं तानिद्वैधाधिकरणम् ॥ ४ ॥

तानि द्वैधं गुणप्रधानभूतानि ॥ २-१-७ ॥

(विषयसंशयौ)

एवं तावत्सिद्धमपूर्वम्, तच्च धात्वर्थादेवेत्यपि, धात्वर्थस्याऽपूर्वजनकत्वे द्रव्यादेस्तदर्थत्वमित्यपि च। इदानीं तदपवादः प्रस्तूयते। "व्रीहीनवहन्ति" "तण्डुलान् पिनष्टि" इत्यादाववघातपेषणादीनां स्वतन्त्रापूर्वार्थत्वं, व्रीह्यादेस्तु तदर्थत्वम्? उत तेषां वितुषीभावादिरूपप्रयोजनलाभान्नाऽदृष्टार्थत्वम्, व्रीह्यादेस्तु अवघातादीन्प्रति प्राधान्यादेव न तदर्थत्वम्? इति विचार्यते।

(सङ्गतिः)

सति च दृष्टार्थत्वे धात्वर्थभावनाभेदसत्त्वेऽप्यपूर्वभेदाभावात् अपूर्वभेदोपयोगिचिन्तनात्मकत्वेन पादाध्यायसङ्गत्यविघातः।

(पूर्वपक्षः)

तत्र 'अवहन्ती'(१)त्यवघातभावनाया अन्योत्पादकस्वभावत्वेन जन्यभाव्यापेक्षायां सत्यपि व्रीह्यादीनां द्वितीयया कर्मत्वावगमे तेषामवघाताद्यजन्यत्वेन भाव्यत्वायोगान्न तावदवघातो व्रीह्यर्थः। न च स्वरूपेण व्रीहीणामजन्यत्वेऽपि वैतुष्यविशिष्टत्वेन भाव्यत्वोपपत्तिः, वितुषीभावजनकत्वेनाऽवघातस्य लोकत एव प्राप्तत्वेन तदंशे विधि(२)वैयर्थ्यात्।

न च लोकतो विदलनादेरपि प्राप्तत्वेन तन्निवृत्तिफलकस्य नियमस्यैवाऽयं विधिरस्त्विति वाच्यम्। तर्हि नियमेन वितुषीभावस्याऽप्यजननात्तद्वैशिष्ट्यरूपेणाऽपि व्रीहीणां नियमं प्रति भाव्य-

---

१ त्यत्र भावनाया इति ख. पु.   २. वैफल्यादिति ख. पु.

तानुपपत्तेः। (१)न च नियमं प्रति वितुषीभावाविशिष्टत्वेन भाव्यतानुपपत्तावप्यदृष्टविशिष्टत्वेन भाव्यत्वोपपत्तिः, अशाब्दनियमादृष्टकल्पनापेक्षया शाब्दावघातादेव तत्कल्पनस्योचितत्वात्।

न चाऽस्तु तर्ह्यवघातादेव व्रीहिनिष्ठादृष्टकल्पनमिति न व्रीहीणामवघातार्थत्वसिद्धिः, अदृष्टे आत्मनिष्ठत्वेन प्रयाजादिजन्यादृष्टवदनपेक्षिताश्रये व्रीह्याश्रयत्वकल्पनापेक्षया अवघात एव द्रव्यापेक्षे व्रीहिरूपद्रव्यविधिप्रतीतेः। अत एवाऽपेक्षितविधिलाभाय प्रयाजशेषाभिधारण इव लक्षणया द्वितीयाविभक्तिः करणत्वपरा अनीप्सितकर्मत्वपरा वा नीयमाना न दुष्यति।

न च तवाऽपि व्रीहिविधेस्तन्नियमविधेर्वा अवघातविधिवदेवाऽनुपपत्तिस्तुल्येति वाच्यम्। अवघातजन्यादृष्टं प्रत्येव व्रीहिनियमविधेरुपयोगोपपत्तेः। त्वया त्ववघातस्य व्रीहिसाध्यापूर्वं प्रत्युपयोगाङ्गीकारे व्रीहिसाध्यस्य यागजन्यापूर्वस्य यागभावनायामेव भाव्यत्वेनाऽन्वयान्नाऽवघातभावनायां भाव्यत्वेन तदन्वय इत्यवघात(२)जन्येप्सितरूपभाव्याभावप्रसङ्गः। तस्माद्व्रीहिविशिष्टोऽवघात एव प्रयाजादिवददृष्टार्थं विधीयत इति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—यत्र दृष्टप्रयोजनं न सम्भवति तत्र युक्ता अदृष्टस्याऽपि कल्पना आत्मनिष्ठस्याऽपि। यत्र तु दृष्टप्रयोजनसम्भवः यथा प्रकृते, न तत्राऽऽत्मनिष्ठादृष्ट(३)कल्पना। अत एवोभयत्र क्रियां प्रति द्रव्यस्य यथायथं गुणत्वं प्राधान्यं च, क्रियायाश्च द्रव्यं प्रति प्राधान्यं गुणत्वं च। अतो धात्वर्थरूपक्रियाप्रतिपादकान्याख्यातान्तानि पदानि यथासम्भवं गुण-

१. न हीति. ग. पु. २. विधौ जन्येति. क. ख. पु.
३. कल्पनमिति. ख. पु.

प्रधानभावेन द्विविधानि विज्ञेयानीति सूत्रार्थः ॥ ७ ॥

यैस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् ॥ २-१-८ ॥

नन्वेवमपि क्व दृष्टप्रयोजनासम्भवेन प्रधानकर्मता, क्व वा तत्सम्भवेन गुणकर्मत्वमित्याशङ्क्य पूर्वपक्ष्युक्तप्रयाजदृष्टान्तवैषम्यप्रदर्शनार्थं चाऽनेन सूत्रेण प्रधानकर्म(१)लक्षणमुच्यते । येषां हि यागीयद्रव्यदेवतादिसंस्कारार्थत्वं तदङ्गताबोधकप्रमाणाभावेन नेष्यते, तानि कर्माणि स्वतन्त्रात्मनिष्ठादृष्टजनकानि सन्ति द्रव्यादि प्रति प्रधानभूतानि । द्रव्यादीनि च तत्र 'सिद्धसाध्यसमभिव्याहारे(२) सिद्धं साध्यायोपयुज्यत' इति न्यायेन तृतीयाश्रुत्यैव वा क्रियां प्रति च गुणभूतम् ॥ ८ ॥

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् ॥ २-१-९ ॥

येषां तु यागीयद्रव्यादिसंस्कारार्थत्वं प्रमाणवशेन निर्ज्ञातं तेषां दृष्टप्रयोजनासम्भवे 'व्रीहीन् प्रोक्षती'त्यादावदृष्टद्वाराऽपि यदा द्रव्यसंस्कारार्थत्वं प्रोक्षणादेरभ्युपगम्य द्रव्यं प्रति गुणकर्मत्वमुत्तराधिकरणे उपपादयिष्यते, तदा को नाम 'व्रीहीनवहन्ती'त्यादौ पुरोडाशनिष्पत्त्यौपयिकवितुषीभावरूपद्रव्यप्रयोजनलाभसम्भवे अदृष्टकल्पनया प्रधानकर्मत्वमापादयितुं समर्थः ? अत एव तत्र भावनाभाव्यमपि वितुषीभावविशिष्टत्वेन व्रीहय एव ।

---

१. कर्मणो लक्षणमिति. ग. पु.

२. सिद्धं साध्यार्थमिति न्यायेति. क. ख. पु.

चतुर्विधं हि सर्वत्र भाव्यमिष्यते--किञ्चित्स्वत एवोत्पाद्यत्वेन, यथा-संयवनेन पिण्डः। किञ्चिदाप्तिविषयत्वेन, यथा-दोहनेन पयः। किञ्चिद्विकाराविशिष्टत्वेन, यथा-अवघातेन व्रीहयः। तत्र वितुषीभावाख्यो विकारो जन्यते। किञ्चिच्च संस्कारविशिष्टत्वेन। यथाऽत एव प्रोक्षणेनाऽदृष्टरूपसंस्कारजननात्। अतश्च व्रीहीणां स्वरूपेण भाव्यत्वायोगेऽपि युक्ता वितुषीभावविशिष्टत्वेन भाव्यता।

न च वितुषीभावसाधनत्वस्य लोकत एव प्राप्तत्वाद्विधिवैयर्थ्यम्। लोकस्याऽव्यभिचरितान्वयव्यतिरेकग्रहसापेक्षत्वेन विलम्बितत्वात्ततः पूर्वमेव विधिवाक्येन तद्विधानात्। तत्प्रयोजनं च विदलनादिव्यावृत्तिफलको नियमः। तस्याऽपि च प्रयोजनं दृष्टाभावाददृष्टम्। तस्य चाऽदृष्टस्य(१) वितुषीभावप्रयुक्तावघातोपजीविनियमजन्यत्वान्न कृष्णलचरौ वैतुष्यासम्भवे नियमावघातप्रयोजकत्वम्। यदि त्वशाब्दस्य नियमस्याऽदृष्टजनकत्वानुपपत्तिराशङ्क्येत, ततो विधेयादवघातादेवाऽदृष्टं कल्प्यते। तच्च वितुषीभावस्य मुख्यफलत्वेऽप्यानुषङ्गिकत्वेन कल्प्यते, न त्वनुष्ठापकत्वरूपमुख्योद्देश्यतया, गौरवापत्तेः। अत एव कृष्णलचरौ वैतुष्याभावेनाऽदृष्टानुरोधेनाऽवघातानुष्ठानम्। उद्देश्यतावैजात्याच्च नोद्देश्यानेकत्वनिमित्तको वाक्यभेदोऽपि। आर्थिकविध्यन्तरफलत्वाद्वा न सः। अदृष्टस्याऽननुष्ठापकताऽपि चैतादृशी—यद्वैतुष्याभावे तस्याऽननुष्ठानं, न तु वैतुष्यसम्भवेऽपि तत्, विदलनादेरप्यनुष्ठानापत्तेः। अत एव तद्व्यावृत्तिफलकनियमफलकत्वान्नियमादृष्टत्वव्यवहारः।

ननु (२)नवमाधिकरणन्यायेन व्रीहिपदेऽपूर्वसाधनत्वलक्ष-

१. वितूषीभावफलावघातेति ग. पु. २. पू. मी. ९. १. १.

णाया आवश्यकत्वादवघातविधेर्व्रीहिस्वरूपे वितुषीभावस्वरूपे नाऽऽनर्थक्येऽपि तज्जन्यप्रधानापूर्वस्याऽवघातं विनाऽनुत्पत्तेस्तदुत्पत्त्यर्थत्वेनाऽवघात(१)विधिसार्थक्यात्कृतं नियमादृष्टेन। (२)नियमादृष्टकल्पने वा तेनैवाऽऽनर्थक्यपरिहारोपपत्तेः कृतमपूर्वसाधनत्वलक्षणयेति चेत्--न; अवघातं विना विदलनादिना वितुषीभावसत्त्वेनाऽपूर्वानुत्पत्तौ प्रमाणाभावात्। न चाऽवघाताभावे तज्जन्यवितुषीभावाभावात्सामग्र्यभावः, अवघातविदलनजन्यवितुषीभावव्यक्त्योर्वैजात्ये प्रमाणाभावेनाऽवघाताभावेऽपि तज्जन्यावितुषीभावसत्वात्सामग्र्यभावासिद्धेः।

न च कार्यकारणभावे व्यभिचारपरिहारार्थमेव वैजात्यकल्पना, अनेककार्यकारणभावादिकल्पनागौरवभिया द्वयोरेकशक्तिमत्त्वेन कारणताङ्गीकारात्। यत्र तु व्रीहियवादिवाक्ये कारणताद्वयं (३)प्रमाणसिद्धं तत्रैव परमाग्नेयादौ वैजात्यकल्पनमिति (४)तेषामर्थाधिकरणे वक्ष्यते, न त्वत्र। अतश्चाऽपूर्वसाधनत्वलक्षणायामप्यवघातविधिवैयर्थ्यस्य तदवस्थत्वादवश्यमवघातेन वैतुष्यवददृष्टमपि व्रीहिनिष्ठमाधेयम्। अन्यथा अवघातस्याऽपूर्वसाधनत्वानुपपत्तेः।

न चैवमपूर्वसाधनत्वलक्षणावैयर्थ्यम्, नियमादृष्टस्याऽपि व्रीहिस्वरूपे अनुपयोगित्वेन प्रधानापूर्वार्थत्वावश्यंभावात्। अतस्सिद्धा अवघातस्य नियमादृष्टजनकत्वेऽपि दृष्टवितुषीभावद्वारा व्रीह्यर्थता, योग्यतारूपालिङ्गात्, द्वितीयाश्रुतेर्नियमविधिलाघवाच्च। एवं च द्वितीयविधिप्रकाराङ्गीकरणाल्लाघवम्। इतरथा विशिष्टविध्याश्रयणात्पञ्चमप्रकाराङ्गीकरणे गौरवं स्यात्। तस्मान्नाऽव-

१. विधेस्सार्थक्येति. क. ख. पु. २. अवश्यं वा नियमेति. क. पु.
३. प्रमाणसिद्धमिति नाऽस्ति. क. पु. ४. पू. मी. ३. १. ४.

घातप्रयोजनीभूतादृष्टकल्पनम् । अतश्चैतादृशस्थले धात्वर्थभावनाभेदसत्त्वेऽपि न प्रयोजनीभूतापूर्वभेदः ।

प्रयोजनं पूर्वपक्षे(१) 'मैदयङ्गवश्चरुर्भवती'त्येतद्वाक्यविहिते यागे यागीयहविःप्रकृतिभूतव्रीह्यभावेऽप्यतिदेशप्राप्तावघाताङ्गत्वेन व्रीहयस्सम्पाद्या एव । यथा—अतिदेशप्राप्तप्रयाजाद्यङ्गत्वेनाऽऽज्यम् । न च प्रकृतौ निर्वापोत्तरकालमवघातानुष्ठानादवघातस्य परप्रयुक्तव्रीह्युपजीवित्वावगतेः मैदयङ्गवचरौ तदभावे अवघातस्याऽननुष्ठानमेव स्यान्न तदनुरोधेन व्रीहिसम्पादनमिति वाच्यम् । अवघातस्य वाजिनादिन्यायाविषयत्वेन परप्रयुक्तव्रीह्युपजीवित्वासिद्धेः ।

तथा हि—न तावत्(२)वाजिनन्यायविषयत्वम्, दध्यानयनस्य ह्यामिक्षार्थत्वं वाक्यीयं, न वाजिनार्थत्वम् । अत आमिक्षाप्रयुक्तदध्यानयनानुनिष्पन्नत्वाद्वाजिनस्य न दध्यानयनप्रयोजकतेति हि तन्न्यायः । न चाऽऽसौ प्रकृते समस्ति, व्रीहीणां यागाङ्गत्वस्येवाऽवघाताङ्गत्वस्याऽपि वाक्यीयत्वाविशेषात्, वाजिनवदवघातस्याऽनुनिष्पन्नत्वाभावाच्च ।

नाऽपि (३)पदकर्मन्यायः, तत्र हि 'तेनाऽक्षमुपाञ्ज्यादि'ति तच्छब्दस्य 'सप्तमं पदमध्वर्युरञ्जलिना गृह्णाती'त्यत्र च पदशब्दस्य सापेक्षत्वाद्युक्तं परप्रयुक्तक्रयाङ्गभूतैकहायनीनयनोपजीवित्वम्, प्रकृते तु व्रीहिशब्दस्य प्रकृतानपेक्षत्वान्न यागीयव्रीह्युपजीवितेति विशेषः । 'पुरोडाशकपालेने'तिवच्च प्रयोजकयुक्ताभिधानाभावान्न (४)पुराडोशकपालन्यायः । व्रीहिशब्दस्य सस-

१. तै. सं. २. २. ११. ४. २. पू. मी. ४. १. ९.
३. पू. मी. ४. १. १०. ४. पू. मी. ४. १. ११.

म्बन्धिकत्वाभावात् न(१)उत्तरार्धन्यायोऽपि । (२)निनयनन्यायस्तु प्रतिपत्तित्वाभावादेवाऽनाशङ्क्यः। न च गुणस्य गोदोहनादेः परप्रयुक्ताश्रयोपजीवित्वेनाऽऽश्रया(३)प्रयोजकत्वादवघातस्याऽपि यागप्रयुक्तव्रीह्याश्रयत्वात्तदप्रयोजकत्वमिति वाच्यम् । प्रणयनादेर्हि गुणाङ्गत्वे प्रमाणाभावेन गुणस्य तत्प्रयोजकत्वानुपपत्तेर्युक्ता तस्य परप्रयुक्तोपजीवकता । व्रीहीणां तु यागाङ्गत्वस्येवाऽवघाताङ्गत्वस्याऽपि वाक्यीयत्वाविशेषाद्विनिगमनाविरहेणैकस्येतरप्रयुक्तोपजीवकत्वानुपपत्तेः ।

न च निर्वापेण व्रीहीणां यागीयत्वनिश्चयाद्यागप्रयुक्तत्वावगतेर्विनिगमकसत्त्वेन तदुत्तरभाविनोऽवघातस्य तदुपजीवकत्वोपपत्तिः, एतत्पूर्वपक्षे निर्वापस्याऽप्यारादुपकारकत्वेनाऽवघाततुल्यत्वात्तेन व्रीहीणां यागीयत्वनिश्चयानुपपत्तेः। न च निर्वापार्थमुपात्तानां तदुपादानलाघवेन ग्रहणोपपत्तेरवघातस्याऽन्यानाक्षेपकत्वम्, निर्वापसाधनानां तदवशिष्टानां च सन्निहितत्वाविशेषेणोपादानलाघवस्याप्यनियामकत्वात्, निर्वापे कृते तत्साधनानामपि लौकिकत्वाविशेषाच्च । अत एव क्लृप्तसामान्यसम्बन्धत्वादाग्नेयीन्यायेन निर्वापसाधनानामेव ग्रहणमित्यपास्तम् । निर्वापे कृते तत्साधनीभूतव्यक्तिविशेषस्य लौकिकत्वाविशेषेण सामान्यसम्बन्धाक्लृप्तेः । व्रीहिजातीयस्य तु सामान्यसम्बन्धो निर्वापवाक्य इवाऽवघातवाक्येऽपि तुल्य एव । आग्नेयीवाक्ये हि न(४)मन्त्रविशेषोपादानम्, अपि तु स्तोत्रादिसम्बन्धेनैव तत् । प्रकृते तु यथैव निर्वापवाक्ये व्रीह्युपादानं

---

१. पू. मी. ४. १. १३. २. पू. मी. ४. २. ५.

३. प्रयोजकत्ववदवघातेति क. ख. पु.

४. क्लृप्तसामान्यसंबन्धेन मन्त्रविशेषेति क. ख. पु.

तत्तथैवाऽवघातवाक्येऽपीति नाऽत्राऽऽग्नेयीन्यायप्रवृत्तिः ।

न चैवमपि सिद्धान्तवत्पूर्वपक्षेऽपि प्रकरणेन प्रकृतव्रीहिग्रहणोपपत्तिः, प्रकरणं हीतिकर्तव्यताकाङ्क्षारूपं व्रीहिपदसङ्कोचकत्वेनाऽभ्युपगम्यते ? अधिकारात्मकं वा ? नाऽऽद्यः, तस्य विनियोगातिरिक्ते अप्रवृत्तेः । इतिकर्तव्यताकाङ्क्षया हीतिकर्तव्यतात्वमेवाऽवगम्यते, न तु पदसङ्कोचाद्यपि । न द्वितीयः, तस्य (१)'तुल्येषु नाऽधिकारस्स्यादि'त्यत्र नैराकांक्ष्ये सत्यसङ्कोचकत्वस्य वक्ष्यमाणत्वात् । अत एव यत्रोपादेयेष्वपि 'तेनाऽक्षमुपांज्यादि'त्यत्र सर्वनाम्नस्साकाङ्क्षत्वं तत्रेष्टमेव प्रकृतग्रहणम् । प्रकृते तु व्रीहिपदस्याऽनपेक्षत्वाधिकारेण सङ्कोच इति प्रकृतौ न निर्वापयागावघातानामेकव्रीहि(२)प्रयुक्तत्वं नियतमिति प्रैयङ्गवचरौ यागार्थव्रीहिलोपेऽपि सिद्धं निर्वापावघाताद्यर्थं व्रीहिसम्पादनम् ।

सिद्धान्ते तु व्रीहीणामवघातं प्रति संस्कार्यत्वाद्व्रीहिस्वरूपार्थत्वे चाऽवघातस्याऽऽनर्थक्यापत्तेरपूर्वसाधनत्वापेक्षायां व्रीहिपदस्य तल्लक्षकत्वे अधिकाराख्यप्रकरणस्य तात्पर्यग्राहकत्वाङ्गीकारात्प्रकृतग्रहणोपपत्तिः । प्रकृतौ च यागीयहविःप्रकृतिद्रव्यसंस्कारस्याऽवघातस्य प्रैयङ्गवचरावतिदेशेन प्राप्तस्य स्थानापत्त्या प्रियङ्गुष्वेवाऽनुष्ठानान्न तदर्थं व्रीहिसम्पादनम् । पूर्वपक्षे चाऽदृष्टार्थत्वादवघातस्य(३) सर्वौषधावघातवत्सकृदेव करणम् । सिद्धान्ते त्वातण्डुलीभावात् । अन्यच्च पूर्वपक्षे यागी-

१. जै. सू. ९. १. १९. २. व्यक्तिकत्वं इति. क. पु.

३. अग्निचयने 'औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वा अवहन्ति अथैनदुपदधाती'ति वाक्येन विहितो योऽवघातः स सर्वौषधावघातः ।

यद्धविःप्रकृतिद्रव्यस्याऽवघातं विनाऽपि तण्डुलीभावः। प्रकृतौ च प्रयाजादिवदवघातस्य सान्नाय्योपांशुयाजाङ्गत्वाविशेषात्तद्विकारेष्वप्यतिदेशः। यवपक्षेऽपि व्रीहीणामेवाऽवघातः। त्रयाणामेव च तेषां(१)कपिञ्जलाधिकरणन्यायेन स इति प्रयोजनम्। सिद्धान्ते तु यागीयद्रव्येऽवघातनियमः। प्रकृतौ चौषधद्रव्यकयागाङ्गत्वात्तद्विकारेष्वेवाऽतिदेशः, यवपक्षेऽपि च तेष्वेवाऽवघातान्न तदर्थं व्रीहिसम्पादनम्, चतुर्मुष्टिपरिमितानामेव च यागसाधनत्वात्तावतामेवाऽवघात इति तत्। सूत्रं निगदव्याख्यातम् ॥८॥

इति चतुर्थं तानिद्वैधाधिकरणम् ॥ ४ ॥

अथ पञ्चमं सम्मार्गाधिकरणम् ॥ ५ ॥

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥२-१-९॥

(विषयसंशयौ)

एवं तावद्दृष्टोपकारकत्वलाभाद्गुणकर्मत्वे प्रसाधिते, अधुना दृष्टोपकारकत्वासम्भवेऽपि तदस्ति न वेति विचार्यते। दर्शपूर्णमासयोश्श्रूयते—"स्रुचस्सम्मार्ष्टि" "परिधिं सम्मार्ष्टि" "पुरोडाशं पर्यग्निकरोति" "व्रीहीन् प्रोक्षती"ति। तत्र सम्मार्गादिकं किं स्रुगादिसंस्कारार्थत्वेन विधीयते, अतश्च गुणकर्म? उत स्रुगादिसाधनकं स्वतन्त्रादृष्टार्थं सत्प्रधानकर्म? इति विचार्यते।

(सङ्गतिः)

अत्र च सिद्धान्ते स्रुगादिनिष्ठाधेयशक्तिरूपातिशयसद्भा-

१. पू. मी. ११. १. ६.

वेऽपि तस्याऽऽत्मानिष्ठादृष्टपदवाच्यत्वाभावादपूर्वाभावेन पूर्ववदेवाऽपूर्वभेदोपयोगिचिन्तनात्मकत्वात्पादाध्यायसङ्गतिः। प्रोक्षणादेस्संस्कारकर्मत्वे प्रतिपुरोडाशमपूर्वकल्पनाद्वा तद्भेदोपयोगित्वेन सा। अनन्तरा तु पूर्वाधिकरणसिद्धान्तहेतुभूतदृष्टोपकारकत्वप्रत्युदाहरणरूपेण पूर्वपक्षोत्थानाद्द्रष्टव्या।

(पूर्वपक्षः)

तत्र पूर्वाधिकरणपूर्वपक्षन्यायेनैव स्रुगादेस्सम्मार्गाद्यजन्यत्वेन भाव्यत्वायोगादवघातवच्च दृष्टोपकारविशिष्टत्वेनाऽपि तदसम्भवात्, स्रुगादिविशिष्टसम्मार्गादिविधानमेव प्रयाजादिवत् स्वतन्त्रक्रतूपकारभाव्यकं युक्तमाश्रयितुम्। न चाऽवघातवद्योग्यतारूपलिङ्गात्सम्मार्गादेर्गुणकर्मत्वासम्भवेऽपि द्वितीयया स्रुगादीनां प्राधान्यावगमादर्थात्सम्मार्गादीनां तद्गुणत्वावगतेर्दृष्टोपकाराभावे च तद्बलेनैवाऽदृष्टस्य द्रव्यनिष्ठस्य कल्पनोपपत्तेर्न स्रुगादिविशिष्टसम्मार्गादिविधानमिति वाच्यम्। द्वितीयायाः प्राधान्यवाचित्वाभावेन गुणकर्मत्वासिद्धेः।

तथा हि—प्राधान्यवाचित्वं किं प्रयोगानुसारादभ्युपगम्यते? अनुशासनानुरोधाद्वा? न तावदाद्यः, "बल्बजान् शिखण्डकान् कुरु" "सक्तून् जुहोति" त्यादौ करणत्व एव द्वितीयादर्शनेन तदसिद्धेः। न ह्यत्र बल्बजादीनां कर्मत्वं सम्भवति, करोतेर्द्विकर्मकत्वाभावेन शिखण्डककर्मावरुद्धे तस्मिन् बल्बजानां कर्मत्वेनाऽन्वयस्य वक्तुमशक्यत्वात्। जुहोतेश्च देवतोद्देश्यकप्रक्षेपद्रव्यत्यागसमुदायवाचित्वेन सक्तूनां समुदायकर्मत्वानुपपत्तेः, सक्तुनामनीप्सिततत्वेनैकदेशकर्मत्वस्याऽप्यनुपपत्तेश्च। अतोऽत्र बल्बजादीनां द्वितीयया करणत्वमेवाऽङ्गीकर्तव्यम्। ततश्चाऽन्वयव्यभिचाराद्द्वितीयायाः करणत्व एव शक्तिर्न प्राधान्ये। तथा

'प्रयाजशेषेणे'त्यादौ द्वितीयाभावेऽपि प्राधान्यदर्शनेन व्यतिरेकव्यभिचारादपि तथात्वनिश्चयः ।

न चैवं घटं करोतीत्यादौ करणत्वासम्भवेऽपि द्वितीयादर्शनात्तत्राऽपि व्यभिचारतादवस्थ्यमिति वाच्यम् । विषयतासम्बन्धेन घटादेर्ज्ञानं प्रति करणत्ववत्कृतिं प्रत्यपि तदुपपत्तेः । अतोऽव्यभिचारात्करणत्वमेव द्वितीयार्थः, न तु प्राधान्यमिति प्रयोगानुसारेण निर्णीयते । अत एव प्रयोगविरुद्धमनुशासनमपि(१) 'कर्मणि द्वितीये' त्यादिकं न प्राधान्यवाचित्वे प्रमाणम् । अतो न सम्मार्गादीनां द्वितीयया गुणकर्मत्वप्रतीतिः । नाऽपि सप्रयोजनत्वमात्रेण; पुरोडाशकपालादीनां सप्रयोजनत्वेऽपि तुषोपवापसंस्कार्यत्वाभावात् । अतो गुणकर्मत्वावेदकप्रमाणाभावात्पूर्वाधिकरणपूर्वपक्षन्यायेन स्रुगादिविशिष्टसम्मार्गविधिरेवाऽयम् ।

सूत्रं तु—धर्ममात्रे दृष्टोपकाराजनकसम्मार्गादिरूपे, प्रयाजादिवत् प्रधानकर्मत्वं स्यात्, द्रव्यनिष्ठोपकारस्य तेन अनिर्वृत्तेः इति व्याख्येयम् ॥ ९ ॥

(सिद्धान्तः)

तुल्यश्रुतित्वाद्वेतरैस्सधर्म स्यात ॥ २-१-१० ॥

सत्यं (२)दृष्टोपकारकत्वेन नाऽस्याऽवघाततुल्यत्वम्, तथाऽपि द्वितीयाश्रुतितुल्यत्वादवघातादिवद्गुणकर्मत्वं सम्भवत्येव । तथा हि—द्वितीया प्राधान्याभिधायिनी व्रीहीणामिव स्रुगादीनामपि प्राधान्यं प्रतिपादयन्ती अर्थादवघातस्येव सम्मा-

१. पा. सू. २. ३. २.

२. दृष्टोपकारकत्वे प्रयाजवन्नाऽस्येति. क. ख. पु.

र्गादीनामपि गुणत्वं गमयति । अतश्च दृष्टोपकारकत्वाभावेऽपि द्वितीयावगतगुणकर्मत्वनिर्वाहार्थं द्रव्यनिष्ठादृष्टोपकारकल्पनेऽपि न क्षतिः ॥ १० ॥

द्रव्योपदेश इति चेत् ॥ २-१-११ ॥

यत्तु द्वितीयायाः प्राधान्यवाचित्वे प्रमाणाभावात्प्रयोगानुसारेण (१)करणत्वावगतेः सक्तुवत्स्रुगादिद्रव्यस्यैव सम्मार्गादि प्रत्युपदेशो विधानमित्युक्तम्, तत्रोच्यते—

न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥२-१-१२॥

न करणत्ववाचिनी द्वितीया, प्रमाणाभावात् । अपि तु 'कर्मणि द्वितीये' त्यनुशासनात्कर्मत्वपरैव । न च तस्य निर्मूलत्वम्, घटं करोतीत्यादिप्रयोगस्यैव मूलत्वात् । न ह्यत्र सत्यपि घटस्य विषयतासम्बन्धेन कृतिकरणत्वे तदवभासते, अपि तु कर्मत्वमेवेति सर्वस्वसंवेद्यम् । अतश्च प्रयोगानुगृहीतस्मृत्या कर्मत्वमेव द्वितीयार्थः । न चैवं(२) 'कर्तुरीप्सिततमं कर्म'(३) 'तथायुक्तं चाऽनीप्सित' मित्यादिस्मृत्या कर्मत्वस्याऽनेकविधत्वावगतेरेकत्रैव शक्तिरपरत्र लक्षणेत्यस्य च विनिगमनाविरहेणाऽसम्भवात्सर्वेषामेव वाच्यत्वापत्तौ शक्यतावच्छेदकैक्याभावेनाऽनेकशक्तिकल्पनापत्तेर्गौरवमिति वाच्यम् । लाघवेनेप्सितानीप्सितसाधारण्येन व्याप्यत्वापरपर्यायस्य क्रियाजन्यचतुर्विधफलान्यतमफलाश्रयत्वरूपस्य कर्मत्वस्य, तत्समानियताखण्डोपाधेर्वा द्वितीयावाच्यत्वावधारणात् । ईप्सितत्वानीप्सितत्वयोस्तु प्रमाणान्तरलभ्यत्वेन तत्राऽपि शक्त्यङ्गीकारे गौरवात् ।

---

१. करणत्ववाचित्वेति. क. पु. २. पा. सू. १. ४. ४९.
३. पा. सू. १. ४. ५०

न चैवं व्याप्यं कर्मेत्येव स्मरणापत्तौ सूत्रद्वयवैयर्थ्यापत्तिः,(१) 'वारणार्थानामीप्सित' इति सूत्रात् 'अग्नेर्माणवकं वारयती'त्यत्रोभयोरग्निमाणवकयोर्व्याप्यत्वे ईप्सितत्वे चाऽविशिष्टे तन्निमित्तककर्मसंज्ञाबाधेनाऽपादानसंज्ञापत्तेर्माणवके तां वारयितुमीप्सिततमे तस्मिन् कर्मसंज्ञाविधायकस्याऽऽद्यसूत्रस्याऽऽवश्यकत्वे सति, द्वेष्योदासीनसङ्ग्रहार्थं तथायुक्तसूत्रस्याऽप्यावश्यकत्वात्। एतेन सूत्रद्वयवैयर्थ्यापत्तेः प्रथमोपस्थितत्वादीप्सितकर्मत्व एव शक्तिः, तथायुक्तसूत्रं तु अकथितादिसूत्रवल्लाक्षणिकानुशासनमिति न्यायसुधाकारोक्तमपास्तम्, शक्यतावच्छेदकलाघवसङ्ग्रहकलाघवाभ्यामीप्सितानीप्सितसाधारण्येन व्याप्यत्व एव शक्तिकल्पनेनेप्सितत्वेऽपि तदकल्पनात् । अकथितादिसाधारण्येन तु शक्यतावच्छेदकाभावादगत्या अकथितादिसूत्रस्य लाक्षणिकानुशासनत्वमिति विवेकः ।

न चैवं स्रुगादीनामीप्सितत्वानवगमे कथं प्राधान्यसिद्धिः? द्वितीयया तदनवगमेऽपि विध्यपेक्षितत्वात्तदवगमोपपत्तेः । विधिर्हि चेतनप्रवर्तनात्मा अनीप्सितफले व्यापारे तं प्रवर्तयितुमशक्नुवन् भावनाया ईप्सितजन्यत्वमवगमयति । अतश्चेप्सितजन्यापेक्षायां द्वितीयया जन्यत्वेनाऽवगतानां स्रुगादीनां 'जुह्वा जुहोती'ति शास्त्रान्तरप्रमितेप्सितभावानां भावनाभाव्यत्वेन स्वीकारो नाऽनुपपन्नः । अत एव यत्र 'सक्तून् जुहोती'त्यादौ न शास्त्रान्तरेण विनियोगः सक्तूनाम्, तत्र द्वितीयया व्याप्यत्वमात्रावगमेऽपीप्सितत्वस्य बाधान्न भावनाभाव्यत्वसम्भवः ।

ननु तत्राऽपि द्वितीयावगतव्याप्यत्वनिर्वाहार्थं विध्यपेक्षया

---

१. पा. सू. १. ४. २७.

च सक्तूनां भूते भाविनि वा ज्योतिष्टोमे उपयोगः कल्प्यः। न च निर्व्यापारत्वात्सक्तूनां प्रकरणग्रहणायोगेन कथमुपयोगकल्पनम्? व्यापारान्तरासम्भवेऽपि संस्कारकत्वेनोपस्थितस्य होमस्यैवाऽर्थाद्व्यापारत्वोपपत्तेः। न हि 'अग्नीषोमीयं पशुपुरोडाशमि'त्यत्र ताद्धितश्रुत्या गुणभूताया अपि देवताया अर्थात्संस्कार्यत्वाङ्गीकारवदिहाऽपि तथाङ्गीकारे कश्चिद्विरोधः। अतस्सक्तुष्वपि श्रुतव्याप्यतादिनिर्वाहार्थमुत्तरकालं विनियोगकल्पनेऽपि बाधकाभावात्कथं प्राधान्यासम्भव इति चेत् —न; इप्सितकर्मत्वशक्तिवादिनो ह्ययं दोषस्स्यात्। तन्मते हीप्सितत्वस्याऽपि द्वितीययाऽभिधानात्तन्निर्वाहार्थं विनियोगोऽपि कल्प्यते। इष्यत एव हि श्रुतस्वर्गादिसाध्यतानिर्वाहार्थं स्वर्गसत्ता। साध्यत्वमात्रार्थकत्ववादिनस्तु यथैव द्वितीयया सक्तूनां तदभिहितं, तथैव धातुसामर्थ्याद्धोमस्याऽपि साध्यत्वमवगतमेवेति न तद्बलेनेप्सितत्वकल्पनायां(१) प्रमाणमस्ति, प्रत्युत होमस्यैव विधिप्रत्यासन्नत्वात् व्यापारान्तरानपेक्षत्वाच्चाऽऽरादुपकारकत्वविधया ईप्सितत्वकल्पनमुचितम्। एवञ्च सक्तूनां भूतभाव्यसमुच्चारणन्यायेन होमार्थत्वावधारणाद्द्वितीयाऽपि विषयतासम्बन्धिकरणत्वलक्षणार्थैव द्रष्टव्या।

अत एव संस्कारविधेः प्राक् संस्कार्यस्य विनियोगानवगमेऽपि यत्र लौकिकप्रमाणेनैव क्रियाजनकत्वमात्रमवगन्तुं शक्यं, यथा "अध्वर्युं वृणीते" "स्वाध्यायोऽध्येतव्यः" "अष्टवर्षं ब्राह्मणमुपनयीते" त्यादौ, तत्र ह्यसत्यपि वरणादिविधितः प्रागध्वर्य्वादीनां विनियोगे सामर्थ्यमात्रेणैव तेषां तत्तत्क्रियाजनकत्वावगमाद्युक्तं तत्तत्संस्कारविधौ तत्तत्क्रियासाधकत्वेन रूपेणो-

१. विनिगमकमिति. क. ख. पु.

द्देश्यतामध्वर्य्वादीनामङ्गीकृत्य तत्तत्क्रियासु विनियोगकल्पनम्, सक्तूनां तूत्पत्तिशिष्टसोमाद्यवरुद्धे ज्योतिष्टोमे साधनत्वस्याऽसम्भवाददृष्टविधयोपकारकत्वस्य च लौकिकप्रमाणागम्यत्वान्न शक्यं संस्कारविध्यन्यथानुपपत्त्या विनियोगकल्पनम्। अतश्च द्वितीया सक्तुगत(१)करणत्वार्थैव ।

ननु सक्तूनां विनियोगकल्पनायोगेऽपि न द्वितीया करणत्वलक्षणार्था, अननुशिष्टलक्षणायां गौरवात् । किं त्वनीप्सितकर्मत्वार्थिका, अतश्च सक्तूनां कर्मत्वेनैवाऽन्वयः । स च यद्यपि धात्वर्थे प्रथमत एवाऽसंभवी, तथा सति(२)पश्वैकत्वाधिकरणपूर्वपक्षन्यायेन सक्तूनामविवक्षापत्तेः, तथाऽपि भावनायामेव सोमादिवत्परम्परासम्बन्धेन कर्मत्वेऽवगते पाश्चात्य इत्यवगन्तव्यम्। न चैवमुद्देश्यानेकत्वं शङ्क्यम्, सक्तूनां कर्मत्वेऽप्युद्देश्यत्वानङ्गीकारात् । अतस्सक्तूनामनीप्सितकर्मत्वेनैवाऽन्वयोपपत्तेर्न करणत्वलक्षणेति चेत्—न; भावनावाचिप्रत्ययस्य नित्यं सकर्मकत्वेऽप्येककर्मकत्वेन कर्मान्तरस्याऽन्वयानुपपत्तेः। अन्यथा तत्समानार्थकस्य करोतेरपि द्विकर्मकतापत्तिः ।

अथ करोतेरेककर्मकत्वेऽपि भावनावाचिप्रत्ययस्य द्विकर्मकत्वमुपेत, ततो 'व्रीहीनवहन्ती'त्यादौ कर्मान्तराभावात्प्रत्ययानुपपत्तिः । अत एव यत्र लोके तृणं स्पृशतीत्यादौ विध्यभावेनेप्सितकर्मानादरस्तत्रैव तृणादीनामनीप्सितत्वेनाऽन्वयः। तद्विषयमेव च तथायुक्तसूत्रं विधिसत्त्वेऽपि पार्ष्ठिकधात्वर्थान्वयविषयम् । भावनान्वयस्तु विधिसत्त्वे करणत्वेनैव । आवश्यकी च धात्वर्थान्वयेऽपि करणत्वलक्षणा बल्बजान् शिखण्डकान् कुर्वित्यादौ, करोतेरेककर्मकत्वेन कर्मान्तरान्वयानुपपत्तेः। अतश्च सर्वत्र

१. करणत्वलक्षणार्थैवेति. क. पु. २. पू. मी. ४. १. ५.

विधिसत्त्वे भावनान्वयो द्वितीयस्य कर्मणः करणत्वेनैव । अत एव(१)'मैत्रावरुणाय दण्डं प्रयच्छती' त्यादौ मैत्रावरुणस्यैवोद्देश्यत्वेन भावनान्वयाद्दण्डस्य करणत्वेनैव तदन्वयो न त्वनीप्सितकर्मत्वेनेति ध्येयम् ।

यत्तु तन्त्ररत्ने तन्त्रसारन्यायसुधयोश्च 'यच्छतेस्सकर्मकत्वात् युक्तो दण्डस्याऽनीप्सितकर्मत्वेनाऽन्वयः, जुहोतेस्त्वकर्मकत्वात् सक्तूनां द्वितीयया करणत्वलक्षणे'त्युक्तम्, तन्न,(२) 'हुतोऽहुतः पर्यावर्तत' इत्यादौ कर्मणि निष्ठादर्शनेन जुहोतेरकर्मकत्वासिद्धेः, होः कर्मणि तृतीया चकाराद्द्वितीया च स्यादित्यर्थकेन(३) 'तृतीया च होश्छन्दसी'ति सूत्रकारव्यवहारेण सकर्मत्वावगतेश्च । तस्मादुक्त एव प्रकारः श्रेयान् ।

अत एव गुणफलाधिकारे इन्द्रियकामाद्यवरुद्धायां भावनायां न होमस्याऽनीप्सितकर्मत्वरूपाश्रयत्वेन वाक्ययोरन्वयोऽङ्गीकृतः । अन्यथा तत्राऽपि तथात्वसम्भवे विशिष्टभावनाविधानेन वाक्यभेदाभावाज्जितं प्राभाकरेण । तस्मादुक्तप्रकारेणैव सक्तुषु करणत्वलक्षणामङ्गीकृत्य सक्तुविशिष्टहोमविधानमारादुपकारकतयेति सिद्धम् । स्रुगादीनां तु प्रयोजनवत्त्वस्य प्रमाणान्तरेणाऽवगतत्त्वात्तेषामेव भाव्यत्वोपपत्तेर्युक्तं तत्संस्कारार्थत्वं सम्मार्गादीनामिति ।

न चैवं सर्वत्र सप्रयोजनत्वनिष्प्रयोजनत्वकृतमेव द्रव्यस्य

---

१. तै. सं. ६. १. ४.

२. 'यत्सर्वहुतं जुहोति सा त्वेका परिचक्षा।हुतोऽहुतः पर्यावर्तते सा द्वितीया, तस्मादाज्यस्यैव द्यावापृथिव्यौ यजेते'ति समग्रं वाक्यम् । इदं च आग्रयणे द्यावापृथिव्यमेककपालंविधिसन्निधौ श्रुतम्॥

३. पा. सू. २. ३. ३.

क्रियां प्रति गुणप्रधानत्वमिति कृतं द्वितीयातृतीयाभ्यामिति वाच्यम् । (१)'ऐन्द्र्या गार्हपत्यमुपतिष्ठत' इत्यत्र हि सत्यपि इन्द्रगार्हपत्ययोः क्रतुसम्बन्धित्वेन प्रयोजनवत्त्वे, द्वितीयैव गार्हपत्यप्राधान्ये प्रमाणम् । न च तत्राऽपि द्वितीयाया नियामकमात्रत्वेऽपि कथं प्रमाणत्वमिति वाच्यम् । द्वितीयाभावे मन्त्रस्य लिङ्गादिन्द्रार्थत्वस्यैवाऽवगमात्तस्याऽनियामकत्वाभावात् । गार्हपत्यप्रातिपदिकमात्रसमभिव्याहारस्य च लिङ्गविरोधे सामीप्यनिरूपकत्वेनाऽप्युपपत्तेः । अतो लिङ्गबाधेन गार्हपत्यप्राधान्यं द्वितीयाप्रमाणकमेव । तथा सूक्तवाकप्रस्तरप्रहरणयोरुभयोरपि निष्प्रयोजनत्वाविशेषे केवलतृतीयाकृतमेव सूक्तवाकस्य प्रस्तरप्रहरणाङ्गत्वम् । अतश्च सत्येव द्वितीयाश्रुतिप्रामाण्ये निष्प्रयोजनत्वं सक्तुष्वपवादः । सत्यपि च तृतीयाप्रामाण्ये दृष्टार्थत्वादि प्रयाजशेषाभिघारणस्थलेऽपवादः । अतस्सिद्धमदृष्टार्थत्वेऽपि सम्मार्गादीनां गुणकर्मत्वम् ।

सूत्रं तु—न द्वितीया गुणत्वपरा, अपि तु प्राधान्यपरा, तदर्थत्वेन स्मृत्याऽनुशिष्टत्वात् । लोकवत् लोकसिद्धघटादिपदवदनुशिष्टार्थप्रतिपादकत्वस्योपपत्तेः । न चैवं सक्तुष्वपि तदापत्तिः, तेषां निष्प्रयोजनकत्वात् । प्रकृते तु तेषां स्रुगादीनां क्रतौ शेषभावावगमात्प्रयोजनवत्त्वसिद्धेर्युक्तं गुणकर्मत्वमिति व्याख्येयम् ।

प्रयोजनं स्रुगुदाहरणे पूर्वपक्षे सम्मार्गसाधनीभूतस्रुचां प्रकृतौ विवक्षितसङ्ख्यात्वात्कपिञ्जलाधिकरणन्यायेन त्रित्वस्यैव शास्त्रीयत्वात्पशवादौ स्रुग्विवृद्धावपि तिस्र एव सम्मार्ष्टव्याः । सिद्धान्ते तु संस्कार्यत्वात्सर्वा एव सम्मार्ष्टव्याः । परिध्युदाहरणेऽप्येकस्यैव परिधेः पूर्वपक्षे सम्मार्गः । तैत्तिरीयशाखास्थबहुवच-

१. तै. सं. ५. ५. ७.

नान्तवाक्योदाहरणे तु त्रयाणाम् । सिद्धान्ते तु यावत्परिधि । अग्नेरपि पूर्वपक्षे एकस्यैवाऽऽहवनीयस्य । सिद्धान्ते त्वाहवनीयवृद्धौ सर्वेषाम् ।

यत्तु वार्तिके पूर्वपक्षे 'अग्निमुपनिधाय स्तुवत'इतिवल्लौकिकस्याऽग्नेस्सम्मार्गः, सिद्धान्ते त्वाहवनीयादीनां सर्वेषामिति प्रयोजनमुक्तम्, तत् 'अग्निं सम्मार्ष्टी'त्यस्य कल्पसूत्रकारवचनमूलभूतश्रुत्या आहवनीयमात्रविषयिण्या अनुपसंहाराभिप्रायेण । यदा तु तेनाऽऽहवनीयमात्रविषयेण सामान्यवाक्यस्योपसंहारः, तदा सिद्धान्तवत्पूर्वपक्षेऽप्याहवनीयस्यैव सम्मार्गात्सिद्धान्तेऽपि च गार्हपत्यादीनामसम्मार्गात्पूर्वोक्तमेव प्रयोजनं द्रष्टव्यम् । एवं पुरोडाशोदाहरणेऽपि पूर्वपक्षे एकस्यैव । सिद्धान्ते तु सर्वेषां पर्यग्निकरणमिति द्रष्टव्यम् । तथा (१)शाक्त्यानामयने 'तरसमयास्सवनीयाः पुरोडाशा भवन्ती'त्यत्र पूर्वपक्षे पर्यग्निकरणत्वेन पिष्टमयपुरोडाशस्सम्पादनीयः । न च तत्राऽपि पुरोडाशोद्देशेन मांसविधानात्सवनीयपुरोडाशवत्पर्यग्निकरणपुरोडाशेऽपि मांसप्राप्त्युपपत्तेर्न पिष्टमयोत्पादनम्, (२)तृतीये पुरोडाशपदस्य जघन्यस्य (३)धानादिपञ्चके लिङ्गसमवायेन वृत्ति-

१. शक्तिनामकस्य ऋषेर्गोत्रोत्पन्ना ऋषयश्शाक्त्याः, तैरनुष्ठितत्वात् शाक्त्यानामयनमिति कर्मनाम । तच्च षट्त्रिंशत्संवत्सरसाध्यं सत्रम् । तत्र श्रूयते 'संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति, स तत्र यान् मृगान् हन्ति तेषां तरसमयाः सवनीयाः पुरोडाशा भवन्ति' इति । अस्याऽर्थः—प्रतिदिनं गृहपतिसंज्ञको यजमानस्तत्तदहस्सम्बन्धिक्रियाकलापसमाप्त्यनन्तरं मृगयार्थं वनं गच्छेत् । तत्र तेन ये मृगा हताः तेषां मांसमानीय तेन सवनीयाः पुरोडाशास्सम्पादनीया इति । केषुचिद्ग्रन्थान्तरेषु शाक्यानामयनमित्यपि पाठ उपलभ्यते ।

२. पू. मी. ३. ८. २३.

३. धानाः करम्भाः परिवापाः पुरोडाशः पयस्या इति पञ्च सव-

मङ्गीकृत्य सवनीयमात्रोद्देशेनैव तरसविधानस्य वक्ष्यमाणत्वेन पर्यग्निकरणपुरोडाशे तदप्राप्तेः ।

न चैवमपि सवनमध्यवर्तित्वेन तस्याऽपि सवनीयपदाभिधेयत्वोपपत्तेर्मांसप्राप्त्युपपत्तिः, सवनमध्यवर्तिनि दक्षिणादानादौ सवनीयपदप्रयोगाभावाद्योगरूढ्या सवनीयपदस्य धानादियागपञ्चकवाचित्वावगतेः । अतश्च पर्यग्निकरणपुरोडाशे मांसप्राप्तेरभावात्पुरोडाशपदस्य च लोके पिष्टापिण्डवाचित्वात्पिष्टपिण्डरूप एव पुरोडाशस्सम्पादनीयः। तत्राऽपि च न व्रीहिमयत्वं यवमयत्वं वा नियतम्, प्रकृतौ व्रीह्यादिवाक्यैर्यागीयपुरोडाशोद्देशेनैव तद्विधानात् । सिद्धान्ते तु क्लृप्तदर्शपूर्णमासप्रकृतिकसवनीययागपञ्चकोद्देशेन मांसविधानात्प्रदेयपुरोडाशादिस्थानापन्नत्वात्तद्धर्मप्राप्तेः पुरोडाशादिचतुष्टयस्थानापन्ने मांसे पर्यग्निकरणं भवत्येव ।

यद्यपि च प्रदेयत्वेन मांसविधानादर्थलोपाच्च नाऽवघातपेषणादिधर्मप्राप्तिर्मांसे सम्भाव्यते, तथाऽपि प्रकृतौ पर्यग्निकरणस्य प्रदेयपुरोडाशधर्मत्वावगतेर्मांसे(१) प्राप्नोत्येव तत् । न चैवं पेषणप्राप्त्यभावे तदर्थाधिवापमन्त्रस्य 'धान्यमसी'त्यस्योहानूहचिन्ता(२) नवमे करिष्यमाणा निर्विषया आपद्येतेति वाच्यम् । तस्याः कृत्वाचिन्तात्वेनोपपत्तेर्वक्ष्यमाणत्वात् ।

यत्तु न्यायसुधाकृता सवनीयपदोपेते वाक्ये अधिवापप्राप्त्यभावेऽपि छान्दोग्यशाखास्थे(३) 'एतेन वै गौरीवितिश्शाक्त्यस्तरसमयपुरोडाशो यव्यावत्यां सर्वामृद्धिमार्ध्नोदि'ति वचने सवनीय-

---

नीयहवींषि । तत्र धानाः भ्रष्टयवाः । करम्भाः दधिमिश्रितास्सक्तवः। परिवापा लाजाः । पयस्या आमिक्षा इति ।

१. प्राप्त्यविघात इति क. पु.   २. पू. मी.९.१.१३.   ३ ता. ब्रा. २१.७.२.

पदाभावात्पुरोडाशपदेनैव च तत्कार्योद्देशे लक्षणापत्त्या(१)पुरोडाशमात्रोद्देशेन मांसविध्यवगतेर्मांसेन च पिष्टपिण्डरूपपुरोडाशस्य कर्तुमशक्यत्वेऽपि 'तरसपुरोडाशमन्नसंरोधादि'ति छान्दोग्यसूत्रकृद्वचनादन्नमिश्रितेन तेन पुरोडाशोपपत्तेस्तत्र चाऽधिवापप्राप्तौ तन्मन्त्रोहानूहचिन्तोपपत्तिरित्युक्तम्; तन्न, पुरोडाशपदेनाऽत्र पिण्डमात्रं वा प्रतिपाद्यते लक्षणया, पिष्टपिण्डो वा? नाऽऽद्यः, लक्षणापत्तेः। न द्वितीयः, तस्याऽन्नमात्रोपादानकस्य मांसप्रकृतिकत्वानुपपत्तेः। तस्मात्पिष्टपिण्डप्रकृतिकस्यैवाऽस्य मांससंस्कारकत्वेन विधीयते। ततश्च(२) "पयसा मैत्रावरुणं श्रीणाती" तिवत्संस्कारके तस्मिन् प्रदेयप्रकृतिधर्माणां पेषणादीनामप्राप्तेर्नोहचिन्तोपपत्तिः। अतश्च कृत्वाचिन्तात्वेनैव तदधिकरणोपपत्तिः। ततश्च सवनीयपदोपेतवाक्ये पेषणाद्यप्राप्तावपि पर्यग्निकरणप्राप्तिसत्त्वात्प्रयोजनोपपत्तिः।

यत्तु भाष्यकारेण स्रुगुदाहरणे पूर्वपक्षे वरुणप्रघासेषु 'शमीमय्यस्स्रुचो भवन्ति, हिरण्मय्यो वे' ति वाक्योक्तशमीमयत्वादीनां प्रधानाङ्गभूतस्रुगनुवादेनैव विहितत्वात्सम्मार्गाङ्गभूतस्रुक्षु प्रकृतिप्राप्तनानावृक्षीयत्वम्। सिद्धान्ते तु संस्कार्यत्वाच्छमीमय्यादीनामेव सम्मार्ग इति प्रयोजनमुक्तम्; तन्न, स्रुङ्मात्रानुवादेन शमीमयत्वविधानात्प्रधानस्रुक्ष्विव सम्मार्गस्रुक्ष्वपि शमीमयत्वप्राप्तेः। न च प्रियङ्गुवत्प्रकरणात्प्रधानमात्रलाभः, प्रकरणस्य वाक्यसङ्कोचकत्वानुपपत्तेः। प्रियङ्गूनां तु चरूद्देशेन विहितानामपि चरोः प्रधानमात्रसम्बन्धित्वेन विधानाद्युक्तं प्रधानमात्रगामित्वम्। अतश्च यथैव 'वेद्यां हवींष्यासादयती'त्यादौ प्रधानप्रकरणेन ह-

---

१. पुरोडाशप्रकृतित्वेनेति. क. ख. पु. २. तै. सं. ६.४.८.

विशब्दसङ्कोचायोगादानर्थक्यपरिहारस्योपस्थित्याविशेषादङ्गप्रधानसाधारणापूर्वसाधनीभूतहविर्मात्रलक्षणयाऽप्युपपत्तेर्न वेद्यादेः प्रधानमात्रगामित्वम्, तथैव प्रधानप्रकरणेन स्रुक्छब्दसङ्कोचायोगादतिदेशसहकृतेन च प्रधानवाक्येनोभयो(१)रुपस्थित्यविशेषादुभयाङ्गत्वमेव शमीमयत्वादीनाम्। न चाऽतिदेशेन सम्मार्गस्य क्लृप्तोपकारनानावृक्षीयस्रुग्विशिष्टस्यैव प्राप्तत्वात्तदबाधाय स्रुक्पदसङ्कोचोपपत्तिः, प्राकृतनानावृक्षीयत्वाबाधाय स्रुक्पदसङ्कोचाङ्गीकारे(२) अङ्गगुणविरोधन्यायेन प्रधानस्रुक्षु नानावृक्षीयत्वानुग्रहेण सम्मार्गादिस्रुक्ष्वेव शमीमयत्वादिनिवेशोपपत्तेः।

वस्तुतस्तु "अप्स्ववभृथेन चरन्ती" तिवदुपदेशेन प्रधानगतास्विव सम्मार्गगतास्वपि स्रुक्षु शमीमयत्वादिविधानात्प्रयाजादिगतास्विव तद्गतास्वपि प्राकृतनानावृक्षीयत्वबाधो गुण एव। न हीदमुद्गातृवेदस्थश्येनप्राकृताङ्गेषूद्गातृकर्तृकत्ववत्प्रयोगविधिद्वारकं प्रधानाश्रितमङ्गेष्ववतरति, येनाऽतिदेशापेक्षया दौर्बल्यं शङ्क्येत। अङ्गप्रधानसाधारणस्रुङ्मात्रानुवादेन विधानादपामिवाऽस्याऽप्यौपदेशिकत्वात्प्राबल्यमिष्टमेव। अतश्च यथैव प्रयाजादिस्रुक्षु शमीमयत्वप्राप्तिरुपपादनीया, तथा सम्मार्गस्रुक्ष्वपीति नाऽस्य प्रयोजनत्वोपपत्तिः।

यस्त्वत्र वार्तिकेऽभ्युपगम्याऽपि यथाकथञ्चिच्छमीमयत्वादेः प्रधानसम्बन्धं, न सम्मार्गस्रुक्षु नानावृक्षीयत्वप्राप्तिस्सम्भवति, प्रधानस्रुग्भिरेवाऽङ्गानामपि प्रसङ्गात्कार्यसिद्धेस्स्वतन्त्रस्रुगाक्षेपकत्वानुपपत्तेः। अतश्च यथैव 'दक्षिणास्सोमस्ये'ति वचनात्प्र-

---

१. रुपस्थितत्वाविशेषेति. क.ख.पु. २. पू. मी. १२. २. ९.

धानमात्राङ्गभूतयाऽपि दक्षिणया प्रसङ्गात्कार्यसिद्धेर्नाऽङ्गभूतेष्टिप-शुष्वातिदेशिकान्वाहार्यदक्षिणाप्राप्तिरिति(१) द्वादशे वक्ष्यते, तथैव प्रधानस्रुग्भिरेव प्रसङ्गसिद्धेर्न सम्मार्गार्थं नानावृक्षीयस्रुगुत्पादनमिति दूषणान्तरमुक्तम् , तन्न; सौमिकपात्रैरैष्टिकपात्रकार्यस्यैव शामित्राग्निना पौरोडाशिकाग्निकार्यस्य पाकस्यैवाऽत्र सम्मार्गस्य प्रधानस्रुग्भिस्सिध्यनुपपत्तेः । दक्षिणया ह्यानतानां कर्तॄणामङ्गप्रधानसाधारण्याद्दानतिरूपकार्यसिद्धेः प्रत्यक्षत्वाद्युक्ता तत्साधनीभूतान्वाहार्यनिवृत्तिः । प्रकृते तु स्रुग्भिः प्रधाननिष्पत्त्या सम्मार्गानिष्पत्तेस्सम्मार्गस्य पृथगनुष्ठेयत्वाद्युक्तमैष्टिकपात्रवत्स्वाङ्गभूतस्रुगाक्षेपकत्वम् ।

न च यथा सोमाङ्गभूतमहावेद्यैवैष्टिकहविरासादनादिकार्यस्य पृथगनुष्ठेयस्याऽप्यनुनिष्पादनात्तदङ्गभूतदार्शपूर्णमासिकवेदिनिवृत्तिः(२) द्वादशे वक्ष्यते, तथाऽत्राऽपि सम्मार्गस्य पृथगनुष्ठेयत्वेऽपि प्रधानस्रुग्भिरेव निष्पादनोपपत्तेर्न नानावृक्षीयत्वप्राप्तिरिति वाच्यम् । सौमिकवेदेर्देशत्वेनाङ्गप्रधानार्थत्वस्य(३) तृतीये वक्ष्यमाणत्वाद्धविरासादनादिकार्याङ्गत्वेन तस्या एव प्राप्तेरातिदेशिकैष्टिकवेदेरुपदेशेन बाधोपपत्तेः । न चैवं वेदेस्तन्त्रत्वापत्तेर्द्वादशोक्तप्रसङ्गानुपपत्तिः, तस्य 'इयति शक्ष्यामहेऽस्यां कर्तुमि'त्यार्थवादिककर्तृगमनागमनादिरूपप्रचारार्थत्वं कृत्वाचिन्तया कर्तृप्रचारार्थायाः वेदेर्हविरासादनसिध्यङ्गीकारेण वक्ष्यमाणत्वात् ।

न चैवमपि पात्रन्यायेन हविरासादनरूपस्य कार्यस्य पृथगनुष्ठेयत्वान्न प्रसङ्गोपपत्तिः, कर्तृप्रचारार्थमनुष्ठितेनैव सौमिक-

१. पू. मी. १२. १. ३. २. पू. मी. १२ १. १६. ३. पू. मी. ३. ७. ३.

वेदिकरणेनाऽदृष्टविशेषावच्छिन्नाहवनीयप्रत्यग्देशरूपाया वेदेस्सिद्धत्वादैष्टिकवेदिकरणनिवृत्त्या प्रसङ्गोपपादनात् । न ह्यैष्टिकसौमिकवेदिकरणभेदे वेदिभेदस्समस्ति, प्रत्यग्देशस्य प्रत्यक्षेणैकत्वात्, वेदिपदस्य नानार्थकत्व(१) कल्पनायोगाददृष्टस्याऽप्येकस्यैव कल्पनाच्च । अत एव तत्तत्क्रत्वपूर्वसाधनीभूतवेदिरूपादृष्टत्वेनैव तत्तद्वेदिकरणं प्रति कार्यत्वाद्व्यभिचारस्सङ्करो वा नाऽशङ्क्यः । पात्रेषु तु सौमिकापेक्षया ऐष्टिकानां भेदस्य सम्पादयितुं शक्यत्वान्न प्रसङ्ग इति वैषम्यम् । अतश्च पात्रन्यायेन प्रधानस्रुगपेक्षया सम्मार्गस्रुचां भेदेन कर्तुं शक्यत्वान्न प्रसङ्गोपपत्तिः । न च प्रसङ्गासंभवेऽप्याग्नेयीन्यायेन प्रकृतानामेवोपादानशङ्का, तस्य प्रकृतिप्राप्तनानावृक्षीयत्वबाधकृतवैगुण्यप्रसङ्गेनाऽनुदयात् । अतश्च वार्तिके प्रसङ्गापादनमनास्थयैवेति द्रष्टव्यम् ।

इदं त्विह वक्तव्यम्—कथञ्चिच्छमीमयत्वादेः प्रधानमात्रसंबन्धाभ्युपगमे प्रकृतौ नानावृक्षीयत्वस्याऽपि प्रधानमात्रसम्बन्धापत्तेस्सम्मार्गस्रुक्षु नानावृक्षीयत्वस्यैवाऽभावाद्भाष्योक्तप्रयोजनानुपपत्तिरिति ।

एतेन यदपि परिध्युदाहरणे 'बाणवन्तः परिधयो भवन्ती'त्यत्र पूर्वपक्षे सम्मार्गार्थे पलाशा उत्पादयितव्याः, सिद्धान्ते बाणवतामेव सम्मार्ग इत्युक्तं प्रयोजनमपास्तम् ; बाणवत्त्वस्याऽङ्गप्रधानसाधारण्येन विधानात् । अन्यथा पालाशत्वस्याऽपि सम्मार्गः परिधिष्वप्राप्तेः । किंच 'परिधीन् सम्मार्ष्टी'त्यत्र परिधिशब्देन परिधीयते अनेनेति व्युत्पत्त्या अग्निपरिधानोपलक्षितद्रव्याभिधानात्पुरोडाशकपालन्यायेन पालाशप्रयोजकत्वान्नोक्तप्रयोजनासिद्धिः ।

१. कल्पनाभियेति. क. पु.

यदपि चाऽग्न्युदाहरणे 'अप्स्ववभृथेन चरन्ती'त्यत्र पूर्वपक्षे सम्मार्गोऽग्नेः कर्तव्यः, सिद्धान्ते त्वपामिति प्रयोजनमुक्तम्, तदपि अवभृथे तस्याऽपूर्वत्वेन तदर्थं पुनः श्रूयमाणप्रयाजानूयाजाद्यर्थं वा आरादुपकारकसम्मार्गप्राप्त्यभावाद्यथाकथंचित्प्राप्त्यङ्गीकारेऽपि तृतीयान्तेनाऽवभृथपदेन साङ्गस्यैव करणत्वावगमाच्चरन्तीत्यनेन च साङ्गस्यैव प्रयोगविधानादपां च देशत्वात्साङ्गप्रधानविषयत्वस्य(१)एकादशे वक्ष्यमाणत्वेन सम्मार्गेऽप्यपामेव प्राप्तेरुपेक्षणीयम्। अतः पूर्वोक्तान्येव प्रयोजनानि द्रष्टव्यानि॥

इति पञ्चमं सम्मार्गाधिकरणम्॥ ५॥

अथ षष्ठं स्तुतशस्त्राधिकरणम्॥

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात्॥ २-१-१३॥

(विषयसंशयसङ्गतयः)

इह स्तोत्रशस्त्राण्युदाहरणम्। तत्र प्रगीतमन्त्रसाध्यं गुणगुणिसम्बन्धकीर्तनं स्तोत्रम्, शस्त्रं च तदेवाऽप्रगीतमन्त्रसाध्यम्। तत्र किं तयोरारादुपकारकत्वं प्रयाजादिवत्, उत देवतादिरूपगुणिस्मरणार्थत्वेन सन्निपत्योपकारकत्वमिति विचारः। अत्राऽपूर्वभेदोपयोगिचिन्तनात्पादाध्यायसङ्गतिः पूर्ववत्। अनन्तरा तु पूर्वाधिकरणे श्रुतिग्रहणस्य द्रव्याङ्गताबोधकप्रमाणमात्रोपलक्षणत्वादिहापि गुण्यङ्गताबोधकलिङ्गसद्भावेन पूर्वपक्षकरणादापवादिकी।

१. पू. मी. ११. २. ७.

६४ व्याप्तिपञ्चकरहस्यम् सिंहव्याघ्रलक्षणरहस्यं च । श्रीमथुरानाथतर्कवागीशकृतम् । न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादिर्विभूषितं च । [न्या० वि० ८] रु० ०-१२

६५ सिद्धान्तबिन्दुः । श्रीमधुसूदनसरस्वती विरचितः । श्रीभगवान्शङ्कराचार्य विरचित दशश्लोकव्याख्यारुपः श्रीगौड ब्रह्मानन्दविरचित न्यायरत्नावलीनारायणतीर्थ विरचित लघुव्याख्या टिप्पणीसहितः । [वेदान्त वि० ८] रु० ४—०

६६ अन्त्यकर्मदीपकः आशौचकालनिर्णयसहितः । प्रेतकर्मब्रह्मीभूतयति कर्मनिरूपणात्मकः महामहोपाध्याय पं० श्री नित्यानन्दपन्तपर्वतीय विरचितः । [कर्मकाण्ड वि० ६] रु० १—८

६७ सांख्यदर्शनम् । श्रीमद्विज्ञानभिक्षुकृत सांख्यप्रवचनभाष्यसमलङ्कृतम् । [सांख्य वि० १] रु० २—०

६८ अनेकार्थसङ्ग्रहो नाम कोशः । आचार्यश्रीहेमचन्द्रेण विरचितः । [कोश वि० २] रु० २—०

६९ शिशुपालवधम् । श्रीमन्माघकविनिर्मितं श्रीवल्लभदेवकृतया सन्देहविषौषधिव्याख्यया महामहोपाध्याय श्रीमल्लिनाथकृतया सर्वङ्कषाव्याख्यया समेतम् । सजिल्द ग्लेज कागज । सम्पूर्णम् । [काव्य वि० ९] रु० ३—०

६९ ,, ,, [संपूर्णम्] रफ मोटा कागज ० २—४

७० जागदीशीपञ्चलक्षणी सिंहव्याघ्रलक्षणं च । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादि विभूषितं च । [न्याय वि० ९] रु० ०—८

७१-१ ब्रह्मसूत्रशाङ्करभाष्यम् । चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम् । द्वितीयाध्यायस्य द्वितीयपादान्तो प्रथमोभागः (वेदान्तविभागे ९) रु० २—८

७१-२ ब्रह्मसूत्रशाङ्करभाष्यम् । श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम् । द्वितीयाध्यायस्य तृतीयपादमारभ्य समाप्तिपर्यन्तम् । द्वितीयोभागः । (वेदान्त वि० ९) रु० २—८

७२-१-सिद्धान्तशिरोमणिः । श्रीभास्कराचार्य विरचितः । गणिताध्यायः वासनाभाष्य सहितः ज्योतिषाचार्य म० म० श्रीद्मद्वापूदेवशास्त्रिकृतटिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७२-२-सिद्धान्तशिरोमणिः । ,, ,, ,,
गोलाध्यायः वासनाभाष्य सहितः । ज्योतिषाचार्य म० म० श्रीद्मद्वापूदेवशास्त्र कृत टिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७३ काकचण्डीश्वरकल्पतन्त्रम् । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] । [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [अलङ्कार वि० ३] रु० ०—१०

७६ किराताऽर्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनककान्तशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—०

७८ माथुरीपञ्चलक्षणी । पं० श्रीउमानाथार्य्यालङ्कृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्टभेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासा-विचारिताः तत्र प्रथमं प्रकरणं मुद्रितं द्वितीय प्रकरणमपि मुद्रित प्रायं शिघ्रमेव भवन्तं दृष्टि पथमधिगमिष्यतीति ।) प्रथमो भागः । (व्या० वि १०) रु० १—८

८१ गणितकौमुदी । (हिन्दीभाषाटीकासहिता) प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम् । [गणितविभागे १] रु० ०—६

८२ छन्दःकौमुदी । (हिन्दीभाषाटीकासहिता) प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दःसंग्रहपुस्तकम् । [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र (१) भोजवृत्तिः, (२) भावागणेशवृत्तिः, (३) नागोजीभट्टवृत्तिः, (४) मणिप्रभा, (५) योगचन्द्रिका, (६) योगसुधाकराख्य टीका षट्कसमेतम् । [योग० विभागे१] रु० २—०

८४ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा पं० ब्रह्मशङ्करमिश्रकृतपरीक्षोपयोगि सुधाऽऽख्यव्याख्यया सहितः । १ से ४ सर्गः मू० १-४-० । १ से ५ सर्गः रु० १-८-० तथा ६ से १० सर्गः १—८

८५ योगदर्शनम् । पण्डित बलदेवमिश्रकृतया सटिप्पण्यायोगप्रदीपिकाख्य विवृत्या समन्वितम् । (योग विभागे २) रु० १—०

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पण्डित श्रीनारायणशास्त्रीखिस्तेकृत काव्यमीमांसा-चन्द्रिका टीका सहिता । प्रथमाध्यायमारभ्य पञ्चमाध्यायपर्यन्ता प्रथमो भागः । (काव्य विभागे १३) रु० ०—८

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्येति पदवी विभूषितेन पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्या समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । (नाटक विभागे १) रु० १—४

८८ मेघदुतकाव्यम् । महाकवि श्री कालीदासविरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्तेकृत भावप्रबोधिनी व्याख्या टिप्पण्या च सहितम् । (काव्य वि० १४) रु० ०—८

८९ जागदीशोव्यधिकरणम् । न्यायाचार्य पं० श्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्यायविभागे १२) रु० २—०

९० काव्यकल्पलतावृत्तिः । श्रीअमरचन्द्रयतिनिर्मिता अरिसिंहकृतसूत्रसहिता । (अलङ्कारविभागे ४) रु० १-४

December 1931.

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 408.

मीमांसाकौस्तुभः ॥

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(द्वितीयाध्यायस्य प्रथमद्वितीयौ पादौ ।)

पूर्वोत्तरमीमांसापारावारपारीण-

श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकेन

वेदविशारदविरुदभाजा

पं० अ. चिन्नस्वामिशास्त्रिणा

तच्छिष्येण श्रीपट्टाभिरामशर्मणा मीमांसाशास्त्रिणा च

संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ।

MIMAMSAKAUSTUBHA

[An exhaustive Commentary of Jaiminisutras]

(I and II Pada of II Adhyaya)

BY

KHANDADEVA.

Edited by

"Veda Visarada" Pandit A. Chinnaswami Sastri,

Chief Professor of Mimamsa, Benares Hindu University

and his pupil Sri Pattabhirama Sarma M. S.

Vol. III. FASCICULUS III–३.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Benares City

1932

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तबकः—४०८

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

(पूर्वपक्षः)

तत्र यद्यपि विषयतासम्बन्धेन गुणगुणिनोरुभयोरपि सम्बन्धकीर्तनाख्यस्तोत्रशस्त्रं प्रति करणत्वमस्ति, तथाऽपि प्रयोजनापेक्षायां दृष्टविधया कर्मानुपयुक्तगुणप्रकाशनार्थत्वायोगेऽपि कर्मोपयुक्तगुणिस्मरणार्थत्वसंभवेऽदृष्टार्थत्वकल्पनानुपपत्तेर्गुणिस्मरणरूपसंस्कारार्थत्वमेव याज्यादिमन्त्रवत्स्तोत्रशस्त्रमन्त्राणामङ्गीकर्तव्यम् । न चाऽत्र स्तौतिशंसतिभ्यां विनियोगेन याज्यादिवैलक्षण्यात्स्तौतिशंसत्योश्च गुणविशेष्यकगुणिसम्बन्धकीर्तनवाचित्वस्य लोके प्रसिद्धत्वाद्गुणिप्रकाशनार्थत्वे च तस्यैव विशेष्यत्वेन तयोर्लक्षणापत्तिरिति वाच्यम् । 'प्रयाजशेषेण हवींष्यभिघारयती' तिवद्दृष्टार्थत्वानुरोधेन लक्षणाङ्गीकारस्य न्याय्यत्वात् । अतस्सन्निपत्योपकारकत्वमेव स्तोत्रशस्त्रयोरपि । सूत्रं निगदव्याख्यातम् ॥ १३ ॥

अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ २-१-१४ ॥

(सिद्धान्तः)

अस्तु तावन्मूलयुक्तिभूतः श्रुतिविरोधो लिङ्गस्य बाधकः । अभ्युच्चययुक्तिरूपो दुर्बलप्रमाणबाधप्रसङ्ग एव तावदादावभिधीयते । यदि हि स्तौतिशंसत्योः प्रकाशनलक्षणार्थतामङ्गीकृत्य तन्मन्त्राणां गुणिस्मरणार्थत्वमिष्यते, ततो महेन्द्रदेवताकयागाभ्यासक्रमे पठितयोरैन्द्रमन्त्रयोर्महेन्द्रप्रकाशनाशक्तेरिन्द्रस्य च यागानङ्गत्वेन प्रकाशनानर्हत्वात्प्रकरण एव यत्रेन्द्रो देवता तत्रोत्कृष्येत पूषानुमन्त्रणमन्त्रवत् । ततश्च यजुर्वेदविहितग्रहयागाभ्या-

सक्रमेण सामवेदान्तर्गतोत्तराग्रन्थपठितानामृचां यथाक्रमं पाठेनाऽवगताङ्गभावानां मध्ये ऐन्द्रमन्त्रयोस्तदनङ्गीकारात्क्रमबाधापत्तिः । 'पादं पुनरारभत'इति वचनावगतस्य चाऽऽद्यामृचं सकृत्पठित्वा तस्यामन्त्यपादेन सह द्वितीयाद्यर्धर्चं पठित्वा, तदन्त्यपादेन सह द्वितीयान्त्यार्धर्चपठनरूपस्य प्रग्रथनस्य माहेन्द्रग्रहसन्निधावाम्नातस्य तदङ्गत्वानङ्गीकारात्सान्निधिबाधश्च । अतश्च दुर्बलयोरपि क्रमसान्निध्योः प्रबलेनाऽपि लिङ्गेन सहाऽबाधेनैवोपपत्तौ बाधायोगान्न सन्निपत्योपकारकत्वं स्तोत्रशस्त्राणाम् ।

सूत्रं तु—देवतापदं प्रति गुणत्वेन संयुक्ता यदि स्तुतिभावना, ततः अर्थेन प्रयोजनानुरोधेन माहेन्द्रग्रहयजितः अपकृष्येत ऐन्द्री स्तुतिः, तस्याः प्रयोजनभूतां देवतां प्रति गुणभूतत्वादिति व्याख्येयम् ॥ १४ ॥

वशावद्वा गुणार्थं स्यात् ॥ २-१-१५ ॥

नाऽपकृष्येतैन्द्री स्तुतिः, इन्द्रशब्देनैव प्रकृतग्रहयागीयेन्द्रप्रकाशनोपपत्तेः । यद्यपि च तत्र महत्त्वगुणविशिष्टस्यैवेन्द्रस्य माहेन्द्रमिति तद्धितेन देवतात्वमुक्तम्, तथाऽपि विशेष्यस्यैव मन्त्रेण प्रकाशनोपपत्तेः, विशेषणांशस्य च मन्त्राभावेऽपि ध्यानाद्युपायान्तरेण स्मृतिसिद्धेर्नाऽपकर्षापत्तिः। न हि (१)'सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेते'ति वाक्येन वशात्वगुणविधानेऽपि विशेष्यमात्रस्य (२)'छागस्य वपाया मेदस' इति मन्त्रेणाऽभिधानं नेष्टम् । न ह्यत्र महेन्द्रशब्दस्यैव देवतात्वम्, येनेन्द्रशब्दस्य ततो भिन्नत्वेनाऽपकर्षश्शङ्क्येत । तथा सति महे-

१. तै. सं. ३. ४. ३. २. तै. ब्रा. ३. ६. ८.

न्द्रशब्दस्याऽर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाभावात्तद्धितानुत्पत्तिप्रसङ्गात् । अत एव चेतनाचेतनसाधारण्येनाऽर्थस्यैव देवतात्वं (१)दशमे वक्ष्यते । एवं सत्यपि यदि महेन्द्रशब्दो रूढ्या अर्थान्तरवचनस्स्यात्ततोऽर्थान्तरवचनेनेन्द्रशब्देन नाऽभिधीयते तदर्थ इत्युत्कृष्येतैन्द्रो मन्त्रः, प्रोक्षणीशब्दवत्तु क्लृप्तावयवयोगेनोपपत्तौ नाऽर्थान्तरवाचित्वकल्पनायां प्रमाणमस्ति ।

ननु तद्धितसमासरूपवृत्तिद्वयानुपपत्तिरेव रूढिकल्पनायां प्रमाणं भविष्यति । तथा हि—न तावदेकस्यैवेन्द्रशब्दस्य युगपत्तद्धितसमासरूपवृत्तिद्वयसम्भवः, अन्यतरसापेक्षत्वेनैकस्या अपि वृत्तेरनुपपत्तेः समासवृत्त्यर्थमिन्द्रशब्दस्य सुबन्तत्वकल्पना, तद्धितवृत्त्यर्थं वाऽसुबन्तत्वमिति युगपद्वृत्तौ युगपत्सुबन्तत्वासुबन्तत्वविरोधापत्तेश्च । नाऽपि क्रमेण, सकृच्छ्रुतस्येन्द्रशब्दस्याऽऽवृत्त्यापत्तेः । तद्धितपूर्ववृत्तौ महेन्द्रमित्युत्तरपदवृद्धिर्महत्त्वस्य प्रधानभूतद्रव्याविशेषणत्वं चाऽधिकं प्रसज्येत । अतो वृत्तिद्वयानुपपत्त्या अश्वकर्णादिशब्दवद्रूढिकल्पनोपपत्तेरिन्द्रान्महेन्द्रस्य भेदावगमादिन्द्रशब्देन च प्रकाशनानुपपत्तेरुत्कर्षानिवारणमिति चेत्, समासवृत्त्युत्तरकाले तद्धितवृत्त्यङ्गीकारात् ।

न चैवमिन्द्रपदावृत्तिः, वृत्तिद्वयविवरणवेळायां पौरुषेयेन्द्रपदावृत्तावपि वैदिकमाहेन्द्रपदेनाऽनावृत्तेनैव महत्त्वगुणविशिष्टेन्द्रदेवतात्वविध्युपपत्तेः । अत एव तद्धितवृत्तेः पूर्वं द्वन्द्वादिसमासाङ्गीकारात् "आग्नावैष्णव" मित्यादौ देवताद्वन्द्वादिनिमित्तकानङाद्युत्पत्तिराअस्येनोपपादिता भविष्यति । अतश्च क्रमेण वृत्तिद्वयस्याऽप्युपपत्तेः प्रोक्षणीशब्दवत्क्लृप्तावयवयोगेनोपपत्तौ रूढिकल्पनानवकाशात्सत्यपि गुणविशिष्टस्येन्द्रस्य देव-

१. पू. मी. १०. ४. १३.

तात्वे वशाबदिन्द्रशब्देन विशेष्यमात्रप्रकाशनोपपत्तेर्नोत्कर्षापत्तिः ।

वस्तुतस्तु महेन्द्रप्रातिपदिकेन महत्त्वविशिष्टे इन्द्रे उक्तेऽपि राजपुरुषश्शोभन इतिवद्विशेष्यमात्रस्यैव तद्धितेन देवतात्वावगमाद्विशेषणस्य च महत्पदस्य विशेष्योपलक्षणार्थत्वेन स्तावकत्वेनोपपत्तेर्देवताभूतस्य शुद्धस्येन्द्रस्यैन्द्रेण(१) प्रकाशनोपपत्तौ नोत्कर्षापत्तिः ।

सूत्रं तु—अगुणार्थं स्यादित्यकारप्रश्लेषेण व्याख्येयम् ॥१५॥

न श्रुतिसमवायित्वात् ॥ २-१-१६ ॥

नेन्द्रशब्देन प्रकृतग्रहसम्बन्धिदेवताभिधानम्, प्रकृतग्रहे माहेन्द्रमिति तद्धितसहकृतेन विधिना महेन्द्रपदस्यैव देवतात्वविधानात् । तथा हि—ताद्धितेन देवतात्वविशिष्टद्रव्याभिधानात् देवतात्वस्य च त्यज्यमानहविरुद्देश्यत्वेन वृद्धव्यवहारे प्रसिद्धस्याऽनुच्चार्येऽर्थेऽसम्भवात् तद्धिताभिहितोद्देश्यत्वान्वयार्थं महेन्द्रप्रातिपदिकेन लक्षणया महेन्द्रपदमेवाऽभिधाय तस्य त्यज्यमानहविरुद्देश्यताख्यं देवतात्वं विधीयते। महेन्द्रशब्दे पदलक्षणायाश्च शक्यसम्बन्धं विनाऽनुपपत्तेर्महेन्द्रपदशक्यश्चेतनाचेतनसाधारण्येन दशमे वक्ष्यमाणोऽर्थोऽपि नाऽसङ्गतः । अतश्च महत्त्वगुणविशिष्टेन्द्रवाचकमहेन्द्रपदस्यैव देवतात्वावसायाद्विशिष्टवाचकबृहच्चक्रादिपदान्तरप्रयोगे सुतरां शुद्धेन्द्रपदप्रयोगान्नेन्द्रपदेन प्रकृतग्रहसम्बन्धिदेवताप्रकाशनोपपत्तिः ।

यत्तु—न्यायसुधाग्रन्थस्वारस्यात्प्रातिपदिकेनाऽर्थवाचिनाऽप्युद्देश्यात्वान्वयार्थं पदविशिष्टार्थलक्षणामङ्गीकृत्य तत्र तद्धितवाच्य-

---

१. प्रागाथेनाऽभिधानोपपत्ताविति. ख. पु.

देवतात्वान्वयाङ्गीकाराच्छब्दोपहितोऽर्थो देवतेति प्रतीयते, तत् पदविशिष्टेऽर्थे उच्चार्यत्वाख्योद्देश्यत्वस्य बाधाद्विशेषणीभूतपदान्वयस्य च 'अन्योपसर्जनमन्येन नाऽन्वेती'ति न्यायेनाऽव्युत्पन्नत्वादुपेक्षणीयम् ।

एतेनाऽर्थस्यैव देवतात्वेऽपि तस्य व्रीह्यादिवत्स्वरूपेण यागोपयोगाभावाच्छब्दोच्चारणद्वारेणैवोपयोगावगतेश्शब्दविशेषापेक्षायां लाघवादुपस्थितस्य विधिगतशब्दस्यैव नियम इति पक्षोऽपि प्रत्युक्तः, तद्धितार्थस्य त्यज्यमानहविरुद्देश्यत्वाख्यस्याऽर्थे बाधेनाऽन्वयानुपपत्तेः । त्यज्यमानहविरुद्देश्यभूतशब्दाभिधेयत्वलक्षणा तु प्रधानभूते तद्धिते लक्षणापत्तेरयुक्तैव । तद्वरं प्रातिपदिक एव गुणभूते पदलक्षणेति । किञ्चैवं "अग्नये पावकाये" त्यादावेकस्यैव पदस्योच्चारणनियमोपपत्तेर्न पदद्वयोच्चारणापत्तिः । अतो महेन्द्रपदस्योच्चार्यत्वेन देवतात्वान्नैन्द्रमन्त्रेणाऽभिधानोपपत्तिः । अतश्चोत्कर्षापत्तिस्तदवस्थैव ।

सूत्रं तु--श्रुत्या विधिगतशब्देनैव देवतायाः कर्मणि समवायात् सम्बन्धादिन्द्रशब्देन महेन्द्रप्रकाशनानुपपत्तेर्नाऽनुत्कर्षसम्भव इति व्याख्येयम् ॥ १६ ॥

व्यपदेशभेदाच्च ॥ २-१-१७ ॥

इतश्च नेन्द्रपदेन महेन्द्राभिधानम् । अन्यथा सान्नाय्ये(१) "बहु दुग्धीन्द्राय देवेभ्यः, बहु दुग्धि महेन्द्राय देवेभ्य" इति द्वयोर्मन्त्रयोस्समाम्नातयोरन्योन्यप्रकाशकत्वे विकल्पापत्तेः । असम्मते त्वैन्द्रेण मन्त्रेण सान्नाय्यगतेन्द्रप्रकाशनान्माहेन्द्रेण च

१. तै. ब्रा. ३. २. ३.

तद्गतमहेन्द्रप्रकाशनान्मन्त्रद्वयव्यपदेशव्यवस्थेति न विकल्पः। अतश्चेन्द्रमहेन्द्रयोराधिष्ठानैक्येऽपि विशेषणांशभेदादुद्देश्यशब्दभेदाच्च भेदावगमेनैन्द्रमन्त्रेणाऽभिधानानुपपत्तेरुत्कर्षानिवारणम् ॥१७॥

गुणश्चाऽनर्थकस्स्यात् ॥ २-१-१८ ॥

यदप्युक्तं महेन्द्रप्रातिपदिकेन महत्त्वविशिष्टे इन्द्रेऽभिहितेऽपि राजपुरुषश्शोभन इतिवद्विशेष्यमात्रस्यैव तद्धितार्थान्वय इति, तन्न; तथा सति गुणवाचिमहत्पदानर्थक्यप्रसङ्गात् । न हि तस्य राजपदवदर्थद्वारेणोपलक्षकता सम्भवति, देवतायास्स्वरूपेण कर्मण्यसम्बन्धात् । किन्तु शब्दोच्चारणद्वारा तदुपकारकत्वात् महत्पदस्याऽपि तद्वारैवोपलक्षकता वाच्या । ततश्च तस्याऽप्युच्चार्यत्वात् देवतात्वान्तर्गत्यवगतेर्न महत्त्वरहितस्येन्द्रस्य तद्धितार्थान्वयः(१)सम्भवति । किञ्च सम्भवति विधेयेन्द्रविशेषणत्वेनाऽर्थवत्त्वे उपलक्षणत्वस्य स्तावकत्वस्य चाऽन्याय्यत्वान्न शुद्धस्येन्द्रस्य देवतात्वम् । राजपुरुषश्शोभन इत्यादौ तु प्रमाणान्तरानुरोधेन तथाऽङ्गीकरणमिति न किञ्चिदेतत् । अत एव च सान्नाय्ये "ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायाम्, माहेन्द्रं दध्यमावास्यायां माहेन्द्रं पयोऽमावास्याया"मिति व्यपदेशभेदः । अन्यथा तत्राऽपि महत्पदानर्थक्यम् ॥ १८ ॥

तथा याज्यापुरोरुचोः ॥ २-१-१९ ॥

तथा सान्नाय्य एवेन्द्रमहेन्द्रदेवत्ययाज्यापुरोनुवाक्ययोर्भेदेनाऽऽम्नानमपीन्द्रमहेन्द्रयोर्भेद एवाऽवकल्पते।(२) अन्यथा एकेन

---

१. सम्भवीति. क. ख. पु. २. इतरथेति. ख. पु.

कार्यसिद्धेरितराम्नानमनर्थकं विकल्पो वा प्रसज्येत । न च भवन्मतेऽप्येकापूर्वसाधनत्वादिन्द्रमहेन्द्रयोर्धर्मसाङ्कर्यापत्तेर्विकल्पानिवारणम्, सम्मीलनादिवत्प्रतिनियतधर्मनिर्देशेन साङ्कर्यानापत्तेः।
वस्तुतस्तु मन्त्राणां लिङ्गेन मुख्य एवाऽर्थे विनियोगात्(१) 'व्रीहीणां मेध सुमनस्यमान' इतिवदेकापूर्वसाधनीभूतेऽप्यर्थान्तरे अप्राप्तत्वेन साङ्कर्यप्रसङ्ग एव नाऽस्ति । अतो याज्यापुरोनुवाक्ययोर्भेदाम्नानमपि देवताभेदसाधकम् । सूत्रे पुरोरुक्छब्दश्शस्त्रगतमन्त्रविशेषवाच्यपि लक्षणया पुरोनुवाक्यापरो द्रष्टव्यः ॥१९॥

वशायामर्थसंयोगात् ॥ २-१-२० ॥

यत्तु वशात्वगुणविशिष्टद्रव्यविधावपि छागशब्देन विशेष्यमात्रप्रकाशनं दृष्टमित्युक्तम्, तद्वशात्वस्य(२) स्वरूपत एवोपकारकत्वादुपायान्तरेणाऽपि स्मृत्या कर्मण्यनुष्ठानोपपत्तेर्नाऽवश्यं शब्दोच्चारणापेक्षा । प्रकृते तु महत्त्वस्य महत्पदोच्चारणद्वारेणैवोपकारकत्वान्नाऽनुच्चारितस्य साधनत्वं संभवतीति विशेषः ॥२०॥

यत्रेति वाऽर्थवत्त्वात्स्यात ॥ २-१-२१ ॥

ननु यत्र माहेन्द्रग्रहसन्निधावयमैन्द्रः प्रगाथः पठितः, तत्रैवाऽस्य मनोतास्थाग्नि(३)पदवल्लक्षणया महत्त्वविशिष्टेन्द्रप्रकाशकत्वेन निवेशकल्पनादर्थवत्त्वोपपत्तिः । वस्तुतस्तु नेदृशस्थले लक्षणा । त्यागवेलायां महेन्द्रपदप्रयोगेऽपि मन्त्रे विशेष्यभूतेन्द्रमात्रप्रकाशनेन मन्त्रस्याऽपूर्वीयदेवतात्वाश्रयवाच्यभूतेन्द्रप्रकाशना-

---

१. तै. ब्रा. ३. ७. ५. २. स्वत एवोति क. पु.
३. शब्दवदिति. ख. पु.

र्थत्वेनाऽप्युपपत्तेः। मनोतास्थाग्निशब्दे तु देवतावाचिमनोतापद-सामानाधिकरण्येन लक्षणाङ्गीकरणमित्युक्तं(१) मन्त्राधिकरणे। अतश्च यथापठितस्याऽप्युपपत्तेर्नोत्कर्षापत्तिः। अथ वा पूषानुमन्त्रणमन्त्रवद्दुर्बलप्रमाणबाधेनोत्कर्षाङ्गीकारेऽपि न क्षतिः। न च तत्र यागानुमन्त्रणमन्त्रसमाख्यावदिह सम्बन्धसामान्यबोधकप्रमाणाभावेनोत्कर्षस्याऽप्यनुपपत्तेरानर्थक्यापत्तिः, ऐन्द्रयागान्तरे तदभावेऽपि ज्योतिष्टोमप्रकरणस्थैन्द्रग्रहाभ्यासे प्रकरणस्यैव सामान्यसम्बन्धबोधकस्य सत्त्वेनोत्कर्षोपपत्तेः। अतश्च यत्र प्रकरण एवैन्द्रो यागस्तत्राऽस्य प्रगाथस्योत्कर्षेऽप्यर्थवत्त्वोपपत्तिरिति ॥ २१ ॥

न त्वाम्नातेषु ॥ २-१-२२ ॥

न चैन्द्रस्य प्रगाथस्य प्रकरणे उत्कर्षसम्भवेऽप्यन्येषु तत्तद्ग्रहाभ्याससन्निधावाम्नातेषु मन्त्रेषु "याम्याश्शंसति, शिपिविष्टवतीश्शंसति, पितृदेवत्याश्शंसति, कुसुंभकसूक्तमन्वाह, अक्षसूक्तं मण्डूकसूक्तं मूषिकसूक्तमन्वाहे"त्यादिविधिविहितेषु प्रकरणेऽपि यमादीनामभावात्तत्रोत्कर्षानुपपत्तेः, प्रकरणबहिर्भूते यमादिदैवत्यकर्मणि च सामान्यसम्बन्धबोधकप्रमाणाभावेनोत्कर्षानुपपत्तेः, कुसुम्भकादीनां चाऽन्यत्राऽपि देवतात्वाभावेन सुतरां तदनुपपत्तेर्नाऽर्थवत्त्वोपपत्तिरिति वाच्यम् ॥ २२ ॥

दृश्यते ॥ २-१-२३ ॥

सर्वेषामेवाऽर्थवत्त्वोपपत्तेः। तथा हि--मण्डूकसूक्तस्य ता-

---

१. पू. मी. १. २. ४.

वत्(१) "मण्डूकेनाऽग्निं विकर्षती"ति विहितमण्डूकप्रकाशकत्वेनाऽग्न्युपयोगः । न च तस्याऽनारभ्याधीतत्वेन सामान्यसम्बन्धबोधकप्रमाणाभावः, मण्डूकसूक्तस्य प्रकरणाज्ज्योतिष्टोमसम्बन्धेऽवगते(२) आनर्थक्यतदङ्गन्यायेन तदङ्गभूते चयने निवेशोपपत्तेः । एवं मूषिकसूक्तस्याऽपि प्रकरणाज्ज्योतिष्टोमाङ्गभूतयूपैकादशिन्यां निवेशः । तत्र च यद्यप्याखोर्न साक्षाद्विनियोगः, तथाऽप्युपशये यूपे(३) "सर्वे वा अन्ये यूपाः पशुमन्तोऽथोपशय एवाऽपशुरि" त्युपक्रम्य द्रव्याभावे "आखुस्ते पशुरिति ब्रूयादि" ति मन्त्रविधानेनाऽऽखुस्मृतिद्वारा लक्षणया तत्सम्बन्ध्युपशयस्तुतिरिति द्रष्टव्यम् ।

ये तु याम्यादिमन्त्रास्तेषां प्रकरणे कथमपि निवेशासम्भवेनोत्कर्षायोगादन्यत्र च सामान्यसम्बन्धबोधकप्रमाणाभावेनैव तदप्रसक्तेरगत्या प्रकृतग्रहदेवतैव लक्षणया तैः प्रकाश्यते । प्रयोगाभावेन निषिद्धलक्षणानङ्गीकारे तु जपादिमन्त्रवद्याम्यादिमन्त्राणामप्यदृष्टार्थमुच्चारणं प्रकृतग्रहयागाङ्गत्वेन विधीयते । अस्मिंश्च पक्षे स्तौतिशंसत्योर्गुणिविशेष्यकप्रकाशनलक्षकत्वाभावेऽपि लक्षणयोच्चारणपरत्वमेव द्रष्टव्यम् ।

यदि त्वस्मिन् पक्षेऽदृष्टार्थत्वस्याऽऽवश्यकत्वे लक्षणाङ्गीकारे प्रमाणाभावश्शङ्क्येत, ततो याम्यादिविषये गुणविशेष्यकगुणिसम्बन्धकीर्तनात्मकस्तोत्रशस्त्रविधानमेवाऽदृष्टार्थमङ्गीक्रियते । न चैतावता सर्वत्रैव तथा प्रसङ्गः, अनुपपत्तेरभावात् । न च याम्यादिमन्त्रेषु आघारवन्मन्त्रवर्णकल्प्यदेवताङ्गीकारेण तद्दैवत्ययागान्तरस्यैव कल्पयितुं शक्यत्वात्, किमिति सिद्धान्त्यभिप्रेतस्तोत्रशस्त्रादृष्टार्थताङ्गीकरणमिति वाच्यम् । याम्यादिमन्त्रैस्स्तुति-

१. तै. सं. ५. ४. ४. २. पू. मी. ३. १. ९. ३. तै. सं. ६. ६. ४. ५.

भाक्त्वरूपदेवतात्वकल्पनेऽप्याघारवद्द्रव्यसम्बन्धाभावे हविर्भाक्त्वरूपदेवतात्वाकल्पनात् तदेककल्प्ययागानुमानानुपपत्तेः । अत एव जपादिमन्त्रेषु न यागान्तरकल्पनम् । किन्त्वदृष्टार्थत्वमेव ।

न चाऽन्येषु जपादिमन्त्रेष्वदृष्टार्थत्वेऽप्यत्र "यद्यज्ञस्य साधनता व्यापद्येत अतो देवा अवन्तु न इति जपेत् अपि वाऽन्यां वैष्णवीमि" त्यादौ विष्णुप्रकाशकस्य मन्त्रस्योपांशुयाजाङ्गत्वेन विद्वद्वाक्यविहितकर्मणि मान्त्रवर्णिकदेवताकल्पकत्वेनोपपत्तेः किमित्यदृष्टार्थत्वाङ्गीकरणमिति वाच्यम् । विधिवाक्यादेवैतस्य मन्त्रस्य यज्ञसाधनलोपनिमित्तवैगुण्यसमाधानार्थत्वेनाऽवगतत्वादर्थान्तराकाङ्क्षानुपपत्तेः । अतो जपादिमन्त्रवदेव याम्यादिमन्त्राणामदृष्टार्थत्वं सिद्धान्त्यभिप्रेतस्तुतिरूपत्वमेव वाऽङ्गीकर्तव्यम् ।

यत्तु मूले "वाचस्तोमे सर्वा ऋचस्सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसती"ति विहिते शस्त्रे सर्वेषां मन्त्राणां विनियोगाद्याम्यादीनामपि तत्रैवोत्कर्षः । यद्यपि च तत्र दृष्टविधया नोपयोगः, तथाऽप्यदृष्टद्वारैव तदुपपत्तिरित्युक्तम्, तत् वाचस्तोमेऽप्यदृष्टार्थतावश्यकत्वे याम्यादीनामपि सन्निध्यबाधार्थं प्रकृत ग्रह एवाऽदृष्टार्थत्वस्य न्याय्यत्वादुपेक्षितम् । यदि तु वचनेन सन्निधानबाधान्न प्रकृतग्रहसम्बन्ध इत्याशंक्येत, ततो दर्शपूर्णमासादिप्रकरणपठितानां जपादिमन्त्राणामन्येषां च लिङ्गादिविनियुक्तानां वचनेन लिङ्गादिबाधापत्तेर्न तदङ्गत्वसम्भवः । अथ तु वाक्यस्याऽपि सामान्यविषयस्य विशेषनिष्ठलिङ्गादिबाधकत्वायोग उच्येत, ततस्सन्निधानेऽपि तुल्यम् । तस्मात्पूर्वोक्तविधयैवाऽर्थवत्त्वदर्शनं व्याख्येयम् ॥ २३ ॥

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् ॥ २-१-२४ ॥

नैन्द्रस्य प्रगाथस्योत्कर्षस्सम्भवी । स हि न तावत्प्राकरणिक एवैन्द्रयागे, तस्याऽवान्तराधिकारविहितमन्त्रान्तरावरोधेन तत्राऽस्य मन्त्रस्याऽनवकाशात् । नाऽपि क्रतुप्रकरणबहिर्भूते इन्द्रयागान्तरे । तत्र सामान्यसम्बन्धबोधकप्रमाणाभावेनोत्कर्षानुपपत्तेः। इन्द्रशब्देन मनोतास्थाग्निशब्दवन्महेन्द्रप्रतिपादनं तु लक्षणा(१) भिया त्वयैव निरस्तम्। अवशिष्यते तावद्यागवेलायां विशेषणयुक्तप्रकाशनेऽपि मन्त्रे विशेष्यमात्रप्रकाशनं नाऽनुपपन्नमिति।

तत्रेदं वाच्यम्—स्तौतिशंसत्योर्गुणिप्रकारकगुणविशेष्यकबोधानुकूलव्यापारवाचित्वस्य, गुणिनिष्ठगुणतात्पर्यकबोधानुकूलव्यापारवाचित्वस्य वा 'वक्रकेशान्तो देवदत्त' इत्याद विवाऽवधारणात् गुणिप्रकाशनार्थत्वे लक्षणापत्तेस्स्तौतिशंसतिवाच्यस्यैवाऽर्थस्य (२)विधेयत्वावगमात्तस्य च दृष्टार्थत्वासम्भवे अदृष्टार्थत्वकल्पनस्य फलमुखत्वेन प्रामाणिकत्वान्नाऽनुपपत्तिरिति। लोके हि वक्रकेशो देवदत्त इत्यत्र देवदत्ते वक्रकेशत्वप्रतिपादन एव स्तुतिबुद्धिरुत्पद्यते, न पुनर्वक्रकेशत्वस्य देवदत्तविशेष्यताप्रतिपादने। तेन स्तौतिशंसतिपदशक्तिपर्यालोचनया प्रकाशनार्थत्वावगमाददृष्टार्थत्वाङ्गीकारेणाऽपि गुणिप्रकारकगुणविशेष्यकशाब्दबोधानुकूलव्यापाररूपस्तुतिविधायित्वमेव युक्तम् । न च 'प्रयाजशेषेणे'तिवद्दृष्टार्थत्वानुरोधेन लक्षणाङ्गीकरणमप्यदोषः, प्रकाशनस्य लिङ्गकल्प्यश्रुतिबलेनैव प्राप्तिसम्भवे लक्षणयैव तत्प्रतिपादनेऽपि विधिवैयर्थ्यात् । किञ्च दृष्टार्थत्वं किं त्वया मन्त्राणामभ्युपगम्यते ? स्तुतेर्वा ? नाऽऽद्यः, ममाऽपि स्तुतिनिष्पादकत्वेन तत्सत्त्वात् । नाऽन्त्यः स्तुतिस्वरूपस्यैव हानापत्तेः । तस्माद्धातुश्रुतिसंयोगात् प्रकरण एव स्तौतिशंसती स्तुतिरूप-

---

१. दोषात्त्वयैवेति. क. पु. २. विधेयत्वावसायादिति. क. पु.

क्रियोत्पत्तिं विदध्यात्तामिति सूत्रार्थः ॥ २४ ॥

शब्दपृथक्त्वाच्च ॥ २-१-२५ ॥

"द्वादशस्तोत्रोऽग्निष्टोमो द्वादशशस्त्रोऽग्निष्टोम" इति श्रुतं द्वादशत्वं न प्रकाशनलक्षणार्थत्वेऽवकल्पते, प्रकाशनानां प्रत्यृचं प्रतिपदं वा भिन्नत्वेन द्वादशत्वानुपपत्तेः । प्रकाशनत्वेनैक्याङ्गीकारे सुतरां तदनुपपत्तेश्च । अस्मन्मते तु सत्यपि प्रत्यृचं स्तुतिव्यक्तीनां भेदे विधिभेदेन विधेयतत्तदनेकस्तुतिव्यक्तिवृत्तिविधेयतावच्छेदकीभूतवैजात्यावश्यंभावात्तज्जातिगतद्वादशत्वोपपत्तिः । तव तु प्रकाशनस्य सामर्थ्यप्राप्तत्वेनाऽविधेयत्वान्न वैजात्य(१)कल्पने प्रमाणमस्ति ।

किञ्चाऽस्मन्मते वैजात्याकल्पनेऽपि तत्तद्विधिभेदेन विधेयभावनाभाव्यस्याऽनेकस्तुतिजन्यापूर्वस्य भेदावश्यंभावात्तद्गतद्वादशत्वेनाऽपि स्तोत्रादिद्वादशत्वोपपत्तिः । प्रकाशनपक्षे तु तस्य दृष्टार्थत्वेनाऽपूर्वानङ्गीकारात् दृष्टप्रयोजनैक्यस्य च प्रत्यक्षबाधितत्वेन द्वादशत्वानुपपत्तिः । अतो द्वादशशब्देन स्तोत्राणां शस्त्राणां च पृथक्त्वाक्षेपादपि न प्रकाशनलक्षणा ॥ २५ ॥

अनर्थकं च तद्वचनम् ॥ २-१-२६ ॥

प्रकाशनार्थत्वपक्षे आग्निष्टुति "आग्नेया ग्रहा भवन्ती"ति वचनेन प्राकृतग्रहानुवादेनाऽग्निदेवताविधौ कृते प्राकृतदेवताबाधवत्तत्प्रकाशकमन्त्रबाधेनाऽग्निप्रकाशकमन्त्रान्तराणां न्यायादेव प्राप्तेः 'आग्नेयीषु स्तुवत'इति वचनवैयर्थ्यापत्तिः । न चाऽस्य

१. कल्पनायामिति. ख. पु.

प्राकृतमन्त्रेष्वेवाऽग्निपदोहप्रसक्तौ मन्त्रान्तराविधानेनाऽर्थवत्त्वमिति वाच्यम् । "पूयति वा य एतदृचोऽक्षरं यदेनदूहति तस्मादृचं नोहेदि" ति वचनेन ऋगूहनिषेधादर्थप्रकाशनरूपकार्यबलेनाऽऽग्नेयमन्त्रान्तरस्यैव प्राप्तेः । अस्मन्मते तु सत्यपि ग्रहाणामाग्नेयत्वे कर्मासमवेतगुणिनिष्ठस्याऽपि गुणस्य कीर्तनेन स्तोत्रशस्त्रजन्यादृष्टसम्पत्त्युपपत्तेः प्राकृतानामेव मन्त्राणामुच्चारणप्रसक्तौ तन्निवृत्त्यर्थं 'आग्नेयीषु स्तुवत' इति(१) सार्थकम् ॥ २६ ॥

अन्यश्चाऽर्थः प्रतीयते ॥ २-१-२७ ॥

'सम्बद्धं वै स्तोत्रं शस्त्रं चे'ति श्रुत्या स्तोत्रशस्त्रयोस्सम्बन्धप्रतीतेस्सम्बन्धस्य च(२) भेदसाधनत्वात्स्तोत्रशस्त्रयोस्स्वरूपतः फलतो वा वैजात्यकल्पनया भेदोऽवधार्यते । न चाऽसौ प्रकाशनार्थत्वपक्षे सम्भवति । न च (३)स्तोत्रादावपि प्रगानाप्रगानकृतस्सम्भवत्येवेति वाच्यम् । स्वरूपतः फलतो वा भेदभानसम्भवे प्रगानाख्याङ्गकृत(४)भेदस्याऽन्याय्यत्वात् ॥ २७ ॥

अभिधानं च कर्मवत् ॥ २-१-२८ ॥

यदिदं स्तोत्रशस्त्रादिरूपं सामान्याभिधानं, यच्चाज्यपृष्ठप्रउगादिरूपं विशेषाभिधानम्, तदुभयमप्यारादुपकारकत्वपक्षे उपपद्यते, न तु संस्कारकर्मत्वपक्षे । संस्कारस्य संस्कार्यनिरूपणाधीननिरूपणीयस्य संस्कार्येणैवाऽवच्छेदसिद्धौ अवच्छेदकीभूतसंज्ञानपे-

---

१. वचनं नाऽनर्थकमिति. क. ख पु.
२. भेदनिबन्धनत्वादिति. क. ख. पु.　　३. तत्राऽपीति. क. पु.
४. भेदाङ्गीकरणस्येति. ख. पु.

क्षत्वात्। एवं सत्यपि यद्यारादुपकारकत्वग्राहकः स्तौतिशंसतिधातुरूपः श्रुतिसंयोगसंस्कारकर्मत्वबाधको न स्यात्, ततो लिङ्गेन संस्कारकर्मत्वस्यैवाऽवधारणात् "अंशुं गृह्णात्यदाभ्यं गृह्णाती" तिवद्गत्या सत्यप्यवच्छेदकान्तरे संज्ञावच्छिन्नमेव ज्ञातं कृतं कर्माऽभ्युदयकारि भवतीति कल्पनया संज्ञाऽप्यङ्गीक्रियेत, न त्वेतदस्तीत्यत आरादुपकारकत्वमेव युक्तमुत्पश्यामः॥ २८॥

फलनिर्वृत्तिश्च ॥ २-१-२९ ॥

(१)"स्तुतस्य स्तुतमस्यूर्जस्वत्पयस्वदा मा स्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनामहे भक्षीमहि प्रजामिषम्, सा मे सत्याशीर्यज्ञस्य भूयादि" ति मन्त्रे भावनिष्ठान्तेन स्तुतपदेन स्तोत्रक्रियोपादानात्, स्तोत्रस्य मध्ये स्तोत्रमसि, तदेवं भूतं स्तोत्रस्योर्जस्वत्पयस्वद्भूत्वा मां आगम्यात्, इन्द्रवन्तः इन्द्रोपलक्षितदेवतावन्तो वयं, त्वां याचामहे, प्रजामिषं भजेमहीति सेयं यज्ञपदलक्षितस्य स्तोत्रस्याऽऽशीस्सत्या भूयादित्यर्थकस्तोत्रादेव फलं प्रार्थितं, न देवतातः। यद्यपि च नेदं स्तोत्रस्य फलं करणविभक्तिसंयोगाभावेनाऽवगतक्रत्वङ्गभावस्य स्तोत्रस्य मान्त्रवर्णिकफलकल्पनानुपपत्तेः, तथाऽपि प्रधानफलमेवेदं परम्परासम्बन्धेन स्तोत्रात्प्रार्थितं, लक्षणया वा स्तोत्रफलमेव क्रतूपकाराख्यम्। अतश्च स्तोत्रक्रियातः फलप्रार्थनात्तस्या एव प्राधान्यम्, न देवतायाः। इतरथा हि देवतात एव फलं प्रार्थ्येत, प्राधानत्वात्, नाऽङ्गभूतात्प्रकाशनात्। किञ्च प्रकाशनस्य दृष्टफलस्य प्रत्यक्षगम्यत्वान्न

१. तां. ब्रा. १. ६. ३.

प्रार्थनार्हत्वं, स्तोत्रफलस्य त्वदृष्टत्वात्तदर्हत्वमिति विशेषः । अत आराद्रुपकारकाण्येव स्तोत्रशस्त्राणीति सिद्धम् ।

प्रयोजनं प्राकृतग्रहानुवादेन विकृतौ देवतान्तरविधाने 'आग्नेयीषु स्तुवत'इत्येवंविधवचनाभावे प्राकृतानां मन्त्राणामविकारेण प्रयोगः सिद्धान्ते । पूर्वपक्षे प्राकृतऋग्बाधेन वैकृतदैवत्यऋगन्तरागम इति (१)दशमे वक्ष्यते ॥ २९ ॥

इति षष्ठं स्तुतशस्त्राधिकरणम् ॥ ६ ॥

अथ सप्तमं विधिमन्त्राधिकरणम् ॥ ७ ॥

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात ॥ २-१-३० ॥

(विषयसंशयसङ्गतयः)

एवं 'एष ह्यर्थो विधीयत' इत्यनेनोपाक्षिप्तानां विधायकाख्यातानां "तानि द्वैध" मित्यादिना द्वैविध्यमुक्त्वा इदानीं प्रसङ्गादाख्यातस्याऽपि क्वचिद्विधायकत्वं नाऽस्तीति प्रतिपाद्यते । यथा(२) "न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरादधर्षति । देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिस्सचते गोपातिस्सह" इत्यादिमन्त्रे "यस्योभयँ हविरार्तिमार्छे" दित्यादौ ब्राह्मणे च ये यच्छब्दादिसमभिव्याहृता आख्यातशब्दास्ते किं विधायकाः ? उत नेति संशयः । अत्राऽप्यपूर्वभेदोपयोगिन एव विचार्यमाणत्वात्पादाध्यायसङ्गती स्पष्टे । प्रासङ्गिकी त्वनन्तरा ।

१. पू. मी. १०. ४. २४. २. ऋ. सं. ४. ६. २५.

(पूर्वपक्षः)

तत्र 'आर्छेदि'त्यादौ असन्दिग्धलिङ्श्रवणात् यजते ददाति चेत्यादावपि स्तुत्युन्नीतलेडन्तत्वावधारणात् 'यजेत स्वर्गकाम' इतिवदेव विधायकत्वाविघातः । न च यच्छब्दादिना प्रतिबन्धः, यच्छब्देन गोपदार्थस्य सिद्धत्वद्योतनेऽपि "यदाग्नेयोऽष्टाकपाल" इतिवद्यागसाधनत्वेन विध्युपपत्तेः । अत एव कर्तृसमानाधिकरणस्य यच्छब्दस्यैव प्रतिबन्धकता न कर्मसमानाधिकरणस्येति सिद्धान्तिनोऽपि प्रवादः ।

वस्तुतस्तु गुणभूतेन यच्छब्दादिना प्रधानभूतविधिशक्तिप्रतिबन्धस्याऽन्याय्यत्वात्कर्तृसमानाधिकरण(१)यच्छब्दे सत्यपि न विधित्वव्याघातः । किञ्च यच्छब्दादिकं प्राप्तिं द्योतयत्प्रतिबन्धकं वाच्यम् । सा यदि प्राप्तिः प्रमाणान्तरेणाऽस्ति तदा तेनैव प्रतिबन्धसिद्धेः कृतं यच्छब्दादिना । यदि नाऽस्ति ततो यच्छब्दसद्भावेऽपि "य एवं विद्वानग्निं चिनुत" इतिवदप्राप्तार्थकत्वादेव विध्युपपत्तेर्न यच्छब्दादेः प्रतिबन्धकता संभवति ।

वस्तुतस्तु एतस्य मन्त्रस्य गोद्रव्यकानुबन्ध्यपशुपुरोडाशानुनिर्वाप्यदैविकहविर्यागे चरुद्रव्यके गोदैवत्ययाज्यात्वेन विनियुक्तत्वात्तत्र च चरुद्रव्यकत्वाद्गोद्रव्यकत्वाभावेन तत्र विनियुक्तस्याऽप्यस्याऽप्राप्तस्वतन्त्रगोद्रव्यकयागविधायकत्वोपपत्तिः । न च साक्षाच्छेषिणि दैविकहविर्यागे गोद्रव्यकत्वाप्राप्तावपि तच्छेषिण्यामनुबन्ध्यायां गोद्रव्यकत्वस्य प्राप्तत्वादविधायकत्वोपपत्तिरिति वाच्यम् । एवं यथाकथञ्चित्प्राप्तिसंभवेऽप्यभ्यासात्कर्मान्त-

---

१. यच्छब्दसत्वेऽपीति. क. ख. पु.

रत्वोपपत्तेः । अतश्च 'यजेत स्वर्गकाम'(१) इतिविध्याख्यातव-न्मन्त्रगतस्याऽप्याख्यातस्य विधिरूपैकप्रयोजनकत्वमेव । वि-धायकशब्दत्वस्योभयत्र समानत्वादिति सूत्रार्थः । अत्र च मन्त्रग्रहणं यच्छब्दादिसमभिव्याहृताख्यातमात्रोपलक्षणम्, न तु स्वतन्त्रम्, "वसन्ताय कपिञ्जलानालभेते" त्यादावभियुक्तप्रसिध्या मन्त्रत्वेऽपि विधायकत्वाङ्गीकारात् । 'यस्योभयमि'त्यादौ च ब्राह्मणे यच्छब्दादिसमभिव्याहारे तदनङ्गीकाराच्च । अतश्च सर्वस्याऽप्यत्रोदाहरणत्वेऽपि प्रायशो यच्छब्दादि-समभिव्याहारस्य(२) तेष्वेव सत्त्वात्सूत्रे मन्त्रग्रहणम् ॥ ३१ ॥

अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ २-१-३२ ॥

(सिद्धान्तः)

नैते विधायकाः, 'यजत' इत्यादीनां लट्लेट्साधारणत्वेन विध्यर्थकत्वानिश्चयात् । न च(३) स्तुत्या तन्निश्चयः, विधेरभावे स्तुतेरेवाऽनिश्चयेन तस्यास्तदानिश्चायकत्वात् । न च "वसन्ताय कपिञ्जलानालभेते"त्यादिवदप्राप्तार्थकत्वमेव तन्निश्चायकम्, गो-द्रव्यकस्य यागदानादेरनूबन्ध्यारूपस्य तदन्यस्य वा बहुशः प्राप्तत्वेन तदसिद्धेः । अत एव न विधिपुनश्श्रवणरूपादभ्यासात्कर्मान्तरत्वं शङ्क्यम्, विधित्वस्यैवाऽनिश्चयेनाऽभ्यासस्वरूपाभावात् । विध्यभावेऽपि पुनश्श्रुतिमात्राद्भेदस्तु पुनश्श्रुतेस्स्मरणार्थत्वेनाऽप्युपपत्तेरनन्यपरत्वाभावादयुक्तः । किञ्च यद्यप्यत्र

१. इत्यख्यातवदिति क. पु. २. मन्त्रेष्वेवेति. क. ख. पु.
३. स्तुतिरेव तन्निश्चायिकेति क. ख. पु.

विधायको लिङादिरभ्रोष्यत, तथाऽपि यच्छब्दादिना विधिश-क्तिप्रतिबन्धान्नाऽस्य विधायकत्वोपपत्तिः ।

तथा हि—यच्छब्दस्तावत्स्वसमभिव्याहृतार्थस्य सिद्धतां द्योतयन्प्राप्तिमपेक्षते । अस्ति चाऽत्र सा । अतो गोद्रव्यकयाग-दानादेरनूद्यमानस्याऽज्ञातज्ञापनैकस्वभावविधिविषयत्वायोगस्स्प-ष्ट एव । न च यच्छब्दस्य स्वार्थमात्रे सिद्धताद्योतकत्वाद्गोस्वरू-पानुवादेऽपि तस्य साधनत्वेन विध्युपपत्तिरिति वाच्यम् । यः पाकं करोति स भुङ्क्त इत्यादौ यत्तच्छब्दयोस्स्वसमाभिव्याहृतमात्रे सिद्धत्वद्योतकताव्युत्पत्तेः । अतश्च याभिर्यजते, याश्च गा ददा-ति, ता न नश्यन्ति, न च तस्करो दभ्नोति, न वासां अमि-त्रकृता व्यथा अभिभवति, गोस्वामी च ताभिस्सह चिरं नन्दतीति यच्छब्देन समभिव्याहृते गोद्रव्यके यागदाना-दावपि सिद्धताप्रतीतेर्न विधेयतोपपत्तिः । यच्छब्दस्य समभि-व्याहृतवृत्तिसिद्धताद्योतकत्वादेव च यत्र कर्तृसमभिव्याहारस्त-त्र कृत्याश्रयत्वरूपस्य कर्तृत्वस्य सिद्धताप्रतीतौ कृतेरपि तत्प्रती-तेर्विधेयत्वानुपपत्त्या विधिशक्त्यनुपपत्तिः ।

यत्र तु कर्ममात्रसमभिव्याहृतो यच्छब्दस्तच्छब्दसमभिव्या-हृतश्च विधिः, तत्र सत्यपि कर्मस्वरूपस्याऽनुवादे कर्तव्यत्वेन वि-धानोपपत्तेः न विधिशक्तिप्रतिबन्धकता यच्छब्दस्य । प्रकृते तु विधेर्यच्छब्देनैव समभिव्याहाराद्युक्ता प्रतिबन्धकतेति विशेषः । एवं सत्यपि यदि कथञ्चिदप्यालोच्यमाने प्राप्तिर्न सम्भाव्येत, त-तो 'यदाग्नेयोऽष्टाकपाल' इतिवद्यच्छब्दस्य स्वार्थमात्र(१)सिद्धत्व-द्योतकतामङ्गीकृत्य विधेर्विधायकत्वोपपत्तेर्न शक्तिः प्रतिबध्येत ।

१. प्रसिद्धिद्योतकेति ख. पु.

न त्वेतदस्ति, गोद्रव्यकस्य यागदानादेर्बहुशः प्राप्तत्वात् ।

यत्तु सत्यपि यच्छब्दस्य विधिविरोधित्वे प्रधानभूतत्वाद्विध्यनुग्रह एव न्याय्यः, न गुणभूतयच्छब्दानुग्रह इत्युक्तम्, तत् 'उच्चैर्ऋचा क्रियत' इत्यादौ प्रधानभूतस्याऽप्युपसंहारस्थस्य विधेरुपक्रमस्थेन गुणभूतेनाऽप्यर्थवादेन बाधस्य वक्ष्यमाणत्वादकिञ्चित्करम् ।

वस्तुतस्तु विधिवदेव यच्छब्दस्याऽपि प्रधानभूतार्थभावनान्वयित्वान्न विधिं प्रति तस्य गुणत्वम् । यदि परं पदान्तरत्वात्तदपेक्षया विप्रकर्षश्शङ्क्येत, ततः "ऐन्द्रं पञ्चशराव" मित्यनेन वाक्यभेदापत्तेः (१)'हेतुहेतुमतोरि'त्यनुशासनैवयर्थ्यापत्तेश्च विधिशक्तिप्रतिबन्धोऽनुसन्धेयः ।

एवं यदिशब्दस्याऽपि निमित्तपरत्वेन प्राप्तिद्योतकत्वाद्विधिविरोधित्वं द्रष्टव्यम् । अतश्चोभयत्राऽपि लिङ्श्रवणं 'हेतुहेतुमतोरि'ति स्मृतेर्हेतुरूपनिमित्तत्वादिपरम् । यजते ददातीत्यत्र तु (२)लिङोऽश्रवणाल्लडन्तत्वस्यैव निश्चयः । एवं "अग्नीदग्नीन्विहरे" त्यत्र सम्बोधनविभक्तेर्वक्त्रभिमुखश्रोतृमात्रविषयत्वाद्वेदे च वक्तुरभावाद्विधेश्चाऽभिमुखानभिमुखसर्वपुरुषसाधारणत्वाद्विरुद्धस्वभावेनाऽऽमन्त्रणेन विधिशक्तिप्रतिबन्धः । अतश्च लोडप्यत्र नाऽलौकिकविध्यर्थकः, किन्तु(३) "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चे" ति चकारात् प्रैषार्थक एव, लौकिकप्रवर्तनार्थको वा ।

यत्तु न्यायसुधाकृता सम्बोधनविभक्तिसमभिव्याहृतस्य लिङादेः प्रमाणान्तरप्रवृत्तपुरुषप्रवर्तकत्वावगमादप्रवृत्तप्रवर्तनात्मकविधिशक्तिव्याघात इत्युक्तम्, तत् लोके प्रमाणान्तरानधिगमेऽपि देवदत्त गामानयेत्यादौ सम्बोधनविभक्तिप्रयोगदर्शनादुपे-

१. पा.सू. ३.३.१५६. २. लिङभावादिति क.पु. ३. पा.सू.३.३.१६३.

क्षितम् । एवं ददामि गृह्णामीत्यादौ तावल्लडन्तत्वादेव न विधिशक्तिः । विशेषतश्चाऽस्मदर्थविषयोत्तमपुरुषान्तत्वेन परप्रवर्तनात्मकविधिविरोधित्वम् । अतश्च यत्राऽपि अहं दद्यामित्यादौ लिङः श्रवणमुत्तमपुरुषे, तत्राऽपि लिङः स्वनिष्ठप्रवर्तनापरत्वमेव लक्षणया, न तु परप्रवर्तनात्मकविधिवाचित्वमिति विवेकः । अतश्च यच्छब्दादिचतुष्टयस्य प्रतिबन्धकत्वात् तत्समभिव्याहृतस्य लिङादेर्न विधायकत्वम्, अपि तु प्रमाणान्तरसिद्धानुवादकत्वमेव । न चैवमानर्थक्यम्, ब्राह्मणगतानां निमित्तादिप्रतिपादकतया विध्यपेक्षितोद्देश्यसमर्पणेनोपयोगस्य वक्ष्यमाणत्वात् । मन्त्रगतानां तु यद्यपि विधेयसमर्पणेन वा उद्देश्यसमर्पणेन वा न विध्युपयोगः । नाऽपि स्तावकत्वेन, दूरस्थानां पदैकवाक्यत्वेन तावत्तस्याऽनुपपत्तेः, पदार्थविधया स्तुतिमात्रलक्षणायामपि स्वार्थबोधे समाप्त्यभावेन वाक्यैकवाक्यत्वेनाऽप्यनुपपत्तेश्च, तथाऽपि परिशेषान्मन्त्राधिकरणन्यायेन प्रयोगकाले ऽर्थाभिधायकत्वेनैव । अर्थोऽपि च यत्र प्रयोगसमवेतस्तत्र तदभिधानं दृष्टार्थम्, नो चेददृष्टार्थमिति विवेकोऽपि तत्रैव द्रष्टव्यः ।

सूत्रे च अपिवाशब्देन मन्त्रब्राह्मणसाधारण्येन विधायकत्वे निरस्ते ब्राह्मणगताख्याते निमित्तपरत्वं वक्ष्यमाणत्वादुपेक्ष्य मन्त्रगते तस्मिन्नर्थाभिधानव्यापारकत्वं मन्त्राधिकरणसिद्धमेव स्मारितमिति द्रष्टव्यम् । प्रयोजनं स्पष्टम् ॥ ३२ ॥

इति सप्तमं मन्त्राविधायकत्वाधिकरणम् ॥ ७ ॥

अथाऽष्टमं मन्त्रलक्षणाधिकरणम् ॥ ८ ॥

तच्चोदकेषु मन्त्राख्या ॥ २-१-३२ ॥

(विषयसंशयसङ्गतयः)

पूर्वाधिकरणे उपलक्षणतया मन्त्रशब्दप्रयोगादुपस्थितस्य मन्त्रस्येह लक्षणं प्रसङ्गादुच्यते। तत्र च(१) "अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रयीविदा विदुः। ऋचस्सामानि यजूँषि। सा हि श्रीरमृता सता" मिति मन्त्रे प्रयुक्तस्य मन्त्रपदस्याऽर्थकथनाद्वेदवाक्यार्थविचारवत् पदार्थविचारस्याऽपि शास्त्रे कर्तव्यत्वेन प्रतिज्ञानाच्छास्त्रसङ्गत्युपपत्तिः। मन्त्रनियमादृष्टरूपापूर्वभेदोपयोगिमन्त्रभेदसिध्यर्थत्वाच्च पादाध्यायसङ्गतिः। यद्यपि तत्तददृष्टत्वावच्छिन्नं प्रति तत्तदानुपूर्वीकत्वेनैव कारणता, तथाऽपि 'यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि स' इत्यभिप्रेत्येदम्। प्रासङ्गिकी त्वनन्तरा।

तत्र यथाश्रुतसूत्रस्वारस्यात्तावत् प्रयोगकाले अर्थप्रकाशकत्वं मन्त्रत्वमिति लक्षणं प्रतीयते। अत्र प्रयोगकाल इति विशेषणान्न विधावतिप्रसङ्गः। जपेष्वपि चाऽदृष्टार्थमर्थप्रकाशनान्नाऽव्यापकत्वम्। वस्तुतस्तु मन्त्रकाण्डसमाम्नाते(२) 'वसन्ताय कपिञ्जलानालभेते'त्यादौ मन्त्रे विधायकत्वाङ्गीकारेणाव्यापकत्वापत्तेः। ब्राह्मणस्याऽपि च मन्त्राभावे स्मारकत्वस्य(३) पञ्चमे वक्ष्यमाणत्वेन तत्राऽतिव्याप्त्यापत्तेः। अनृक्सामादिमन्त्रेषु च कथमप्यर्थप्रकाशकत्वायोगेनाऽव्यापकत्वाच्चैतल्लक्षणायोगेनाऽभियुक्तानां मन्त्रपदवाच्यत्वप्रकारको यो निश्चयस्तद्विषयत्वं मन्त्रत्वमिति लक्षणमेव

---

१. तै. ब्रा. १. २. १. २. मा. सं २४. २०. ३. पू. मी. ५. १. ४.

सर्वव्यापकं सूत्रकृदभिप्रेतमिति प्रतीयते ।

ननु तत्राऽपि मन्त्रपदवाच्यतावच्छेदकानिश्चये वाच्यत्वप्रकारकनिश्चयायोगेन कथं लक्षणप्रसिद्धिः ? न हि मन्त्रत्वं नाम जातिः, यत् मन्त्रपदशक्यतावच्छेदकत्वेन निश्चीयेत, तथात्वे वेदत्वऋक्त्वादिवदेव गत्वादिना साङ्कर्यापत्तेः, अनेकवर्णाभिव्यक्तीनां यौगपद्याभावेन मन्त्रत्वस्याऽभिव्यक्त्यनापत्तेश्च । नाऽप्युपाधिः, स हि यदि मन्त्रपदवाच्यत्वप्रकारकप्रसिद्धिविषयत्वाख्यः, ततोऽन्योन्याश्रयता । यदि त्वन्यः, ततस्तस्यैव लक्षणत्वोपपत्तेर्नैतस्य सूत्रकृदभिप्रेततेति चेत्—न; अखण्डोपाधिरूपस्यैव वेदत्ववन्मन्त्रत्वस्य मन्त्रपदवाच्यतावच्छेदकत्वाङ्गीकारात् । अतश्च तदवच्छेदेन वाच्यत्वेऽवधारिते तत्प्रकारकनिश्चयविषयत्वस्य लक्षणत्वोपपत्तिः ।

ततश्च सूत्रम्——तदर्थाभिधानं चोदकं प्रयोजकं येषां तेषु मन्त्राख्येत्येवं यथाश्रुतमाभासमानमपि, तच्चोदकेषु मन्त्राध्येतृषु या मन्त्राख्या मन्त्रपदवाच्यत्वप्रकारिका प्रसिद्धिः सैव विषयतासम्बन्धेन मन्त्रलक्षणमिति व्याख्येयम् । यानि तु वृत्तिकारेणाऽस्यन्तत्वस्वान्तत्वादीनि मन्त्रलक्षणान्युक्तानि तानि अस्यन्तत्वस्य स्वान्ते, स्वान्तत्वस्य चास्यन्तेऽभावेनाऽव्यापकत्वापत्तेर्भाष्यकारेणैव दूषितानीति ग्रन्थगौरवभयान्नेह प्रपञ्च्यन्ते ॥ ३२ ॥

इत्यष्टमं मन्त्रलक्षणाधिकरणम् ॥ ८ ॥

अथ नवमं ब्राह्मणलक्षणाधिकरणम् ॥ ९ ॥

शेषे ब्राह्मणशब्दः ॥ २-१-३४ ॥

मन्त्रलक्षणप्रसङ्गात् (१) "एतद्ब्राह्मणान्येव पञ्च हवींषी"त्यत्र वेदे प्रयुक्तस्य ब्राह्मणशब्दस्याऽर्थपरिज्ञानार्थं ब्राह्मणलक्षणमुच्यते--मन्त्रातिरिक्तवेदत्वं ब्राह्मणत्वमिति । अतश्च विधिवाक्यानि अर्थवादा उपनिषदश्च सर्वमपि ब्राह्मणम् । अत्र च ब्राह्मणत्वमपि मन्त्रत्ववदेवाऽखण्डोपाधिरूपं ब्राह्मणपदशक्यतावच्छेदकम् । अन्यथा मन्त्रातिरिक्तवेदत्वरूपब्राह्मणत्वस्येव ब्राह्मणातिरिक्तवेदत्वरूपस्य मन्त्रत्वस्याऽपि वक्तुं शक्यत्वेन विनिगमनाविरहात् । अतश्च यत्राऽभियुक्तानां ब्राह्मणमिति प्रसिद्धिः, तत् ब्राह्मणमिति लक्षणस्याऽपि मन्त्रवद्वक्तुं शक्यत्वेऽपि, रुचिवैचित्र्यान्मन्त्रातिरिक्तवेदत्वमेव ब्राह्मणं सूत्रकृता लक्षितम् । अथवा नैवेदं सूत्रं लक्षणाभिधानार्थम्, अपि तु शेषे मन्त्रातिरिक्तवेदभागे ब्राह्मणशब्दस्य येन केनचिल्लक्षणेन सुज्ञानत्वान्न मया लक्षणं वाच्यमिति लक्षणावक्तव्यत्वाभिधानार्थमेव व्याख्येयम् । अत एवाऽग्रे मन्त्रप्रस्तावोऽपि सङ्गच्छते । अत्राऽपि यानि वृत्तिकारेणेतिकरणबहुलत्वादीनि ब्राह्मणलक्षणान्युक्तानि तान्यव्यापकत्वापत्तेर्भाष्यकारेणैव दूषितानीति नेह प्रपञ्च्यते ॥ ३४ ॥

इति नवमं ब्राह्मणलक्षणाधिकरणम् ॥ ९ ॥

---

१. तै. ब्रा. १. ७. १.

अथ दशमं ऊहाद्यमन्त्रताधिकरणम् ॥ १० ॥

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागस्स्यात् ॥ २-१-३५ ॥

(विषयसंशयौ)

'तच्चोदकेषु मन्त्राख्ये'त्यनेन लक्षणद्वयसूचनात्कस्य मुख्यत्वं कस्य वाऽभ्युच्चयतेति विवेकायेदमाधिकरणम् । प्रकृतितोऽतिदेशेन प्राप्ते "अग्नये जुष्टं निर्वपामी"ति मन्त्रे कार्यवशेन विकृतौ प्रक्षिप्यमाणमग्निपदस्थाने सूर्यादिपदमूहः । "आर्षेयं वृणीत" इति विधिवशादुच्चार्यमाणः काश्यपादिः प्रवरः। 'यजमानस्य नाम गृह्णाती'त्यादिविधित उच्चार्यमाणं देवदत्तपदं नाम । तदेतान्यूहप्रवरनामधेयानि किं मन्त्राः उत नेति विचारः । केचित्तु मन्त्रब्राह्मणात्मके वेदस्य द्वैराश्ये निरूपिते प्रसङ्गात्प्रत्यक्षपठित एव वदे द्वैराश्यं, न त्वनुमित इति वक्तुमूहादीनां द्वैराश्यबहिर्भावोऽनेन प्रतिपाद्यत इत्याहुः । तेषां 'अनाम्नातेष्वमन्त्रत्वत्वमि' तिवद्ब्राह्मणत्वमित्यपि सूत्रापत्तेः उपेक्षैव युक्ता ।

(पूर्वपक्षः)

तत्र प्रयोगकाले अर्थाभिधायकस्यैव मन्त्रपदवाच्यत्वादूहादीनां चाऽर्थाभिधायकत्वस्य स्पष्टत्वात् मन्त्रपदैकवाक्यत्वाच्चैषां मन्त्रत्वम् । अन्यथा ह्यमन्त्रैकवाक्यतापन्नानां मन्त्राक्षराणामपि श्लोकैकवाक्यतापन्नमन्त्राक्षरवदमन्त्रत्वापत्तिः । ऊहे तु मन्त्रान्तर्गताग्निपदत्यागादप्यवशिष्टाक्षरेषु सा । अस्मन्मते तु मन्त्र-

भूताग्निपदयुक्तानामिव मन्त्रभूतसूर्यादिपदयुक्तानामपि मन्त्रत्वोपपत्तेर्नाऽयं दोषः । तस्मादूहादीनामपि मन्त्रत्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—पूर्वसूत्रव्युत्पादिताव्याप्त्यतिव्याप्त्यादिदूषणवशेनैतल्लक्षणायोगस्य स्पष्टत्वादभियुक्तप्रसिद्धिविषयत्वस्यैव तल्लक्षणत्वं वाच्यम् । अतश्चोहादीनां तदभावेन मन्त्रत्वायोगस्स्पष्ट एव । न चैतावता तदेकवाक्यतापन्नमन्त्राक्षराणाममन्त्रत्वापत्तिः, मन्त्रत्वप्रत्यभिज्ञानस्य दृढत्वात् । अत एव कर्मकाले याज्यान्तःप्लुतिकरणेऽपि न मन्त्रत्वहानिः । यत्र तु श्लोकाद्येकवाक्यतापन्नद्वित्रिमन्त्राक्षरेषु न मन्त्रत्वप्रसिद्धिरभियुक्तानाम्, तत्र मन्त्रत्वे प्रमाणाभावस्स्पष्ट एव । अतश्चोहादिष्वभियुक्तप्रसिद्ध्यभावेनाऽमन्त्रत्वेऽपि तदेकवाक्यतापन्नानामक्षरान्तराणां तत्सत्त्वान्मन्त्रत्वोपपत्तिः । एवञ्च 'ऐरं कृत्वोद्गेयमि'त्यादाविरापदस्य मन्त्रत्वप्रसिद्ध्यभावेनाऽमन्त्रत्वेऽपि तदेकवाक्यतापन्नाक्षरान्तराणां मन्त्रत्वोपपत्तिः । गिरापदे मन्त्रत्वप्रसिद्धिस्तु अध्ययनकाले, पारायणादौ चोपयुज्यत इति द्रष्टव्यम् ।

यत्तु वार्तिके इरापदस्य 'ऐरमि'ति विधिवाक्ये तद्धितान्तर्गतत्वेनाऽऽम्नातत्वादस्यैव मन्त्रत्वमित्युक्तम्, तत् ब्राह्मणे समाम्नातस्याऽपि मन्त्रप्रसिद्ध्याविषयत्वेन मन्त्रत्वायोगात् 'वसन्ताय कपिञ्जलानालभेते'त्यादिवन्मन्त्रकाण्डे पाठाभ्युपगमेऽपि वा ऐरपदस्यैव पठितत्वेन मन्त्रत्वापत्तेस्तद्विधेयस्येरापदस्य वस्तुतः पाठाभावेन मन्त्रत्वानुपपत्तेरतिशयार्थमिति द्रष्टव्यम् । एवं यत्राऽपि सूक्तवाकादौ "आशास्तेऽयं यजमानोऽसा" विति सर्वनामसंयुक्तमन्त्राम्नानम्, तत्राऽप्यसाविसस्य स्वाध्यायकाले, मन्त्रस्याऽपि कर्मकाले तत्पदस्थाने पठनीयस्य देवदत्तादिपदस्य स्वरूपेणाऽपाठादभि-

युक्तप्रसिद्धिविषयत्वानुपपत्तेरमन्त्रत्वम् । न च सर्वनाम्नि मन्त्रताप्रसिद्धेस्तत्रानर्थक्ये तदनुमेयदेवदत्तादिपदविषयत्वकल्पनान्मन्त्रत्वोपपत्तिरिति वाच्यम् । सर्वनाम्न्यपि मन्त्रत्वप्रसिद्धेस्स्वाध्यायोपयुक्तत्वात् । अतोऽत्राऽपि देवदत्तादिपदे मन्त्रत्वोक्तिरतिशयार्थैव वार्त्तिके द्रष्टव्या । तस्मादभियुक्तप्रसिध्यविषयत्वाद्युक्तमूहादीनाममन्त्रत्वम् ।

प्रयोजनं--पूर्वपक्षे ऊहादिभ्रेषे मन्त्रभ्रेषनिमित्तं प्रायश्चित्तम् । सिद्धान्ते त्वङ्गभ्रेषनिमित्तकमेव । मन्त्रत्वनिमित्तकशब्दविकारादिसदसद्भावश्च । सूत्रं स्पष्टम् ॥ ३५ ॥

इति दशमं ऊहाद्यमन्त्रताधिकरणम् ॥ १० ॥

अथैकादशं ऋग्लक्षणाधिकरणम् ॥ ११ ॥

तेषामृग्यत्राऽर्थवशेन पादव्यवस्था ॥२-१-३६॥

एवं लक्षणस्थिरीकरणेन (१)मन्त्रपदे व्युत्पादितेऽधुना प्रसङ्गात्तदवान्तरभेदरूपस्य ऋगादेः "अहे बुध्निय मन्त्रं मे गोपाये"ति वेदस्थऋगादिपदार्थज्ञानार्थं लक्षणमुच्यते। तेषां मन्त्राणां मध्ये यत्र पादव्यवस्था 'त्रिपदा गायत्री' 'चतुष्पदा बृहती' त्यादिका सा ऋक् । अथवाऽस्मिन्नक्षरे पादसमाप्तिः,नाऽस्मिन्निति पादव्यवस्था यत्र सा ऋक्, वृद्धव्यवहारे तादृशमन्त्र एव ऋक्शब्दप्रयोगात् । सा च पादसमाप्तिः क्वचिदर्थवशेन । यथा(२) 'अग्निमीळे पुरोहितमि'त्यत्र । न चाऽत्र ऋगर्थापर्यवसानात्कथमर्थवशेन

१ मन्त्रपदार्थ इति. क, ख. पु. २. ऋ. सं. १. १. १.

पादस्य समाप्तिः ? ऋगर्थापर्यवसानेऽपि 'ईळ' इत्याख्यातपदाद्वान्तरार्थपर्यवसानोपपत्तेः । एवमपरयोरपि पादयोरेतदाख्यातानुषङ्गेणैवाऽर्थपर्यवसानं द्रष्टव्यम् । अतो युक्ताऽर्थवशेन पादव्यवस्था । क्वचिच्च(१) "अग्निः पूर्वेभिर्ऋषिभि" रित्यादौ लघुगुर्वक्षरसाम्याख्यवृत्तवशेन "अग्निमील" इत्यादौ चाऽक्षरसङ्ख्यानियमलक्षणछन्दोवशेन, (२)"तमुस्नामिन्द्रं न रेजमान"मित्यादौ चाऽल्पवैषम्येणैव पादव्यवस्था । अत एव सूत्रे अर्थवशग्रहणं वृत्तवशादेरुपलक्षणार्थम् । तदपि च न लक्षणान्तर्गतम्, पादव्यवस्थावन्मन्त्रत्वरूपस्यैव लक्षणस्याऽनातिप्रसक्तत्वात् ॥ ३६ ॥

इत्येकादशं ऋग्लक्षणाधिकरणम् ॥ ११ ॥

अथ द्वादशं सामलक्षणाधिकरणम् ॥ १२ ॥

गीतिषु सामाख्या ॥ २-१-३७ ॥

अत्र 'तेषामि'त्यनुवृत्त्या मन्त्रगतगीतित्वस्य सामशब्दार्थता लभ्यते । अतश्च न लौकिकगीतावतिप्रसङ्गः । अभियुक्तव्यवहाराच्चाऽस्याऽपि शब्दार्थत्वावधारणम् । न चैवं वैदिकगीति(३)विशिष्टमन्त्रेऽभियुक्तप्रयोगान्मन्त्रस्याऽपि वाच्यतापत्तिः, मन्त्राणां व्यक्तिन्यायेन लक्षणयाऽपि भानोपपत्तौ अतिरिक्तशक्तिकल्पने प्रमाणाभावात् । विस्तरेण चैतत्(४)सप्तमे उपपादयिष्यामः । न चैवं पौनरुक्त्यम्, सामश-

१ ऋ. सं. १. १. १. २. ऋ. सं. ७. ६. १.

३ विशिष्ट मन्त्रस्याऽपि वाच्यतापत्तिरिति. ख. पु.

४ पू. मी. ७. २. १.

न्दस्य गीतिमात्रवाचित्वे तद्विशिष्टमन्त्रवाचित्वे वा, उभयथा ऋग्यजुर्भ्यां(१)विवेकोपपत्तेर्गीतिमात्रवाचित्वस्येहाऽनुपयोगेनाऽवाच्यत्वात्, सप्तम एव ऋगन्तरे अतिदेशसिध्यर्थमवश्यवाच्यत्वात् । इह सप्तमसिद्धस्यैव गीतिमात्रवाचित्वस्य अनागतावेक्षणेन शिष्यहितार्थं कथनेन पौनरुक्त्यनापत्तेः । यथा च तस्य नाऽऽकृत्यधिकरणेन पौनरुक्त्यं, तथा सप्तम एव उपपादयिष्यामः । यत्तु(२) नवमे पुनर्गीतिमात्रवाचित्वकथनं, तदुत्तरविवक्षार्थं(३) स्मरणार्थमिति तत्रैव वक्ष्यते ॥ ३७ ॥

इति द्वादशं सामलक्षणाधिकरणम् ॥ १२ ॥

अथ त्रयोदशं यजुर्लक्षणाधिकरणम् ॥ १३ ॥

शेषे यजुश्शब्दः ॥ २-१-३८ ॥

ऋक्सामभिन्नं यत्प्रश्लिष्टाक्षरमन्त्रजातं तद्यजुः । स्तोभाक्षराणामपि यजुष्ट्वान्नातिव्याप्तिः ॥ ३८ ॥

इति त्रयोदशं यजुर्लक्षणाधिकरणम् ॥ १३ ॥

१ विवेकसिद्धेरिति. क. ख. पु. २ पू. मी. ९. २. १.
३ स्मरणमात्रमिति. क. ख. पु.

अथ चतुर्दशं निगदाधिकरणम् ॥ १४ ॥

निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ २-१-३९ ॥

(विषयसंशयौ)

'शेषे यजुश्शब्द' इत्येतदाक्षेपेणेदमारभ्यते । सन्ति निगदा नाम प्रायशः परसम्बोधनार्था मन्त्राः 'अग्नीदग्नीन् विहरे'त्याद-यः । ते किं यजूंष्येव, उत भिन्ना इति विचारः ।

(पूर्वपक्षः)

तत्र निगदानां यजुष्ट्वे "उपांशु यजुषे"ति वचनेनोपांशु-त्वप्राप्तेः "उच्चैर्निगदेने" ति वाक्यविहितोच्चैस्त्वानुपपत्तिः । न च विशेषविहितेन सामान्यविहितस्य बाधः, विशेषविधेस्स्ववि-षयवृत्तिभेदबोधनेनाऽप्युपपत्तौ सामान्यस्याऽपि वाक्यस्य स-ङ्कोचे प्रमाणाभावात् । न च परप्रत्यायनरूपकार्यानुरोधेनोपां-शुत्वविधेस्सङ्कोचादु'च्चैर्निगदेने'त्यस्याऽनुवादकत्वोपपत्तेर्न भेद-बोधकतेति वाच्यम् । मन्त्रगताल्लिङ्गप्रमाणकपरप्रत्यायनरूपकार्या-नुरोधेन वाक्यस्याऽपि ब्राह्मणगतस्य सङ्कोचायोगात् 'नमः प्रवक्त्रे' (१)'देवेद्धो मन्विद्ध' इत्यादीनां परसम्बोधनार्थत्वस्या-ऽप्यभावाच्च । सत्यपि परसम्बोधनार्थत्वे उपांशुत्वव्यतिरिक्त-मन्द्रादिस्वराणामपि पक्षे प्राप्तत्वादुच्चैस्त्वानुवादानुपपत्तेश्च । अ-तश्चोच्चैर्निगदेनेत्यस्य विधित्वावश्यंभावाद्भेदबोधनादपि च तदु-पपत्तेर्न सामान्यस्याऽपि वाक्यस्य सङ्कोचकल्पनावसरः । तस्मा-दर्थान्तरं निगदाः । सूत्रं स्पष्टम् ॥ ३९ ॥

---

१ तै. ब्रा. ३. ५. ३.

व्यपदेशाच्च ॥ २-१-४० ॥

इमे निगदाः, इमानि यजूंषीति संज्ञाभेदादपि ज्योतिरादिवद्भेदकतोपपत्तेरर्थान्तरम् । एवञ्च "मन्त्र एव खल्वयं निगदभूतो भवति तस्माद्यजु" रिति सुब्रह्मण्यावाक्यशेषे निगदस्य यजुष्ट्वसङ्कीर्तनं योगेन यागसाधनत्वमात्रपरम्, सुब्रह्मण्यामात्रस्यैव वा यजुष्ट्वज्ञापकमिति द्रष्टव्यम् ॥ ४० ॥

यजूंषि वा तद्रूपत्वात् ॥ २-१-४१ ॥

(सिद्धान्तः)

नैतदेवम्, 'अहे बुध्निये' ति मन्त्रे मन्त्रावान्तरभेदानामृगादिमन्त्राणां त्रयाणामेवाऽनुकीर्तनेन निगदस्य भेदेनाऽननुकीर्तनात्, 'मन्त्र एव खल्वयं निगदभूतो भवती'त्यत्र ऋक्सामभिन्नमन्त्रत्वस्य सुब्रह्मण्यानिगदे यजुष्ट्वसाधकत्वेनोक्तस्य निगदान्तरेष्वपि सत्त्वाच्च । न चाऽत्र यौगिको यजुश्शब्दः, जपादिसाधनमन्त्रेऽपि प्रश्लिष्टपठिते यजुश्शब्दप्रयोगेण तस्य रूढत्वावगमाद्यौगिकार्थबोधकत्वानुपपत्तेः । तस्माद्यजूरूपप्रत्यभिज्ञानाद्यजुष्ट्वमेव ॥ ४१ ॥

यत्तु विरुद्धधर्मकत्वाद्भेद इति तत्रोत्तरम्—

वचनाद्धर्मविशेषः ॥ २-१-४२ ॥

(१)"वेदो वा प्रायदर्शनादि" त्यत्र तृतीये वेदोपक्रमानुरोधेनोच्चैस्त्वादेः ऋग्वेदादिविहितकर्माङ्गमन्त्रमात्राङ्गत्वस्य स्थापयिष्यमाणत्वेन भवन्मतेऽपि 'उच्चैर्निगदेने'त्यस्य 'उपांशु यजुषे'ति

---

१ जै. सू. ३. ३. २.

वाक्यसङ्कोचकत्वावश्यंभावाद्भेदानुमापकत्वानुपपत्तेः, सत्यपि चोच्चैस्त्वादेः ऋगादिधर्मत्वे परप्रत्यायनरूपकार्यानुरोधेनैवोपांशुत्वानुपपत्तेः 'उपांशु यजुषे'त्यस्य निगदविषयत्वानुपपत्तेः, सत्यपि निगदानां यजुष्ट्वे 'उच्चैर्निगदेने'त्यस्य निगदेषु पक्षप्राप्तमन्द्रादिव्यावर्तनफलकोच्चैस्त्वनियामकत्वोपपत्तेर्भेदानुमापकत्वायोगाच्च।

न च लैङ्गिकपरप्रत्यायनार्थत्वस्य ब्राह्मणवाक्यगतेन वाक्यप्रमाणकेनाऽपि बाधश्शंक्यः, लैङ्गिकस्याऽपि प्रधानभूतस्य परप्रत्यायनस्याऽङ्गभूतेनोपांशुत्वेन बाधायोगात्। उक्तं ह्येतत्(?) प्रमाणबलाबलापेक्षया प्रमेयबलाबलं ज्याय इति। अतश्च लिङ्गेनैव'उपांशु यजुषे'त्यस्य सङ्कोचितत्वान्न 'उच्चैर्निगदेने'त्यस्य सङ्कोचकता। किंच नाऽवश्यं लिङ्गस्यैव विधिसङ्कोचे व्यापारः, अपि तु विधिवाक्यस्याऽपि स्वनिष्ठगौरवपरिहारार्थं सः।

तथा हि—'उपांशु यजुषे'त्यस्य निगदेष्वत्यन्ताप्राप्तोपांशुताविधायित्वेनाऽपूर्वविधित्वापत्तेः, तस्य चाऽदृष्टोद्देश्यकत्वेन गौरवापत्तिः। पुनश्च निगदभिन्नमन्त्रान्तरे पक्षप्राप्तोपांशुतानियामकत्वेन नियमविधित्वाद्वैरूप्यम्। अतो निगदातिरिक्तेष्वेव दृष्टपदार्थोद्देश्यकतालाघवार्थं स्वरविशेषनियामकत्वाङ्गीकरणात्स्वयमपि विधिस्स्वसंकोचे व्याप्रियते। अतश्चोपांशुत्वाविषयीभूतेषु निगदेषू‘च्चैर्निगदेने’त्यनेन स्वरनियमो नाऽनुपपन्नः।

यत्तु मूले 'उच्चैर्निगदेने'त्यस्य परप्रत्यायनरूपकार्यबलप्राप्तोच्चैस्त्वानुवादकत्वमुपांशुत्वविधिप्रशंसाफलकमङ्गीकृतम्, तदतिशयार्थम्, मन्द्रादिस्वरान्तराणामपि पक्षे प्राप्तत्वेन नित्यवदनुवादायोगात्। परप्रत्यायनरूपकार्यरहितानामपि निगदानां स-

१. शिष्टाकोपाधिकरणे (१-३-३)

त्वेन तेषूपांशुत्वस्याऽपि पक्षे प्राप्त्या सुतरां तदयोगाच्च। न चैवं 'उपांशु यजुषे'त्यत्र वस्तुतो (१)वेदोपक्रमाधिकरणन्यायेन वेदलक्षणाविभिगदपदेऽपि यजुर्वेदलक्षणापत्तेर्यजुर्वेदविहितकर्माङ्गभूतमन्त्रेषूच्चैस्त्वोपांशुत्वविकल्पापत्तेः, वेदोपक्रमस्यैकत्रैव लक्षणातात्पर्यग्राहकत्वेनोपपत्तावुभयत्र तदङ्गीकारे प्रमाणाभावात् । न च नियामकाभावः, 'वायोर्यजुर्वेद' इति यजुःपदसमभिव्याहृतवेदपदोपक्रमस्य यजुःपदलक्षणायामेव तात्पर्यग्राहकत्वेन तदासिद्धेः । अतश्चोपांशुत्वस्य वेदधर्मत्वेऽप्यु 'च्चैर्निगदेने'त्यस्य निरर्थवादकस्यैव निगदमात्रोद्देशेन विशेषविधया पक्षप्राप्तोच्चैस्त्वादिनियामकत्वोपपत्तेर्नाऽनुवादकत्वसम्भवः । अतश्च निगदानां यजूरूपत्वेऽपि परप्रत्यायनरूपकार्यानुरोधेनोपांशुत्वाप्राप्त्या तेषूच्चैस्त्वविधानोपपत्तेर्न धर्मविरोधाद्भेदसिद्धिः ॥ ४२ ॥

अर्थाच्च ॥ २-१-४३ ॥

ननु 'अग्नीदग्नीन् विहरे'त्यादेर्लोटः प्राप्तकालतायामप्युपपत्तेः प्रैषत्वनियामकाभावेन परप्रत्यायनार्थत्वाभावान्न वाचनिकोपांशुत्वबाधो युक्त इति चेत्; एवमपि सामान्यविहितोपांशुत्वस्य विशेषविहितेनोच्चैस्त्वेन बाधेऽपि बाधकाभावात् ।

वस्तुतस्तु प्राप्तकालत्वे लोटोऽदृष्टार्थत्वापत्तेर्दृष्टार्थत्वानुरोधेन प्रैषत्वावसायाद्युक्त एवोपांशुत्वबोधः ॥ ४३ ॥

यत्तु संज्ञाभेदाद्भेद इत्युक्तं, तत्रोत्तरम्—

गुणार्थो व्यपदेशः ॥ २-१-४४ ॥

---

१. पू. मी. ३. ३. १.

योऽयं यजुष्ट्वे सत्यपि निगदव्यपदेशः, स ब्राह्मणत्वे सत्यपि परिव्राजकत्वव्यपदेशवत्परप्रत्यायनरूपकार्यवशेनोपांशुत्वनिवृत्तौ नितरां गदनरूपगुणयोगेनोपपन्न एव । अत एवोपांशुत्वाभावमात्रकृतप्रकर्षबलेनैव 'उच्चैर्निगदेने'त्येतद्वाक्ये निगदानुवादेनोच्चैस्त्वविधानात्तद्विधेः पूर्वमेव प्रयुज्यमानस्य निगदशब्दस्य शक्यतावच्छेदकावगतिसिद्धिः । अतश्च मूले उच्चैस्त्वरूपप्रकर्षस्य शक्यतावच्छेदकत्वोक्तिरतिशयार्थैव ॥ ४४ ॥

सर्वेषामिति चेत् ॥ २-१-४५ ॥

उपांशुत्वभिन्नस्वरोच्चारणविषयत्वस्यैव निगदपदशक्यतावच्छेदकत्वे ऋच्यपि(१)तत्संभवान्निगदपदप्रयोगापत्तिः। अतो रूढत्वात्रसायान्निगदयजुस्संज्ञयोर्भेदकत्वं ज्योतिरादिवदुपपन्नमेवेति चेत्—

न ऋग्व्यपदेशात् ॥ २-१-४६ ॥

गदतेरपादबद्धाक्षरसमूहवाचकत्वात् निशब्दस्य च प्रकर्षवाचित्वादवयवयोगेनोपांशुत्वभिन्नस्वरयुक्तापादबद्धमन्त्राक्षरत्वस्यैव शक्यतावच्छेदकत्वप्रतीतेः ऋच्यतिप्रसङ्गाभावेन रूढत्वकल्पने प्रमाणाभावात् । अनेनैवाऽभिप्रायेण "अपाज्या वै निगदाः ऋचैव यजती"ति निगदानां ऋग्भेदव्यपदेशोऽपि सङ्गच्छते । तस्मान्न रूढत्वेन ज्योतिरादिपदवद्भेदकत्वं संज्ञायाः ।

वस्तुतस्तु 'नमः प्रवक्त्र'इत्यादिनिगदेषु वचनेनैवोपांशुत्वप्रतिप्रसवादवयवयोगबाधेनाऽश्वकर्णादिवद्रूढेरावश्यकत्वेऽपि निगदत्वस्याऽखण्डोपाधिरूपस्य यजुष्ट्वावान्तरव्याप्यस्यैव निगद-

१. तत्सद्भावादिति क. पु.

पदशक्यतावच्छेदकत्वेन(१) कल्प्यत्वान्मनुष्यब्राह्मणसंज्ञयोरिव व्याप्यव्यापकभावेन निगदयजुस्संज्ञयोरेकस्मिन्नप्युपपत्तेर्न भेदकत्वापत्तिः । तस्माद्यजूंष्येव निगदा इति सिद्धम् ।

प्रयोजनं वाचस्तोमे "सर्वा ऋचस्सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसती"ति विहिते शंसने निगदानां यजुष्ट्वे शंसनम्, भेदे तु नेति द्रष्टव्यम् ॥ ४६ ॥

इति चतुर्दशं निगदाधिकरणम् ॥ १४ ॥

अथ पञ्चदशमेकवाक्यताधिकरणम् ॥ १५ ॥

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥ २-१-४७ ॥

तदेवं यजुष्ट्वाश्रये निरूपिते अधुना प्रसङ्गात्तद्यजुष्ट्वं कियत्सु पदसमूहेषु व्यासज्य वर्तते, कियत्सु वा पर्याप्नोतीति विवेकार्थमिदमारभ्यते । यावति पदसमूहे लोके वाक्यत्वप्रसिद्धिः, तावत्येव यजुष्ट्वं, न तु वाक्यसमूहे, तस्यैकार्थ(२)प्रतिपादकत्वाभावेन विनियोगानर्हत्वात् । लोके च यत्रैकार्थकत्वं विभज्यमाने साकाङ्क्षत्वं च तावत्येव वाक्यत्वप्रसिद्धेस्तावत्येव यजुष्ट्वमित्यवगम्यते ।

ननु किमिदमर्थैकत्वम्? न तावत्पदार्थैकत्वम्, तेषां गामानयेत्यादिवाक्येऽनेकत्वात् । नाऽपि वाक्यार्थैकत्वम्, तस्याऽपि संसर्गरूपत्वेन प्रतिपदार्थं भेदात् । नाऽपि प्रयोजनैकत्वम्, तद्यदि शेषिरूपप्रयोजनैकत्वं विवक्षितं, ततः 'सौर्यं चरुमि'त्यादौ द्रव्य-

---

१. कल्पनीयत्वादिति क. पु. २. प्रकाशकत्वाभावेनेति क. ख. पु.

देवते प्रति यागः, (१)यागं च प्रति फलमित्यनेकार्थत्वादर्थैकत्वानापत्तिः, "सर्वेभ्यो दर्शपूर्णमासा" वित्यादौ च सा। अथ मुख्यविशेष्यरूपप्रयोजनैकत्वम्, तदापि "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते" त्यादावाग्नेयादिभावनानां मुख्यविशेष्याणां भिन्नत्वात्तदेकत्वानापत्तिः।

अथ मुख्यविशेष्यप्रतिपादकशब्दैकत्वम्, ततो व्रीहियववाक्ययोः, 'भगो वां विभजत्वि'त्यादौ च तत्प्रतिपादकशब्दभेदेनाऽर्थैकत्वानापत्तेर्विभज्यमानसाकाङ्क्षत्वरूपविशेषणोपादानवैयर्थ्यमिति चेत्—न; भिन्नप्रतीतिविषयानेकमुख्यविशेष्यराहित्यमर्थैकत्वम्। अस्ति च गामानयेत्यादौ तत्, आनयनभावनाया मुख्यविशेष्यभूताया एकत्वात्। अस्ति चेदं दर्शपूर्णमासवाक्येऽपि, अनेकासामप्याग्नेयादिभावनानामेकेन प्रत्ययेनोपादानात् भिन्नप्रतीतिविषयत्वासिद्धेः। व्रीहियवादिवाक्ययोः, 'भगो वां विभजत्वि'त्यादौ च सत्यपि भिन्नप्रतीतिविषयत्वे मुख्यविशेष्यस्य यागविभागभावनादेरेकत्वादर्थैकत्वोपपत्तिः। न ह्यत्र "आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पता" मित्यत्र "क्लृप्तीर्वाचयती"ति बहुवचनवद्विभागभेदे प्रमाणमस्ति, यतोऽर्थभेदश्शङ्क्येत। अतस्सत्यपि व्रीहियववाक्ययोः, "भगो वां विभजतु, अर्यमा वां विभजतु, पूषा वां विभजत्वि"त्यादौ चोक्तविधार्थैकत्वे विभज्यमानसाकाङ्क्षत्वाभावाद्वाक्यभेदसिद्धिः। विभज्यमानसाकाङ्क्षत्वं चाऽन्वीयमानयोः पदार्थयोरनन्वये अनिवृत्ताकाङ्क्षत्वम्। यथा—गामानयेत्यत्र गोशब्दस्य। न च 'भगो वामि'त्यत्र 'अर्यमा वामि'त्यस्याऽनन्वये साकाङ्क्षत्वमस्ति, स्ववाक्योपात्तविभजत्यन्वयेनैव निराकाङ्क्षत्वात्। अतोऽस्त्येव विभज्यमानसाकाङ्क्षत्वविशेषणसार्थक्यम्।

१. तं प्रति चेति क. पु

अर्थैकत्वविशेषणसार्थक्यं तु "स्योनं ते सदनं कृणोमी" त्यस्याऽपि 'तस्मिन् सीदे'त्यनेनाऽनन्वये तच्छब्दस्य साकाङ्क्षत्वेन विभज्यमानसाकाङ्क्षत्वादेकवाक्यतापत्तेर्द्रष्टव्यम् । तत्र विभज्यमानसाकाङ्क्षत्वेऽप्यर्थैकत्वाभावात् । न हि सदनकरणप्रतिष्ठापनभावनयोरेकपदोपादानमस्ति, येनैकप्रतीतिविषयत्वमाशङ्क्येत । सदनकरणभावनायाः प्रतिष्ठापनभावनायां प्रकारत्वाङ्गीकारेण (१)मुख्यविशेष्यभेदराहित्यशङ्का तु, आख्यातस्वाभाव्येन तस्या अपि मुख्यविशेष्यताप्रतीतेः, तच्छब्दस्य च वाक्यान्तरोपात्तसदनकरणप्रकाशकत्वेनाऽप्युपपत्तेर्वाक्येन लिङ्गबाधायोगादयुक्ता । अतोऽर्थैकत्वाभावादेव तत्रैकवाक्यत्वाभावः । 'देवस्य त्वे'त्यादिवाक्ये तूभयसत्वाद्युक्तं निर्वपामीत्यन्तस्यैकवाक्यत्वम् । अतश्च तावत्येव यजुष्ट्वमपि, तावत एवाऽर्थप्रकाशकत्वेन यागसाधनत्वात् ।

न च न यागसाधनत्वमात्रेण यजुष्ट्वम्, ऋच्यपि तदापत्तेः, जपादिसाधनेषु तदनापत्तेश्च, किन्तु मन्त्रत्वावान्तरधर्मरूपमखण्डं तदित्यङ्गीकर्तव्यम् । तस्य च वेदत्ववत् सर्वमन्त्रेषु व्यासक्तिकल्पनेऽपि यजुरवयवस्यैव विनियोगेन प्रकाशकत्वोपपत्तेर्न यजुष्ट्वस्य पर्याप्तिकल्पने प्रमाणमस्तीति वाच्यम् । 'मन्त्र एव खल्वयं निगदभूतो भवति तस्माद्यजु" रित्यादौ वाक्येऽपि यजुश्शब्दप्रयोगात्पर्याप्तिवृत्तितोपपत्तेः । अन्यथा हि सर्वेषु मन्त्रवाक्येषु व्यासक्ते यजुष्ट्वे एकस्मिन्निगदे यजुरवयवत्वान्न यजुश्शब्दप्रयोगोपपत्तिः । अतो वाक्य एव पर्याप्तं यजुष्ट्वम् । एवं मन्त्रत्वमपि वाक्ये मन्त्रशब्दप्रयोगात्पर्याप्तमेव । वेदत्वं तु एकस्मिन्वाक्ये अधीते वेदोऽधीत इति व्यवहाराभावाद्व्यासज्यवृत्त्येवेति वक्ष्यते । न चैवं मन्त्रत्वयजुष्ट्वयोर्वाक्यमात्रवृत्तित्वे किंचिन्न्यूनेऽपि

१. मुख्यविशेष्यत्वाभावशङ्केति क. पु.

तस्मिन्मन्त्रत्वाद्यनापत्तिः, गोर्गद्रुनि जाते, विषाणे वा भग्ने गोत्व-प्रत्यभिज्ञाबलेन गोत्ववदिहापि तथाङ्गीकारे बाधकाभावात् । अत एव यत्र न प्रत्यभिज्ञा, यथा श्लोकाद्येकवाक्यतापन्नद्वित्रि-मन्त्राक्षरेषु, तत्र नैव मन्त्रत्वमित्युक्तं प्राक् । तस्मात्सिद्धं वाक्य-मात्रवृत्ति यजुष्ट्वमिति ।

सूत्रं तु—यद्विभज्यमानसाकाङ्क्षं पदजातं तदर्थैकत्वे सत्येकं वाक्यमित्येव लोके प्रसिद्धिः, अतस्तादृशवाक्यवृत्त्येव यजुष्ट्वमित्येवमध्याहारेण व्याख्येयम् । न तु यथाश्रुतमेव वाक्य-लक्षणपरमेकवाक्यत्वलक्षणपरं वा, पूर्वोक्तमन्त्रप्रस्तावेनाऽसङ्गत-त्वापत्तेः । अतो मन्त्रावान्तरविभागे पूर्वं निरूपिते, अधुना तद-वान्तरभेदरूपस्य यजुषः परिमाणं निरूप्यत इति द्रष्टव्यम् । अत एव ऋक्सामरूपयोस्तदवान्तरभेदयोरन्यतृसिद्धपरिमाणत्वात्तद-निरूपणेऽपि न क्षतिः ॥ ४७ ॥

इति पञ्चदशमेकवाक्यताधिकरणम् ॥ १५ ॥

अथ षोडशं वाक्यभेदाधिकरणम् ॥ १६ ॥

समेषु वाक्यभेदस्स्यात् ॥ २-१-४८ ॥

(विषयसंशयौ)

तदेवं विभज्यमानसाकाङ्क्षत्वविशिष्टार्थैकत्वकृतवाक्यैकत्वेन यजुःपरिमाणे चिन्तिते, अधुना विभज्यमानसाकाङ्क्षत्वादिकमेव कियत्सु पदेषु व्यासक्तमिति विचार्यते । दर्शपूर्णमासयोः "इषे त्वोर्जे त्वा वायव स्थे" त्यादि समाम्नायते । तत्र 'वायव स्थे'-त्यादेस्तावद्वत्सापाकरणे विनियुक्तस्य 'स्थे'तिक्रियापदसत्त्वाद्वायु-

वच्छीघ्रगामिनो भवथ, मातृसमीपं पुनरागामिनो भवथेत्युक्ते चा ऽर्थादपाकरणप्रतीतेः 'देवस्य त्वे'तिमन्त्रवदेव सुज्ञानं परिमाणम् । 'इषे त्वे' त्यादेस्त्वेकवचनान्तस्य शाखाच्छेदनादौ विनियुक्तस्य 'वायव स्थे'त्यनेनैकवाक्यत्वासम्भवात्ततो भिन्नत्वेनाऽवगतस्याऽपि स्ववाक्ये आख्यातपदाश्रवणान्न सुज्ञानं परिमाणमिति चिन्त्यते - कियदेकं यजुरिति । तथा वाजपेये पठितं "आयुर्यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पता"मित्यादि । तत्रा- ऽपि कियदेकं यजुरिति चिन्त्यते । तदर्थं चाऽर्थैकत्वाविभज्यमान- साकाङ्क्षत्वे कियत्सु पर्याप्ते इत्यपि चिन्तनीयम् ।

(पूर्वपक्षः)

तत्र 'इषे त्वे' त्यादावाख्यातपदाश्रवणेऽपि साकाङ्क्षत्वात्तत्ता- वदवश्यं कल्पनीयम् । न च साकाङ्क्षार्थज्ञानस्याऽपि मन्त्रजन्य- स्याऽदृष्टार्थत्वेन जपादिवदुपपत्तेर्नाऽध्याहारावश्यकत्वमिति वा- च्यम् । "इषे त्वेति शाखां च्छिनत्ति, ऊर्जे त्वेत्युन्मार्ष्टी"तीतिकरणेन छेदनाद्यङ्गत्वेन मन्त्रविनियोगान्मन्त्रे इतिकरणावगतकरणत्वस्य चाभिधानं विनाऽनुपपत्तेः छेदनादिप्रकाशकत्वावगमेन छिनद्मी- त्यादिपदाध्याहारावश्यकत्वप्रतीतेः । अतश्चाऽश्रूयमाणस्यैक- स्यैवाऽऽख्यातस्य कल्पनयैवोपपत्तावनेककल्पने प्रमाणाभावात् 'इषे त्वोर्जे त्वे'ति पदचतुष्टयान्ते एकमेव तदध्याह्रियते । यद्यपि च विनियोगभेदात्पूर्वपक्षेऽपि छिनद्मि, उन्मार्ज्मीत्याद्याख्यातद्वय- कल्पनमावश्यकम्, तथापि 'इषे त्वे'त्यस्य सामर्थ्यात्प्राकरणिक- सर्वयोग्यक्रियार्थत्वस्याऽवगतस्याऽन्यक्रियाविषये बाधेऽप्युन्मा- र्जनविषयेऽपि बाधे प्रमाणाभावेन समस्तस्यैवैकैकत्र विनियो- गावगतेरेकवाक्यत्वोपपत्तिः ।

न च 'ऊर्जे त्वेत्युन्मार्ष्टी'त्यस्यैव पदद्वयमात्रविनियोजकस्य

ब्राह्मणवाक्यस्य सामर्थ्यप्राप्तेषेत्वेति पदद्वयबाधकत्वम्, तस्य प्रतीकग्रहणेनाऽपि समस्तविनियोजकत्वोपपत्तौ सामर्थ्यबाधे प्रमाणाभावात्। न च 'इषे त्वेति शाखां छिनत्ती'त्यस्यादिप्रतीकेन समस्तविनियोजकत्वोपपत्तावप्यूर्जेत्वेत्यस्य कथं मध्यमप्रतीकेन समस्तविनियोजकत्वमिति वाच्यम्, (१)"आनः प्राण एतु परावत आन्तरिक्षाद्दिवस्परि आयुः पृथिव्या अध्यमृतमासि प्राणाय त्वे"ति मन्त्रस्य(२) "प्राणाय त्वेति हिरण्यमभिव्यनिती"त्यनेनाऽन्तिमप्रतीकेनाऽपि विनियोगस्य सङ्कर्षे वक्ष्यमाणत्वात्, तन्न्यायेनाऽत्र मध्यान्त्यप्रतीकेनाऽपि समस्तविनियोगोपपत्तेः। अतश्च समस्तस्यैकाख्यातकल्पकत्वेनैकार्थत्वात्तस्मिंश्च सर्वेषामनन्वये अनिवृत्ताकाङ्क्षत्वेन विभज्यमानसाकाङ्क्षत्वादेकवाक्यतालाभेन यजुष्ट्वोपपत्तिः। क्लृप्त्यादिमन्त्रे तु यद्यपि कल्पतामित्याख्यातं श्रुतम्, तथाऽपि विभागवत्क्लृप्तिभेदे प्रमाणाभावेनैकार्थत्वोपपत्तिः।

न चायुरादिकारकभेदादेव क्लृप्तिभेदः, भगादिवत्तेषां स्वतोऽसमवेतत्वेन स्तुतिमात्रोपयोगितया एकस्यामपि क्रियायां निवेशसंभवेनाऽभेदकत्वात्। न च 'क्लृप्तीर्वाचयती'ति सङ्ख्यया क्लृप्तिभेदः, वाचयतेरुच्चारणानुकूलप्रयोजकव्यापारवाचित्वेन तदन्तर्गत(३)वचनकर्मतया अर्थरूपायाः क्लृप्तेरन्वयायोगेन क्लृप्तिपदस्य कल्पतामिति पदलक्षकत्वावगतेस्सङ्ख्यायास्तन्निष्ठत्वेन क्लृप्तिरूपार्थनिष्ठत्वाभावात्तद्भेदकत्वानुपपत्तेः।

न चैवमेकार्थत्वोपपत्तावपि विभागवदेव विभज्यमानसाकाङ्क्षत्वाभावान्नैकवाक्यत्वोपपत्तिः, एतेषां प्रोत्साहनार्थत्वेन दृष्टार्थानामपि 'क्लृप्तीर्वाचयती'त्यनेन समुच्चयावगमादेकस्मिन्प्रोत्सा-

१. तै. सं. ३.३. ३. २. तै. सं. ३.३. ४. ३. वचिकर्मतयेति क. ख. पु.

दनार्थक्लृप्तिप्रकाशनाख्ये कार्ये अनेकेषामपि कल्पतामितिपदानां परस्परसाहित्यावगमेन विभागेऽनिवृत्ताकाङ्क्षत्वोपपत्तेः। विभागमन्त्रेषु तु मन्त्राणां दृष्टार्थत्वेन विकल्पात्साहित्यानवगतेर्विभागेऽपि परस्परानाकाङ्क्षत्वाद्भिन्नवाक्यत्वोपपत्तिः। अतश्च क्लृप्तिमन्त्रेऽप्यर्थैकत्वविशिष्टविभज्यमानसाकाङ्क्षत्वकृतवाक्यैकत्वसत्त्वाद्युक्तं यजुरेकत्वमिति।

केचित्तु क्लृप्तिमन्त्रे वास्तवमेकवाक्यत्वमुपपादयितुमसमर्थाः उदाहरणद्वयेऽपि मन्त्राणामदृष्टार्थत्वमङ्गीकृत्य अदृष्टस्यैकस्यैव कल्पनयोपपत्तावनेककल्पनायोगाददृष्टरूपैकार्थत्वं परिकल्प्य तस्मिन् विभज्यमानसाकाङ्क्षत्वादेकवाक्यत्वं कथयन्तः, "यद्यपि च न पूर्वसूत्रे वास्तवं प्रयोजनैकत्वेनैकार्थत्वं विवक्षितम्, किन्तु मुख्यविशेष्यभूतशाब्दप्रयोजनैकत्वेनैव तत्, तथाऽप्यज्ञाताभिप्रायस्यैवाऽयं पूर्वपक्ष" इत्याहुः; तत् वास्तवैकवाक्यत्वस्याऽपि क्लृप्तिमन्त्रे उपपादितत्वात्, अदृष्टार्थत्वाङ्गीकारे च प्रमाणाभावात्, तदैक्यस्य च विनियोगभेदेन शब्दोच्चारणक्रमिकत्वेन च कल्पनानुपपत्तेः, कल्पितेऽपि तस्मिन्नितरपदार्थानामन्वयानुपपत्तेः, अप्रसक्तान्वयाङ्गीकारेऽपि च साकाङ्क्षत्वाभावादेकवाक्यत्वकल्पनानुपपत्तेः, ईदृशैकवाक्यत्वस्य पूर्वसूत्रे अनभिप्रेतत्वाच्चोपेक्षितम्। तस्मात्पूर्वोक्तविधयैवैकवाक्यत्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—नात्रैकवाक्यत्वम्। तथा हि—आद्योदाहरणे तावद्विनियोगभेदेनैवाऽर्थभेदान्नाऽर्थैकत्वम्। न च मध्यान्त्यप्रतीकेन समस्तस्यैवोभयत्र विनियोगान्न प्रत्येकमर्थभेदः, तत्र ह्यादिमध्यान्त्यप्रतीकेन विनियोगः, यत्र मन्त्रस्वरूपाम्नानवेलायामेव पदानां परस्पराकाङ्क्षत्वम्, यथा सङ्कर्षो-

दाहृते मन्त्रे । तत्र हि "प्राणाय त्वेति हिरण्यमभिव्यनिती"त्युक्ते कथं हिरण्याभिव्यननस्य प्राणप्राप्त्यर्थतेत्यपेक्षिते, परावतो दूरदेशादन्तरिक्षाद्दिवश्च परि सर्वतः प्राणः नः अस्मानागच्छतु, यच्च पृथिव्या अधि उपरि आयुः तदप्यागच्छतु, यतस्तवाऽमृतत्वेन प्राणदानसामर्थ्यादित्यन्योन्याकाङ्क्षत्वं मन्त्रस्वरूपाम्नानवेलायामेव प्रतीयते । अतस्तत्र युक्तो मध्यान्त्यप्रतीकेन विनियोगः । प्रकृते तु मन्त्रस्वरूपालोचनवेलायां 'इषे त्वे'त्यस्योर्जेत्वेत्यनेन निराकाङ्क्षत्वप्रतीतेः पश्चादवगम्यमानो विनियोग एकोऽपि न प्रतीकग्रहणायाऽलम्, पूर्वावगतनैरपेक्ष्यभङ्गापत्तेः । किमुत यदा यथापेक्षितो विनियोगभेद एव स्पष्टतरोऽवधार्यते, तदा कः प्रसङ्गो मध्यान्त्यप्रतीकेन समस्तविनियोगस्य । किञ्चाऽऽख्यातकल्पकतावच्छेदकं तव गुरुभूतम् । पुनश्च कार्यकारणभावद्वयेऽपि कारणतावच्छेदकैक्याद्व्यभिचारप्रसङ्गः ।

यत्तु सामर्थ्यबलेन 'इषे त्वे'त्यस्योन्मार्जनाङ्गत्वावगमात्तदर्थार्थं समस्तविनियोग इत्युक्तम्, तत् सामर्थ्यकल्प्यश्रुतेः पूर्वमेव प्रत्यक्षश्रुत्या छेदनाङ्गत्वेन विनियोगेऽवगते सामर्थ्यस्य श्रुत्यकल्पकत्वादुन्मार्जनाङ्गताबोधकप्रमाणाभावेनोपेक्षणीयम् । तस्मादर्थैकत्वविशिष्टविभज्यमानसाकाङ्क्षत्वाभावात् भिन्नवाक्यताप्रतीतेर्युक्तो यजुर्भेदः ।

द्वितीयोदाहरणे तु सत्यप्यर्थैकत्वे विभज्यमानसाकाङ्क्षत्वाभावान्न विभागमन्त्रवदेकवाक्यत्वम् । न च 'क्लृप्तीर्वाचयती' त्यनेन सर्वेषां कल्पतामिति पदानां समुच्चयविधानादेकस्मिन् क्लृप्तिप्रकाशने साहित्यावगतेर्विभज्यमानसाकाङ्क्षत्वोपपत्तिः, सकृदुच्चरितस्यैव पदस्य क्लृप्तिबोधजनकत्वेन क्लृप्तिबोधेऽनेकपदसाहित्यस्य बाधितत्वात् । 'क्लृप्तीर्वाचयती'त्यत्र च न क्लृ-

प्तिपदं कल्पतामितिपदपरं, तद्घटितमन्त्रपरं वा, लक्षणाप्रसङ्गात्, अपि तु क्लृप्तिरूपार्थपरमेव । न च क्लृप्तिरूपार्थपरत्वे तस्योच्चारणानुकूलव्यापारवाचिवाचयत्यन्तर्गतवचिकर्मत्वानुपपत्तिः, 'वचपरिभाषण' इत्यनुशासनबलेन वचेराभिधानार्थकत्वावसायात्तं प्रत्यर्थस्य कर्मत्वोपपत्तेः । अत एव क्वाचित्को वचेरुच्चारणे प्रयोगो लाक्षणिक इत्यनुसन्धेयम् ।

एवञ्च क्लृप्तिपदस्याऽर्थपरत्वावसायात्तस्याश्च बहुत्वसङ्ख्यया भेदावगतेरर्थभेदोऽप्यत्र सुलभ एव । युक्तश्च(१)उत्तराधिकरणन्यायेन यावत्प्रथमान्तं क्लृप्तिभेद इति, न कपिञ्जलाधिकरणन्यायेन त्रित्वमात्रपर्यवसानाशङ्का । विभागमन्त्रे तु बहुवचनाभावात्कारकभेदस्य च स्वरूपेणाऽसमवायितया एकस्यामपि क्रियायां स्तुतिमात्रार्थत्वेनोपपत्तेर्न भेदकतेति विशेषः । अतश्च 'क्लृप्तीर्वाचयती'त्यस्य क्लृप्तिभेदकतयाऽप्युपपत्तेस्तन्मन्त्रसमुच्चयस्य च मन्त्राणां भिन्नार्थत्वादेव सिद्धेरर्थभेदावगमाद्विभज्यमानसाकाङ्क्षत्वस्य च दूरभ्रष्टत्वाद्वाक्यभेदावगमेन यजुर्भेदोपपत्तिः ।

प्रयोजनम्—प्रथमोदाहरणे स्पष्टमेव । द्वितीये तु यावन्मन्त्रं ऋष्याद्यनुसन्धानम्, एकमन्त्रभ्रेषे वा तन्मात्रोच्चारणं सिद्धान्ते । पूर्वपक्षे तु सकृदेव तदनुसन्धानं समस्तोच्चारणं चेति द्रष्टव्यम् ।

सूत्रं तु—समेष्वन्योन्यनिराकाङ्क्षेषु वाक्यभेदस्यादिति स्पष्टम् ॥ ४८ ॥

इति षोडशं वाक्यभेदाधिकरणम् ॥ १६ ॥

---

१. उत्तरान्यायेनेति. क. ख. पु. उत्तरागोदोहन (११. १. ५.) न्यायेनेत्यर्थः ॥

अथ सप्तदशं अनुषङ्गाधिकरणम् ॥ १७ ॥

अनुषङ्गो वाक्यपरिसमाप्तिस्सर्वेषु तुल्य-योगित्वात् ॥२-१-४९॥

(विषयसंशयौ)

ज्योतिष्टोमे तिसृणामुपसदां द्वितीयतृतीयचतुर्थेष्वहस्सु पूर्वाह्णापराह्णभेदेन द्विरावृत्त्याऽनुष्ठीयमानानां क्रमे संहितायां मन्त्रत्रयमुपसदङ्गभूतोपहोमाङ्गत्वेन समाम्नातम् । तत्राऽऽद्यो(१) "या ते अग्ने अयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीत् त्वेषं वचो अपावधीत्स्वाहे"ति । द्वितीयतृतीयौ तु "या ते अग्ने रजाशया, या ते अग्ने हराशये"ति । एतेषां च मन्त्राणां क्रमणैकैकस्य तत्तदहःक्रियमाणोपसदङ्गभूतहोमाङ्गतेत्यप्यविवादम् । तत्रोत्तरयोर्मन्त्रयोर्यच्छब्दस्त्रीलिङ्गनिर्देशात्स्त्रीवाचकपदसाकाङ्क्षतावगतेरवश्यं कश्चित्तत्परिपूरणसमर्थो वाक्यैकदेशः कल्पनीयः । न चाऽध्ययनविधिनाऽध्ययनोपायनियमात्कथमनधीतस्य (२)तद्वैदिकवाक्यत्वोपपत्तिरिति वाच्यम् । तेन प्रत्यक्षपठिते वेदे तन्नियमेऽपि अनधीते प्रवादिपदवदेव वैदिकदेशत्वोपपत्तेः । ततश्चावश्यकल्पनीये वाक्यैकदेशे किं लौकिकोऽध्याहर्तव्यः? उत वैदिक एव 'तनू'रित्यादिराद्यमन्त्रैकदेशोऽनुषञ्जनीय ? इति सन्देहः ।

(सङ्गतिः)

अत्राऽनुषङ्गपक्षे आम्नानस्य सर्वार्थत्वेनैव साधयिष्यमाण-

---

१. वा. सं. ५. ८. ८.　　२. तस्य वैदिकवाक्यत्वेति. क. पु.

त्वेनाऽनुषक्तस्याऽऽम्नातत्वेन मन्त्रत्ववद्यजुष्ट्वस्याऽप्युपपत्तेः पूर्व-
वद्यजुःपरिमाणचिन्तात्मकत्वेन सङ्गत्युपपत्तिः ।

(पूर्वपक्षः)

तत्र वैदिकश्शेष आद्यानन्तरपठितत्वादपेक्षितदेशपाठाच्चा-
ऽऽद्यस्यैव स्वारस्येन सम्बध्यते, नाऽनन्तरयोरिति तावदविवाद-
म् । अतश्चाऽगृह्यमाणविशेषत्वात्प्रयाजादिवत्सर्वार्थमेवाऽयमाम्ना-
त इति नैवाऽऽशङ्कितुं शक्यम् । न च शेषस्याऽऽद्यसम्बन्धेन निरा-
काङ्क्षस्याऽप्युत्तरयोस्साकाङ्क्षत्वात्तदन्वयोपपत्तिः, तयोरप्य-
निबद्धलौकिकशेषग्रहणेन निराकाङ्क्षयोराद्यमन्त्रमात्रनिबद्धवैदि-
कशेषग्रहणानुपपत्तेः । अत एव 'अग्निमुपनिधाय स्तुवीते' त्यस्य
लौकिकाग्निग्रहणेनाऽपि निराकाङ्क्षत्वात्कार्यविशेषपुरस्कारेण
निबद्धानां वचनव्यतिरेकेणाऽऽयतनाद्बहिर्नेतुमशक्यानामाहवनी-
यादीनामग्निपदेनाऽग्रहणमिति(१) सप्तमे वक्ष्यते । एवञ्च सत्य-
पि यदि लौकिकस्याऽप्रकृतत्वादाग्नेयीमन्त्रन्यायेन प्रकृत-
स्यैव वैदिकस्य 'तनू'रित्यादेर्ग्रहणमित्याशङ्क्येत, तत आग्नेयी-
मन्त्रस्याऽन्यत्र विनियुक्तस्याऽपि 'कुशा दर्व्यादय' इतिवचना-
त्समस्तस्याऽन्यत्र विनियोगे मन्त्रत्वानपायेऽपि मन्त्रैकदेशस्य
तनूरित्यादेरन्यत्र नयने मन्त्रत्वानापत्तिः । अतश्चोपस्थितत्वान्म-
याऽपि स एव गृह्यते । न त्वेतावता तस्य मन्त्रत्वं यजुष्ट्वं वा
शक्यमापादयितुमिति न तद्भ्रेषे यजुर्भ्रेषनिमित्तप्रायश्चित्ताद्या-
पत्तिरिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते-वैदिकस्यैव सर्वत्राऽनुषङ्गः, तस्य सर्वार्थमा-

---

१. पू. मी. ७. ३. १०.

म्नातत्वात् । यथैव हि तनूरित्यादेराद्यमन्त्रसम्बन्धे आकाङ्क्षा-योग्यतासान्निधयः कारणं, तथैवोत्तरमन्त्रद्वयसम्बन्धेऽपि । तथा हि—आकाङ्क्षा तावद्विशेष्यविषयिण्याद्यस्येवोत्तरयोरप्यविशिष्टा । योग्यता च निराकाङ्क्षीकरणसामर्थ्यरूपा पूर्वस्मिन्निवोत्तरयोरप्यविशिष्टैव । सन्निधिस्तु यद्यप्यानन्तर्यरूपो नाऽविशिष्टः, तथाप्यसम्बन्धिपदाव्यवधानरूपोऽविशिष्ट एव । न ह्यानन्तर्याख्यस्सन्निधिश्शाब्दबोधे कारणम् , तदभावेऽपि देवदत्त गामानयेत्यादौ देवदत्तादिपदानामानयनान्वयदर्शनात् , अपि त्वसम्बन्धिपदाव्यवधानमेव । गोशब्दस्य च सत्यपि व्यवधायकत्वे आनयनान्वयित्वेन(१) नाऽसम्बन्धित्वम् । अतश्च प्रकृतेऽप्याद्य इव द्वितीये तृतीयेऽपि उक्तरूपस्सान्निधिरविशिष्टः ।

न च द्वितीये सन्निध्युपपत्तावपि तृतीये तेनैव व्यवहितत्वात्कथं सन्निधानोपपत्तिरिति वाच्यम् । द्वितीयस्याऽपि शेषान्वययोग्यत्वेन गोपदवदेवाऽसम्बन्धित्वाभावात् । अतश्चाऽसम्बन्धिपदाव्यवधानरूपस्य सान्निधानस्य सर्वेष्वविशेषात्सर्वार्थमाम्नानावगतेस्सर्वसम्बन्धोपपत्तिः । अत एवैकस्यैवाऽव्यवहितानन्तर्यं यथापेक्षितश्च स्वपाठोत्तरकाले पाठोऽप्याकिञ्चित्करः, सर्वमन्त्राव्यवहितानन्तर्यस्य सकृत्पाठेऽशक्यत्वेनाऽऽवृत्तपाठस्य चाऽऽकाङ्क्षादित्रयेणैव सर्वार्थत्वज्ञानोपपत्तेरनर्थकत्वेन सर्वान्तपाठनियमस्य चाऽऽपादयितुमशक्यत्वेनैकाव्यवधानस्याऽवर्जनीयत्वात् , उत्तरयोरपेक्षितदेशोच्चारणस्य लिङ्गेनैव ज्ञातुं शक्यत्वाच्च । ततश्च युक्तमाकाङ्क्षादित्रयसाधारण्यात्सर्वार्थत्वम् ।

न चैवमव्यवधानस्याऽन्वयाप्रयोजकत्वे समानपदप्रत्यासत्त्या यागस्यैव करणत्वोक्तिर्विरुध्येतेति वाच्यम् । अव्यवहिता-

१. असम्बन्धित्वाभावादिति क. ख. पु.

नन्तर्यस्याऽन्वयतात्पर्यग्राहकत्वाभावेऽप्यन्वयनियामकत्वोपपत्तेः। तत्र हि फलनिरूपकत्वं किं यागस्य, उत सोमादेरित्यनियमे प्राप्ते नियामकमात्रं पदप्रत्यासत्तिः। प्रकृते त्वाकाङ्क्षादित्रयसाधारण्यात्सर्वत्र नियमेनैव(१) सम्बन्धप्राप्तेर्नानन्तर्यस्य नियामकत्वोपपत्तिः। न ह्येकस्य नैराकाङ्क्ष्येणेतरयोर्नैराकाङ्क्ष्यं शक्यते वक्तुम्। अतश्च यथैव प्रयाजादीनां सत्यप्याग्नेयाव्यवधाने अग्नीषोमीयादरप्याकाङ्क्षादित्रयसाधारण्यात्सर्वार्थत्वं, एवमिहापि द्रष्टव्यम्। तस्माद्वैदिकस्य सर्वसम्बन्धरूपोऽनुषङ्ग एव युक्तः, न तु क्रमिकान्वयाङ्गीकारेणैकसम्बन्ध एव वैदिकत्वं, इतरसम्बन्धे लौकिकत्वमिति। यतश्शेषान्वयं विना आद्यस्येवोत्तरयोरपि न परिसमाप्तिः, अतस्सर्वेषु तुल्याम्नानादनुषङ्ग इति सूत्रार्थः।

प्रयोजनं तु तद्भ्रेषे यजुर्भ्रेषनिमित्तप्रायश्चित्तप्राप्तिस्स्पष्टैव॥

(अनुषङ्गाधिकरणवर्णकान्तरम्)

(विषयसंशयौ)

एवं तावदनेकेषामुत्थिताकाङ्क्षाणां सन्निधावाम्नायमानश्शेषस्सर्वत्राऽनुषज्यत इत्युक्तम्। इदानीं तूत्थाप्याकाङ्क्षाणामनेकेषां सन्निधावाम्नायमानश्शेषस्सर्वत्राऽनुषज्यते न वेति विषयव्याप्त्यर्थं तस्मिन्नेव सूत्रे विचार्यते। ज्योतिष्टोमे यजमानपावनार्था मन्त्राः(२) "चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनात्वि"त्येवंविधाः क्रियापदान्तत्वेन स्वतो निराकाङ्क्षाः पठिताः। तेषामन्ते "अच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभि"रिति क्रियासाकाङ्क्षश्शेषस्समाम्नातः। स किं अनन्तरेणैव मन्त्रेण सम्बध्यते ? उत सर्वैरपीति विचारः।

---

१. शेषप्राप्तेरिति. क. पु. २. १. २. १.

(पूर्वपक्षः)

तत्र तेषां तावत्स्वरूपेण निराकाङ्क्षत्वाच्छेषाकाङ्क्षयैवाकाङ्क्षामुत्थाप्य सम्बन्धो वाच्यः । तत्र चैकपदसम्बन्धेनैव(१) निराकाङ्क्षस्य शेषस्येतराकाङ्क्षोत्थापकत्वे प्रमाणाभावान्नियामकापेक्षायां यागादाविवाऽऽनन्तर्यस्य नियामकत्वोपपत्तेर्न सर्वत्राऽनुषङ्गः । न चैवमपि 'यजमानं पावयती'ति विधिना विहितस्यैकस्यैव पावनस्य त्रिभिरपि मन्त्रैः प्रकाशनादच्छिद्रादेश्चाऽपूर्वसाधनीभूतप्रकाश्यमानपावनक्रियाकरणप्रकाशनार्थत्वात्पूर्वमन्त्रयोरप्यन्तिममन्त्रवत्प्रयोगोपपत्तिरिति वाच्यम्; पावनक्रियैक्येऽपि मन्त्रभेदेन तत्प्रकाशनानां भेदादन्तिमप्रकाशनविषयीभूतपावनक्रियाकरणप्रकाशनार्थस्यैवाऽऽनन्तर्यादवगतत्वेन चित्पत्यादिकर्तृव्यवस्थावदेव करणव्यवस्थाया अप्युपपत्तेः ।

न चाऽत्र मन्त्राणां विकल्पः, येनैकस्मिन्नेव प्रकाशने त्रयाणां करणत्वाद्व्रीहियवयोरिव धर्माणामव्यवस्थापत्तिः, सत्यपि दृष्टार्थत्वे 'त्रिभिर्यजमानं पावयती'ति वचनात् पार्थसारथिमिश्रधृतात्समुच्चयोपपत्तेः । अतश्च विकल्पोक्तिर्याज्ञिकाचारविसंवादिनी वार्तिककारीयाऽतिशयार्थैव । अतश्च सत्यप्यच्छिद्रादेस्सर्वार्थत्वे प्रयाजादिवत्सकृत्प्रयुक्तस्यैव सर्वोपकारकत्वोपपत्तेर्न प्रत्येकं प्रयोगाख्यानुषङ्गोपपत्तिः ।

वस्तुतस्तु बोधायनादिकल्पपर्यालोचनया पावनस्याऽपि मुखनाभिगुल्फप्रदेशभेदेन त्रिरभ्यासादेकैकमन्त्रस्यैकैकाभ्यासकरणत्वावगमादानन्तर्याविशेषेणाऽच्छिद्रादेः गुल्फप्रदेशसंस्कारार्थपावनक्रियाभ्यासप्रकाशकपदैकवाक्यतया विजातीयापूर्वसा-

---

१. निवृत्ताकाङ्क्षस्येति. क. ख. पु.

धनीभूतपावनक्रियाभ्यासाङ्गत्वावगतेः "पयसा मैत्रावरुणं श्रीणाती" तिवदभ्यासान्तरे प्राप्त्यभावाद्व्यवस्थोपपत्तिस्सुलभैव । अतो नेदृशस्थले अनुषङ्ग इति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—आकाङ्क्षादित्रयसाधारण्यदत्रापि सर्वार्थाम्नानावगमेनाऽनुषङ्गेणैव वाक्यपरिसमाप्तिः । तथा हि—सन्निधियोग्यत्वे तावत्पूर्ववदेवाऽविशिष्टे । आकाङ्क्षा चाऽपि यथैवाऽन्तिमस्यैतदाकाङ्क्षावशेन कल्प्या, तथैव पूर्वयोरपि । न ह्यत्रानन्तर्यस्य नियामकता सम्भवति । तत्र हि तन्नियामकं, यत्र तत्प्रवृत्तेः पूर्वं विकल्पेनाऽनेकेषु प्राप्तिः, यथा—प्रतिपदाधिकरणसिद्धान्तरीत्या यागसोमयोः । प्रकृते तूत्थाप्याकाङ्क्षाणामपि तेषां विनिगमनाविरहेण प्रधानत्वात् प्रतिप्रधानावृत्तिन्यायेन च प्रत्येकं समुच्चयेनैव शेषग्राहित्वावगतेर्नियामकानाकाङ्क्षत्वान्नाऽऽनन्तर्यस्य तन्नियामकत्वोपपत्तिः । अतश्च यथैवाऽनेकहविष्कासु विकृतिषु श्रुतानामुपहोमानां विनिगमनाविरहेण प्रधानत्वेन च सर्वहविर्गतामेवाऽऽकाङ्क्षां प्रकल्प्य समुच्चयेन सर्वार्थतावगतेर्नियामकाकाङ्क्षाविरहेण नाऽऽनन्तर्यस्य नियामकत्वं, तथैव प्रकृतेऽपीति पूर्ववदेव सर्वार्थमाम्नानावगतेर्युक्तोऽनुषङ्गः ॥ ४९ ॥

इति सप्तदशमनुषङ्गाधिकरणम् ॥ १७ ॥

अथाऽष्टादशं व्यवायाधिकरणम् ॥ १८ ॥

व्यवायान्नाऽनुषज्येत ॥ २-१-५० ॥

असम्बन्धिपदाव्यवधाने सत्यनुषङ्गे साधिते, यत्राऽसम्बन्धिपदव्यवधानं तत्राऽनुषङ्गो नाऽस्तीति प्रत्युदाहरणार्थमिदं सूत्रम्। यथा—(१)"सन्ते वायुर्वातेन गच्छतां संयजत्रैरङ्गानि संयज्ञपतिराशिषे"त्यत्र 'गच्छतामि'त्यस्य 'अङ्गानी'त्यनेन तावद्योग्यत्वेनाऽसम्बन्धात् असम्बन्धिपद(२)व्यवधानेन 'संयज्ञपतिराशिषे'त्यनेन सत्यपि साकाङ्क्षत्वे योग्यत्वे च, सन्निधानाभावान्नाऽनुषङ्गः। अतः 'संयजत्रैरङ्गानी'त्यत्र 'गच्छन्तामि'त्यस्येव 'सं यज्ञपतिराशिषे'त्यत्राऽपि 'गच्छतामि'ति पदमध्याहर्तव्यम्।

न चाऽनयोस्साकाङ्क्षत्वेऽपि गमनरूपस्यैवाऽर्थस्य योग्यताबललभ्यस्याऽन्वयोपपत्तेः किमर्थं पदाध्याहारकल्पनेति वाच्यम्। तत्तत्पदार्थशाब्दबोधत्वावच्छिन्नं प्रति वृत्तिमत्त्वसम्बन्धेन तत्पदज्ञानस्यैव कारणत्वात्। अन्यथा देवदत्तः पचतीति केनचिदुक्ते प्रत्यक्षदृष्टेनैव कलायेन कर्माकाङ्क्षानिवृत्तेः किं पचतीति प्रश्नानापत्तिः। अस्मन्मते तु कलायोपस्थितावपि तद्वाचकपदस्योद्बोधकाभावादनुपस्थितौ प्रश्नोपपत्तिरिति वैषम्यम्।

किञ्च घटं स्मरेत्यादौ वृत्त्या घटोपस्थितिवदेकसम्बन्धिदर्शनेनाऽपरसम्बन्धिस्मरणमिति न्यायेन घटपदसमवायिकारणीभूताकाशोपस्थितौ तस्याऽपि स्मरणकर्मत्वेनाऽन्वयापत्तिः। अतोऽवश्यं शाब्दत्वसिध्यर्थं गच्छतामिति पदमेवाऽध्याहृत्योच्चारणीयम्। न चैवं पदाध्याहारोपपत्तावप्यध्याहृतस्य पदस्य ध्यानेनाऽपि स्मरणोपपत्तेर्नाऽवश्यमुच्चारणोपपत्तिः, मन्त्राधिकर-

---

१. तै. सं. १. ३. ८. २. व्यवायेनेति· क. पु.

णोक्तन्यायेन पठितमन्त्रेष्विवाऽध्याहृतमन्त्रेष्वपि प्रयोगसमवेतार्थप्रकाशकेपूच्चारणोपपत्तेः । अतोऽत्र लौकिकत्वाद्गच्छतामिति पदस्य तद्भ्रेषे यजुर्भ्रेषनिमित्तप्रायश्चित्ताभावेऽपि यत्राऽसम्बन्धिपदाव्यवधानम्, तत्र वैदिकस्याऽनुषङ्गोपपत्तेर्युक्तं तद्भ्रेषे यजुर्भ्रेषप्रायश्चित्तादि । ततश्च तत्राऽनुषक्तस्यैव यजुष्ट्वम् ।

वस्तुतस्तु गमिधातुमात्रस्य द्वितीयमन्त्रेऽप्यनुषङ्गसम्भवेन तृतीये संबन्धोपपत्तेः प्रत्युदाहरणेऽपि प्रत्ययमात्रस्यैव व्यवायादनुषङ्गो निराकर्तव्यः । न चैकपदत्वात्प्रत्ययानानुषङ्गे प्रकृतेरपि(१)अननुषङ्गापात्तिः, प्रत्ययमात्रोहे प्रकृतेरार्षत्ववत्तस्याऽनुषङ्गे बाधकाभावात् । अत एवेदृशविषये विपरिणतानुषङ्गमाचक्षते वृद्धाः । तेन प्रत्ययरहितस्यैव यजुष्ट्वमिति सिद्धम् ॥ ५० ॥

इत्यष्टादशं व्यवायाधिकरणम् ॥ १८ ॥

मीमांसाम्बुनिधिं प्रमथ्य विविधन्यायोच्चयैर्निर्झरैः
कृत्वा जैमिनिसूत्रमन्दरममुं वेदं तथा वासुकिम् ।
यद्धालाहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः ॥

इति पूर्वोत्तरमीमांसापारावारपारीण श्रीरुद्रदेवसूनोः खण्डदेवस्य कृतौ मीमांसाकौस्तुभे द्वितीयाध्यायस्य प्रथमः पादः ॥ १ ॥

---

१. अनुषङ्गानुपपत्तिरिति. क. पु.

श्रीः ।

मीमांसाकौस्तुभः ॥

(द्वितीयाध्यायस्य द्वितीयः पादः)

प्रथमं शब्दान्तराधिकरणम् ॥ १ ॥

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ २-२-१ ॥

(विषयसंशयसङ्गतयः)

एवमुपोद्घातप्रसक्ते मन्त्रलक्षणादौ समाप्ते 'यत्प्रसङ्गेन यदागतं तत्समाप्तौ तत् बुद्धिस्थं जायत' इति न्यायेन भावार्थाधिकरणोक्तधात्वर्थकरणत्वस्योपस्थितेः तस्य चाऽपूर्वभेदसिद्धिद्वारा भावनाभेदसिध्यर्थत्वस्योक्तत्वादिदानीमवसरप्राप्तो लक्षणार्थभूतो भावनाभेद एव शब्दान्तरादिप्रमाणैः प्रतिपाद्यते । तत्राऽपि शब्दान्तरस्य प्रमाणान्तरसिद्धधात्वर्थभेदोपजीवित्वेन भावनाभेदमात्रे व्यापारात् सूचीकटाहन्यायेन प्रथमं तस्यैव भेदकता निरूप्यते। ज्योतिष्टोमेन स्वर्गकामो यजेते'ति प्रकृत्य 'सोमेन यजेत' (१)'दाक्षिणानि जुहोति' (२)'हिरण्यमात्रेयाय ददाती'त्यादि श्रुतम् । तत्र यागदानहोमादिसकलप्रकृतधात्वर्थानुरक्ता एका भावना ? अथ वा प्रतिधात्वर्थं भावनाभेदः ? इति विचारः। अत्र च प्रकरणान्तरातिरिक्तसकलभेदकप्रमाणनिरूपणस्य पादार्थत्वात् पादाध्यायसङ्गतिः स्पष्टा ।

(पूर्वपक्षः)

तत्र लाघवादेकैव भावना। न च तद्वाचकातिप्प्रत्ययाभ्यासात्

---

१. आप. श्रौ १३. ५. ६. २. आप. श्रौ. १३. ६. १२.

भेदः, तस्य धात्वर्थविधानार्थमनुवादकत्वाभ्युपगमेनाऽनन्यपरत्वाभावात्। न चैवमप्येकेन वाक्येन भावनाविधौ तद्वाक्यस्थस्य धात्वर्थस्य, गुणादेर्वा उत्पत्तिशिष्टत्वेन वाक्यान्तरविहितोत्पन्नशिष्टधात्वर्थान्तरादिनिवेशानुपपत्तेर्गुणाद्भेदापत्तिः, फलवाक्ये स्वर्गोद्देशेन शुद्धभावनाविध्यङ्गीकारेण तदनुवादेन सोमादिवाक्यैर्गुणविशिष्टधात्वर्थविध्यभ्युपगमे सर्वेषामुत्पन्नशिष्टत्वेन (१)गुणन्यायानवतारात्। न च फलवाक्येऽपि धातूपादानान्न शुद्धभावनाविधिः शक्यः, विशिष्टविधिगौरवापत्त्या फलवाक्यस्थस्य यजेरवयुत्यानुवादकत्वेन, प्रकृतधात्वर्थमात्रोपलक्षणत्वेन वा साधुत्वार्थमनुवादकतया विधेयार्थकत्वाभावात्।

न च फलानुकूलव्यापारसामान्यस्य लोकत एव प्राप्तत्वात् धात्वर्थविशेषावच्छिन्नस्य च तत्र विधेयत्वेनाऽनिष्टत्वात् कथं शुद्धभावनाविधानोपपत्तिः? स्वर्गस्य जन्यत्वेन तदनुकूले व्यापारसामान्ये लोकतोऽवगतेऽपि तदुद्देश्यकस्य पुरुषनिष्ठयत्नरूपव्यापारस्य नियमेनाऽनाक्षेपात्तद्विधानोपपत्तेः, पुत्रादौ यत्नस्याप्यवगमेऽपि तद्गतवैजात्यस्याऽनवगमाद्विधानोपपत्तेश्च। न च 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत' इत्यनुशासनेन प्रत्ययानां नियमेन प्रकृत्यर्थान्वितस्वार्थबोधकत्वावगतेः शुद्धभावनाविधानानुपपत्तिः। वस्तुतो धात्वर्थावच्छिन्नभावनाभिधानेऽपि धात्वर्थावच्छेदस्य प्रमाणान्तरप्राप्तत्वात् विशेष्यमात्रांशे विधिफलोपपत्तेः। अत एव गुणफलस्थले धात्वर्थावच्छेदकत्वस्य प्रकरणप्राप्तत्वेऽपि भावनामात्रविधिराश्रितः। अतश्च यजिपदस्य प्रमाणान्तरानुरोधेन प्रकृतसर्वधात्वर्थपरत्वावगतेः तत्समानाधिकरणस्य ज्योतिष्टोमपदस्याऽपि एकदेशप्रवृत्तिनिमित्तेन सर्वनामधेय-

१. पू. मी. २. २. ९.

त्वापत्तिः। एवञ्च फलवाक्ये शुद्धभावनाविधानेऽवगते सोमादिवाक्यस्थातिप्रत्ययेन प्रत्येकं तामनूद्य तत्करणतया सोमादिविशिष्टधात्वर्थविधानोपपत्तेः, सर्वेषाञ्चोत्पन्नशिष्टत्वेन गुणन्यायाभावात् भेदकप्रमाणाभावेन भावनैकत्वसिद्धिः । एवञ्च तत्तद्वाक्ये निरपेक्षतया तत्तद्धात्वर्थानामेकफलभावनाकरणत्वावगमेन विकल्पोपपत्तेरेकजातीयस्यैवाऽपूर्वस्य तृणारणिमणिन्यायेन सकलजन्यत्वोपपत्तेः तद्वैजात्यकल्पनाभावादपि लाघवम्। अस्तु वा व्यभिचारपरिहारार्थं तद्भेदोऽपि, न चैतावता भावनाभेदः । न च भेदकान्तराभावेऽपि अवच्छेदकीभूतधात्वर्थभेदरूपाच्छब्दान्तरादेव भेदोपपत्तिः, समूहालम्बनस्थले एकस्मिन्नेव ज्ञाने घटपटादीनामनेकेषां विषयतासम्बन्धेनाऽवच्छेदकत्ववदेकस्यामेव कृतौ सर्वेषां धात्वर्थानां साहित्येनाऽवच्छेदकत्वोपपत्तेः। अस्तु वा एकस्यां भावनायां वैकल्पिका सर्वेषामवच्छेदकता, सर्वथा सिद्धं भावनैकत्वम् ।

यत्त्वत्र भाष्यकारेण यागदानहोमानां स्वत्वत्यागांशेन एकत्वादवच्छेदकीभूतधात्वर्थस्याऽप्येकत्वमित्युक्तम् , तत् स्वत्वत्यागांशस्यैक्येऽपि परस्वत्वापादनप्रक्षेपांशयोराधिक्येन धात्वर्थैक्यानुपपत्तेरातिशयार्थम् । किञ्चैवं ददातिवाक्ये प्राप्तकर्मानुवादेन हिरण्यात्रेयरूपानेकगुणविधाने वाक्यभेदप्रसङ्गादवश्यमुभयविशिष्टकर्मविधानावगतेः धात्वर्थैक्योक्तिरसम्बद्धैव । तथा 'दाक्षिणानि जुहोती'त्यत्राऽपि जुहोतिलक्षितयागानुवादेन विधेयस्य गुणस्याऽभावात् धात्वर्थविधानावश्यकत्वेन तदैक्योक्तिरसम्बद्धा ।

न च दाक्षिणपदेन दक्षिणाकालरूपगुणविधिः, दाक्षिणानीति तद्धितस्य कालार्थे स्मरणाभावेन कालविधौ प्रमाणाभा-

त्वात्। दक्षिणायास्तु यागाङ्गत्वेन प्राप्तत्वादेव विधिरनाशङ्क्यः। अतो विधेयान्तराभावेन कर्मविध्यवश्यम्भावे पाठप्राप्तदक्षिणाचरकालतारूपप्रवृत्तिनिमित्तेन दाक्षिणशब्दो नामधेयम्। अतश्च धात्वर्थैक्यस्य बाधितत्वात् सत्यपि धात्वर्थभेदे भावनाया ऐक्यमिति प्राप्ते—

(सिद्धान्तः)

उच्यते--यत्राऽपर्यायधातुभेदरूपं शब्दान्तरम्, तत्राऽवश्यं भावनारूपकर्मभेदः प्रत्येतव्यः। तथा हि--भावना तावत् कृतिस्सविषया, कृतिविषयत्वमपि न ज्ञानविषयत्वादिवत् सिद्धपदार्थवृत्ति, अपि तु साध्यमात्रवृत्तित्वात् तज्जन्यत्वापरपर्यायम्। अतश्च फलवाक्यविहिताया अपि कृतेर्विषयापेक्षायां सोमादिवाक्यविहितो यागादिरेव साध्यत्वात् जन्यत्वेन सम्बध्यत इत्यभ्युपगन्तव्यम्। तत्र च कार्यतावच्छेदकस्य यागत्वादेर्भेदात् कारणीभूतायां कृतावपि वैजात्यमावश्यकमेव। न च तत्तत्कार्यतावच्छेदकावच्छिन्नं प्रति यत्नत्वेनैव कारणताऽस्तु, होमोत्पत्तिदशायां यागोत्पत्तिप्रसक्तिस्तु विजातीयादृष्टरूपसामग्र्यभावादेव निराकर्तव्येति वाच्यम्। विजातीयादृष्टस्य कारणत्वकल्पने प्रमाणाभावात्, अन्यथा तन्मात्रादेव कार्यमात्रोत्पत्त्युपपत्तौ कारणमात्रोच्छेदापत्तेः, अदृष्टगतवैजात्यकल्पनापेक्षयोपस्थितकृतावेव वैजात्यस्य कल्पयितुं युक्तत्वाच्च। एवञ्च कार्यमात्रवृत्तिजातेः किञ्चित्प्रति कार्यतावच्छेदकत्वानियमोऽप्यनुगृहीतो भवति।

न चैवं ईश्वरकृतौ कार्यद्वयजनकतावच्छेदकजातिद्वयसत्त्वात्साङ्कर्यापत्तिः, ईश्वरकृतेरेवाऽनङ्गीकारात्। एवं सत्यपि यदि सकलप्राकरणिकधात्वर्थवृत्त्यधिश्रयणफूत्कारादिवृत्तिपाकत्वमिव व्यापकसामान्यमेव कार्यतावच्छेदकतया केनचित्पदेनोपा-

त्वं स्यात्, ततो भवेत्कार्यतावच्छेदकैक्येन कारणीभूतभावनैक्यम्, न च प्रकृते तदस्ति, सोमादिवाक्यैर्यागत्वादिनैव तत्तद्धात्वर्थोपस्थितेः । अतश्च तत्तत्कार्यतावच्छेदकवाचिधातुपदभेदाद्युक्त एव कारणीभूतभावनाभेदः ।

न चैवमपि सोमादिवाक्ये यागादेः फलभावनाकरणत्वस्यैव (१)शाब्दत्वादार्थिककर्मतादशायां च कल्पनालाघवानुरोधेनैकस्यैव व्यापकधर्मस्य कार्यतावच्छेदकत्वकल्पनोपपत्तेः कथं तद्भेदेन भावनाभेद इति वाच्यम् ? शाब्दस्य करणत्वस्य शब्दभेदेन भिन्नत्वात् तदन्यथानुपपत्तिकल्पितस्य कर्मत्वस्याऽपि कल्पकभेदेन भेदोपपत्तेः। अनयैव च दिशा 'तिस्र आहुतीर्जुहोती'त्यादावपि भावनाभेदो बोध्यः, मूलोक्तरीत्या तदसिद्धेरिति ध्येयम्। अतश्च भावनाभेदावश्यकत्वेन तत्तद्वाक्यैरेव तत्तद्वाक्योपात्तसकलकारकविशिष्टभावनाविधानमित्यङ्गीकर्तव्यम्, न तु फलवाक्य एवाऽनेकभावनाविधानम्, इतरैस्तु एकैकभावनानुवादेन तत्तद्धात्वर्थविधिरिति । फलवाक्ये भावनानेकत्वग्राहकप्रमाणानुपस्थितेः तद्वाक्यस्थयजेस्सर्वोपलक्षणार्थत्वे प्रमाणाभावाच्च, ज्योतिष्टोमपदे एकदेशप्रवृत्तिनिमित्तत्वाङ्गीकारस्याऽयुक्तत्वाच्च । अतश्च तत्तद्वाक्येनैव तत्तद्धात्वर्थविशिष्टभावनाविधानमङ्गीकृत्य फलवाक्ये लाघवात्फलसम्बन्धमात्रविधानम् । तदपि च ज्योतिष्टोमपदानुरोधात्(२) चातुर्थिकन्यायेन सोमद्रव्यकयागस्यैव ।

न चाऽस्तु तर्हि फलवाक्य एव 'उद्भिदा यजेते'तिवद्यागकरणिकभावनायाः फलोद्देशेन विधिः, सोमवाक्ये तु मत्वर्थलक्षणाविशिष्टविधिगौरवभिया यागकर्मकभावनानुवादेन सोममात्रविधिरिति वाच्यम् । फलवाक्ये दीक्षणीयादिप्राकरणिकयागानामेव राजसू-

१. शाब्दत्वेनेति क. पु. २. पू. मी. ४. ४. १२.

यवत् फलसम्बन्धापत्त्या तत्र तदपेक्षया कर्मान्तरविधाने प्रमाणाभावात् ज्योतिष्टोमपदस्य चोत्तरकालिकाङ्गत्वरूपसम्बन्धमादायैव सर्वपरत्वोपपत्तेः । न चेष्टापत्तिः, तथात्वे दीक्षणीयादिवाक्ये उत्पत्तिशिष्टद्रव्यावरोधेन तत्र सोमविधानानुपपत्तौ सोमवाक्ये गुणात् सोमविशिष्टकर्मान्तरविधानस्याऽवश्यकत्वात् । अतश्च युक्तं चातुर्थिकन्यायेन तस्यैव फलसम्बन्धविधानमिति सिद्धो धात्वर्थभेदेन भावनाभेदः ।

किञ्च यत्र संज्ञोपपदयुक्ताख्यातश्रवणं तत्र फलवाक्ये प्राप्तभावनानुवादेन धात्वर्थमात्रविधानोपपत्तावपि गुणोपपदयुक्ते सोमादिवाक्ये सोमधात्वर्थरूपानेककारकविधाने वाक्यभेदस्तदवस्थ एव । न च सोमविशिष्टयागविधानान्न वाक्यभेदः, यागस्याऽपि कारकत्वाविशेषेण गुणविशिष्टगुणान्तरविध्ययोगवत् गुणविशिष्टधात्वर्थस्य विध्ययोगस्याऽपि तुल्यत्वात् । अतश्च सर्वेषामपि प्रथमतो भावनायामेवाऽन्वयमङ्गीकृत्य तस्या एव विशिष्टाया विधिरङ्गीकर्तव्यः, तस्य च त्वयाऽनङ्गीकरणात् फलवाक्यमाप्तभावनानुवादेनोभयविधौ च वाक्यभेदो दुरपह्नवः । अतस्सिद्धमपर्यायधातुभेदरूपाच्छब्दान्तरात् कार्यतावच्छेदकभेदेन कार्यभेदावगतौ कारणीभूताया भावनाया वैजात्यमिति ।

प्रयोजनम्-पूर्वपक्षे सर्वेषां धात्वर्थानां समप्राधान्यं विकल्पश्च । सिद्धान्ते तु सोमयागस्यैव प्राधान्यम्, अन्येषां तु तदङ्गत्वान्न विकल्पः ।

सूत्रं तु-उक्तविधे शब्दान्तरे भावनारूपकर्मभेदः प्रत्येतव्यः, कार्यकारणयोरेकवैजात्येनाऽपरवैजात्यरूपानुबन्धस्य कृतत्वादिति व्याख्येयम् ॥

इति प्रथमं शब्दान्तराधिकरणम् ॥ १ ॥

अथ द्वितीयमभ्यासाधिकरणम् ॥ २ ॥

एकस्यैवं पुनःश्रुतिरविशेषादनर्थकं हि स्यात् ॥ २-२-२ ॥

(विषयसंशयौ)

इदानीमभ्यासाद्भेदोऽभिधीयते। दर्शपूर्णमासयोः(१) 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजती'ति पञ्चकृत्वो यजतिपदमभ्यस्तं श्रुतम्। तत्र किमेको यागः? उत प्रत्यभ्यासं यागभेदः? इति विचारः। यागैकत्वे भावनापूर्वयोरप्येकत्वम्, तद्भेदेऽर्थान्तरपरधातूच्चारणभेदात् शब्दान्तराधिकरणन्यायेनैव भावनाभेदसिद्धिः, अपूर्वाधिकरणोक्तन्यायेन चाऽपूर्वभेदसिद्धिः। यद्यपि चाऽभ्यासाद्यागभेदवद्भावनाभेदोऽपि शक्यते वक्तुम्, तथाऽपि शब्दान्तरेणाऽपि तत्सम्भवादसाधारण्याभावेन नोपन्यस्तः।

(सङ्गतिः)

अत्र च धात्वर्थभेदमात्रस्यैव विवक्षितविवेकेन निरूपणीयत्वेऽप्यध्यायार्थरूपभावनाभेदसिद्ध्यर्थत्वादध्यायसङ्गत्यविरोधः। एवं सङ्ख्याद्यधिकरणेष्वपि द्रष्टव्यम्। पादसङ्गतिस्तु स्पष्टैव। अनन्तरा तु पूर्वाधिकरणे सत्यप्याख्यातैक्येन भावनाप्रत्यभिज्ञाने धातुभेदेन तदर्थभेदाद्युक्तो भावनाभेदः, प्रकृते तु धातोरप्येकत्वेन तद्भेदे प्रमाणाभाव इति पूर्वपक्षोत्थानाद्द्रष्टव्या।

(पूर्वपक्षः)

तत्र धातुस्तावत् स एवेति दृढतरप्रत्यभिज्ञयाऽवगम्यत इ-

१. तै. सं. २. ६. १.

त्यविवादम्। अतस्तदर्थोऽप्येक एव। न च पुनरुच्चारणाद्भेदस्तस्य, लोके पटः पट इत्यादौ शतश उच्चारितोऽपि भेदाप्रतीतेः। प्रत्युत प्रत्यभिज्ञापकत्वेनाऽभेदसाधकतया विरुद्धत्वात्। न च पुनःश्रुतिमात्रस्याऽभेदसाधकत्वेऽपि विधिपुनःश्रुतिः स्वसमभिव्याहृतार्थे विहितविधानायोगेन भेदसाधकत्वान्न विरुध्यत इति वाच्यम्। उपक्रमस्थयजिपुनःश्रुतिबलेनैकवाक्यतालाभाय च 'एकं वृणीते द्वौ वृणीते' इतिवत् 'तनूनपातं यजती'त्यादौ लडन्तत्वस्याऽपि सम्भवेन विधिपुनःश्रुतेरेवाऽसिद्धेः। अतश्च(१) तद्वदेवाऽयमेकस्याऽर्थवाद इति नाऽनर्थक्यप्रतिहतत्वेनाऽपि विधिपुनःश्रुतेर्भेदकता।

अस्तु वा(२) 'समिधो यजति वसन्तमेवर्तूनामवरुन्धे' 'तनूनपातं यजति ग्रीष्ममेवाऽवरुन्धे' इत्यादिपृथगर्थवादाम्नानान्निस्सन्दिग्धगुणविधिव्यवहितत्वाच्च 'तनूनपातं यजती' त्यादिरपि विधिः, तथाऽपि 'दध्ना जुहोती' त्यादिवत् गुणसङ्क्रान्तशक्तिकत्वात् विधेर्धात्वर्थभावनाविषयत्वाभावेन न तद्भेदकत्वापत्तिः; सर्वत्र हि समिदादिपदानां द्वितीयान्तानामपि 'विष्णुं यजती' तिवद्देवतापरत्वमेवाऽवगम्यते, न तु नामधेयत्वम्, येन तस्याऽविधेयत्वाद्विधिः धात्वर्थभावनाविषय एव 'अग्निहोत्रं जुहोती' तिवद्भ्राम्येत, तेषां तूभयत्र तुल्यवद्वृत्तिकत्वाभावेन नामधेयन्यायाविषयत्वात्।

न च न्यायान्तराविषयत्वेऽपि समिदादिदेवतानां(३) याज्यामन्त्रवर्णैरेव सम्भवत्प्राप्तिकत्वात्'अग्निहोत्रं जुहोती'तिवत्तत्प्रख्यन्यायविषयत्वोपपत्तिः,(४)'वसन्तमृतूनां प्रीणामी' त्याद्यनुमन्त्रणमन्त्रैः

१. अयं च विषयः (६. १. १०.) अधिकरणे द्रष्टव्यः।

२. तै. सं. २. ६. १.

३. समिधस्समिधोऽग्न आज्यस्य वियन्तु इत्यादयो मन्त्रवर्णाः।

४. तै. सं. १. ६. २.

वसन्तादिदेवतानामपि प्राप्तिसम्भवेन समिदादीनां नित्यप्राप्त्य-भावात्। अतो वसन्तादिमान्त्रवर्णिकदेवताव्यावृत्तिफलकस्य स-मिदादिनियमस्याऽप्राप्तत्वेन विधिवाक्यैर्विधानोपपत्तेः नामधेय-त्वासम्भवाद्विधायकस्य गुणसङ्क्रान्तशक्तित्वेन धात्वर्थभावना-विषयत्वाभावान्न तद्भेदकत्वम्। न चैवं कर्मोत्पत्तिवाक्यस्थदेवता-वरोधात् कथमुत्पन्नवाक्यस्थदेवतान्तरविधानोपपत्तिः, कर्मोत्प-त्तिवाक्यस्थोपपदस्य नामत्वाङ्गीकारात्, अत एव न गुणाद्भे-दशङ्का। न चैवमपि विनिगमनाविरहः, प्राथमिकत्वेन समिद्वाक्ये कर्मविधिरितरत्र गुणविधिस्तदनुवादेनेति विनिगन्तुं शक्यत्वादि-ति पार्थसारथिभवदेवश्च।

वस्तुतस्तु समित्पदस्याऽपि नामधेयत्वं नोद्भिन्न्यायासिद्धम्, उभयत्र तुल्यवद्वृत्तिकत्वाभावात्। वाक्यभेदतद्व्यपदेशौ तु ना-शङ्कनीयावेव। तत्प्रख्यन्यायोऽपि नियमस्याऽप्राप्तत्वादनुपपन्नः, देवतामात्रप्राप्त्या तदुपपादनं तु तनूनपातादिपदेष्वप्यविशिष्टम्। अतो न समित्पदमात्रस्य नामधेयत्वाभिधानं युज्यते। तस्मादेवं प-रिहर्तव्यम्—स्वाहाकारवाक्ये कर्मविधिः, तत्रत्यस्वाहाकारपदस्य नामधेयत्वात्। न हि तत्र स्वाहाकारपदं स्वाहाकाररूपदेवता-विधायकम्, तस्य णमुलन्तत्वस्याऽपि सम्भवेन द्वितीयान्तत्व-स्यैव नियामकाभावात् देवताविध्यप्रतीतेः, मन्त्रतः पक्षे स्वाहा-कारदेवताया अप्राप्तत्वेनाऽपूर्वायाः स्वाहाकारदेवताया विधौ गौरवाच्च। नाऽपि स्वाहाकारशब्दमात्रविधिः, णमुलन्तत्वस्याऽपि संशयितत्वेन तद्दोषतादवस्थ्यात्, स्वाहाकारशब्दस्य मन्त्रवर्णा-न्नित्यप्राप्तत्वेन नियमविधेरप्यनाशङ्कनीयत्वाच्च। अतोऽसौ त-त्प्रख्यन्यायेन नामधेयमिति तत्रैव कर्मविधिः। इतरे तु तदनु-वादेन वैकल्पिकदेवताविधयः। अस्मिश्च पक्षे(१) 'स्वाहाऽग्निम्,

१. तै. ब्रा. ३.५ ५.।

स्वाहा सोम' मित्यादिमन्त्रो मुख्यलिङ्गकैर्मन्त्रान्तरैर्याज्याकार्ये बाधितेऽपि महाप्रकरणसहकृताल्लिङ्गात्साङ्गप्रधानदेवताप्रकाशनार्थस्सन् 'स्वाहा देवां आज्यपाँ' इत्यादिना प्रयाजदेवताया अपि प्रकाशितत्वात्तदङ्गमपि भवत्येवेति नैतस्य प्रधानमात्राङ्गत्वापत्त्या प्रयाजे स्वाहाशब्दस्याऽप्राप्तत्वात् तत्प्रख्यन्यायविघातश्शङ्क्यः॥ अतः समिदादिवाक्यानां तत्रैव देवताविधायकत्वोपपत्तेर्विधिपुनःश्रवणस्य धात्वर्थविषयत्वाभावात् न तद्भेदकत्वोपपत्तिः।

अस्तु वोपांशुयागोत्पत्तिवाक्ये देवताभावात्तदनुवादेन समिदादिवाक्येषु पञ्चस्वपि देवताविधिः, तत्क्रमाम्नातविष्ण्वादिदेवत्ययाज्यानुवाक्यायुगलानां तु क्रमं बाधित्वा समाख्यासहकृतलिङ्गेनोत्कर्ष इति भवदेवोक्तः पक्षः। अस्तु वा वक्ष्यमाणसिद्धान्तरीत्यैव समिदादीनां पञ्चानामपि नामधेयत्वम्, तथाऽपि प्राथमिकत्वेन समिद्वाक्य एव कर्मविधिः, इतरे तु तस्यैव कर्मणोऽभ्यासविधायकाः,(१)'तेन पुनर्यजेतेतिवत्'। न तु कर्मान्तरविधायकाः, प्रकृतप्रत्यभिज्ञाबाधप्रसङ्गात्। अस्मिंश्च पक्षे 'अतिहायेडो बर्हिः प्रतिसमानयते' 'चतुर्दश पौर्णमास्यामाहुतयः' इत्यादिसमुच्चयज्ञापकान्युपपन्नानि भवन्ति। न चैवं संज्ञातो भेदापत्तिः, तस्याऽप्यभ्यासाभिप्रायेणैवोपपत्तेः॥ अतस्सिद्धं कर्मैकत्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—सत्यपि लेट्लट्सन्देहे विध्यन्तरैकवाक्यत्वाभावात्, स्वतन्त्रानुवादमात्रत्वे त्वानर्थक्यापत्तेः, निस्सन्दिग्धगुणविधिव्यवहितत्वाच्च एतेषामेव मध्ये कस्य चिद्विधित्वमितरे

---

१. यद्युद्गाता अपच्छिन्द्यादृदक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेते' त्यत्र दक्षिणां विना समापितस्यैव प्रथमप्रयोगस्य 'तेन पुनर्यजेते' त्यनेनाऽभ्यासविधिः तद्वदित्यर्थः।

तदर्थवादा इति शङ्कानुपपत्तेः, सर्वेऽपि तावद्विधय इत्यविवादः। तत्र समानाभिधानश्रुत्या समानपदश्रुत्या च विधिर्धात्वर्थभावनयोरेव व्याप्रियते, न तूपपदार्थ (१)इत्ययमप्युत्सर्गः, प्रथमविधिप्रकाराङ्गीकारात् । तच्चेदं तदा बाध्येत यदि दध्यादिवदुपपदार्थोऽनन्यगतिः स्यात्। तथा हि—विधिः स्वस्य विशिष्टविधिगौरवपरिहारार्थं धात्वर्थभावनयोः प्राप्तिमन्यतोऽपेक्षते । तस्याश्चाऽपेक्षायां प्रत्यभिज्ञानमनुवादकारणम्, न त्वपेक्षाराहित्येऽपि । अतश्चाऽपेक्षाप्रत्यभिज्ञयोर्द्वयोरपि परस्परापेक्षत्वेनाऽनुवादकारणत्वात् यथैव 'सोमेने'त्यादौ सत्यामप्यपेक्षायां प्रत्यभिज्ञाभावान्न धात्वर्थभावनयोरनुवादः, तथैव प्रकृते विधेयान्तराभावेनाऽनुवादापेक्षाभावात् सत्यपि प्रत्यभिज्ञाने नाऽनुवादोपपत्तिः । अतश्च स्वोपमर्दापत्तेः विधिस्तावन्नैतादृशविषये सन्निधिकृतप्रत्यभिज्ञोपजीवी । नाऽपि यजिः, तस्याऽपि समानपदोपात्तविधिश्रुत्यनुरोधप्रवृत्तित्वेन सन्निधिकृतप्रत्यभिज्ञानुपजीवकत्वात् । एवं सत्यपि यदि याजिस्तच्छब्दवत् प्रकृतमात्रवाची भवेत्ततस्तस्योपक्रमस्थत्वेन बलवत्त्वात् तदनुरोधेन जघन्यो विधिरेव 'देवांश्च याभिर्यजत' इतिवदनुवादकत्वेनैव नीयेत।

वस्तुतस्तु तद्वदिह प्रयोजनाभावादानर्थक्यप्रतिहतत्वेन उपक्रमस्थयजेरेवाऽप्रकृतपरत्वं लक्षणयाऽभ्युपगम्यतैव, किमुत यदा यजिः प्रकृताप्रकृतसाधारणः, तदा समानपदोपात्तविधिपुनःश्रुत्यनुरोधेन सान्निधिकृतप्रत्यभिज्ञां बाधित्वा अप्रकृतविषयत्वे यजेर्न किञ्चिद्बाधकं पश्यामः । यत्तु प्रकृतेऽपि सामिदादिदेवतानियमस्य (२)सत्त्वात् विधिर्धात्वर्थभावनांशे प्राप्तिसापेक्ष इत्युक्तम्, तन्न; अन्यतराकाङ्क्षाबललभ्यसम्बन्धानुमन्त्रणमन्त्रक-

---

१. इत्युत्सर्ग इति क. पु.   २. विधेयस्य सत्वादिति क. पु.

ल्प्यवसन्तादिदेवतापेक्षया उभयाकाङ्क्षावल्लभ्ययाज्यामन्त्रवर्णकल्प्यसमिदादिदेवतानां बलवत्त्वेन विषमशिष्टविकल्पानुपपत्तेः नियमाविध्ययोगात् । अतः समिद्यागे, स्वाहाकारयागे वाऽवान्तराधिकाराख्यप्रकरणेन सर्वेषां याज्यामन्त्राणामङ्गत्वावगतेः तद्बलेन मान्त्रवर्णिकसमिदादिमात्रदेवताकल्पनं नऽनुपपन्नम् ।

न चैवं 'वसन्तमृतूना' मित्याद्यनुमन्त्रणमन्त्राणां पूषानुमन्त्रणमन्त्रवदुत्कर्षापत्तिः, तद्वदेतेषां प्रयाजानुमन्त्रणसमाख्यातत्वेन प्रयाजातिरिक्ते सामान्यसम्बन्धबोधकप्रमाणाभावादुत्कर्षानुपपत्तेः । अतो(१) मनोतामन्त्रवल्लक्षणयाऽत्र समिदादिदेवताप्रकाशनार्थान्येवैतानीति द्रष्टव्यम् , न तु तन्त्ररत्नोक्तमदृष्टार्थत्वम् ।

न चैवं(२) 'एको ममे' त्यादीनामनुमन्त्रणमन्त्रान्तराणां विकल्पापत्तिः, तेषामपि लक्षणया प्रयाजफलप्रकाशकत्वेन भिन्नकार्यतया समुच्चयोपपत्तेः । विशिष्य चाऽयमर्थः (३)रश्रमे (?) निरूपयिष्यते । अतस्समिदादिपदानां तत्प्रख्यन्यायेन नामधेयत्वाद्विधेयान्तराभावेन विधेर्धात्वर्थभावनाविषयत्वावगतेः विहितविधानायोगेन विधिपुनःश्रवणरूपादभ्यासाद्भेदसिद्धिः । अत्र च न पुनःश्रुतिमात्रस्य भेदसाधकत्वम् , तस्या अभेदसाधकत्वेन विरुद्धत्वात् । अतो विधिप्रवेशः । तस्य च स्वोपमर्दापत्तेरभेदसाधकत्वाभावान्न विरुद्धता । पुनःश्रवणं चऽनन्यपरं द्रष्टव्यम् । अतश्च 'दध्ना जुहोती'त्यादौ सत्यपि विधिपुनःश्रवणे गुणनिमित्तफलादिसम्बन्धपरत्वान्न भेदकता वि-

१. 'त्वं ह्यग्ने प्रथमो मनोतेति' मन्त्रः मनोतापदघटितत्वान्मनोतामन्त्र इत्युच्यते ।

२. 'एको मम एका तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्मः' इति पञ्च अनुमन्त्रणमन्त्राः प्रयाजप्रकरणे वाजसनेयिशाखायामाम्नाताः॥

३. पू. मी.५.१.३.

धिपुनःश्रवणस्य । अनन्यपरत्वेऽपि च विधानयोग्यपरत्वं द्रष्टव्यम् । अतश्च 'य एवं विद्वानि'त्यादौ सत्यप्यनन्यपरत्वे रूपाभावेन विधानयोग्यत्वाभावान्न भेदकतेति(१)उत्तराधिकरणे वक्ष्यते । प्रकृते तु जौहवाज्यस्य समिदादिदेवतायाः प्राप्तत्वेन रूपलाभान्न विधानायोग्यत्वम् ।

वस्तुतस्तु 'य एवं विद्वानि'त्यत्राऽपि अधिकारवाक्यगतद्वित्वसिद्धिफलकसमुदायपरत्वेनाऽनन्यपरत्वाभावादेव न भेदकता । रूपाभावस्त्वतिशयार्थमुक्तः, अन्यथाऽव्यक्तत्वेन सौमिकधर्मातिदेशस्य विद्वद्वाक्ययोः,'वैश्वदेवेन यजेते'त्यादौ च कथमपि निवारयितुमशक्यत्वात् । न चैवमत्राऽपि विधिपुनःश्रवणस्य 'एकादश प्रयाजान् यजती'तिवदावृत्तिविधानार्थत्वेनाऽन्यपरत्वात् भेदकता न स्यादिति वाच्यम् । तत्र हि प्रयाजानुवादेन विधीयमाना सङ्ख्या निर्ज्ञातसंख्येषु तेषु साक्षात्सम्बन्धेन निवेशमलभमाना प्रयाजप्रयोगपरिच्छेदकत्वेन विधेयत्वाद्युक्तं यदर्थादभ्यासमापादयतीति,प्रकृते तु विधेयान्तराभावेन यागपुनःप्रयोगस्यैव विधेयत्वकल्पनात्'तनूपातं यजती'त्यादियजिना अदृष्टान्तरफलकस्य यागप्रयोगगतद्वितीयत्वादेः पुनःप्रयोगाभ्यासावृत्त्यपरनामधेयस्य लक्षणापत्तेः तत्परत्वायोगात् । 'तेन पुनर्यजेते'त्यत्र तु पुनःशब्देनैव पौनःपुन्यस्य कृतत्वात् न लक्षणेति वैषम्यम् ।

न चैवं सिद्धान्तेऽपि यजिधातुना यागत्वसामान्यवाचकेन विधेयतावच्छेदके विजातीययागत्वलक्षणा तुल्यैवेति वाच्यम् । तल्लक्षणायामपि तदवच्छेद्ययागव्यक्तेश्शक्यतावच्छेदकीभूतयागत्वेनाऽप्यवच्छेदेनेदृशलक्षणाया अदोषत्वात् । अतः आवृत्तिरूपान्यपरत्वायोगात् अनन्यपरपुनःश्रवणस्य भेदकत्वमावश्यकमेव ।

१. पू. मी. २. २. ३.

यत्तु भवदेवेनोपांशुयाजानुवादेन सामदादिदेवताविधान-मिति पूर्वपक्षः कृतः, स वैकल्पिकसमिदादिदेवताकत्वे 'अति-हायेडो बर्हिः प्रतिसमानयत' इत्यादिसमुच्चयज्ञापकानुपपत्तेरेतद्वि-ध्यन्यथानुपपत्तिकल्पितसमुच्चयविधिप्रसूतोपांशुयाजावृत्तिकल्पने च गौरवापत्तेः,'विष्णुरुपांशु यष्टव्योऽजामित्वाये' त्याद्यर्थवादा-नुपपत्तेश्च निराकर्तव्यः । तत्सिद्धमनन्यपराविधिपुनःश्रवणरूपादभ्यासादेतेषु पञ्चस्वपि धात्वर्थभावनयोर्द्वयोरपि विधानावगतेः विहितविधानायोगेन भेद इति ।

नन्वेवं संज्ञोपबन्धाख्यातेषु सर्वत्राऽभ्यासेनैव भेदसिद्धेर्न क्वचित्संज्ञाया भेदकत्वं भवेत्, तस्या वा भेदकत्वे प्रकृतेऽपि तत एव भेदसिद्धेर्नाऽभ्यासस्याऽसङ्कीर्णोदाहरणलाभ इति चेत्, न; यत्राऽऽख्यातसामानाधिकरण्याभावेन यागविशेषनामत्वानवगमेऽपि 'अथैष ज्योति'रित्यादौ अधिकारादथशब्दान्वयेनाऽनिर्धारित-क्रियाविशेषसंज्ञात्वनिश्चयं कृत्वा तद्बलेनैव विध्याख्यातकल्पनम्, तत्राऽभ्यासस्य संज्ञाधीनसिद्धिकत्वेन दुर्बलत्वात् संज्ञयैव तदव-धारणम् । यत्र वा 'उद्भिदा यजते'त्यादौ संज्ञाभावे प्रकृतस्यैव यागस्य फलसम्बन्धो गुणफलसम्बन्धो वा प्रकृतयागाश्रितो विधिपुनःश्रवणेऽपि विधीयत इत्यनन्यपरत्वाभावान्नाऽभ्यासस्य भेदकत्वम्, तत्राऽपि निष्प्रतिद्वन्द्वमेव संज्ञाया भेदकत्वम् । प्र-कृते त्वभ्यासस्वरूपस्य संज्ञानधीनत्वादन्यपरत्वाभावेनाऽधि-कबलत्वाच्च युक्तं तस्य भेदकत्वम् ।

न च संज्ञाया अपि प्रकृते प्रत्यक्षयन्यायसिद्धत्वेनाऽभ्यासस्य यागविध्यधीनत्वाभावात्, प्रत्युत संज्ञात्वाभावे देवताविधिपरत्वे-नाऽभ्यासस्यैव तदधीनत्वात्, संज्ञयैव भेदसिद्धेर्नाभ्यासस्याऽस-ङ्कीर्णोदाहरणत्वमिति वाच्यम् । प्रकृतोदाहरणे प्रमाणद्वयसङ्करे-

ऽपि यत्रोभयत्र तुल्यवृत्तिकधातुपारार्थ्यादिना नामधेयतासिद्धिः, तत्र विधेर्धात्वर्थभावनाविषयत्वद्वारकभेदावगमोत्तरमेव संज्ञात्वसिद्धेरभ्यासस्यैवाऽसङ्कीर्णस्य भेदबोधकत्वोपपत्तेः, प्रकृतोदाहरणेऽपि तत्प्रख्यन्यायस्य गुणविधिमात्रप्रतिबन्धकत्वात्, यजिसमभिव्याहारस्य च मन्त्रवर्णप्राप्तदेवतानुवादकत्वेनाऽप्युपपत्तेर्नामधेयकृत्यस्य चाऽवच्छेदस्य स्ववाक्योपात्तनामधेयेनैव सिद्धेर्नामत्वानवगमात् ततः पूर्वमेव विधिपुनःश्रवणस्य भेदकत्वोपपत्तेश्च । न चैवं तदुत्तरमपि नामत्वानवगमप्रसङ्गः,अभ्यासभिन्नकर्मान्तरस्यैवाऽवच्छेदकापेक्षायां तदङ्गीकारात् । अतश्च सिद्धोऽभ्यासमात्रप्रमाणकोऽत्र धात्वर्थभेद इति ।

भेदश्चाऽत्र न व्यक्तिमात्रस्य, अपि तु तद्गतजातेरपि, विधेयभेदे विधेयतावच्छेदकभेदस्यौत्सर्गिकत्वात् । अतश्च यागत्वाद्व्याप्या जातयः समिद्यागत्वतनूपाद्यागत्वादिरूपास्तत्तद्वाक्यगतेन यजिना लक्षयित्वा तत्तदवच्छिन्नयागव्यक्तयो विधीयन्ते । न चाऽत्र विधेयतावच्छेदकमुपाधिरूपं किञ्चित्सम्भवति, तनूनपातादिदेवतानां यागविधेयतावगत्युत्तरकालं विधेयत्वेन विधेयत्वानवच्छेदकत्वात् ।

यत्तु वार्तिके गकारादिवदेकैव समिद्यागव्यक्तिर्नित्या तद्देशकालद्रव्यकर्त्रादिभेदेनाऽभिव्यज्यते, द्रुताद्युच्चारणभेदेनेव गकारव्यक्तिः । अतस्तद्भेदोपाधिकैव तस्या भेदप्रतीतिर्न तु स्वतः । सैव च विधिना विधीयते, विधेयतावच्छेदकाभावेऽपि च व्यक्तिमात्रं विधिना विधीयत इति पक्षान्तरमुक्तम्, तत् शाब्दादपि निर्विकल्पकप्रत्ययोत्पत्तिमङ्गीकृत्येति द्रष्टव्यम् । यदा तु शाब्दात्सविकल्पकमेवेति नियमः, तदा व्यवहारसौकर्यार्थं समिद्यागत्वादिजातिकल्पनेऽपि न किञ्चिद्बाधकम् । अत एव यत्रोपाधि-

रूपमेव पदप्रवृत्तिनिमित्तं सम्भवति, यथा—दर्शपूर्णमासेष्टिसत्रैकहायनीशब्देषु तत्तत्कालत्वादि, तत्र न जातिकल्पनम्, गौरवात्। प्रकृते तु तादृशोपाध्यभावाज्जातिकल्पनेऽपि न किञ्चिद्बाधकं पश्यामः। अस्तु वा समिद्यागत्वाद्यखण्डोपाधिः। तस्मात्सिद्धोऽभ्यासाद्भेदः।

प्रयोजनम्—देवताविधिपूर्वपक्षे तासां दृष्टार्थत्वेन विकल्पात्सकृदेव कर्मानुष्ठानम्। आवृत्तिविधिपूर्वपक्षे तु यत्र विकृतिविशेषेऽपूर्वार्थं समिद्यागपुनःश्रवणम्, तत्राऽपि तनूनपातादिसंज्ञिकाया आवृत्तेस्समिद्यागाङ्गत्वेन 'प्रधानं नीयमानं हि तत्राऽङ्गान्यपकर्षती'ति न्यायेन प्राप्तेः पञ्चकृत्वोऽनुष्ठानम्। तथा समिद्यागाश्रितस्य फलार्थस्य गुणस्य सायं प्रातरग्निहोत्रावृत्तौ दध्यावृत्तिवत्पञ्चवारमावृत्तिः। सिद्धान्ते तु प्रकृतौ प्रयाजानामदृष्टार्थत्वात्पञ्चानामप्यनुष्ठानम्। न च तत्राऽप्येकया प्रयाजसमाख्यया एककार्यत्वावगतेर्विकल्प एव युक्त इति वाच्यम्। 'त्रिरतः प्राचीनान्प्रयाजान्यजति' 'अतिहायेडो बर्हिः प्रतिसमानयत' इत्यादिसमुच्चयज्ञापकबलेन तत्सिद्धेर्विकल्पायोगात्। विकृतिविशेषे च पुनःश्रुतस्य समिद्यागमात्रस्यैवाऽनुष्ठानम्, काम्यश्च गुणस्तत्रैवाऽनुष्ठेय इति।

सूत्रं तु—एकस्य या अविशेषेण पुनःश्रुतिः साऽप्येवं कर्मभेदिका, अन्यथा आनर्थक्यापत्तेरिति व्याख्येयम् ॥ २ ॥

इति द्वितीयमभ्यासाधिकरणम् ॥ २ ॥

अथ तृतीयं पौर्णमास्यधिकरणम् ।

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ २-२-३ ॥

(विषयसंशयौ)

इदानीमभ्यासस्याऽपवादः क्रियते । दर्शपूर्णमासयोः(१) 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजत' इति वाक्यद्वयं श्रुतम् । तत्र किं कर्मान्तरं पौर्णमासीसंज्ञकममावस्यासंज्ञकं च विधीयते? उत ये श्रुतपौर्णमासीकालसम्बन्धा आग्नेयोपांशुयाजाग्नीषोमीयाः प्रकृता यागास्ते पौर्णमासीवाक्येन, ये च श्रुतामावास्याकालसम्बन्धा आग्नेयसान्नाय्यैन्द्राग्नास्त अमावास्यावाक्येन समुदायसिद्ध्यर्थमनूद्यन्त ? इति विचारः ।

(पूर्वपक्षः)

तत्र यजत इत्ययं तावद्विधिरित्यसन्दिग्धम् । सत्यपि च वर्तमानविभक्तित्वसन्देहे विध्यन्तरैकवाक्यत्वाभावेन स्तुत्यर्थमनुवादानुपपत्तेः, स्वतन्त्रानुवादस्य च वक्ष्यमाणरीत्या सार्थकत्वासम्भवेनाऽऽनर्थक्यापत्तेः परिशेषादेव पञ्चमलकारत्वनिश्चयात् । अत एव(२) 'यावदुक्थ्येनोपाप्नोति तावदुपाप्नोती'ति पौर्णमासीवाक्यस्य 'यावदतिरात्रेणोपाप्नोती' त्यमावास्यावाक्यस्याऽर्थवादोऽपि सङ्गच्छते । अन्यथा हि विधेयाभावात्कस्य स्तुतिरेताभ्यां क्रियेत ।

(३)न चैवं सति यच्छब्दैवंशब्दाभ्यां विधित्वप्रतिबन्धः, क्रियाविशेषितकर्तृसमानाधिकरणस्य यच्छब्दस्य, क्रियाविशेष-

---

१. २. तै. सं. १. ६. ९. ३ न चैवमपीति. क. पु.

परामर्शकस्यैवंशब्दस्य च समभिव्याहृतवेदनक्रियाविधिप्रतिब-न्धकत्वेऽपि यागक्रियाविधि(१)प्रतिबन्धकत्वाभावस्य भवदेवैनै-वोक्तत्वात् । अत एव(२) 'यो दीक्षितो यदग्नीषोमीयं पशुमाल-भत' इत्यत्र दीक्षाविधिः प्रतिबध्यते, न तु यागविधिः । अतश्च पूर्ववदेव विधिपुनःश्रवणात् कर्मान्तरत्वम् । न चाऽत्रान्यपर-त्वम्, स्ववाक्ये फलनिमित्तगुणादिप्रतिपादकशब्दाभावेन त-त्परत्वासम्भवात्, पौर्णमास्यमावास्याशब्दयोस्तत्र मम च नाम-धेयत्वात् ।

न च प्रापकप्रमाणात्पूर्वमेवैतद्वाक्यप्रवृत्त्यङ्गीकारेण तस्यैव कर्मणः प्रयोजनान्तरार्थं विधिरङ्गीक्रियत इति वाच्यम् । प्रापक-प्रमाणस्याऽऽग्नेयादिवाक्यरूपस्य श्रौतत्वेन ततः पूर्वं(३)एतत्प्रवृ-त्त्यङ्गीकारानुपपत्तेः, पुनर्विधानस्य च प्रयोजनाभावाच्च । तथा हि—न तावदेकेन पदेनाऽनेकेषामुपादाने साहित्यप्रतीतेस्स-मुदायसिद्धिः प्रयोजनम्, तस्यास्स्वतो निष्प्रयोजनत्वात् । न चैतद्वाक्याभावे 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिका-रवाक्ये दर्शपूर्णमासनामावच्छिन्नेन यजिनोपात्तानामेव यागानां फलसम्बन्धावगमेऽपि तेन द्विवचनान्तदर्शपूर्णमासपदावयवश-क्तिपर्यालोचनया कालयोगिनां, द्वित्वयोगिनां चोपादानावगते-रुत्पत्तिवाक्ये कालयोगिनां चाऽऽग्नेयादीनां द्वित्वयोगाभावात्, द्वित्वयोगिनां चाज्यभागादीनां कालयोगाभावादप्रसिद्धार्थकद-र्शपूर्णमासनामकत्वागतेः, तत्समभिव्याहृतेनाऽपि यजिना राज-सूयवत्प्रकृतयागमात्रग्रहणेन सर्वेषां फलसम्बन्धापत्तेः, एतद्वा-क्यद्वयसत्त्वे च कालयोगिनामाग्नेयादीनां समुदायद्वयकरणेन

---

१. प्रतिबन्धकताभावस्येति. के. पु. २. तै. सं. ६. १ .११

३. एतद्वाक्यप्रवृत्तीति. क. पु.

तद्द्वारकाद्वित्वसम्बन्धावगतज्योतिष्टोमवत्प्रसिद्धार्थकदर्शपूर्णमासनामावच्छिन्नेन यजिना तन्मात्रोपादानेन तेषामेव फलसम्बन्धावगतेष्षड्यागफलसम्बन्धापादकनामगतद्विवचनप्रसिध्युपयोगिसमुदायद्वयफलकत्वेन वचनद्वयसार्थक्योपपत्तिरिति वाच्यम् । एतद्वाक्यद्वयेन पौर्णमास्यमावास्यासंज्ञकयागसमुदायद्वयकरणेऽप्यधिकारवाक्यस्थदर्शपूर्णमासशब्दस्य ततो भिन्नत्वेन तदुपस्थापकत्वानुपपत्तेरप्रसिद्धार्थकत्वस्य तदवस्थत्वात् । न हि पौर्णमासीपदं पूर्णमासपदं च तुल्यम्, दर्शामावास्यापदयोस्त्वैक्यमनाशङ्कनीयमेव । (१) यदा तु पूर्णमासशब्दस्याऽत्यन्तसाम्याभावेऽपि नामैकदेशत्वेन वाऽऽख्याविकारत्वेन वा पौर्णमासीपदोपस्थापनद्वारा तदर्थोपस्थापकत्वोपपत्तेः, दर्शशब्दस्य च विरुद्धलक्षणया चन्द्रादर्शनाधिकरणकामावास्यातिथिसम्बन्धिकर्मोपस्थापकत्वोपपत्तेः, अन्वारम्भणीयावाक्यशेषे च(२) "दर्शो वा एतयोः पूर्वः, पूर्णमास उत्तरोऽथ यत्पूर्णमासं पूर्वमारभते तद्यथापूर्वं क्रियते, तस्मात्पूर्णमासं पूर्वमारभमाणस्सरस्वत्यै चरुं निर्वपेत्सरस्वते द्वादशकपालममावस्या वै सरस्वती पूर्णमासस्सरस्वानि" ति दर्शामावास्याशब्दयोः पर्यायत्वावगमात् प्रसिद्धार्थकत्वमाशङ्क्येत, तत(३) एतद्वाक्यद्वयफलभूतसमुदायानुवादद्वयाभावेऽपि अधिकारवाक्ये दर्शशब्देन पूर्णमासशब्देन च श्रुतकालयोगिनां त्रयाणामेव कर्मणामुपादानेन, तत्समानाधिकरणेन यजिना षण्णामेव फलसम्बन्धोपपत्तेर्वाक्यवैयर्थ्यात् ।

न च दर्शपूर्णमासप्रातिपदिकस्य कालयोगिषु प्रसिद्धार्थकत्वेऽपि द्विवचनस्याऽप्रसिद्धेः कथं तस्य यज्यवच्छेदकत्वमिति

---

१. अथ तु इति. क. पु.   २. मै. सं. १. ४. १५.

३. एतद्वाक्यफलीभूतसमुदायद्वयाभावेऽपीति. क. पु.

वाच्यम् ? प्रातिपदिकप्रसिद्धिसत्त्वे (१)पाशाधिकरणन्यायेन द्विवचनानुरोधेन तत्त्यागानुपपत्तेः। (२)अवश्यं च समुदायद्वयसिद्धावपि फलवाक्ये भावार्थाधिकरणन्यायेन यजतेरेव करणसमर्पकत्वात्, तेन च षण्णामेकपदोपादानात् तन्त्राभिधानावगतैकसमुदायप्रतीतावपि यजिपदेन समुदायस्य शक्त्याऽनभिधानात्, तच्छक्यानां यागानामेव लक्षितसमुदायविशिष्टानां फलकरणत्वावगतेः, तेषां बहुत्वात् तत्सामानाधिकरण्यार्थं दर्शपूर्णमासपदेऽपि द्विवचनेन बहुत्वलक्षणा। अतश्च समुदायद्वयाभावेऽपि पापाशाधिकरणन्यायेन बहुत्व(३)लक्षणायामपि न दोषः। न चेयं निषिद्धा, 'सुपां सुपो भवन्ती' त्यभ्यनुज्ञानात्।

न च लक्षणाविशेषेऽपि मन्मते द्वित्वस्य समुदायवृत्तित्वात् स्वाश्रयसमुदायघटकसमुदायिवृत्तित्वरूपस्य शक्यसम्बन्धस्य सत्त्वात्तदुपपत्तिः, तव तु तदभावे कथं लक्षणेति वाच्यम् ? ममाऽपि द्वित्वस्य पौर्णमास्यमावास्याकालवृत्तित्वात् स्वाश्रयकालीनयागवृत्तित्वरूपस्वशक्यसम्बन्धेन बहुत्वलक्षणोपपत्तेः। अतश्च विद्वद्वाक्याभावेऽपि षड्यागफलसम्बन्धापादकनामगतद्विवचनप्रसिध्युपपत्तेः समुदायकरणस्य वैयर्थ्यान्न तत्प्रयोजनतया समुदायिविधानोपपत्तिः। एतेन समुदायिनामनुवादः समुदायद्वयप्रयोजनक इति सिद्धान्त्यभिप्रेतं प्रत्युक्तम्। अतश्चाऽनन्यपरविधिपुनःश्रवणरूपादभ्यासात् कर्मान्तरं विधीयते। पौर्णमास्यमावास्याशब्दश्च 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमा-

---

१. पू. मी. ९. ३. ५.

२. अतश्च तदनुरोधेन द्विवचन एव बहुत्वलक्षणाऽवगन्तव्येत्यधिकः पाठः 'क' पुस्तक उपलभ्यते।

३. लक्षणा न दोषायेति क. पु.

वास्यायाममावास्यया यजेते'ति वाक्यद्वयप्राप्तपौर्णमास्यमावास्याकालयोगेन तत्प्रख्यन्यायेन नामधेयम् । इदं हि वाक्यद्वयं तृतीयान्तनामधेयवशात् विद्वद्वाक्यविहितकर्मानुवादेन कालविधायकम्, अनन्यप्रयोजनत्वाच्च । न ह्याग्नेयादीनामुत्पत्तिवाक्यविहितकालकत्वेन प्रयाजाद्यङ्गानां च प्रधानकालकत्वेन तव मते एतस्य कालविधायकता सम्भवति ।

न चैवमपि कालविधौ सति नामधेयत्वम्, नामधेयत्वे च सति तदनुवादेन कालविधिरितीतरेतराश्रयापत्तिः, अग्निहोत्रन्यायेन पूर्वं सामानाधिकरण्येन(१) नामधेयत्वेऽवधारिते, पश्चात्तदनुवादविहितकालयोगेन प्रवृत्तिनिमित्तावधारणोपपत्तेः । अतस्तत्संज्ञककर्मान्तरविधानमेवेदम् । अत एव 'पौर्णमासी'मित्येकवचनं कर्मण एकत्वात्सङ्गच्छते । इतरथा समुदायिनां यागानां बहुत्वात् बहुत्वलक्षणार्थं स्यात् । द्वितीया तु 'अग्निहोत्रं जुहोती'तिवत् सामानाधिकरण्यार्थं करणत्वं लक्षयतीति न किञ्चिदनुपपन्नम् ।

न चैवमपि द्रव्यदेवतालक्षणरूपाभावाद्विधानायोग्यत्वम्, रूपाभावस्याऽसिद्धेः। तथा हि—द्रव्यं तावत् 'चतुर्ध्रुवायां गृह्णाती'ति प्रयोजनसाकाङ्क्षं ध्रौवं द्रव्याकाङ्क्षाभ्यामेव ताभ्यामुपांशुयाजवत् उभयाकाङ्क्षारूपाधिकराख्यप्रकरणेन सम्बध्यते ।(२) 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्य'मिति वचनेनाऽप्राप्तिबललब्धविधिशक्तित्वेन सर्वयज्ञार्थत्वेन तादर्थ्यचतुर्थ्या ध्रौवविधानाच्च । न चात्राऽऽज्यानुवादेन ध्रौवतामात्रस्य लाघवेन विधिप्रतीतेः न दृष्टान्ते दार्ष्टान्तिके वा सामान्यतोऽप्राप्ताज्यके तद्विधिसम्भव इति वाच्यम् । यज्ञाङ्गभूताज्यानुवादेन त-

१. नामत्व इति. क. पु. २. तै. ब्रा. ३. ३. ५.

द्विधौ विशिष्टोद्देशे वाक्यभेदापत्तेः, आज्यमात्रानुवादेन तद्विधौ चाऽलङ्करणादावपि तदापत्तेः यज्ञपदवैयर्थ्यप्रसङ्गात् , तदुद्देशेनाऽत्र ध्रौवाज्यस्यैव विधिप्रतीतेः बाधकाभावात् ।

न चैवमुभयाकाङ्क्षाबलेनैव तत्प्राप्त्युपपत्तेः विधिवैयर्थ्यम् , तद्बलेनाऽलङ्करणादिष्वयज्ञेष्वपि तत्प्राप्तिसम्भवेन तस्य तद्व्यावृत्तिफलकत्वात् । अत एवाऽलङ्करणादौ जौहवादिग्रहणेन निराकाङ्क्षस्याऽप्याज्यस्थाल्याज्यस्यैव विनियोगः, न तु ध्रौवस्य । तस्माद्द्रव्यं तावन्निर्बाधम् ।

देवताऽप्याज्यभागक्रमाम्नातानामपि वार्त्रघ्नीवृधन्वतीमन्त्राणां(१)'वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वत्यमावास्याया'मिति वचनेन क्रमं बाधित्वा विद्वद्वाक्यविहितकर्माङ्गत्वेन विनियुक्तत्वात् , तदन्यथानुपपत्तिकल्प्या अग्नीषोमरूपाऽत्र मान्त्रवर्णिकी । न चाऽबाधेनोपपत्तौ बाधायोगादाज्यभागयोरेवाऽव्यवस्थया प्राप्तानां मन्त्राणां व्यवस्थामात्रकरणेन वचनोपपत्तेः मान्त्रवर्णिकदेवताकल्पने प्रमाणाभाव इति वाच्यम् । आज्यभागयोः पौर्णमास्यमावास्याकालकर्तव्यत्वस्य विध्यभावेनाऽप्राप्तत्वात् तिथ्यन्तरक्रियमाणविकृतिषु वार्त्रघ्न्यादिप्राप्त्यभावापत्तेश्च । पौर्णमास्यां यावाज्यभागौ तत्र वार्त्रघ्नी इति कालकृतव्यवस्थानुपपत्तेरेतद्वाक्यस्थपौर्णमास्यमावास्यापदाभ्यां प्रसिद्धनामधेयत्वेन विद्वद्वाक्यस्थकर्मणोरेव लक्षणयोपस्थापनावगमादाज्यभागयोश्चैतत्पूर्वपक्षे समप्राधान्यस्य वक्ष्यमाणत्वेन विद्वद्वाक्यविहितकर्मानङ्गत्वात् पौर्णमास्यमावास्यापदाभ्यां तत्तद्वाक्यविहितकर्माङ्गभूताज्यभागलक्षणायां गौरवापत्तेश्च । एतद्वाक्यविहितपौर्णमास्याख्यकर्माङ्गभूताज्यभागयोर्वार्त्रघ्नी इति कर्मकृतव्यवस्थाया

१. तै. सं. २. ५. २.

अप्यनुपपत्तेर्लाघवेन एतद्वाक्यविहितकर्माङ्गत्वेनैव मन्त्रविध्यवगमात् मान्त्रवर्णिकदेवताविधानोपपत्तेः । एवं सत्यप्येतयोर्यद्यग्नीषोमीयादिवदन्यदेवताकत्वमवगतं स्यात्, ततो वाक्येन लिङ्गबाधायोगादगत्या विशिष्टलक्षणामङ्गीकृत्य गौरवमपि(१)'मिथश्चाऽनर्थसम्बन्ध'इति तृतीयस्थाधिकरणन्यायेनाऽऽश्रियेत, न तु तदस्ति । अत एवोपक्रमस्थपौर्णमास्यमावास्याप्रातिपदिकगतविशिष्टलक्षणागौरवभिया उपसंहारस्था सप्तम्येव 'तत्र जयाञ्जुहुया' दितिवल्लक्षणया प्राधान्यं प्रतिपादयन्ती न दुष्यति । अतोऽग्नीषोमप्रकाशकयोर्वार्त्रघ्नयोर्ऋचोः पौर्णमासीकर्माङ्गत्वात्तादृश्योरेव च वृधन्वत्योरमावास्याकर्माङ्गत्वादेकैकस्मिन् कर्मणि मन्त्रद्वयस्य दृष्टार्थत्वेन विकल्पावगतेः देवताद्वयस्याऽपि विकल्पः। एतयोश्चाऽनुवाक्यासमाख्यातत्वेऽपि न देवतालक्षणा, 'याज्यानुवाक्या' इति स्मरणात् तत्तद्दैवत्ययाज्यान्तरकल्पनं द्रष्टव्यम् ।

वस्तुतस्तु वार्त्रघ्नीत्याद्येकपदोपादानसामर्थ्यात् द्वयोरपि मन्त्रयोः साहित्यप्रतीतेः न विकल्पः। अतश्च मान्त्रवर्णिकदेवताद्वयस्याऽपि समुच्चयादेकैकस्य कर्मणोऽग्निहोत्रादिवदावृत्तिः, समुच्चितयाज्याद्वयकल्पनञ्च । अस्तु वा मन्त्रद्वयेनाऽपि लाघवाद्व्यासज्यवृत्त्येकदेवतात्वकल्पनम्, उभयप्रकाशकैकयाज्याकल्पनं च । सर्वथाऽस्ति विद्वद्वाक्यविहिते कर्मणि देवता ।

यत्तु वार्तिके अनयोरेवैका अनुवाक्या, एका याज्या, उभयत्राऽपि मनोतान्यायेनोभयत्र लक्षकत्वमङ्गीकृत्या कल्पनीयेत्युक्तम्, तत् अनुवाक्यासमाख्याबाधापत्तेर्लक्षणायां प्रमाणाभावाच्चोपेक्षितम् । आज्यभागयोस्तु 'तौ होचतुरग्नीषोमौ किमावयोर्वस्तु तद्रस्या' दिति प्रकृतयोरग्नीषोमयोः 'यस्यैककस्यै देवतायै ह-

१. जै. सू. ३. १. २३.

विर्निर्वपन्नाज्यस्यैव नौ यज' न्नित्यत्र पुराकल्पसरूपार्थवाद- कल्प्ये विधौ 'नौ' इत्यनेन द्वितीयान्तेन देवतात्वस्य 'विष्णुं यजती' तिवदुक्तत्वात्, 'अग्नीषोमाभ्यामाज्यभागौ यजती'ति- वचनेनैव वा तद्विधानात् तदनुरूपानुवाक्याकल्पनम् । याज्या तु क्रमप्राप्ता अभ्याहतैव । अतश्च विद्वद्वाक्यविहिते कर्मणि क- र्मरूपसत्त्वान्न विधानायोग्यत्वम् ।

अथ वाऽस्तु(१) एतद्वाक्यविहितकर्मानुवादेन समिदादि- वाक्ये देवताविधिः, समुच्चयज्ञापकसत्वाच्च(२) समुच्चयः। न चोपांशुयाजे समिदादिदेवताविधौ 'विष्णुरुपांशु यष्टव्य' इत्या- द्यर्थवादानुपपत्तिवदिह काचिदनुपपत्तिरस्ति । अस्तु वा (३)अ- व्यक्तत्वसादृश्यात् सौमिकधर्मातिदेशः । न च वाचनिकपौर्ण- मास्यमावास्या(४)कालसम्बन्धबाधप्रसङ्गात् पार्थसारथ्युक्तानति- देशः, वाचनिककालानुरोधेन सुत्यान्यकालीनाङ्गबाधेऽपि त- त्कालीनाङ्गानामतिदेशोपपत्तेः । प्रयाजानां तु मान्त्रवर्णिकदेवता- कत्वेन व्यक्तत्वात् कृत्स्नविधानाच्च(५) न सौमिकधर्मातिदेश प्रसक्तिरिति न तत्प्रतिबन्ध्यापादनं(६) शक्यम् । तस्माद्रूपोपपत्तेः (७)कर्मान्तरविधी एताविति सिद्धम् ।

एवञ्च फलवाक्येन षण्णामेव फलसम्बन्धस्सिध्यति । तथा हि—सर्वत्र प्रसिद्धपदसमभिव्याहारेणाऽप्रसिद्धपदार्थनिर्णयः । तद्यत्र नामधेयं प्रसिद्धम्, यथा चतुर्थान्त्यन्यायेन ज्योतिष्टोमप- दं सोमयागे, तत्र प्रकृतमात्रग्राहियजिनिर्णयः । यत्र वा यजि-

---

१. एतत्कर्मानुवादेनेति क. पु. २. तासां समुच्चय इति क. पु
३. अव्यक्तत्वादिति क. पु. ४. कालबाधप्रसङ्गादिति क. पु
५. सौमिकधर्मातिदेशप्रसङ्गानुपपत्तेरिति क. पु.
६. अनाशङ्क्यमेवेति क. पु. ७. कर्मान्तरविधिरेवेति क. पु.

पदं यागमात्रे प्रसिद्धम्, नामधेयं तु राजसूयादिरूपं प्रकृतयागायागमात्रपरं सम्भाव्यते, तत्र यजिनैव चतुर्थपादाद्यन्यायेन नामधेयनिर्णयः। न च राजा सोमस्सूयते अभिषूयतेऽस्मिन्निति व्युत्पत्त्या राजसूयपदस्याऽपि सोमयागमात्रे ज्योतिष्टोमपदवत्प्रसिद्धार्थकत्वात् तेनैव यजिनिर्णयोपपत्तेः कथं यजिना नामधेयनिर्णयः? राज्ञा क्षत्रियेण सूयते निष्पाद्यते असाविति व्युत्पत्त्या, राजा क्षत्रियः सुनोति स्नाति अभिषेकेणाऽऽर्द्रीक्रियतेऽस्मिन्निति व्युत्पत्त्या वा सर्वेष्वपीष्टिपशुसोमयागेषु राजसूयपदप्रवृत्तिसम्भवेन तस्य प्रसिद्धार्थकत्वाभावात् यजिना तन्निर्णयोपपत्तेः। तदिह दर्शपूर्णमासाभ्यामिति द्विवचनान्तं नामधेयमपि न प्रसिद्धार्थम्। द्वित्वस्याऽऽज्यभागादौ प्रसिद्धत्वेऽपि प्रातिपदिकस्य काऽप्यप्रसिद्धत्वात्।

न च तस्याऽपि पौर्णमास्यमावास्याकालरूपस्वशक्यसम्बन्धेनाऽस्त्याग्नेयादौ प्रसिद्धिः, दर्शपूर्णमासपदस्य पौर्णमास्यमावास्यापदाद्भिन्नत्वेन तदर्थ(१)वाचकत्वे प्रमाणाभावात्। अत एव पौर्णमास्यमावास्यानामकयोरपि विद्वद्वाक्यद्वयविहितकर्मणोर्दर्शपूर्णमासपदेना ग्रहणम्। न चैवमपि द्वित्वमात्रस्यैव प्रसिद्धेः तदनुरोधेन यजिना आज्यभागयोरेवोपादानोपपत्तेस्तयोरेव फलसम्बन्धापत्तिः, आग्नेयवाक्ये यागद्वयविधानस्याऽनुपदमेव वक्ष्यमाणत्वात् तावादाय विनिगमनाविरहात्। अतो द्विवचनप्रतिरूपकमव्ययमिदं यजिसामानाधिकरण्यात् प्रकृतयागवाचकत्वेन निर्णीयते इति राजसूयन्यायेन सर्वेषां फलसम्बन्धान्न षड्यागमात्रवृत्ति फलम्।

अस्तु वा पूर्वोक्तनामैकदेशत्वादियुक्तिनिचयबलेन दर्शपूर्णमास

१. वाचित्व इति क. पु.

शब्दस्य शक्त्या पौर्णमास्यमावास्याकालवाचित्वं निरूढलक्षणया च तद्योगिकर्मपरत्वम्, तथाऽपि आग्नेयादीनां षण्णां विद्वद्वाक्यविहितयोश्च कर्मणोः कालयोगस्याऽविशेषाद्दर्शपूर्णमासपदेन ग्रहणोपपत्तेः, द्विवचनस्य च(१) पाशाधिकरणन्यायेन बहुत्वलक्षणार्थत्वेऽपि बाधकाभावादष्टानामेव फलसम्बन्धोपपत्तेः न षण्णामेव सः। अथ वा विद्वद्वाक्यविहितकर्मणोः पौर्णमास्यमावास्यासंज्ञकत्वप्रसिद्ध्या तत्पर्यायदर्शपूर्णमाससंज्ञकत्वस्याऽपि प्रसिद्धेः, सिद्धान्तवत्पूर्वपक्षेऽपि प्रचयाशिष्टद्वित्वप्रसिद्ध्युपपत्तेः, तयोरेव फलसम्बन्धान्न षण्णामेव सः। अपि चाऽऽग्नेयद्वये पौर्णमास्यमावास्याकालत्वेन प्रातिपदिकप्रसिद्धेरेकवाक्योपादानावगतद्वित्वप्रसिध्या च द्विवचनप्रसिध्युपपत्तेस्तस्यैव फलसम्बन्धान्न षण्णामेव सः। तस्माद्यस्य कस्यचित्फलसम्बन्धेऽपि विद्वद्वाक्ययोः कर्मान्तरविधित्वमव्याहतमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते— नाऽत्राऽभ्यासस्वरूपमस्ति, 'यजत' इत्यस्य वर्तमानापदेशत्वेन विधित्वाभावात्। न चाऽप्राप्तार्थकत्वेन लेट्त्वनिश्चयः, आग्नेयादियागानां प्राप्तानामेवाऽनुवादसम्भवेन तदसिद्धेः। प्रत्युत यच्छब्दैवंशब्दसमभिव्याहारेणाऽनुवादत्वोपोद्बलनाच्च। न च तयोर्वेदनमात्रविधिप्रतिबन्धकत्वेऽपि न यागविधिप्रतिबन्धकत्वम्, तस्य तच्छब्दसमभिव्याहाराधिकसमभिव्याहृतमात्रवृत्तिविधिप्रतिबन्धकत्वस्य(२) 'देवांश्च याभियजत' इत्यत्र साधितत्वात्। एवं सत्यपि यच्छब्दस्य प्राप्तिद्योतनमात्रकारित्वात् यदि प्रमाणान्तरेण विशेषणस्य विशेष्यस्य विशिष्टस्य वा प्राप्तिर्न भवेत्, ततोऽगत्या विधिरप्यङ्गीक्रियेत। अत एव

१. पू. मी. ९. ३. ४. २. पू. मी. २. ८ ११.

'यो दीक्षितो यदग्नीषोमीय'मित्यत्र यच्छब्दो दीक्षामात्ररूपविशेषणप्राप्तिद्योतक एव, यागस्त्वप्राप्तत्वाद्विधेय एवेति विशेषः । अतश्च यच्छब्दोपबन्धादपि न लेट्त्वनिश्चयः ।

न चाऽऽनर्थक्यप्रसङ्गात्तन्निश्चयः, तदसिद्धेः । तथा हि—यजत इत्यनेन तावदेकैकेन प्रकृतत्वाविशेषेऽपि तत्तन्नामधेयसामानाधिकरण्यात् श्रुततत्कालयोगिन एव त्रयो यागा अनूद्यन्ते । तेषां च पौर्णमास्यमावास्यापदं तत्प्रख्यन्यायेन नामधेयम् । ततश्च त्रयाणामेकशब्दोपादानादेकप्रतीतिविषयत्वाच्च समुदायप्रतीतिः । अत एव 'पौर्णमासी' मित्याद्येकवचनं स्वाश्रयघटकवृत्तित्वसम्बन्धेन बहुत्वलक्षणार्थम् । द्विवीया तु यागानां(१)अर्थाक्षिप्तकर्मानुवादिनी मन्मते यथाश्रुतैव । अत्र समुदायस्य चाऽनुवदितारौ समुदायवचनावेताविति यथाश्रुतभाष्याद्यनुसारान्न पौर्णमास्यमावास्यादिशब्दा आग्नेयादिसमुदायवचना इति न भ्रमितव्यम्, तयोः कालयोगाभावेन तत्प्रख्यन्यायाविषयत्वात् मानान्तराप्रमितत्वेनाऽनुवादायोगाच्च, यजिना तदनुवादे लक्षणापत्तेश्च । अतश्च समुदायिनामेव समुदायसिद्ध्यर्थमनुवाद इति द्रष्टव्यम् ।

तत्प्रयोजनं च फलवाक्ये निमित्तवाक्ये चाऽनूद्यमानानामेव फलादिसम्बन्धसिद्धिः । तथा हि—दर्शपूर्णमासशब्दस्य पौर्णमास्यमावास्याशब्दपर्यायत्वस्य स्थापितत्वात् तत्संज्ञकानामाग्नेयादीनां षण्णामेव फलादिसम्बन्धित्वेन यजिनोपादानं सिद्धं भवति । तत्रत्यद्विवचनस्य च बहुत्वलक्षणायां स्वाश्रयघटकवृत्तित्वरूपशक्यसम्बन्धोऽपि प्रमापिता भवति ।

न चैतद्वाक्याभावेऽपि दर्शपूर्णमासप्रातिपदिकस्य श्रुतका

१. अर्थाक्षिप्तकर्मत्वेनैषाऽनुवादादिति क. पु.

लयोगिष्वाग्नेयादिष्वेव प्रवृत्त्युपपत्तेः, द्विवचनस्य च स्वाश्रयकालीनयागवृत्तित्वसम्बन्धेन बहुत्वलक्षणोपपत्तेः षण्णामेव फलादिसम्बन्धः (१)सिध्यतीति वाच्यम् । एतद्वाक्याभावे साक्षात्सम्बन्धेन कालद्वित्वोभययोगिनोराग्नेययोरेव तत्सम्बन्धापत्तौ बहुत्वलक्षणायां प्रमाणाभावेन षण्णां फलादिसम्बन्धासिद्धेः । अतस्तत्सिध्यर्थोऽयं समुदायानुवादः । सति ह्यस्मिन्ननुवाद आनर्थक्यभिया तत्प्रयोजनजिज्ञासायां फलवाक्यस्थद्विवचनस्य उक्तसम्बन्धेन बहुत्वलक्षणातात्पर्यग्राहकत्वावसायात् षण्णां फलसम्बन्धसिद्धिः सुलभैव ।

ननु नाऽऽग्नेयभेदे प्रमाणमस्ति । न तावदेकस्मिन् कर्मण्यसम्भवन्निवेशः समुच्चितकालद्वयलक्षणो गुणः, तस्याऽऽवृत्त्यापि निवेशोपपत्तेः । अन्यथा सायम्प्रातःकालभेदेनाऽग्निहोत्रस्याऽपि भेदापत्तेः । न च कालस्याऽनुपादेयत्वेनोद्देश्यत्वात् तदनेकत्वनिमित्तवाक्यभेदापत्त्या गुणविध्यैव भेदकत्वोपपत्तिः, कालस्योद्देश्यत्वेऽप्यङ्गत्वापरपर्यायस्याऽज्ञातज्ञापनविषयत्वापरपर्यायस्य च विधेयत्वस्य सत्त्वेन 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन' इतिवद्वाक्यभेदानापादकत्वात् । विधेयानेकत्वकृतं तु सत्यपि प्राप्तकर्मानुवादे 'अर्धमन्तर्वेदि मिनोती'तिवत् पौर्णमास्यमावास्यापदाभ्यां पर्वलक्षणयोभयविधानोपपत्तौ यत्र परिहर्तुं शक्यः, तत्राऽपूर्वकर्मविधौ पिण्डपितृयज्ञवाक्य इव कालद्वयविशिष्टकर्मविधानोपपत्तेः कथं न शक्यते परिहर्तुम् ।

नाऽप्यनुपादेयगुणयोगरूपं प्रकरणान्तरं तद्भेदकम् तस्य 'सन्निधौ त्वविभागा'दिति न्यायेन सन्निधावप्रवृत्तेः । किञ्च संख्याव्यतिरिक्तभेदकप्रमाणानां वाक्यान्तरविहितकर्म-

१, सिध्यत्येवेताति. क पु.

प्रतियोगिकभेदकत्वनैयत्यस्य पार्थसारथिनोक्तत्वान्न स्ववाक्यविहितकर्मप्रतियोगिकभेदबोधकत्वं तयोः सम्भवति। अतश्च (१)आग्नेयैक्यस्यैव पार्थसारथ्युक्तस्य युक्तत्वात् कथं तावादाय फलसम्बन्धापत्तिरिति चेत्,

नः आग्नेयद्वित्वे गुणस्यैव भेदकत्वात्। तथा हि—यो हि पदार्थो भेदमावृत्तिं वा विना न कर्मान्वययोग्यः, स उत्पत्तिवाक्यस्थस्सन् कर्मभेदं बोधयति, उत्पन्नवाक्यस्थस्तु(२) पदार्थः तदावृत्तिम्। (३)दृष्टश्चैतत् सङ्ख्यायाम्। अतश्च समुच्चितकालद्वयरूपगुणोऽपि भेदमावृत्तिं वा विना कर्मान्वयमप्रतिपद्यमान उत्पत्तिवाक्यस्थत्वादिह कर्मभेदं बोधयति, उत्पन्नवाक्यस्थस्तु सायं प्रातः कालरूपमावृत्तिम्। अत एकस्मिन् कर्मण्यसम्भवन्निवेशो गुण एव समुच्चितकालद्वयरूपो भेदकः। यथा चैवं सति सङ्ख्याया न गुणान्तर्भावस्तथा(४) सङ्ख्याधिकरणे वक्ष्यते। प्रमाणबलेन च गुणस्य स्ववाक्यविहितकर्मप्रतियोगिकभेदबोधकत्वेऽपि न दोषः। अत एव पार्थसारथ्युक्तमुत्पत्तिशिष्टगुणावरोधे वाक्यभेदापत्तौ च गुणात् भेद इति द्वैविध्यं प्रमाणाभावेनैवाऽपास्तम्, 'वषट्कर्तुः प्रथमभक्ष' इत्यत्रैकप्रसरताभङ्गप्रसङ्गेन तस्य भेदकत्वाङ्गीकारात्।

न च वषट्कर्तृ(५)भक्षोद्देशेन प्राथम्यविधौ(६) विशिष्टोद्देशापत्तेः वाक्यभेदाभियैव गुणस्तद्भेदक इति वाच्यम्। वषट्कर्तृत्वे निमित्ते भक्षानुवादेन प्राथम्यविधावपि विजातीयोद्देशे तद-

---

१. आग्नेयैकत्वस्यैवेति. क. पु.

२. पदार्थ इति नास्ति क. पु. ३. व्यक्तश्चेति. क. पु.

४. पू. मी. २. २. ७ ५. भक्षानुवादेनेति क. पु.

६. विशिष्टोद्देशे वाक्यभेदापत्तेस्तद्भियैवेति क. पु.

भावादेकप्रसरताभङ्गभयेनैव तस्य भेदकत्वात् । अतो यथाकथञ्चिदेककर्मण्यनिविशमानस्यैव गुणस्य भेदकत्वात् सिद्धोऽत्राऽपि गुणाद्भेदः । भेदोऽपि चाऽत्र सङ्ख्यावदनेकत्वबोधनद्वारैव बोध्यते, न तु किञ्चित् प्रतियोगिकः, प्रमाणान्तरवत् प्रतियोगिनः पूर्वमप्रसिद्ध्या तन्निरूपितभेदस्य बोधयितुमशक्यत्वात् । तस्मादाग्नेयभेदः ।

केचित्त्वत्र (१)प्रकरणान्तरन्यायेन भेदं समर्थयन्ते । तथा हि—यद्यनिविशमानत्वेनाऽनुपादेयस्थलेऽपि गुणस्यैव भेदकता, ततो 'मासमग्निहोत्रमि'त्यत्रापि तस्यैव भेदकत्वोपपत्तेः कृतं प्रकरणान्तरेण । अतोऽनुपादेयत्वावच्छिन्नं प्रति तावत् प्रकरणान्तरस्यैव भेदकतेति स्वीकर्तव्यम् । न चैवमप्यसान्निध्यभावात् कथं तस्य भेदकता ? भेदबोधकतादशायां तत्प्रातियोगिककर्मोपस्थित्यभावरूपस्याऽसन्निधेर्मासाग्निहोत्रवदिहापि तुल्यत्वादित्याहुः—तन्न, मासाख्यगुणस्याऽपूर्व(२)कर्मण्यसन्निविशमानत्वेऽप्यसान्निध्युपष्टम्भकत्वेन स्वतो भेदकत्वात् गुणवैलक्षण्येन प्रकरणान्तरत्वोपपत्तेः । अत एव सन्निधौ सायं जुहोतीत्यत्र न तस्य भेदकत्वम् ।

किञ्चाऽसन्निधिः किमुपस्थित्यभावः ? उपस्थापकप्रमाणाभावो वा ? नाऽऽद्यः, अत्यन्तविस्मरणशीलस्य 'सायं जुहोती'त्यादावपि उपस्थित्यभावे भेदप्रमापत्तेः । 'मासमग्निहोत्रं जुहोती'त्यादावपि अत्यन्तमेधाविनः तत्सत्त्वे भेदप्रमानुपपत्तेश्च । अन्त्येऽपि ज्ञातस्य वा भेदबोधकता ? उताऽज्ञातस्य वा ? अन्त्ये उपस्थापकस्य प्रमाणस्य प्रकरणादेः भ्रमात्मकोपस्थितावपि 'मासमग्निहोत्रं जुहोती'त्यादौ वस्तुतः प्रमाणाभावस्य सत्त्वा-

---

१. पू. मी. २. ३. ११ २. कर्मण्यनिविशमानत्वेऽपीति क. पु.

म् भेदप्रमाबोधापत्तेः। आद्ये तु आग्नेयवाक्ये भेदप्रतियोगिनोऽप्रसिद्धेः तदुपस्थापकप्रमाणाभावज्ञानस्याऽशक्यत्वात् भेदबोधासम्भवः। मासाग्निहोत्रादौ तु नित्याग्निहोत्रविधिनोपस्थितस्य प्रतियोगिन इहोपस्थापकप्रमाणाभावस्य ज्ञातुं शक्यत्वादसान्निध्यविघातः। तस्मात् गुणादेवाग्नेयभेदः। विस्तरेण चैतत् प्रकरणान्तरन्यायशरीरोपपादनप्रस्तावे उपपादयिष्यते।

अतश्चाग्नेयभेदात् समुदायानुवादाभावे तयोरेव फलसम्बन्धापत्तेः तद्व्यावृत्तिफलकतया षण्णां फलसम्बन्धसिद्धिरेव समुदायानुवादप्रयोजनमिति सिद्धम्। (१)विशेषाचेदं (२)चतुर्थे उपपादयिष्यते। अतश्चानर्थक्याभावादपि न तद्बलेन विधित्वनिश्चयः। अर्थवादस्त्वेतद्वाक्यफलीभूतसमुदायस्तावक एव सन् प्रयोगविधिबोध्यप्रवृत्तिप्रतिबन्धकीभूतालस्यनिवृत्तावेव परम्परासम्बन्धेनोपयुज्यत इति न सोऽपि विधित्वनिश्चायकः। अस्तु वा विधित्वनिश्चयः, तथाऽपि फलसम्बन्धसिध्युपयोगिसमुदायफलकत्वेन तस्याऽन्यपरत्वान्नाऽभ्यासस्वरूपसद्भावः स मस्तीति न कर्मान्तरम्। अत एवैतद्वाक्यविहितकर्मानुवादेन समिदादिदेवताविधिः, ज्योतिष्टोमधर्मातिदेशः, अन्यदपि वा देवताप्रापकं नैवोपन्यसनीयम्। ज्यौतिष्टोमिकधर्मातिदेशस्तु सोमविधेर्दक्षिणीयाद्यङ्गद्वारेण दर्शपूर्णमासविध्युपजीवित्वात् तयोरपि तदुपजीवित्वेइतरेतराश्रयापत्तिरिति भवदेवोक्तप्रकारेणाऽपि निराकर्त्तव्यः। वार्त्रघ्नीवृधन्वत्योस्तु लिङ्गक्रमाभ्यामाज्यभागात्ववगतेः न विद्वद्वाक्यविहितकर्मणि देवताविधायकत्वम्। न च ब्राह्मणवाक्येन तयोर्बाधः, अबाधेनाऽप्युपपत्तौ बाधायोगात्।

किञ्च ब्राह्मणवाक्यमपि स्वरसेनाऽऽज्यभागपरतामेव मन्त्र-

---

१ विशेषतश्चेति. क. पु. २. पू. मी. ४. ४. ११

स्याऽवगमयति । अन्यथा पौर्णमास्यमावास्याप्रातिपदिकयोः कर्मपरत्वे लक्षणापत्तेः, सप्तम्याः प्राधान्यलक्षणकत्वापत्तेश्च । अपूर्वविधित्वाङ्गीकारे अश्रुतदेवताविधिकल्पने अश्रुतयाज्यान्तरकल्पने आज्यभागयोश्चाऽश्रुतानुवाक्याकल्पने गौरवापत्तेश्च । अतो मन्त्रचतुष्टयस्याऽप्याज्यभागाङ्गतया अनियमेन प्राप्तस्य नियममात्रं विधिवाक्येन क्रियते, लाघवात् । पौर्णमास्यमावास्याप्रातिपदिकाभ्यां शक्त्या काल एव प्रतिपाद्यते, सप्तम्या चाऽधिकरणत्वं वा । अतश्चाज्यभागाङ्गतया प्राप्तयोर्वार्त्रघ्न्योः पौर्णमासीनिमित्तकत्वं, तादृशयोश्च वृधन्वत्योरमावास्यानिमित्तकत्वमिति सम्भवति, पौर्णमास्यमावास्ययोस्तन्निमित्तकता, आज्यभागयोः तत्कालीनप्रधानाङ्गत्वेन तत्कालकत्वात् । निमित्तसम्बन्धप्रयोजनं च व्यवस्थासिद्धिरिति नियमफलकत्वं लाघवं च ।

वस्तुतस्तु न कालस्य निमित्तता, आज्यभागयोः प्रतिपदि क्रियमाणत्वेन तत्कालीनत्वाभावात् । न च खण्डपर्वीणि कदाचित् तत्कालकत्वसम्भवात् निमित्तत्वोपपत्तिः; तथात्वे सम्पूर्णपर्वाणि तत्कालिकत्वासम्भवेन मन्त्रनिवृत्तिरूपशेषपरिसंख्याफलकत्वापत्तेः । अतः शेषनियमरूपलाघवानुरोधेन पौर्णमास्यमावास्यापदं तत्कालीनप्रधानाङ्गभूताज्यभागलक्षकम् । प्रधाने तत्कालीनता च प्रयोगारम्भद्वारिकैव, न तु साक्षात्, प्रधानस्य तस्मिन् काले नियमेनाऽकरणात् । अत एव प्रकृतौ सर्वत्र पौर्णमास्यादिकालविधिः वचनान्तरानुसारादारम्भद्वारक एव । सप्तमी च प्राधान्यपरा । तेन तादृशाज्यभागयोर्मन्त्रविशेषविधानात् प्रकृतौ सर्वदैव व्यवस्थासिद्धिः । विकृतौ च पौर्णमासीविकारस्याऽमावस्याविकारस्य वा यस्मिन् कस्मिंश्चित् दिने करणेऽपि वार्त्रघ्नीवृधन्वतोर्व्यवस्थासिद्धिः । अतो 'वार्त्रघ्नी पौर्णमास्यामि'

त्येतद्वाक्यद्वयमेव स्वगौरवपरिहारार्थमाज्यभागाङ्गत्वं मन्त्रस्याऽप्यनुजानातीति न तद्बलेन विद्वद्वाक्यविहिते कर्मणि देवताविधिः सम्भवतीति देवताभावादपि समुदायानुवादत्वम् । न चैवं सर्वस्य वाक्यस्याऽनुवादकत्वे अनधिगतार्थगन्तृत्वरूपप्रामाण्यानापत्तिः, शक्यार्थानुवादकत्वेऽप्यनधिगतसमुदायादिबोधकत्वेन प्रामाण्योपपत्ते(१)र्मन्त्राधिकरण एवोक्तत्वात् ।

नन्वेवं विद्वद्वाक्ययोरर्थवत्त्वेन प्रामाण्येऽपि 'पौर्णमास्यां पौर्णमास्या यजेते'त्यादिवाक्ययोरानर्थक्येनाऽप्रामाण्यापत्तिः स्यादेव, कालस्याऽऽग्नेयादिषु पौर्णमास्यादिपदाभिधेयेषूत्पत्तिवाक्यैरेव प्राप्तत्वादिति चेत्—न; एतद्वाक्याभावे हि उत्पत्तिवाक्येऽपि श्रुतः पौर्णमास्यमावस्याकालः फलसम्बन्धोत्तरकालं प्रयोगविधिकल्पनवेलायां कालस्य प्रयोगद्वारैवाऽङ्गत्वादुत्पत्तिवाक्ये प्रत्येकश्रुत्यनुरोधेन प्रत्येकमेव(२) 'अग्नयेऽनीकवते प्रातः पुरोडाशमष्टाकपालमि' त्यादावनीकवत्यादिप्रयोगवत् प्रयोगं कल्पयति । न च प्रत्येकप्रयोगकल्पने एकफलसाधनत्वानुपपत्तिः, प्रत्येकं प्रयुक्तानामप्याग्नेयादीनामनीकवत्यादिवदेव अपूर्वरूपेणैकक्षणवृत्तित्वेन फले साहित्योपपत्तेः । अत एव 'समे दर्शपूर्णमासाभ्यां यजेते' त्यनेन देशविधेः प्रयोगविधित्वात् षण्णां देशिकसाहित्यावगमेऽपि एकस्मिन्नेव समे तिसृषु पौर्णमासीष्वमावास्यासु चैकैकप्रधानस्याऽन्वाधानप्रभृतिब्राह्मणतर्पणान्ताङ्गविशिष्टस्य प्रयोगोऽपि नाऽनुपपन्नः । न चैवमपि लाघवादेकस्यामेव पौर्णमास्याममावास्यायां च तत्तत्कालीनप्रयोगत्रयोपपत्तेः पौर्णमास्यादित्रयप्रसङ्गे प्रमाणाभावः । द्व्यहकालीनत्वप्रातःकालीनत्वयोरपि वचनान्तरप्रमितत्वेनैकस्यां तिथाविष्टित्रयकरणे तद्बाधप्रसङ्गात् ।

१. पू. मी. १. २. ४. २. मै. सं. १. १०. १.

अतः 'पौर्णमास्यां पौर्णमास्या यजेत' इत्येतद्वाक्यद्वयाभावे प्रत्येकमेव साङ्गानामाग्नेयादीनां करणापत्तिः ।

यत्तु वार्तिके एकफल (१) सम्बन्धानुरोधादेकस्यैव प्रयोगविधेः कल्पनम् । तत्र चोत्पत्तिकालानुरोधात्त्रिषु पौर्णमासीषु प्रधानत्रयम् । लाघवादेकस्यामेव वा तत् । एवममावास्यायामपि । अतश्च मासत्रयकालीनः पक्षद्वयमात्रकालीनो वा एक एव षण्णां प्रयोगः, तदन्तःपातीनि चाऽङ्गानि सर्वाण्यपि सकृदेव सवनीयपश्वङ्गानामिव क्वचित्क्वचित् कर्तव्यानीत्येतद्वाक्याभावेऽनुष्ठानमुक्तम्; तत् राजसूयचातुर्मास्यादिष्वपि एकफलसाधनत्वेनैकप्रयोगत्वापत्तेरौत्पत्तिककालभेदेऽपि च तत्तत्काले प्रधानमात्रकरणेन तावत्कालीनप्रयोगैक्योपपत्तौ अङ्गानामपि सकृत्करणापत्तेरुपेक्षितम् । यथा च सवनीये नाऽङ्गावृत्तिः, तथा (२)आघाराग्निहोत्राधिकरणे वक्ष्यते । अत उत्पत्तिवाक्येषु नैरपेक्ष्येण कालस्य श्रवणात् प्रत्येकमेव प्रयोगाणामेतद्वाक्यद्वयाभावे कल्पनापत्तेरेतद्वाक्यद्वयसत्त्वे च त्रयाणां त्रयाणामेकप्रयोगसिद्धेः तत्सिद्धिरेव वाक्यद्वयप्रयोजनमिति नाऽऽनर्थक्यम् । तथा हि—

पौर्णमासीशब्दवाच्यानां त्रयाणां प्रधानानां स्वरूपेण प्राप्तानामपि प्रयोगविषयत्वेनाऽप्राप्तत्वात् पौर्णमासीकाले उपादेयत्वावगमात् पौर्णमासीकालविशिष्टप्रधानत्रयप्रयोगविधानावगतेः प्रयोगस्य च(३)एकादशाधिकरणन्यायेन साङ्गतावत्प्रधानविषयत्वादङ्गसाहित्यस्य प्रधानगतपरस्परसाहित्यस्य च विधेयविशेषणत्वेन विवक्षितत्वात् एकस्मिन् काले युगपत् साङ्गप्रधानत्रयकर्तव्यतासिद्धिः । एवममावास्यावाक्येऽपि द्रष्टव्यम् । एवं च सत्यपि

१.सम्बन्धादिति. क. पु. २. पू. मी. २. २. ४.
३. पू. मी. ११. १. २.

कालिकप्रयोगविधिभेदे देशवाक्येन षण्णामेकप्रयोगस्य विधानादेकस्मिन्नेव देशे षण्णां (१)साङ्गानां कर्तव्यताऽपि सिद्धा भवति । सर्वे हि देशकालादयः प्रयोगविशेषणत्वेनैवाऽन्वयं भजमानाः स्वसम्बन्धिनं प्रयोगं विनिगमनाविरहात् कल्पयन्ति । अतश्च तत्तद्वाक्ये कालादिविशिष्टप्रयोगविधिसिद्धिः ।

न च उत्पत्तिवाक्ये नैरपेक्ष्येण कालश्रवणात् फलसम्बन्धोत्तरकालं प्रयोगविधिकल्पने प्रत्येकमेव प्रयोगविधिकल्पनावगतेस्तदनुवादेनाऽत्र कालादिमात्रविधानोपपत्तेः प्रत्येकमेवाऽनुष्ठानप्रसङ्गेन एतद्वाक्यसत्त्वेऽपि नेष्टसिद्धिरिति वाच्यम् । प्रत्येकप्रयोगविधिकल्पनातः पूर्वमेवैतद्वाक्यप्रवृत्त्यङ्गीकारेणाऽत्रैव प्रयोगविध्युपपत्तेः । अन्यथा तादृशानुष्ठानस्यैतद्वाक्याभावेऽपि सिद्धावेतद्वाक्यानर्थक्यापत्तेः । न चैवं 'य इष्ट्या पशुना सोमेन वा यजेत, सोऽमावास्यायां पौर्णमास्यां वा यजेते'ति वाक्येन सर्वासां विकृतीष्टीनामपि पर्वकालविशिष्टैकप्रयोगविधानादेकप्रयोगतापत्तिः, तत्र (२)यत्तच्छब्दसमभिव्याहारात् तत्तद्विकृतिप्रयोगानुवादेन कालमात्रविधानावगतेः तत्तद्विकृतिवाक्येष्वेव प्रत्येकप्रयोगविधिकल्पनाया अभ्यनुज्ञानात् , तत्तद्विलक्षणफलसाधनानां तासामेकप्रयोगविधिविषयत्वानुपपत्तेश्च । अतश्च 'य इष्ट्ये'तिवाक्येनाऽवगतमपि तत्तद्विकृतिप्रयोगसाहित्यमनुवाद्यगतत्वादविवक्षितम् । प्रकृते तु (३)कालविशिष्टभावनारूपस्य प्रयोगस्यैव विधेयत्वाद्युक्तैवेष्टसिद्धिरिति वैषम्यम् ।

न चैवमुत्पत्तिवाक्ये कालश्रवणवैयर्थ्यापत्तिः, तस्य फलस-

---

१. यागानामिति. क. पु.

२. यच्छब्दतच्छब्दसमभिव्याहारादिति. क. पु.

३. कालविशिष्टप्रयोगस्यैवेति. क. पु.

म्बन्धापादकफलवाक्यगतविद्वद्वाक्यादिगतपौर्णमास्यमावास्यादिपदप्रसिद्ध्यर्थत्वेनाऽर्थवत्त्वात्। अत एवोपांशुयाजस्योत्पत्तिवाक्ये कालसम्बन्धाभावेऽपि 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यज' न्निति वाक्येन कालसम्बन्धात्फलसम्बन्धसिद्धिः। अतश्च कस्याऽपि वाक्यस्य वैयर्थ्याभावात्समुदायसिद्ध्यर्थं समुदायानुवादके एव विद्वद्वाक्ये इति सिद्धम् ।

सूत्रं तु—पौर्णमास्युपलक्षितयोर्विद्वद्वाक्ययोः, प्रकरणं प्रकृतानुवादः, रूपावचनात् कर्मान्तरविध्यनुपपत्तेरिति व्याख्येयम् ॥ ३ ॥

विशेषदर्शनाच्च सर्वेषां सर्वेषु ह्यप्रवृत्तिस्स्यात् ॥ २–२–४ ॥

यदि चैतौ कर्मान्तरविधी स्याताम्, ततो यदि सर्वेषां समप्राधान्यम्, ततो विकृतिषु प्रधानस्याऽनतिदेशात् प्रयाजादीनामप्राप्तेः, सौर्ये 'प्रयाजे प्रयाजे कृष्णलं जुहोती'त्यनेन प्रयाजानुवादेन कृष्णलरूपविशेषविधिर्नोपपद्येत । यदि तु विद्वद्वाक्यविहितकर्मणोरेव प्रधान्यम् तत आग्नेयादीनामङ्गत्वेऽपि सौर्यस्यौषधद्रव्यकत्वेनाऽऽग्नेयविकृतित्वस्यैवाऽऽवश्यकत्वात् तद्धर्माणामवघातादीनामतिदेशेऽपि प्रयाजादीनामनङ्गत्वेनाऽऽग्नेयादिसमत्वात् सौर्यादिष्वप्राप्तेः प्रयाजानुवादेन कृष्णलविधेरनुपपत्तिः तदवस्थैव । एवमाग्नेययोरेव प्राधान्यपक्षेऽपि द्रव्यसादृश्येन सान्नाय्याविकारस्येव पशोः प्रयाजाङ्गत्वाभावात् तदनुवादेनैकादशत्वादिविध्यनुपपत्तिः । (१)अतो नैतौ कर्मान्तराविधी । अत्र च सू-

---

१. 'अतश्च' इति. क. पु.

त्रेऽन्वाचयवाचिचशब्दोपादानात् यागाष्टकप्राधान्यपक्षे नाऽयं दोष इत्यव्यापकत्वादन्वाचयत्वं सूचितम् ॥ ४ ॥

गुणस्तु श्रुतिसंयोगात् ॥ २–२–५ ॥

नैतौ समुदायानुवादौ, विधायकत्वेनाऽर्थवत्त्वसम्भवे उक्तप्रयोजनस्याऽपि समुदायानुवादत्वस्याऽनुपपत्तेः । अतः कर्मविध्यपेक्षया प्रयोजनवत्तरत्वेनाऽन्यपरत्वाभावादभ्यासादेव कर्मभेदासिद्धिः । एवञ्च 'पौर्णमासी'मित्येकवचनं कर्मैकत्वेनोपपद्यते । अन्यथा स्वाश्रयघटकवृत्तित्वसम्बन्धेन समुदायिबहुत्वलक्षणा स्यात् । अतोऽत्र तावत् कर्मविधिः । न च रूपाभावः, यदाग्नेयादिवाक्यैस्तद्विधानोपपत्तेः । तथा हि—तत्रत्यपौर्णमास्यमावास्याशब्दाभ्यां विद्वद्वाक्यविहितकर्मोद्देशं कृत्वाऽऽग्नेयादिरूपविधानोपपत्तिः । एवञ्चैतेषु वाक्येष्वश्रुतयागकल्पनं विशिष्टविधिगौरवं च नैवाश्रितं भवति । न चैवं वाक्यभेदः, अग्नीषोमीयसान्नाय्यादिवाक्येषु तावदेकैकस्यैवोद्देशेन तन्निमित्तकवाक्यभेदस्य तावदप्रसक्तेः । आग्नेयादिवाक्येऽपि पौर्णमास्यमावास्याशब्दलक्षणया 'अर्धमन्तर्वेदि मिनोती'तिवत्प्रकृतप्रधानयागस्यैवोद्देशात् न तन्निमित्तो वाक्यभेदः । यदि तु (४)एतस्मिन्नपि पक्षे प्रयाजादिसाधारण्येन सर्वेषां प्राधान्यमुच्येत, ततो रूपसाकाङ्क्षप्रकृतयागत्वस्यैव लक्ष्यतावच्छेदकत्वेनोद्देश्यतावच्छेदकत्वोपपत्तेर्न वाक्यभेदः ।

न चैवमपि द्रव्यदेवतारूपविधेयानेकत्वनिमित्तो वाक्यभेदस्तदवस्थ एवेति वाच्यम् । तद्धितान्तपदेनैकेनैव देवताविशिष्टद्रव्यविशेषवाचिना विशिष्टस्यैकस्यैव प्राप्तभावनानुवादेन विधानो-

१. अस्मिन्नपीति. ख. पु.

पपत्तेः । अत एव (१)गुणाधिकरणे वक्ष्यमाणन्यायेनाऽष्टाकपालपदस्य तात्पर्यग्राहकत्वान्न तदंशे तद्भिन्नपदोपात्तताप्याशङ्कनीया । अतश्चैकपदोपादानाद्वैशिष्ट्यबोधोपपत्तेर्न वाक्यभेदः । यत्र तु 'पञ्चदशान्याज्यानी'त्यादौ भिन्नपदोपादानम्, तत्र भावनान्वयात्पूर्वं परस्परवैशिष्ट्याप्रतीतेः प्राप्तभावनानुवादेनोभयविधौ युक्तो वाक्यभेदः; प्रकृते त्वेकपदत्वेन भावनान्वयात्पूर्वमेव द्रव्यदेवतावैशिष्ट्यप्रतीतेः, प्रत्युत तदनङ्गीकारे 'साऽस्य देवते'ति द्रव्यसम्बन्धाधिकारविहितदेवतातद्धितानुपपत्तेर्भावनान्वयात्पूर्वमेव परस्परवैशिष्ट्यस्याऽऽवश्यकत्वात् प्राप्तभावनानुवादेनाऽपि विशिष्टविध्युपपत्तेर्न वाक्यभेदः । अत एव न (२)पशवेकत्वाधिकरणपूर्वपक्षन्यायेन देवताया अविवक्षा, तद्वदिह प्राथमिकभावनान्वयस्य तद्धितभङ्गभयेनाऽव्युत्पन्नत्वात् ।

यत्त्वत्र भवदेवेन पुरोडाशसान्नाय्यादेः संस्कारविध्यन्यथानुपपत्त्यैव प्राप्तत्वादाग्नेयादिवाक्यैर्देवतामात्रविधानात् न वाक्यभेद इति परिहृतम्, तत् पुरोडाशादेः कथञ्चित् प्राप्तिसम्भवेऽपि अष्टत्वादिप्राप्तेरभावात्, तद्विधाने वाक्यभेदापत्तेरेकस्मिन्नपि च द्रव्ये सर्वासां देवतानां विकल्पेन प्राप्त्यापत्तेरुपेक्षितम् । तस्मादुक्तप्रकारेणैव वाक्यभेदपरिहाराद्रूपलाभोपपत्तेः कर्मान्तरविधिरेवाऽयम् ।

अस्मिंश्च पक्षे त्रिद्वद्वाक्यविहितयोरेव कर्मणोः प्राधान्यात, प्रयाजादीनां तदङ्गत्वात्, सौर्यादीनां चाऽऽग्नेयवाक्यविहितयागाभावेन विद्वद्वाक्यविहितकर्मविकृतित्वादातिदेशेन प्रयाजप्राप्त्युपपत्तेर्युक्तस्तदनुवादेन कृष्णलविधिः । यदि त्वास्मिन्नपि पक्षे पूर्ववत्समप्राधान्याङ्गीकरणम्, ततः कृष्ण-

---

१. पू. मी. २. ३. ९. २. पू. मी. ४. १. ५.

लविशिष्टप्रयाजान्तरस्यैव सौर्ययागाङ्गतया विध्यङ्गीकारेण दार्शपौर्णमासिकप्रयाजानुवादेन कृष्णलविध्यङ्गीकारेण वा 'यत्र नित्यानुवादवचनानि स्यु' रिति न्यायेन परिहर्तव्यम्। अतः कथं समुदायानुवादकत्वमिति चेत्—

चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ॥ २-२-६ ॥

नाऽऽग्नेयादिवाक्ये रूपविधिस्सम्भवति, प्राप्तकर्मानुवादेन द्रव्यदेवतारूपानेकार्थविधाने वाक्यभेदात्। यत्र त्वप्राप्ता भावनाऽनेककारकविशिष्टा विधीयते, तत्र(१)श्रौतविधेर्विशिष्टभावनाविधान एव व्यापाराद्विशेषणानाञ्च विशिष्टविध्यन्यथानुपपत्तिकल्पितविशेषणविधिभिरेव विधानसिद्धेः श्रौतस्य विधेस्तत्र व्यापाराभावात् न विधेयानेकत्वनिमित्तो वाक्यभेदः। न च तत्राऽपि विशिष्टज्ञानस्य विशेषणज्ञानाधीनत्वाद्विशेषणविध्युत्तरकालप्रवृत्तिकस्य विशिष्टविधेर्न विशेषणविधिकल्पकत्वसम्भवः, विशिष्टज्ञानस्य विशेषणज्ञानाधीनत्वेऽपि विशिष्टकर्तव्यतारूपस्य तद्विधेः विशेषणकर्तव्यताज्ञानाधीनज्ञानविषयत्वाभावात्, विशिष्टज्ञानापेक्षितविशेषणज्ञानस्य च विशिष्टविधिवेलायां सोमादिपदैरेव जननोपपत्तेः। अतश्च श्रुतस्य विधेस्तत्तत्पदोपनीतविशेषणयुक्तविशेष्यविधान एव व्यापारादार्थिकविशेषणविधिवाचकपदकल्पनव्यापारकत्वेऽपि तद्विधानव्यापारकत्वाभावान्नाऽनेकविधितात्पर्यकत्वकृतो वाक्यभेदः।

प्रकृते तु विशेष्यभूताया भावनाया विद्वद्वाक्यादेव प्राप्तत्वाद्विधेस्तद्विधितात्पर्यविषयत्वायोगादा(२)नर्थक्यतदङ्गन्यायेन

---

१. श्रौतस्य विधेरिति. क० पु०   २. पू. मी. ३. १. ९

विशेषण एवाऽवतारात् तत्र च विशेषणानेकत्वे तेषां परस्परविशेषणविशेष्यभावे नियामकाभावेन प्रत्येकमेव विधितात्पर्यावगतेः सकृच्छ्रुतस्य चाऽनेकत्र तात्पर्यकल्पने आवृत्तिमन्तरेण तदयोगादावृत्तिलक्षणो वाक्यभेदः। यद्यपि च विशिष्टविधिस्थले भावनाया अनेकान्वयित्वस्वाभाव्यादनेकेषां विशेषणानामन्वयेऽपि नाऽऽवृत्तिः, तथाऽपि विधेः विशिष्टविधावपि विशेष्यरूपैकविधायकतया क्लृप्तस्य नानेकविधिस्वाभाव्यम्, तस्मादिहाऽनेकविधाने वाक्यभेदो दुष्परिहर एव, आवृत्तिप्रसङ्गात्।

अत एव प्राप्तायामपि मुख्यविशेष्यभूतायां भावनायां यत्र विशेषणानामपि व्युत्पत्तिवशेन परस्परवैशिष्ट्यावगमः, तत्र भवत्येवानेकविशेषणविशिष्टस्याऽप्येकस्य विशेष्यस्य प्राप्तानुवादेन विधिः, यथा 'पशुना यजेत' (१)'धेनुर्दक्षिणे' त्यादौ जातिसंख्यादिविशिष्टस्यैकस्य कारकस्य,- यथा चैकक्रयवादिमते (२)"अजया क्रीणाती"त्यादौ। (३)तत्र हि तृतीयोपात्ते करणत्वे पार्ष्ठिकान्वयलभ्यद्रव्यपरिच्छेदद्वारा समानाभिधानश्रुत्या संख्यायाः, पदश्रुत्या च जातेरन्वयो व्युत्पत्तिसिद्ध एव। अतश्च तत्रोभयकारकविशिष्टद्रव्यगतैककरणत्वविधानान्न वाक्यभेदः। यद्यपि जातिसंख्याद्वयवृत्तिकरणत्वद्वयस्यैव तृतीययोपादानमित्याश्रीयते, तथाऽपि द्वयोः करणत्वयोरेकशब्दोपादानेन वाक्यभेदो(४)ऽवगन्तव्यः।

एवं मूलानुयायिमते षष्ठ्या अपि भावनान्वयनियमाभावात् षष्ठ्यन्तस्य कारकविशेषणत्वोपपत्तेः प्राप्तभावनानुवादेनाऽपि विशिष्टविधिर्द्रष्टव्यः। यथा--'तस्य द्वादशशतं दक्षिणे' त्यत्र प्रा-

१. तै. सं. १. ८. १
२. तै. सं. ६. १. १०.
३. अत्र हीति. क पु.
४. अधिगन्तव्य इति. क. पु.

प्रदक्षिणानुवादेनाऽपि तच्छब्दोपात्तगोविशिष्टसंख्याविधिः । वस्तुतस्तु प्राप्तदक्षिणानुवादेन गोविशिष्टसंख्याविधावपि समुच्चिताश्वादेरपि विधेयत्वात् तत्रोभयविशिष्टदक्षिणाविधानमेव स्वीकर्तव्यम् । अत एव षष्ठीस्थलेऽपि निमित्तवत्प्रधानभूतभावनान्वये सम्भवति व्युत्पत्त्यन्तरकल्पनापादकोऽन्वयो नाऽङ्गीक्रियत एव । अतस्तत्राऽपि प्राप्तकर्मानुवादेनाऽनेकविधानेऽस्त्येव वाक्यभेदः ।

यत्त्वत्र पार्थसारथिना(१) 'अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपे"दित्यादौ प्राप्तद्रव्यानुवादेनाऽग्निर्दाता च विधीयते । न च तत्र वाक्यभेदः, अग्निदातृत्वयोः परस्परविशेषणविशेष्यभावस्य मन्त्रार्थवादादौ प्रसिद्धत्वेन दातृत्वगुणविशिष्टस्याऽग्नेः प्राप्तकर्मानुवादेऽपि द्रव्योद्देशेन विधातुं शक्यत्वादित्युक्तम्; तत् अन्यपरमन्त्रार्थवादादिकृतप्रसिध्यवलम्बनेनाऽपि वैशिष्ट्योपपत्तौ सुतरां द्रव्यगुणयोर्वास्तविकलोकप्रसिद्धविशेषणविशेष्यभावेन वैशिष्ट्योपपत्तेः स्तोत्रानुवादेन संख्याविशिष्टाज्यविधाने वाक्यभेदानापत्तेरुपेक्षितम् ।

(२)यदप्युक्तं तन्त्ररत्ने दात्रादिपदानां कृदन्तानां सन्निहितद्रव्यवाचकत्वात् दातृपदेनैव दातृत्वगुणविशिष्टाग्निविधानम्, अग्निपदं चाऽऽमिक्षापदवत्तात्पर्यग्राहकं(३) इति, तत् स्वयमेव शास्त्रदीपिकाया(४)माग्नेय्यधिकरणे यौगिकानां पदानां सन्निहितमात्रवाचकत्वस्य निराकृतत्वादयुक्तमेव । न च आग्नेयीपदस्याऽकृदन्तस्य सन्निहितासन्निहितसाधारणद्रव्यमात्रवाचित्वेऽपि दातृशब्दस्य कृदन्तत्वात् सन्निहितमात्रवाचित्वोपपत्तिः;

---

१. तै. सं. २. ३. २. २. यदपि तन्त्ररत्न इति. क. पु.
३. इति परिहृतमिति. क. पु. ४. पू. मी. ३. २. ८.

दातृपदस्य सन्निहितवाचित्वे सर्वनामार्थविहिततद्धितान्ताग्नेयीपदस्य सुतरां तदापत्तिः, अतः तत्रापि प्राप्तकर्मानुवादेनाऽनेकविधानादस्त्येव वाक्यभेदः। अत एव तत्र द्रव्यदेवताविशिष्टभावनाविधिपक्ष एवाश्रयिष्यते। यानि च तत्पक्षे दूषणानि तानि तत्रैवोपन्यस्य परिहरिष्यामः।

तस्मात्सिद्धमव्युत्पन्नपरस्परविशेषणविशेष्यभावानां विशेषणानां प्राप्तभावनानुवादेन विधाने वाक्यभेद इति।

यत्तु प्रकृतेऽपि आग्नेय इति तद्धितवृत्तिविधानात् द्रव्यदेवतयोर्विशेषणविशेष्यभावोऽव्युत्पन्न एवेत्युक्तम्; तत्रेदमुत्तरं वाच्यम्—यत्र तद्धितवृत्तौ समासवृत्तौ वा कारकतातिरिक्तसम्बन्धेन वृत्तिस्तत्राऽकृत्वापि भावनासम्बन्धं प्रथमतोऽन्योन्यसम्बन्धेन वैशिष्ट्य उच्यमानेऽपि न वाक्यभेदः। अत एव(१) 'लोहितोष्णीषा लोहितवसना ऋत्विजः प्रचरन्ति', 'हिरण्यमालिनः प्रचरन्ती'त्यादौ प्राप्तप्रचारानुवादेन ऋत्विग्गतलौहित्यविशिष्टोष्णीषविधिः। एतदभिप्रायेणैव च(२) चित्राधिकरणे 'यदि पञ्चदशाज्यानीति समासः स्यात् ततो न वाक्यभेदो भवे' दिति पार्थसारथिनोक्तम्।

यत्र तु कारकतासम्बन्धेन वृत्तिः, यथा—आग्नेय इत्यादौ देवतात्वेन, तदपि हि सम्प्रदानकारकं कर्मकारकं वेत्यग्निमाधिकरणे वक्ष्यते, तत्र प्राथमिकक्रियासम्बन्धात् प्रागन्यसम्बन्धाभ्युपगमे कारकत्वव्याघातापत्तेः प्रथमतः क्रियासम्बन्ध एवाभ्युपगम्यते, पश्चात्तु द्रव्यसम्बन्धः, एकहायनीससम्बन्धवत्। युक्तश्चैतत्। यथैवाऽऽरुण्यस्य सत्यप्येकहायनीसामानाधिकरण्ये टाबन्तत्वे च कारकश्रुत्या क्रियासम्बन्धमेव

१. का. श्रौ. २२. ३. १५. २. पू. मी. १. ४. ३.

प्रथमतोऽभ्युपगम्य पाश्चात्यसम्बन्धेनैव सामानाधिकरण्यादेर्निर्वाह्यते, न तु द्रव्यसम्बन्धमेव प्रथमतोऽभ्युपगम्य परम्परासम्बन्धेन कारकत्वम्; तथा प्रकृतेऽपि कारकत्वाविशेषात् प्रथमतः क्रियासम्बन्धः पश्चादेव द्रव्यसम्बन्धः, तदभिप्रायिकैव च वृत्तिः। न च सम्बन्धज्ञानं विना वृत्त्यनुपपत्तिः, अरुणयेत्यादौ टाबादाविव द्रव्यासम्बन्धित्वानिश्चयस्यैव तद्बीजत्वात्। अतश्च सम्बन्धाज्ञानवदसम्बन्धस्याऽप्यज्ञानात् वृत्त्युपपत्तेः द्रव्यवद् देवताकारकस्यापि प्रथमतः क्रियासम्बन्धसिद्धिः। अतश्च "पञ्चदशान्याज्यानी"तिवदेवोभयोः क्रियासम्बन्धाद्वैशिष्ट्यानुपपत्तेः प्राप्तभावनानुवादेनानेकगुणविधाने वाक्यभेदो दुरुद्धर एव। अत आग्नेयादिवाक्ये द्रव्यदेवताविशिष्टयागान्तरस्यैव विधानात् विद्वद्वाक्ये रूपाभावस्तदवस्थ एव।

नन्वेवमपि द्रव्यदेवताविशिष्टभावनामात्रविधिरेवाऽऽग्नेयादिवाक्येष्वस्तु, न तु स्वतन्त्रयागकल्पनम्, गौरवात्, अभ्युदितेष्टौ भावनान्तरविधिवत्। तस्याश्चावच्छेदकीभूतयागापेक्षायां तद्वदेवेन्द्रियकामहोमवच्च विद्वद्वाक्यविहितौ यागौ यथायोगं पौर्णमास्यमावास्यापदोपनीतौ सम्बध्येते, अत एव विद्वद्वाक्येऽपि प्राप्तभावनानुवादेन यागमात्रविधिः, न तु यागविशिष्टभावनाविधिरिति लाघवमिति चेन्न; तथा सति "तावब्रूतामग्नीषोमावाज्यस्यै"वेत्यादिवाक्यस्य वैयर्थ्यापत्तेः। इदं ह्युपांशुयाजस्यान्तरालविधिवशेन सम्भवत्प्राप्तिकपौर्णमासीकालसम्बन्धविधानार्थं सत्तस्य फलसम्बन्धार्थमित्युत्तराधिकरणे वक्ष्यते। विद्वद्वाक्यविहितकर्मद्वयाङ्गीकारे च तस्यैव निर्ज्ञातनामकत्वेन फलसम्बन्धापत्तेः उपांशुयाजे कालविधिरनर्थक एवेति तस्य कर्मविधायकताया एवाऽप्रसिद्धेः दुर्घटैवाऽऽग्नेयादिवाक्यविहितभावनावच्छेदकतोक्तिः।

वस्तुतस्तु अमावास्याव्यावर्तनफलकत्वेनाऽपि तत्सार्थ-क्योपपत्तेः पूर्वोक्तविधयाऽन्यपरत्वाद्विधिकल्पकाभावेनाभ्यास स्वरूपविघटनेनैवाऽयं पूर्वपक्षो निराकर्तव्यः ।

एतेन सत्यप्याग्नेयादिवाक्येषु यागान्तरविधाने विद्वद्वाक्य-विहितकर्मणोरप्येकप्रयोगविधिपरिग्रहेण सान्नाय्यवदाग्नेयादि-यागैः सह तन्त्रेणाऽनुष्ठानोपपत्तेः तदीयद्रव्यदेवतायाः प्रसङ्गे-नोपकारकत्वोपपत्तेरुपपन्नं रूपमिति विधित्वमित्यप्यपास्तम्, विद्वद्वाक्ये विधेरेवाऽनिश्चयेन कर्मविध्यनिश्चयात्, प्रत्युत यच्छ-ब्दोपबन्धत्वेनाऽनुवादत्वस्यैव निश्चयाच्च । अत एव समुदाया-नुवादकत्वापेक्षया प्रयोजनवत्तरमपि विधित्वं नैवाङ्गीकृतम् । किञ्चाऽस्मिन पक्ष आग्नेयादिवाक्यस्थपौर्णमास्यमावास्याशब्दयोः सप्तम्यन्तयोः लाक्षणिकत्वमपि निष्प्रयोजनकमापद्येत । विद्वद्वा-क्यस्थ 'पौर्णमासी' मित्याद्येकवचनश्चोपक्रमस्थयच्छब्दानुरोधेन लक्षणया नीयमानं न दुष्यति । तस्मात् समुदायानुवादः ।

सूत्रं तु–कर्मचोदना वा स्यात् आग्नेयादिवाक्ये, तथा सति गुणानां युगपदेकेन शास्त्रेण विधानं शक्यं कर्तुम्, प्राप्ते तु कर्मणि गुणमात्रविषयत्वात् विधेः तस्यतस्योपदेशे वाक्यभेदाप-त्तिः, इति व्याख्येयम् ॥

व्यपदेशश्च तद्वत ॥ २-२-७ ॥ (सि)

"उग्राणि वा एतानि हवींष्यमावास्यायां सम्भ्रियन्ते आ-ग्नेयं प्रथममैन्द्रे उत्तरे" इत्यत्र त्रयाणामेव तावदग्रत्वापरपर्याय-प्राधान्यव्यपदेशो भवत्पक्षे न युज्यते । किञ्च द्वितीये पक्षे विद्व-द्वाक्यविहिते कर्मणि आग्नेयादिहविषां विकल्पापत्तेः सम्भर-णपदवाच्यं साहित्यं प्रथमादिपदवाच्यश्च क्रमो न युज्ये-त । एतदन्यथानुपपत्त्यैव समुच्चयविध्यङ्गीकारे त्वतिगौरवम् ॥

लिङ्गदर्शनाच्च ॥ २-२-८ ॥

"चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशाऽमावास्यायां" मित्याहवनीयगतवषट्कारादिपरिगणनं प्रथमभवत्पक्षे पौर्णमास्यां पञ्चदशत्वापत्तेरमावास्यायां चतुर्दशत्वापत्तेः द्वितीयपक्षे चोभयत्र द्वादशत्वापत्तेर्नोपपद्येत । अस्मन्मते तु पञ्च प्रयाजाः, द्वावाज्यभागौ, स्विष्टकृत्, त्रयोऽनूयाजाः, पौर्णमास्यां प्रधानाहुतित्रयम्, अमावास्यायां सान्नाय्यस्य सहानुष्ठानात् प्रधानाहुतिद्वयमिति चतुर्दशत्वत्रयोदशत्वानुवादो नाऽनुपपन्नः । यद्यपि चाऽसोमयाजिनोऽग्नीषोमीयाभावादस्मन्मतेपि चतुर्दशत्वसङ्ख्याऽनुपपन्नैव, तथाऽपि सोमयाजिन एव तावत्सम्भवतीति न विरोधः । त्रयोदशत्वसंख्या त्वसन्नयतोऽप्यैन्द्राग्नविधानादुपपन्नैव । तस्मात्समुदायानुवादावेतौ, न कर्मान्तरविधी, इति सिद्धम् ॥ ८ ॥

इति तृतीयं पौर्णमास्यधिकरणम् ॥ ३ ॥

अथ चतुर्थमुपांशुयाजाधिकरणम् ॥ ४ ॥

पौर्णमासीवदुपांशुयाजस्स्यात् ॥ २-२-९ ॥ (पू-)

दर्शपूर्णमासयोः "जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति, विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोमावुपांशु यष्टव्यावजामित्वाये"ति श्रुतम् । तैत्तिरीयशाखायां तु (१)'उपांशुयाजमन्तरा यजत्यजामित्वाय' इत्यपि समाम्नातम् । तत्र सन्दे-

१. तै. सं. २. ६. ६.

हः—किं विष्ण्वादिवाक्येषु तत्तद्देवताविशिष्टयागविधिरन्तराल-वाक्ये च तेषां त्रयाणां समुदायार्थमनुवादः, अथ वा तत्रैवाऽन्तराल-कालोपांशुत्वविशिष्टयागविधिः, इतरे तस्यैवार्थवादाः इति ।

अत्र च समुदायानुवादत्वस्याऽपवादादनन्तरसङ्गतिरेतावत-स्पष्टा । पूर्वपक्षे गुणादभ्यासाद्वा कर्मभेदः, सिद्धान्ते नेत नाच्च पादाध्यायसङ्गतिरपि द्रष्टव्या ।

तत्र तव्यप्रत्ययस्य(१) 'स्वाध्यायोऽध्येतव्य' इतिवन्निःसन्देहं विधित्वात् 'यजती'त्यस्य लट्लेट्साधारणत्वेन सन्दिग्धत्वादुभयत्र तुल्यत्वेऽपि वा(२) 'भूयस्त्वेनोभयश्रुती'त्यनेन न्यायेन यत्र यागपरिचायकदेवतादिमत्ता तत्रैव च यागविधिरिति निश्चयात् विष्ण्वादिवाक्येष्वेव कर्मविधानम् ।

न चैवं विष्ण्वादिदेवतात्रयविशिष्टैककर्मविधाने तव्य-प्रत्ययान्तरपुनःश्रुतिवैयर्थ्यापत्तेः विनिगमनाविरहेण सर्वेषां विधायकत्वावसायात् विहितविधानायोगाच्च कर्मभेदे सति वैश्वानरवाक्यवदुपक्रमोपसंहारैक्यबलगम्यैकवाक्यत्वस्य विधेयभेदेन भङ्गापत्तिरिति वाच्यम्, तत्र हि जातेष्ट्यैवोपक्रमात् तयैव चोपसंहाराद्युक्तैकवाक्यता, प्रकृते तु पुरोडाशैरन्तर्थापा-दितालस्यापरपर्यायजामित्वेनोपक्रमादजामित्वेन चोपसंहारादु-पक्रमोपसंहारैक्याभावेनैकवाक्यत्वाप्रतीतेः ।

यद्यपि च दोषरूपस्य जामित्वस्य तदपनायककर्मस्तुत्यर्थत्वेनैव सङ्कीर्तितत्वात् जामित्वाजामित्वयोरेकविषयत्वमुच्यते, तथाप्य-जामित्वस्य प्रत्येकमुपसंहारात् तदनुरोधेनोपक्रमस्यापि प्रत्येकमनुषङ्गावगतेः भिन्नवाक्यत्वोपपत्तिः । न ह्यन्यथा प्रत्येकमुपसंहारः कथमपि युज्यते; जातेष्टिवत् युगपदेवोपसंह्रियेत । अतो भिन्न-

१. तै. आ. २. १५. २. पू. मी. सू. ३. ३. १०.

७० जागदीशीपञ्चलक्षणी सिंहव्याघ्रलक्षणं च । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादिविभूषितं च । [न्याय वि० ९] रु० ०—८

७१ (१) ब्रह्मसूत्रशाङ्करभाष्यम् । चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम् । द्वितीयाध्यायस्य द्वितीयपादान्तो प्रथमोभागः । [वेदान्तविभागे ९] रु० २—८

७१ [२ ब्रह्मसूत्रशाङ्करभाष्यम् । श्री गोविन्दानन्द प्रणीतया रत्नप्रभया समन्वि- ...तीयाध्यायस्य तृतीयपादमारभ्य समाप्तिपर्यन्तम् । द्वितीयोभागः । [वेदान्त वि० ९] रु०२—८

...सिद्धान्तशिरोमणिः । श्रीभास्कराचार्य विरचितः । "गणिताध्यायः" वासनासहितः ज्योतिषाचार्य म० म० श्री ६ मद्बापूदेवशास्त्रिकृतटिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७२ [२]-सिद्धान्तशिरोमणिः । " " "गोलाध्यायः" वासनाभाष्य सहितः । ज्योतिषाचार्य म० म० श्री ६ मद्बापूदेवशास्त्रि कृत टिप्पणी सहितः । [ज्यो० वि० ४] रु० २—०

७३ काकचण्डीश्वरकल्पतन्त्रम् । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] । [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [अलङ्कार वि० ३] रु० ०—१०

७६ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—०

७८ माथुरीपञ्चलक्षणी । पं श्रीउमानाथज्योलकृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० (१) पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्ट भेदेन प्रकरणत्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासाविचारताः तत्र प्रथमं प्रकरणं मुद्रितं प्रथमो भागः । [व्या० वि १०] रु० १—८

८० (२) पाणिनीव्याकरणे वादरत्नम् । द्वितीयोभागः [व्या० वि०] रु० १—४

८१ गणितकौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम् । [गणितविभागे १] रु० ०—६

८२ छन्दः कौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दःसंग्रहपुस्तकम् । [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम्। महर्षिप्रवरपतञ्जलिप्रणीतम्। तत्र (१) भोजवृत्तिः, [२] भावा-गणेशवृत्तिः, [३] नागोजीभट्टवृत्तिः, [४] मणिप्रभा, [५] योगचन्द्रिका, [६] योगसुधाकराख्य टीका षट्कसमेतम्। सटिप्पण। [योग० विभागे १] रु० २—

८४-[१] रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम्। म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा पं० ब्रह्मशङ्करमिश्रकृतपरीक्षोपयोगि सुधाऽऽख्यव्याख्या सहितः। १ से ४ सर्गः। मूल्यम् रु० १-४-० तथा १ से ५ सर्गः। रु० १—

८४-[२] रघुवंशमहाकाव्यम्। श्रीकालिदासविरचितम्। म० म० मल्लिनाथ कृत सञ्जीविनीटीका पं० श्रीसुदामामिश्रकृत परीक्षोपयोगि सुधाऽऽख्य व्याख्या सहितः। ६ से १० सर्ग। (काव्य वि० १-) रु० १-

८५ योगदर्शनम्। पं० श्रीबलदेवमिश्रकृत योगसूत्रप्रदीपिकाख्यव्याख्यया सहितम्। सटिप्पण। [योग वि० २] रु० १—

८६ काव्यमीमांसा। राजशेखरविरचिता। साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्ते कृत काव्यमीमांसा--चन्द्रिका टीका सहित [१ से ५ अध्याय] प्रथमो भागः। [काव्यविभागे १३] रु० १—

८७ नागानन्दनाटकम्। श्रीहर्षदेवप्रणीतम्। काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्येति पदवी विभूषितेन पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्यया समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादि-भिः सनाथीकृत्य सम्पादितम्। [नाटक विभागे १] रु० १—

८८ मेघदूतकाव्यम्। महाकवि श्रीकालीदास विरचितम्। मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्री नारायण शास्त्री खिस्तेकृत भावप्रबोधिनीव्याख्या टिप्पण्या च सहितम्। [काव्य० १४] रु० —

८९ जागदीशीव्यधिकरणम्। न्यायाचार्यश्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम्। (न्यायविभागे १२) रु० २—

९० काव्यकल्पलतावृत्तिः। श्रीअमरचन्द्रयतिनिर्मिता अरिसिंहकृतसूत्रसहिता। (अलङ्कारविभागे ४) रु० १—

९१ वैयाकरणसिद्धान्तचन्द्रिका। श्रीरामाश्रमप्रणीता। श्रीसदानन्दकृत-सुबोधिन्या, श्रीलोकेशकरकृत-तत्त्वदीपिकया व्याख्यया च सहिता। पं० श्रीनवकिशोरशास्त्रि-णानिर्मितया चक्रधराख्य टिप्पण्या च संवलिता उत्तरार्द्धं। (व्या० वि० ११) रु० २—

९२ त्रिपुरारहस्यम् (महात्म्यखण्डम्) साङ्ख्ययोगशास्त्राचार्य श्रीमुकुन्दलाल शास्त्रिणा संशोधितम्। साहित्याचार्य खिस्ते-इत्युपाख्य पं० श्रीनारायणशास्त्रिणा निबद्धाभ्यां भूमिकाऽध्यायानुक्रमणिकाभ्यां च सहितम्। (पुराणेतिहास वि० १) रु० ६—

९३ आपस्तम्बधर्मसूत्रम्। श्रीमद्धरदत्तमिश्र विरचितया उज्ज्वलाख्यया वृत्त्या संवलितम्। (कर्मकाण्डविभागे ७) रु० ४—

९४ अवच्छेदकत्वनिरुक्तिः। श्रीजगदीशतर्कालङ्कारकृताः। न्यायाचार्य श्रीशिवदत्त-मिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितः। (न्यायवि० १३) रु० १--४

९५ संस्कारदीपकः। गणेशपूजादिग्रहयागान्त-पूर्वाङ्ग-निरूपणात्मकः प्रथमो भागः। म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः। (कर्मकाण्ड वि० ८) रु० २—०

९६ वर्षकृत्यदीपकः। कालनिर्णयव्रतोद्यापनसहितः। म० म० पं० नित्यानन्दपन्त पर्वतीय विरचितः। (कर्मकाण्ड वि० ९) रु० ३—

९७ श्रौतसूत्रम्। (सामवेदीयं) श्रीमन्महर्षि-लाट्यायनप्रणीत अग्निष्टोमान्तम्। सरलावृत्तिसहितम्। (कर्मकाण्ड वि० १०) रु० २—०

९८ नलचम्पूः अथवा दमयन्तीकथा। महाकविश्रीत्रिविक्रमभट्ट विरचिता। विषमपद-प्रकाशाख्यव्याख्यया सहिता। भावबोधिनी टिप्पणी सहिता। (का० वि० १६) रु० १-४

November & December 1932.

THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 419 & 420.

मीमांसाकौस्तुभः ॥

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(प्रथमाध्यायस्य द्वितीयपादः द्वितीयाध्यायस्य प्रथमद्वितीयौ पादौ च ।)

पूर्वोत्तरमीमांसापारावारपारीण-

श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकेन
वेदविशारदेन मीमांसाकेसरिणा

पं० अ. चिन्नस्वामिशास्त्रिणा

संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ।

MIMAMSA-KAUSTUBHA

[An exhaustive Commentary of Jaimini Sutras]
2nd Pada of 1st Adhyaya and 1st
& 2nd Padas of 2nd Adhyaya.

BY

KHANDA DEVA.

Edited by
"VedaVisarada" Pandit A. Chinnaswami Sastri,
Chief Professor of Mimamsa. Benares Hindu University

Vol. III. FASCICULUS IV–V ४–५.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE
Vidya Vilas Press, Benares City.

1933.

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—४१९-४२०

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

THE

CHOWKHAMBÂ SANSKRIT SERIES

Nos. 402, 405, 408, 419 & 420.

THE

MIMAMSA-KAUSTUBHA

(An exhaustive Commentary of Jaimini Sutras)

(2nd Pada of 1st Adhyaya and 1st & 2nd Padas of 2nd Adhyaya)

By

KHANDA DEVA

Edited By

"Veda Visārada" "Mimamsa Kesari"

Pandit A. Chinnaswami S'astri

Chief Professor of Mimamsa, Hindu University Benares

and

his pupil Pandit Pattabhirama Sastri M. S.

Vol III. Fasciculas I to V १-५

JAI KRISHNA DAS-HARIDAS GUPTA,

The Chowkhamba Sanskrit Series office,

BENARES.

1933.

PRINTED, BY

JAI KRISHNA DAS HARIDAS GUPTA
Vidya Vilas Press,
Benares City.

1933

❀ श्रीः ❀

चौखम्बा–संस्कृत–ग्रन्थमाला ॥

नं० ४०२, ४०५, ४०८, ४१९, ४२०.

मीमांसाकौस्तुभः ॥

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(प्रथमाध्यायस्य द्वितीयपादः द्वितीयाध्यायस्य प्रथमद्वितीयौ पादौ च ।)

पूर्वोत्तरमीमांसापारावारपारीण–

श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकेन

वेदविशारदेन मीमांसाकेसरिणा

पं० अ. चिन्नस्वामिशास्त्रिणा

तच्छिष्येण पं० श्रीपट्टाभिरामशर्मणा मीमांसाशास्त्रिणा च

संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ।

प्रकाशकः—

जयकृष्णदास हरिदासगुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी ।

सं० १९९०

श्रीः ।

भूमिका ॥

अद्याऽयं मीमांसाकौस्तुभाख्योऽनुत्तमो मीमांसाग्रन्थोऽध्येतृणामत्यन्तोपकाराय मुद्राप्य प्रकाशं नीयते । केभ्यश्चन वर्षेभ्यः पूर्वमस्मदध्ययनकाले श्रीकाञ्च्यामंशतो मुद्रितोऽर्थवादभावार्थशब्दान्तरपादेष्वेवोपलब्धिमानासीदयं ग्रन्थः । तदा मद्रपुरीयसंस्कृतमहाविद्यालये विद्यामिमामधिगच्छद्भिरस्माभिः ग्रन्थस्याऽस्य मुद्रितेतरभागः, अध्ययनार्थं क्वचिद्भाट्टदीपिकापङ्क्तिषूत्पन्नानां संशयानामुच्छेदार्थश्च अडयार् (Adyar Library) पुस्तकालयादितः स्वहस्तेन लिखित्वैव समानेतव्य आसीत् । अध्ययनसमयेऽस्माभिरनेकशो गुरुमुखाच्छ्रुतम्—ग्रन्थोऽयमसाधारणः पूर्वमीमांसाशास्त्रे, को वाऽवशिष्टमस्य भागं मुद्राप्योद्धरिष्यतीति, तथैवाऽध्यापनकालेऽपि स्वयमनुभूतश्च । अतिसंक्षिप्ताः कठिनतमा अन्तस्सारा भाट्टदीपिकापङ्क्तयो याः, तास्सर्वा अपि तत्तत्स्थलीयकौस्तुभावलोकनेन तथा विकसिता भवन्ति, यथा नितरां समुल्लसति चेतो निधिलाभ इवेति नेदं तिरोहितं मीमांसामर्मज्ञानाम् ।

यद्यप्ययं ग्रन्थः स्वतन्त्रसूत्रव्याख्यारूपः, तथाऽपि भाट्टदीपिकाया व्याख्यारूप एव, अथ वा अस्यैव सङ्कुचितं रूपं यद्भाट्टदीपिका नामेति । नवीनं पन्थानमाश्रित्य ग्रन्थमिममारचयता ग्रन्थकर्त्रा न केवलं नवीनानां शास्त्रान्तरपरिशीलनपरिपक्वशेमुषीणां मनीषिणां मनस्तोषितम्, मीमांसापदार्थास्तत्र तत्र सर्वे तथा सन्निवेशिताः यथा कस्यचित्पदार्थस्य परिज्ञानार्थं अन्यग्रन्थावलुलोकयिषा नोदियात् । भाट्टमतमवलम्ब्य ग्रन्थमिमं रचितवताऽनेन मीमांसकशिरोमणिना शबरकुमारिलभवदेवपार्थसारथिसोमनाथाप्पय्यदीक्षिताद्युक्तयो युक्तियुक्ता न काश्चिदप्युपेक्षिताः अनुक्तिसहा न काश्चिदपि न समालोचिताः । अत एवाऽभियुक्तानां मीमांसापारदृश्वनामुक्तिः—'यदि कण्ठस्था खण्डदेवग्रन्थत्रयी किमन्यैर्ग्रन्थैरि' ति नाऽतिशयोक्तिः । अतोऽस्माभिः पञ्चनदक्षेत्रे (Tiruvadi, Tanjore) इदंशास्त्राध्यापकपदमधितिष्ठद्भिः भाट्टदीपिकाग्रन्थग्रन्थिभेदनार्थमस्य ग्रन्थस्याऽत्यावश्यकतां पश्यद्भिः तदानीमेवाऽस्य मुद्रणं मनस्यभिसंहितमासीत् । परन्तु तदुचितसामग्रीसम्पदभावेनाऽभिसन्धिमात्रेणाऽवस्थितं तेन तदा । ततो भगवता जगदविन्त्राऽत्रैव काश्यां वि-

श्वविद्यालयेऽध्यापनार्थमानीतोऽहं श्रीमता संस्कृतवाणीपरिचर्यैकजीवि तेन चौखम्बासंस्कृतपुस्तकमालाध्यक्षेण श्रीजयकृष्णदासगुप्तमहोदयेन सह सञ्जातपरिचयो न्यवेदयमेतन्मुद्रणं तस्मै। स च समनन्तरमेव मदीयां निवेदनां सफलयिष्यन्नारभतैतन्मुद्रणम्।

(१)मदीयं पुस्तकमेकं मुद्रितभागावशिष्टं अडयारपुस्तकालयतो लिखित्वाऽऽनीतम्,

(२)अस्मदाचार्यवर्याणां महामहोपाध्यायाद्यनेकविरुदावलीरलङ्कुर्वत श्रीकुप्पुस्वामिशास्त्रिमहोदयानां अनुपमया कृपया प्राच्यग्रन्थसंरक्षणालयात् (Madras Oriental Manuscripts Library) मदनुजेन तिरुपतिसंस्कृतमहाविद्यालये मीमांसाध्यापकेन पं० रामनाथशास्त्रिणा लिखित्वा लेखयित्वा च दत्तं पुस्तकमेकम्,

(३)पण्डितकुलभूषणै राजकीयमहाविद्यालयाध्यक्षैः पं० गोपीनाथ कविराजमहोदयैः पुस्तकालयात्सदयं दापितमेकम्,

(४)काशीस्थेभ्यः प्रसिद्धवैदिकेभ्यो बाबूदीक्षित जडे महोदयेभ्यो गृहीतमेकम्,

इति पुस्तकचतुष्टयमवलम्ब्य शोधितोऽयं ग्रन्थः। अध्यापना दिकार्ये ग्रन्थान्तरशोधने च व्यापृतोऽहं शनैश्शनैरेव कार्यमिदं कर्तु मशकम्। अत एतावान् ज्यायान् विलम्बस्समजनि, तथाऽपि समाप्ति मेयिवानयं ग्रन्थ इति नितरां प्रमोदस्थानम्। चतसृष्वप्यासु मातृकासु पाठभेदो नाऽस्ति तावानुल्लेखनार्ह इति नोल्लिखितस्सः। विषयवाक्यान स्थानादिकं परमन्विष्य यथोपलम्भं सूचितमधष्टिप्पण्याम्। तेषां सङ्के तशब्दानां विवरणावेदनिका सूचिकाऽपि सन्निवेशिता सर्वपरिज्ञा नाय। एवं रीत्या सम्मुद्रय प्रकाशितोऽयं मीमांसाकौस्तुभाख्यो ग्रन्थमणिः।

(ग्रन्थकर्तृसमयनिर्णयः)

अस्य ग्रन्थरत्नस्य निर्माता सर्वतन्त्रस्वतन्त्रः पण्डितकुलललाम भूतो देवकुलोत्पन्नो दाक्षिणात्यः श्रीखण्डदेव इति। अस्य जीवनकाल वैक्रमी सप्तदशशताब्दी, निर्याणकालश्च १७२२ परिमितो वैक्रमो वत्स (1665. A. D.) इत्यवोचं मीमांसान्यायप्रकाशभूमिकायाम् तदुपष्टम्भके प्रमाणे चेमे—

वाराणस्यां चित्पावनाख्यदाक्षिणात्यब्राह्मणानामन्येषां च परस्प कश्चन विवादस्समजनि। तच्छमनार्थं १७१४ वैक्रमे हेमलम्बवत्स मुक्तिमण्डपे पण्डितानां महती काचन सभा सम्मिलिता। तत्र व्यव स्था काचन लिखिता, यस्याः प्रतिलिपिर्नीचैरुद्धृता--

"मुक्तिमण्डपांतील निर्णय शक १५७९, सन् ई०१६५७
श्रीविश्वेश्वरो विजयतेतराम् ।
श्रीः । श्रीः । अथ देवर्षिविप्राणां काश्यां श्रीमुक्तिमण्डपे ।
यतिमिश्रविपश्चिद्भिस्सद्ब्राह्मण्यं विविच्यते ॥ १ ॥

तत्र तावत् पूज्यपादपरमहंसपरिव्राजकमहाराष्ट्रकर्णाटककोंकण-तैलङ्गद्राविडादिसकलज्ञातीयविद्वद्गृहस्थनिचयसम्मत्या वेदशास्त्र-लोकतो विमृश्य देवर्षिब्राह्मणा वेदशास्त्रपुराणेभ्योऽधिगतपरमार्थाः क्रतुयजनयाजनादिसदाचारशीलाः पङ्क्तिपावनाश्शरीरान्वयार्हाः अत्युत्तमब्राह्मण्यशालिनः शिष्टानुष्ठितशरीरान्वयाश्चेति सिद्धान्तितम् । दृष्टं चैतत्–भट्टमीमांसकश्रीभट्टरघुनाथाख्यसूरिभिः । मणिकर्णीत्युपाख्यस्याऽनन्तभट्टस्य कन्यका । देवर्षेः प्रसमुद्वाह्य वाजपेययजिः कृता । भूयांसश्चेदृशा अन्ये तद्वंशीया वयं च ते । ब्रुवाणा दोषमत्रार्थे विद्वद्भिः परिशोधिते । विश्वेशद्रोहिणो ब्रह्मघातिनश्च भवन्ति ते । इति-दिक् ॥ लिखितं चैतन्मीमांसकभट्टलक्ष्मणेन विद्वदनुज्ञातेन । संवति कृतकगाब्ज १७१४ सम्मितौ नन्दशैलशरभ १५७९ मितशाके (=। 1657 A. D.) हेमलम्बशरदि समपत्रं (?) ज्ञायते सकलभूसुरवृन्दैः ।" इति ।

व्यवस्थापत्रेऽस्मिन् तदानीन्तनानां वाराणसेयानां सर्वेषां पण्डितानां हस्ताक्षराणि गृहीतानि यन्मध्ये श्रीमतां खण्डदेवमहोदयानामपि हस्ताक्षराणि विलसन्ति । अतस्तत्कालजीविन इमे इति निश्चप्रचम् ।

भाट्टदीपिकाव्याख्यायाः प्रभावल्या अन्ते तत्कर्त्रा श्रीकविमण्डनशम्भुभट्टेन खण्डदेवनिर्याणकाल उल्लिखितस्तच्छिष्येण । स चेत्थम्—

वर्षे नेत्राब्धिसप्तद्विजपतिगणिते (सं० १७२२) मासि......
वारे जैवे प्रभाते सकलपितृतिथौ प्रोष्ठपद्याः परस्याम् ।
काश्यां श्रीब्रह्मनाले निरुपमचरितः खण्डदेवाभिधानः
प्राप्तः श्रीब्रह्मभावं विबुधवरगुरुर्ब्रह्मवर्यो यतीन्द्रः ॥ इति ॥

पण्डितवरेण्यैरेभिः काश्यामेवाऽवस्थाय पूर्वे वयसि गार्हस्थ्यं धर्मं यथावदनुष्ठाय चरमे वयसि सन्यासं गृहीत्वा तस्मिन्नाश्रमे श्रीधरेन्द्र-यतीन्द्राभिख्यामवाप्य कञ्चन कालं यापयित्वाऽन्ते ब्रह्मभूयं गतमित्यपि प्रतीयते–पूर्वोदाहृतश्लोके 'ब्रह्मवर्यो यतीन्द्रः' इति विशेषणद्वयोपादानात्, एतत्पूर्वोदाहृतश्लोके 'यः खण्डदेवनामाऽऽसीत् श्रीधरेन्द्राभिधां गतः' इति लेखनेन च । एतेषां पितरोऽपि श्रीरुद्रदेवनामानः पूर्वोत्तरतन्त्रनिष्णाता आसन्नित्यत्र, तेऽपि काश्यामेवाऽवसन्नित्यत्र च ग्रन्थेऽस्मिन् तत्त-

त्पादान्ते 'श्रीपूर्वोत्तरमीमांसापारावारपारीणधुरीणश्रीरुद्रदेवसूनोः खण्ड देवस्य कृतौ' इत्येतद्ग्रन्थकर्तृलेखनम्, (१)'देवादेवाऽध्यगीष्ट स्मरहर-नगरे शासनं जैमिनीयम्' इति जगन्नाथपण्डितोक्तिश्च प्रमाणम् ।

एतेषां गुरवः श्रीविश्वेश्वरापरपर्यायाः श्रीगागाभट्टाः दिनकरभट्टपुत्रा इति प्रसिद्धिः । तेषां परम्परा च पण्डितलोकविदितैवेति नाऽत्र विशेषतो वक्तव्यमस्ति, तथाऽपि (२)भाट्टदिनकरस्थैः दिनकरभट्टीयैरेव पद्यैस्तत्पुनस्स्मारयामि पण्डितवर्येभ्यः—

विश्वामित्रमुनीश्वरान्वयसुधासिन्धौ सुराणां द्रुमः
श्रीरामेश्वरनामधेय उदभूदाम्नायशाखोज्वलः ।
नानाशास्त्रफलैस्समस्तवसुधावृन्दारकाणां परं
सन्तोषं जनयन् रघूद्वहलसत्सेवालतालिङ्गितः ॥
श्रीरामेश्वरतस्ततस्समभवत् श्रीभट्टनारायणः
शास्त्राम्नायपरायणः खलमतध्वान्तैकविद्रावणः ।
काश्यां पातकिविद्रुतं भगवतो विश्वेश्वरस्याऽचलं
लिङ्गं भोग्यवशात्सुखाय जगतां संस्थापयामास यः ॥
नारायणस्याऽऽत्मज आविरासीत्
स रामकृष्णोऽर्चनदृष्टरामः ।
पराजितो वागधिपोऽपि येन
विद्यानवद्यप्रतिभाधिकेन ॥
दिनकर इति रूढस्तत्सुतो ग्रन्थमेनं
मतियुतसुखबोध्यं सर्ववक्तव्ययुक्तम् ।
असृजदथ समर्थानन्दसच्चित्स्वरूपे
रघुपतिपदपद्मे जन्मसार्थक्यमाप ॥ इति

दिनकरभट्टानां सूनव इमे गागाभट्टा इति तैरेवोक्तं भाट्टचिन्तामणेरादावन्ते च ।

(श्रीखण्डदेवीयाः ग्रन्थाः)

एभिः पण्डितशिरोमणिभिः काश्यामेवाऽवस्थितैः मीमांसायामेव ग्रन्थत्रयी निर्मिता—भाट्टकौस्तुभः, भाट्टदीपिका, भाट्टरहस्यञ्चेति । तत्र प्रथमः प्रथमाध्यायद्वितीयपादत (अर्थवादपादतः) आरभ्य तृतीयाध्यायतृतीयपादस्थसप्तमाधिकरण (बलाबलाधिकरण) पर्यन्तः, द्वितीयश्च तत एवाऽऽरभ्य द्वादशाध्यायपर्यन्तः, तृतीयश्चाऽधिक-

१ 'देवादेव खण्डदेवादेवेत्यर्थः' इति प्रदीपे नागेशः ।
२ भाट्टदिनकरं नाम शास्त्रदीपिकाव्याख्या दिनकरभट्टकृता ।

रणसम्बन्धमनपेक्ष्य लकारार्थधात्वर्थविभक्त्यर्थनिरूपणपरश्शाब्दबोधग्रन्थः।

यद्यपि भाट्टदीपिका प्रथमपादमारभ्य महीशूरपुरे मुद्रिता, तथाऽपि खण्डदेवविरचिता भाट्टदीपिका द्वितीयपादमारभ्यैवेति अध्ययनपरम्परायां प्रसिद्धिः। एवं भाट्टरहस्येऽपि इदानीं यावानुपलभ्यते भागस्तावानेव रचित इत्येव गुरुपरम्पराप्रणाली। कौस्तुभस्तु बलाबलाधिकरणपर्यन्तमेव रचित इति सुस्पष्टमेव श्रीशम्भुभट्ट एतच्छिष्यः स्वीयप्रभावलीग्रन्थे आदौ—'अत्र च यद्यपि बलाबलाधिकरणसमाप्तिपर्यन्तं स्वकृतेन कौस्तुभग्रन्थेन व्याख्यातार्था भाट्टदीपिके' त्यादिग्रन्थेनाऽभिदधाति।

यद्यपीमे कौस्तुभे भाट्टदीपिकायां च स्वप्राचीनान ग्रन्थकारान् यथावसरं खण्डयन्ति, तथाऽपि शास्त्रदीपिकाप्रकाशबालप्रकाशादिग्रन्थकर्तॄणां श्रीशङ्करभट्टानां खण्डने बद्धादरा आसन्निति प्रतीयते, यतः प्रायशोऽधिकतर तेषामेव खण्डनमुपलभ्यते "यत्त्वत्र केश्चित्" "यत्तु केश्चित्' इत्यादिना नामोल्लेखनं विना। ते चैतेषां गुरोर्भ्रातुष्पुत्रा आसन्।

यद्यपि शङ्करभट्टखण्डने मतिरतितरां प्रासरदेषाम्, तथाऽपि तदुपरि गौरवबुद्धिरेवाऽऽसीदेषामिति ग्रन्थावलोकनादवगम्यते, यतो नामोल्लेखनं न केवलं कृत्वाऽपि कृतम्, परन्तु मण्डनमिश्रपार्थसारथिमिश्रप्रभृतिषु विषये "जितं मण्डनेन" "यत्त्वत्र पार्थसारथिः "यत्त्वत्र पार्थसारथिना" इत्येकवचनमेव सावहेलं प्रयुञ्जानैरेभिः 'केश्चिदि'ति सबहुमानं बहुवचनप्रयोग एव कृतस्तद्विषये।

एवं खण्डदेवग्रन्थेषु प्राथमिकोऽयं ग्रन्थः इदम्प्रथमतया प्रकाशितः। प्रार्थये च बुधवरान् सर्वाङ्गीणसुन्दरममुं यथावदुपयोज्य सफलयन्तु मदीयं परिश्रममिति। सावधानेन कृतेऽपि शोधने मर्त्यमात्रसुलभा दोषाः क्वचिदवतिष्ठेरन्नेवेत्यभ्यर्थये तान् तन्मर्षणमपि।

मातृकादानेनाऽस्मभ्यं बहूपकृतवद्भ्यः पण्डितवर्येभ्यो बद्धधमर्णा वयमिति तेभ्यः कृतज्ञतामुपहरामि। शोधनादिकार्ये नितान्तमुपकृतवतेऽस्मत्प्रियशिष्याय श्रीपट्टाभिरामशर्मणे मीमांसाशास्त्रिणे बह्वीराशिषः प्रयुञ्जे। आशासे च सुरभारतीसमुद्धरणबद्धवर्मणे श्रेष्ठिवर्याय श्रीजयकृष्णदासगुप्तमहोदयाय चौखम्बासंस्कृतपुस्तकमालाध्यक्षाय श्रेयःप्राप्तिमुत्तरोत्तरामिति शिवम्।

आश्विन शुक्ल द्वितीया सं० १९९० } चिन्नस्वामिशास्त्री
२१. सितम्बर. १९३३. वाराणसी. } संशोधकः

मीमांसाकौस्तुभगतानामधिकरणानां सूची ॥

मीमांसाकौस्तुभगतानां सूत्राणां

सूची ॥

वाक्यत्वेऽपि न दोषः। अतश्च विष्ण्वादिवाक्येष्वेव तत्तद्देवतोपांशुत्वविशिष्टयागत्रयविधानम्।

यद्यपि तत्र कर्मोत्पन्नतद्धितप्रत्ययेन विष्णवादेः प्राधान्यं यागं प्रत्यवगम्यते, तथाऽपि सक्त्वादेरिव भूतभाव्युपयोगाभावाद्विनियोगभङ्गेन विष्ण्वादेः त्यज्यमानहविरुद्देशकर्मत्वमात्राविवक्षणेऽपि प्राधान्यांशाविवक्षया यागं प्रति वैशिष्ट्योपपत्तिः। अन्तरालवाक्यस्थयजिपदं तु तेषामेव यागानामनुवादकम्। उपांशुयाजपदं तु तेषामेवाऽव्युत्पन्नं सामानाधिकरण्यमात्रेणैव नामधेयम्। न तु तत्प्रख्यन्यायेन। उपांशुयाजपदे व्युत्पत्त्यङ्गीकारे(१) 'च जोः कु घिण्यतो'रित्यनेन चकारान्तस्य जकारान्तस्य वा धातोः घिति णिति च प्रत्यये परे कुत्वविधानादुपांशुयाग इति रूपापत्तेः उपांशुयाजपदे उपांशुत्वरूपगुणविधित्वशङ्काया एवानुपपत्तेः। अतः सामानाधिकरण्येन रूढमिदं नामधेयम्। अन्तरालकालमात्रं त्विह यागत्रयानुवादेन विधीयते। तच्चान्तस्याऽन्तरालकालस्तुत्यर्थम्। समुदायवाक्येऽप्यन्वितस्य जामित्वोपक्रमस्याऽव्यवहितत्वात् विष्ण्वादिवाक्येष्वप्यनुषङ्गेणाऽन्वयो नानुपपन्नः।

वस्तुतस्तु तैत्तिरीयशाखायामन्तरालवाक्येऽप्यजामित्वोपसंहारादुपक्रमोऽपि तन्मात्रविषय एव। विष्ण्वादिवाक्येषु त्वजामित्वायेत्येतावन्मात्रमेवाऽजामित्वसम्पादकान्तरालकालयोगबललभ्याजामित्वसम्पादकतानुवादो यागस्तुत्यर्थो न विरुध्यते। तेषु च विष्ण्वादिदेवत्ययागेषु शाखाभेदेन क्रमाम्नातानि वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानि लिङ्गादेवाङ्गं भवन्तीति न तेषां सिद्धान्त इव मान्त्रवर्णिकदेवताकल्पकत्वमित्यपि लाघवम्।

१. पा. सू. ७. ३. ५२.

अत एव विष्ण्वादिवाक्ये यागमात्रविधिः, देवता तु मान्त्रवर्णिकीत्यपास्तम्, मान्त्रवर्णिकदेवताकल्पनापेक्षया तव्यप्रत्ययद्वितीयोपात्तदेवतायां बलवत्त्वात्। तव्यादौ हि कर्मत्वमुपात्तमिति त्यज्यमानद्रव्योद्देशकर्मत्वरूपदेवतात्वं झटित्यवगम्यते, मन्त्रे तु तदपि कल्पनीयम्, इत्यस्त्येव विप्रकर्षः। तस्मात् विष्ण्वादिवाक्यविहितानां यागानामन्तरालवाक्यमनुवादकमिति सिद्धम्।

न च तदप्यन्तरालविशिष्टयागान्तरविधायकमेव किं न स्यादिति वाच्यम्, भेदकप्रमाणाभावेन यागान्तरत्वानुपपत्तेः। (१)विष्ण्वादियागेषु लिङ्गविनियुक्तानां मन्त्राणामस्मिन् क्रममात्रेण मान्त्रवर्णिकदेवताकल्पनायोगेनाऽरूपत्वाच्च। अतस्तत्र विष्ण्वादिवाक्यविहितयागत्रयानुवादेनाऽन्तरालमात्रविधिः।

न च पुरोडाशनैरन्तर्यापादितजामितादोषनिवर्तकतानुवादबलादेव तत्सिद्धिः, 'न गिरागिरेति ब्रूया'दित्यनुवादबलादिवेरापदस्य तत्स्थानतेति भवदेवोक्तं शङ्क्यम्, अजामित्वानुवादान्यथानुपपत्तिकल्पितविधिबलेन सम्भवत्प्राप्तिकस्याऽपि प्रत्यक्षविधिना विधातुं शक्यत्वात्। अन्यथा विधेयान्तराभावेनाऽन्तरालवाक्ये ऽसम्बद्धस्य जामित्वार्थवादस्य व्यवायेन विष्ण्वादिवाक्येष्वप्यन्वयानुपपत्तेः।

अस्तु वा विद्वद्वाक्ये ऽर्थवादान्वयवदत्रापि समुदायानुवादे तदन्वयः, तथापि समुदायानुवादप्रयोजनं त्रयाणामपि विष्ण्वादियागानां फलसम्बद्धसिद्धिः। एतदभावे हि 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्नि'ति वाक्ये अग्नीषोमपदश्रवणात्तयोरुपलक्षणत्वेन विशेषणत्वेनैव वाऽन्वयावगतेः अग्नीषोमदेवत्यस्यैव विजातीययागस्य पौर्णमासीका-

---

१. विष्ण्वादिवाक्येषु इति. ख. पु.

क्षोद्देशेनोपादानात् विद्वद्वाक्ये फलवाक्ये च सङ्ग्रहेण फलसम्बन्धस्याऽपत्तेः इतरयोरङ्गत्वमापद्येत । सति त्वेतस्मिन् समुदायानुवादे त्रयाणामप्युपांशुयाजसंज्ञकत्वप्रतीतेः 'उपांशु पौर्णमास्या'मिति नामैकदेशेन कालसम्बन्धोपपत्तेस्त्रयाणामपि 'प्राचीनप्रवणे वैश्वदेवेन यजेते'तिवत् फलसम्बन्धसिद्धिः । न हि तदाऽग्नीषोमीयपदमुपलक्षणं विशेषणं वा सम्भवति, समुदायानुवादवैयर्थ्यापत्त्या वैश्वदेवपदवदेव तस्य विष्ण्वादिदेवताद्वयोपलक्षकत्वात् । अतस्त्रयाणां फलसम्बन्धसिद्धिरेव समुदायानुवादप्रयोजनम् । सूत्रं निगदव्याख्यातम् ॥

(इति पूर्वः पक्षः)

(अथ सिद्धान्तः)

चोदना वा प्रकृतत्वात् ॥ २-२-१० ॥ (सि.)

अन्तरालवाक्य एव कर्मचोदना, विष्ण्वादिवाक्ये कर्मविध्यसम्भवेनाऽनुवादासम्भवात् । तथा हि—वैश्वानरवाक्यन्यायेनोपक्रमोपसंहारैक्यादेकवाक्यत्वावगमेन नाऽत्र यागत्रयविधानमुपपत्तिमत्; न च प्रत्येकमजामित्वार्थवादाद्भिन्नवाक्यत्वावगतिः, तस्य विष्णवादिदेवतासु प्रत्येकमजामिताकरणशक्तिप्रदर्शनमुखेन तज्जन्ययागस्तुतिपरतया एकवाक्यत्वेऽप्युपपत्तेः । अतो ऽन्तरालवाक्य एवाऽप्राप्तिबलेन लेट्त्वनिश्चयं कृत्वा यागविधिर्युक्तः, न तु प्रैषार्थकेन तव्यप्रत्ययेन, वाक्यभेदाल्लक्षणापत्तेश्च । तस्मिंश्च यागे ध्रौवद्रव्यस्य शाखाभेदेनोपांशुयाजक्रमाम्नातवैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलैः मान्त्रवर्णिकया देवतायाश्च प्राप्तत्वेन नाऽरूपत्वम् ।

नन्वेवमपि मान्त्रवर्णिकदेवताकल्पनापेक्षया तव्यप्रत्ययोपात्तदेवतात्वस्यैव विष्ण्वादेर्विधानं युक्तम्; न च वाक्यभेदः,

देवतात्रयविशिष्टैकयाग(१)विधानेनाऽवाक्यभेदादिति चेत्-

अत्र केचिदाहुः-मन्त्रकल्पितदेवतापेक्षया तव्यद्वितीयोपात्तदेवतात्वस्य दौर्बल्यम्। अत एव वार्तिके तद्धितचतुर्थ्यपेक्षयैव मन्त्रवर्णस्य दौर्बल्यमुक्तम्। अतश्च नोत्पत्तिवाक्ये विशिष्टविध्यापादकविष्ण्वादिविधिर्युक्त इति मन्त्रवर्णादेव तत्प्राप्तिरिति।

वस्तुतस्तु तव्यद्वितीयास्थले विष्ण्वादीनां तद्गतकर्मत्वस्य च क्लृप्तत्वात् केवलमुद्देशनिरूपितत्वमात्रं न व्युत्पत्तिसिद्धमिति कल्पनीयम्। यदि हि यजिस्त्यागविशिष्टमुद्देशमेव विशेष्यतया वदेत्ततोऽपि विशेष्यान्वयस्य व्युत्पत्तिसिद्धत्वादुद्देशनिरूपितत्वमपि न कल्प्येत। स तु वृद्धव्यवहारादुद्देशविशिष्टत्यागवाची, अतश्च कर्मत्वान्वयाय त्यागविशिष्टोद्देशे याजिपदस्य लक्षणामात्रमङ्गीकृत्य देवतात्वसिद्धिः। अथ वा याजिपदं यथाश्रुतमेवाऽङ्गीकृत्य त्यज्यमानहविरुद्देश्यत्वसमनियतो देवतात्वरूपाखण्डोपाधिरेव सम्प्रदानत्वैकदेशभूतो लक्ष्यते तव्यद्वितीयाभ्याम्। ततश्च तस्य त्यागं प्रत्येवान्वय इति लाघवम्। मन्त्रे तु स्वतन्त्रस्य वाक्यान्तरस्यैव कल्पनात् गौरवमिति स ततो दुर्बल एव।

अत एव देवताप्रमाणेष्वेवंविधो दौर्बल्यक्रमोऽनुसन्धेयः सर्वापेक्षया तावत्प्रबलो हविःपदसमभिव्याहृतस्तद्धितः, तस्य स्मृतिवृद्धव्यवहाराभ्यां त्यज्यमानद्रव्योद्देश्यत्वरूपे देवतात्व एव शक्तत्वात्। यस्तु देवताशब्दः (२)"इन्द्रो देवता वातो देवता" इत्यादाविव क्वचित् देवताविधायकः श्रूयेत, सोऽपि तद्धितापेक्षया दुर्बल एव, देवताशब्दस्य स्तुतिभाक्त्वहविर्भाक्त्वरूपद्विविधदेवतात्ववाचित्वेन साधारणत्वात्, देवतापदेन देवतात्वस्याऽधिष्ठानोपसर्जनतयाऽभिधानेन तद्धितवद्विशेष्यतयाऽप्रती-

१. विधानादिति चेत् इति ख. पु. २. तै० सं० ४. ३. ८.

तस्य झटिति क्रियान्वयाप्रतीतेश्च ।

चतुर्थ्यपि सम्प्रदानत्ववाचिनी तस्य त्यज्यमानद्रव्योद्देश्यत्वविशिष्टप्रतिगृहीतृत्वरूपस्य ब्राह्मणादाविव देवतायां प्रतिगृहीतृत्वासम्भवेनाऽसम्भवादेकदेशलक्षणया देवतात्वापरपर्यायत्यज्यमानद्रव्योद्देश्यत्वरूपभाक्तसम्प्रदानत्वपरा सती ततोऽपि दुर्बलैव ।

द्वितीया तु पूर्वोक्तविधया देवतात्वं लक्षयन्त्यपि शक्यतावच्छेदकाप्रविष्टस्यापि लक्ष्यतावच्छेदकत्वात् न चतुर्थीतुल्येति ततो दुर्बला ।

तव्यस्य तु कृदन्तत्वात् कर्मत्वोपसर्जनद्रव्यविशेष्यकबोधजनकत्वव्युत्पत्तेः न केवलं पूर्वोक्तविधया देवतात्वस्यैव लक्षणा, अपि तु तद्विशेष्यताया अपि क्रियान्वयार्थं लक्षणेति ततोऽपि दौर्बल्यम् ।

मन्त्रस्तु वाक्यान्तरकल्पकत्वात् ततोऽपि दुर्बल इत्युक्तमेवेति ।

अन्यथाऽपि समाधीयते—विष्ण्वादीनां हि तव्यप्रत्ययेन देवतात्वे लक्षिते समानाभिधानश्रुत्या तेनैव विधानोपपत्तेः पञ्चमलकारविधेयभावनायां वैशिष्ट्याभावाद्वाक्यभेदापत्तिः । नाच—अत एव तव्येन देवतात्वमात्रं लक्षयित्वा प्रवर्तनांशेऽनुवादत्वमङ्गीकृत्य तस्य विधेयभावनावैशिष्ट्योपपत्तिरिति वाच्यम्, विष्ण्वादिपदानामजामित्वोपपादकतया अर्थवादत्वेनोपपत्तावन्यतस्सम्भवल्लाभविष्ण्वादिदेवताविशिष्टयागविध्यङ्गीकारायोगात् ।

अत एव नामधेयत्वेनाऽभ्युपपन्नस्य अग्निहोत्रमपिदादिपदस्य मन्त्रवर्णेनाऽपि सम्भवल्लाभाग्निसमिदादिविधायकत्वं नाऽङ्गीकृतम् ; विशिष्टविधिगौरवापत्तेः । अत उत्पत्तिवाक्ये याग-

मात्रविधिः । नचैवं अर्थवादोन्नीतदेवताविधिकल्पनयाऽपि त-त्प्राप्तिसम्भवे मान्त्रवर्णिकतत्कल्पने प्रमाणाभावः । 'सूक्तभाजो हविर्भाजश्च देवता' इति स्मृत्या मन्त्रे तज्जन्यस्तुतिभाक्त्वरूपदे-वतात्वस्याऽवगतौ हविर्भाक्त्वरूपस्य तस्य सुकल्पत्वात् । अत एव मान्त्रवर्णिकदेवताकल्पनापेक्षयाऽप्यार्थवादिकदेवताकल्पनं गु-र्विति ततोऽपि दुर्बलम् । अतश्चोत्पत्तिवाक्ये देवताविध्यभावेऽ-प्यन्तरालोपांशुत्वविशिष्ट एव यागो विधीयते ।

नचाऽन्तरालकालोऽपि पुरोडाशैरन्तर्यापादितजामितादो-षापनयनरूपफलबलादेव लभ्य इति तद्विध्यानर्थक्यम्, उपां-शुयाजस्य वक्ष्यमाणरीत्या फलवत्त्वस्य क्लृप्तत्वेन दोषापनयन-स्यार्थवादमात्रत्वात् । अथाऽप्यर्थवादस्यैवान्तरालकालविध्यु-न्नायकता भवेत्, तथाऽप्युत्पत्तिवाक्येऽन्तरालपदवैयर्थ्यापत्तेः कल्प्यविधिप्रवृत्तेः पूर्वमेवाऽनेनाऽभ्युदयशिरस्कत्वार्थमन्तरालका-लो विधीयते, उपांशुत्वमपि चोपांशुयाजपदेनैव विधीयते । य-द्यपि चास्य व्युत्पन्नत्वे कुत्वप्राप्तिरावश्यकी, तथापि 'दृष्टा-नुविधिश्छन्दसी' त्यनुसाराच्छन्दसि कुत्वाभावमात्रं वैकल्पि-कम् । न त्वेतावता सर्वमेवेदमव्युत्पन्नं नामधेयम्; प्रतीयमा-नावयवार्थत्यागेनाऽतिरिक्तशक्तिकल्पने प्रमाणाभावात् । अव-यवार्थाङ्गीकारे चोपांशुत्वस्याऽप्राप्तत्वाद् गुणविधिरेवायमिति न किञ्चिदनुपपन्नम् । सूत्रं निगदव्याख्यातम् ॥

गुणोपबन्धात ॥ २–२–११ ॥ (सि)

पुरोडाशैरन्तर्यापादिताया जामिताया अन्तरालसम्ब-न्धिना विधेयेन निवृत्तिप्रतीतेर्यत्राऽन्तरालकालरूपगुणोपबन्ध-स्तत्र झटिति कर्मचोदनाप्रतीतेरन्तरालवाक्ये एव कर्मविधानम् ॥

प्राये वचनाच्च ॥ २-२-१२ ॥ (सि)

'शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीयौ' इत्यर्थवादे प्रधानभूताग्नेयादिसाहचर्याच्चोपांशुयाजत्वावच्छेदेन प्राधान्यप्रतीतेः भवन्मते चाग्नीषोमदेवत्यस्यैव तस्य तदापत्तेः सामान्यधर्मेण साहचर्यवादानुपपत्तिः। तथाहि—'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यज' न्नित्यन्तरालविधिसन्निधौ श्रुतमपि वचनं तदीयगुणविधिव्यवधानान्न तावत् तदर्थवाद इत्यसन्दिग्धम्। अतश्च विध्यन्तरैकवाक्यत्वाभावात् पुराकल्पोन्नीतेनाऽपि विधिनाऽत्र न यागविधानम्, अन्तरालवाक्ये श्रुतेन विधिना तद्विधानसम्भवे कल्प्यविधिना तद्विधानस्याऽन्याय्यत्वात्। नाप्युपांशुत्वस्य; उत्पत्तिवाक्येनैव प्राप्तिसम्भवे तद्विधाने निष्प्रयोजनत्वात्। अत एव नाऽऽज्याग्नीषोमयोः; तयोरपि 'सर्वस्मै वा एतद्यज्ञाये' त्यनेन मन्त्रवर्णेन च प्राप्तत्वात्। यज्ञायेति चतुर्थ्या तद्विधिसम्भवे षष्ठ्या तदङ्गीकारस्यान्याय्यत्वाच्च। 'ना'वित्यस्य षष्ठीचतुर्थीसाधारणस्य देवताविधौ सन्दिग्धत्वाच्च। अतः परिशेषात् पौर्णमासकालविधिरेवायम्।

यद्यपि चाऽसावन्तरालकालविध्यन्यथानुपपत्त्यैव प्राप्यते, तथापि ततः पूर्वमेव विधीयते। तत्प्रयोजनञ्च विद्वद्वाक्येऽधिकारवाक्ये च पौर्णमास्यादिनामकत्वेन फलसम्बन्धलाभः। अन्यथा श्रुतपौर्णमासीकालसम्बन्धानामेवाऽऽग्नेयादीनां तन्नामकत्वलाभेन फलसम्बन्धापत्तेः उपांशुयाजस्याऽङ्गत्वापत्तिः। अतः फलसम्बन्धसिद्ध्यर्थं पौर्णमासीविधिरर्थवान्। तत्र च यागत्रयपक्षेऽग्नीषोमपदश्रवणात्तद्देवत्यस्यैव यागविशेषस्याऽयं कालविधिस्स्यादिति तस्यैव फलसम्बन्धात् इतरयोर्वैष्णवप्राजापत्ययोरङ्गत्वमेव

स्यादित्युपांशुयाजत्वावच्छेदेन प्रधानप्रायपाठो न घटते ।

न च समुदायानुवादवैयर्थ्यापत्त्यैव प्राचीनप्रवणादिविधिवत् कालविधेस्सर्वविषयत्वम्, तस्य यागत्रयार्थवादत्वेनाप्युपपत्तेः । यागैकत्वपक्षे तु श्रूयमाणस्याऽप्यग्नीषोमपदस्याऽनुवाद्यगतत्वेनाऽविवक्षितत्वात् । त्रितयदेवत्यस्यापि फलसम्बन्धोपपत्तेः सामान्यावच्छेदेन प्रधानप्रायपाठो युज्यते ।

न च तदाऽपि काले कर्मण उपादेयस्य स्वरूपेण प्राप्तस्याऽपि प्रयोगविधिविषयत्वेन विधेयत्वात् तद्विशेषणस्याऽग्नीषोमदेवत्यत्वस्य समुदायवाक्ये प्रधानत्रयसाहित्यस्यैव विधेयविशेषणत्वेन विवक्षोपपत्तेः कथं देवतात्रययुक्तस्य प्राधान्यमिति वाच्यम्; प्रयोगस्याऽपि समुदायवाक्यादेव प्राप्तत्वेनेह 'य इष्ट्ये' त्यादिवाक्यवत् कालसम्बन्धमात्रकरणात् । अतश्च तद्देवानुवाद्यविशेषणत्वान्न तद्विशेषणविवक्षा । अनुवाद्याऽपि चास्मिन् वाक्ये यागोत्पत्तिरेव, न तु प्राप्तत्वेऽपि यागप्रयोगः, तस्य फलसम्बन्धप्रयोजनकत्वाभावेन कालसम्बन्धाकरणात् । अतश्च वैकल्पिकदेवतात्रययुक्तस्याऽप्युपांशुयाजस्य फलसम्बन्धात् सामान्यतः प्रधानप्रायपाठो युक्त एव ।

नचैवं तर्हि ममाऽप्यग्नीषोमदेवताकत्वस्याऽविवक्षितत्वात् सर्वप्राधान्योपपत्तिः, अग्नीषोमदेवताकत्वस्य विशेषणत्वेनाऽविवक्षायामपि उपलक्षणत्वेनाऽन्वयस्य ग्रहैकत्ववदावश्यकत्वात्, तत्र चोपलक्ष्यतावच्छेदकस्य विजातीययागत्वस्य लाभात्तदवच्छिन्नस्यैव कालसम्बन्धेन फलसम्बन्धापत्तेस्सर्वप्राधान्यानुपपत्तेः । ग्रहैकत्वस्थले तु ग्रहत्वातिरिक्तस्योपलक्ष्यतावच्छेदकस्याऽलाभात् तस्य च सर्वग्रहसाधारणत्वात् सर्वग्रहसम्मार्गसिद्धिः ।

अतएवाऽस्मन्मते सत्यप्यग्नीषोमपदस्योपलक्षकत्वे उपां-

शुत्वाद्युपलक्षकान्तरमहिम्ना उपांशुयाजत्वस्यैवोपलक्ष्यतावच्छेदकस्य लाभात् तदनुवादेनैव कालविधिप्रतीतेः देवतात्रययुक्तस्यैव फलसम्बन्धोपपत्तिः । अत एवोपांशुत्वादीनामविवक्षितत्वाद्याजिना प्रयाजादीनामप्यनुवादात् फलसम्बन्धापत्तिरित्यपास्तम् , तेषामविवक्षितत्वेऽप्युपलक्षकत्वेन व्यावर्तकत्वात् । अतो युक्तोऽस्मन्मते सामान्यमुखेन प्रधानप्रायपाठः ।

नन्वेतत्सर्वमेतस्य वचनस्य फलसम्बन्धफलकत्वे स्यात् , न त्वेतत्सम्भवति, विनाऽपि श्रौतकालविधिमन्तरालविधित एव पौर्णमासीकालसम्बन्धस्य प्राप्तत्वेन फलसम्बन्धोपपत्तेः । न च तस्य विलम्बितप्रतीतिकत्वेन शीघ्रप्रतीतकालसम्बन्धानामाग्नेयादीनां फलसम्बन्धापत्तेरर्थवद्वचनमिति वाच्यम् , तर्हि एतद्वाक्यप्रतीतकालसम्बन्धसत्त्वेऽपि शीघ्रप्रतीतिकोत्पत्तिवाक्यश्रुतकालसम्बन्धानामेवाऽऽग्नेयादीनां फलसम्बन्धापत्तेः उपांशुयाजस्य तदलाभतादवस्थ्यात् ।

अथ त्वेतद्वचनवैयर्थ्यभयेनैव विलम्बितप्रतीतिकमपि कालं निमीत्तीकृत्य पौर्णमास्यादिनामकत्वाङ्गीकारादुपांशुयाजस्य फलसम्बन्धाङ्गीकारः, ततोऽन्तरालस्य पौर्णमास्यामिवाऽमावास्यायामपि सत्त्वात् तत्रोपांशुयाजनिवृत्तिफलकतयैतद्वचनसार्थक्योपपत्तेर्न प्राबल्यसिद्धिः । अमावास्यायामपि कदाचिदस्त्येवाऽऽग्नेयैन्द्राग्नपुरोडाशद्वयम् । तन्नैयत्यं तु पौर्णमास्यामपि नास्त्येव, असोमयाजिनोऽग्नीषोमीयाभावात् । अतः कथं फलसम्बन्धफलकत्वमस्य वचनस्येति चेत् , न ; 'शिरो वा एतद्यज्ञस्य यदाग्नेय' इत्याद्यर्थवादात् 'त्रयोदशाऽमावास्याया'मित्यादिलिङ्गोपबृंहितात् 'यदन्वञ्चौ पुरोडाशा'' वित्यर्थवादान्तर्गतपुरोडाशपदस्याऽऽग्नेयाग्नीषोमीयमात्रपुरोडाशपरत्वे तात्पर्यावगमेनाऽमावास्यायामुपांशु-

याजाप्राप्तिः तद्व्यावृत्तिफलकपौर्णमासीविधिवैयर्थ्यादेतस्य फल-सम्बन्धमात्रफलकत्वोपपत्तेः ।

अत एव भवदेवोक्तम्—एतद्विध्यभावेऽन्तरालवाक्याद्यत्र पुरोडाशद्वयान्तरालं तत्रैवोपांशुयाजो न त्वेकपुरोडाशायामिति प्राप्नुयात्, एतद्विधिसत्त्वे तु विधिवैयर्थ्यभयेन पौर्णमासीका-लस्याऽन्तरालकालनैरपेक्ष्यप्रतीतेरेकपुरोडाशायामप्युपांशुयाजस्य पौर्णमासीसत्त्वेन प्राप्त्युपपत्तेः तद्बलेनैव चाऽऽन्तरालपदस्याऽग्नेयो-त्तरत्वमात्रलक्षणावगतेरेकपुरोडाशायामुपांशुयाजोऽनुष्ठेय इति प्र-योजनमपि एतद्विध्यभावेऽप्यन्तरालवाक्ये पुरोडाशद्वयस्य क्लृ-प्तप्रयोजनत्वेनोपांशुयाजानङ्गत्वात् कालोपलक्षणत्वमात्रप्रतीतेः कालस्य च शङ्खवेलायामागन्तव्यमित्यादौ लोके श्रुतोपलक्ष-णाभावेऽप्युपलक्षकान्तरोपलक्षितस्याऽऽगमनादिक्रियान्वयदर्शने[न] सुतरां प्रकृते आद्यपुरोडाशोपलक्षणेनैवाऽन्त्यपुरोडाशरूपोपलक्ष-णाभावेऽपि कालोपलक्षणसिद्धेः तत्रोपांशुयाजानुष्ठानस्य दशमे व-क्ष्यमाणत्वादुपेक्षितम् । तस्मादनन्यप्रयोजनकत्वाद्युक्तं फलस-म्बन्धप्रयोजनकत्वमेवैतस्य वचनस्य ।

वस्तुतस्तु 'शिरो वा एतद्यज्ञस्ये'त्यादिपौर्णमासीस्थपुरोडा-शतात्पर्यग्राहकवदैतरेयिशाखायां वैष्णवयाज्यानुवाक्यायुगलस्या-ग्नेयसान्नाय्यान्तराले समाम्नानेनाऽमावास्यायामप्युपांशुयाजता-त्पर्यग्राहकस्य सत्त्वात् तन्निवृत्तिफलकत्वोपपत्तेः नोक्तरीत्या फ-लसम्बन्धप्रयोजनकत्वोपपत्तिः । अतः तावब्रूतामित्यस्याऽनन्त-रमेव 'उपांशुयाजमन्तरा यजती' त्यस्य कस्याञ्चिच्छाखायामा-म्नानादिति वार्तिकदर्शनादेवं परिहर्तव्यम्—नैव 'तावब्रूता'मि-त्यस्य स्वतन्त्रविध्युन्नायकता, गौरवाद्वाक्यभेदापत्तेश्च ; अपि [तु] 'उपांशुयाजमन्तरा यजती'त्यनेनैकवाक्यतैव । अतश्चाऽनेन पौ[र्ण-]

मासीकालोपांशुत्वान्तरालकालविशिष्टमुपांशुयाजाख्यं कर्म वि-
धीयते, न त्वेतावताऽग्नीषोमदेवताऽऽज्यं च विधेयम्, प्रमाणान्तरेण
सम्भवत्प्राप्तिकस्य पुनर्विधेः निष्प्रयोजनत्वात्, विशिष्टविधौ
गौरवाच्च । अत एवाऽस्मिन्मते उपांशुत्वमप्युपांशुयजन्नित्यनेन
विधेयभावनाविशेषणत्वेन समर्प्यते, न तूपांशुयाजपदेन, तच्चव्यु-
त्पन्नम्, तत्प्रख्यन्यायेन वा नामधेयमित्यवगन्तव्यम् । अन्या-
नि तु देवतादिपदानि अनुवादकानि सन्ति स्तावकानीति न दो-
षः । एवञ्चाऽग्नीषोमीयपुरोडाशवदेव पौर्णमासीकालस्योत्पत्ति-
शिष्टत्वात् फलसम्बन्धोपपत्तिः । अमावास्यायां चाऽकरणोपपत्ति-
रिति सिद्धम् । बह्वृचब्राह्मणेऽमावास्यायामप्युपांशुयाजविधानाद्वा
तत्रापि तत्करणम् । दाशमिकाधिकरणं तु कृत्वाचिन्तया । 'त्रयो-
दशाऽमावास्याया'मिति लिङ्गं त्ववयुत्यानुवादः । एतद्बलादेवाऽ-
मावास्यायां विकल्प इति गुरवः ॥

प्रयोजनं पूर्वपक्षे यागत्रयानुष्ठानम्, सिद्धान्त एकस्यैव दे-
वता विकल्पनेति स्पष्टम् ॥

इति चतुर्थमुपांशुयाजाधिकरणम् ॥ ४ ॥

अथ पञ्चममाघाराग्निहोत्राधिकरणम् ॥ ५ ॥

आघाराग्निहोत्रमरूपत्वात ॥ २-२-१३ ॥ (पू-)

(विषयसंशयौ)

दर्शपूर्णमासयोः 'आघारमाघारयती'ति प्रकृत्य श्रुतम्–'ऊ-
र्ध्वमाघारयति, सन्ततमाघारयती'त्यादि । तथा 'अग्निहोत्रं जुहो-
ती'ति प्रकृत्य 'दध्ना जुहोती'त्यादि । तत्र किमूर्ध्वादिवाक्यैः
दध्यादिवाक्यैश्च विहितानां कर्मणां संज्ञायुक्तवाक्ये समुदायानु-

वादके ? उत तयोरेव विहितयोः कर्मणोरितराणि गुणविधयः; इति सन्देहः ।

(सङ्गतिः)

पूर्वाधिकरणे तव्यस्य श्रुत्या विधायकत्वाभावात् वाक्यभेदापत्तेश्च युक्तमर्थवादत्वम्, इह तु त्वयाऽपि दध्यादिवाक्यानां विधित्वाङ्गीकारात् शुद्धगुणविधेश्च वक्ष्यमाणरीत्या असम्भवेन विशिष्टकर्मविध्यवश्यम्भावाद्युक्तः समुदायानुवाद इति पूर्वपक्षोत्थानादनन्तरसङ्गतिः, पूर्वपक्षे गुणादभ्यासाद्वा कर्मभेदः, सिद्धान्ते नेति पादाध्यायसङ्गतिरपि ।

(पूर्वपक्षः)

तत्र विधेः प्रवर्तनारूपत्वात्तस्याश्च धात्वर्थविशेषावच्छिन्नप्रवृत्तिरूपभावनाव्यतिरिक्तविषयत्वासम्भवेन शुद्धगुणविधानानुपपत्तेः दध्यादिवाक्येऽपि धात्वर्थावच्छिन्ना भावनैव विधेया, न च विहितस्य विधानं सम्भवति, इति भेदसिद्धिः। नच विहितस्यापि फलकालादिसम्बन्ध इव दध्यादिसम्बन्धेनाऽपि पुनर्विधानोपपत्तिः, स्वत उत्पन्नस्याऽपि फलसम्बन्धे विनियोगाधिकारयोः कालसम्बन्धे विनियोगमात्रस्य विधेयत्वेन विध्युपपत्तिवदुद्रव्यादिसम्बन्धे उत्पत्तेरेवाऽऽवश्यकत्वात्तस्याश्च प्राप्तत्वेन विधानायोगात् भेदोपपत्तेः । अतश्च दध्यादिवाक्येषु देवताविधिवाक्ययोः मन्त्रवाक्ययोश्च होमा एव गुणादभ्यासाद्वा भिन्ना विधीयन्ते । तेषां च समुदायसिद्ध्यर्थमनुवादोऽग्निहोत्रं जुहोतीत्यनेन क्रियते, न तु कर्मान्तरमभ्यासाद्विधीयते, रूपाभावात् समुदायसिध्यर्थकत्वेनाऽनन्यपरत्वाभावाच्च ।

न च समुदायसिद्धिवैयर्थ्यम्, 'अग्निहोत्रं जुहोती'त्येतदभावे फलवाक्य निमित्तवाक्ये चाऽग्निहोत्रनामावच्छिन्नेन जुहोतिना

प्रसिद्धाग्निदेवताकस्यैव होमस्य फलादिसम्बन्धः स्यात्, न तु सूर्यदध्यादिहोमानाम् । एतत्सत्वे तु सर्वेषामेव 'वैश्वदेवेन यजेते' तिवदनुवादादग्निहोत्रनामकत्वोपपत्तेः फलादिसम्बन्धोपपत्तिः इति सार्थक्योपपत्तेः ।

नचैवं दध्यादिहोमे स्ववाक्यत एवाऽग्न्यादिदैवत्यहोमेषु वाक्षेपेण यत्किञ्चिद्द्रव्योपपत्तावपि दध्यादिहोमेषु स्ववाक्ये देवताभावाद्वाक्यान्तरेण देवतामात्रविधेश्च तवाऽनिष्टत्वादाक्षेपेण देवताया अप्राप्तेररूपत्वापात्तिरिति वाच्यम्; एकफलसाधनानामेषां एकप्रयोगविधिपरिग्रहेण सान्नाय्यवत् सकृदनुष्ठानोपपत्तेः, होमान्तरेष्वप्यपेक्षितत्वाद्द्रव्यदेवतादीनां प्रसङ्गेनोपकारकत्वोपपत्तेः ।

एवमाघारस्थलेऽप्यूर्ध्वत्वादिगुणानां धात्वर्थावच्छिन्नभावनाविधिमन्तरेण विधानायोगात्तयोरपि विधिप्रतीतेः विहितविधानायोगेन भेदसिद्धिः । तेषां च ऊर्ध्वत्वादिगुणेन्द्रदेवतादिविशिष्टाघाराणामवान्तरप्रकरणादुपक्रमस्थत्वाद्वाऽऽ"घारमाघारयति" त्ययं समुदायानुवादः, न तु ध्रौवाघारस्यापि; तस्याऽग्निसम्मार्गविधिना व्यवहितत्वात् । तत्प्रयोजनश्चैन्द्राघारेण सहप्रयोगविध्यवगतयौगपद्यसिद्ध्या तदीयेन्द्रदेवताकत्वसिद्धिद्वारा यागरूपतासिद्धिः यौगपद्यसिद्धिमात्रं वा । अन्यथा हि कदाचिदुत्तरकाले क्रियमाणेन समिद्यागेनाऽपि यौगपद्यं प्रसज्येत । तद्या वृत्तिफलकेन्द्रयागयौगपद्यसिद्धिः समुदायानुवादप्रयोजनम् ।

केचित्तु 'तस्याऽऽघारमाघार्ये' त्यनेन प्रयाजार्थे चतुर्गृहीते संस्कार्ये सर्वेषां विनियुज्यमानानामाघारकर्मणामेकत्वासिद्धिः समुदायानुवादप्रयोजनमित्याहुः, तत्स्वयमेवाऽऽघारकर्मणोऽर्थकर्मत्वस्य तत्प्रख्याधिकरणे साधितत्वात् संस्कारकर्मत्वाङ्गीकारेऽपि

वा राजसूयन्यायेन समुदायानुवादं विनाऽपि तन्त्राभिधानावगत समुदायाभिप्रायेणैकत्वोपपत्तेरुपेक्षितम् ।

यत्त्वत्र मूले आघाराग्निहोत्रवाक्ययोः समुदायानुवादकत साधकान्तरमुक्तम्—उत्पत्तिवाक्ये रूपज्ञानाभावाद्विधानायोग्य त्वमिति; तस्याऽयमभिप्रायः-रूपवत्ताज्ञानस्य योग्यताज्ञानाविधय विधेयताज्ञानं प्रति कारणत्वमाग्नेयादिवाक्ये विद्वद्वाक्ये चान्वयव्य त्तिरेकाभ्यां क्लृप्तम्, नीरूपस्य विधानायोग्यत्वात्, अतः आ घाराग्निहोत्रवाक्ययोरूपाश्रवणान्न तत्र कर्मणो विधानम्, तदभा च तदनुवादेनाऽपि गुणविधानायोगान्न वाक्यान्तरेणाऽपि रूपव त्ताज्ञानमिति; तत्तु दध्यादिवाक्ये कर्मविधित्वेऽपि च देवताभावे स्ववाक्ये रूपज्ञानाभावस्य तदवस्थत्वादयोग्यतानिश्चयाभावमात्रे ण च योग्यताज्ञानाभावेऽपि श्रुतशब्दाच्छाब्दबोधस्याऽऽनुभाविक त्वाद्रूपवत्ताज्ञानस्य करणत्वानुपपत्तेः, तदभावेऽपि अरूपवत्तानि श्चयाभावमात्रेण विधेयत्वोपपत्तेः, पश्चाच्च रूपज्ञाने सत्यनुष्ठानोप पत्तेः रूपवत्ताज्ञानस्यैव कारणत्वकल्पनेऽपि वा उत्पत्तिवाक्येऽपी ष्टसामान्यवदनिर्धारितविशेषरूपसामान्यज्ञानमात्रेण विधेयत्वोप पत्तेः उपेक्षितम् । यदि तु कथञ्चिदेतदुपन्यसनीयमित्याग्रहः तदा दध्यादिवाक्येष्वपि 'यदग्नये चे'ति वाक्यस्थचतुर्थ्यन्तपद नुषङ्गेण स्ववाक्ये रूपलाभोपपत्तेः तदलाभचोद्यं परिहर्तव्यम् तत्सिद्धमाघाराग्निहोत्रवाक्ये समुदायानुवादके इति ॥

सूत्रं निगदव्याख्यातम् ॥

संज्ञोपबन्धात् ॥ २-२-१४ ॥ (पू)

एवं चाऽग्निहोत्रमाघारमिति द्वितीयान्तसंज्ञोपबन्धोऽपि दध्या दिवाक्यविहितानां कर्मणामर्थाक्षिप्तसाध्यत्वेनाऽनुवादादुपपन्न

भवति। इतरथा स्वतन्त्रस्य विधेयत्वे तस्य करणत्वात् तृतीयार्थ-लक्षणा स्यात् ॥

अप्रकृतत्वाच्च ॥ २-२-१५ ॥ (पू)

नन्वेवं "अग्निहोत्रं जुहोती"त्यत्र वाक्यान्तरेण रूपालाभेऽपि स्ववाक्य एव(१) तत्प्रख्यन्यायाभावेन अग्निहोत्रशब्दस्य गुणविधित्वापत्त्या रूपलाभोपपत्तेः दध्यादिवाक्यवद्विनिगमनाविरहेण कर्मविध्यवसायात् कथं समुदायानुवादत्वमिति चेन्न ; तत्प्रख्याधिकरणोक्तमार्गेण चतुर्थीसमासस्य व्याकरणलक्षणाननुगततया प्रकर्षेणाऽकृतत्वात् देवतारूपगुणविधित्वाशङ्कानुपपत्तेः । अत एव 'मासमग्निहोत्रं जुहोती'त्यत्र अग्निहोत्रपदस्य गुणविधित्वमनयैव युक्त्या निराकर्तव्यम् , न तु तत्प्रख्यन्यायेन । तत्प्रख्याधिकरणे तदुक्तिस्तु अभ्युपेत्यवादेनैवेति द्रष्टव्यम् । अतश्च रूपवत्त्वात्समुदायानुवादावेतौ ॥

(इति पूर्वः पक्षः)

(अथ सिद्धान्तः)

चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्सन्निधेर्गुणार्थेन पुनः श्रुतिः ॥ २-२-१६ ॥ (सि)

अन्यानाक्षिप्तविधिशक्तिकत्वादाघाराग्निहोत्रवाक्ययोः कर्मचोदनैव प्रत्येतव्या । एवं चाऽनुष्ठापकस्य विधेः स्वशब्दार्थभूतधात्वर्थावच्छिन्नभावनाविषयत्वात् प्रथमविधिप्रकाराङ्गीकरणाल्लाघवम् । अतश्चाऽनन्यपरपुनःश्रवणादपि कर्मविधित्वनिश्चयः। न च समुदायानुवादप्रयोजनकत्वेनाऽन्यपरता, दध्यादिवा-

---

१. पू. मी. १.४.४.

क्येषु पञ्चमविधिप्रकारापेक्षया लाघवेन तृतीयविधिप्रकाराङ्गी-
करणस्यैव न्याय्यत्वावगमेन कर्मविध्यनुपपत्तेः समुदायानुवा-
दायोगात् । न च प्रवर्तनारूपस्य विधेर्धात्वर्थविशेषावच्छिन्नभाव-
नारूपप्रवृत्तिविषयतां विना सिद्धरूपगुणविषयत्वानुपपत्तेः न तृती-
यविधिप्रकारोपपत्तिरिति वाच्यम्, सिद्धरूपस्य साक्षाद्विधिविष-
षयत्वायोगेऽपि विधिविषयीभूतभावनावच्छेदकत्वेन परम्परया
विधिविषयत्वोपपत्तेः। यद्यपि विधिगुणयोः नाऽनेन संसर्गेणा-
न्वयो व्युत्पन्नः, तथाऽपि गुणो भावनायां कारकतादिसम्बन्धेन
प्रकारीभवति, विधिश्च गुणविशिष्टां तां विदधत् फलतो गुण-
विषयः सम्पद्यते ।

न च प्राप्तत्वात् भावनायाः पुनर्विधाने भेदापत्तिः, एकवारं
कर्तव्यत्वेन बुद्धाया अपि गुणविशिष्टायाः पुनः कर्त्तव्यत्वबोधो-
पपत्तेः; तस्य च विशेष्यांशे अज्ञातज्ञापनरूपविधिफलाभावेऽपि
विशेषणांशे तत्फललाभेन सार्थक्योपपत्तिः । विशेष्यांशे त्वसा-
वनुवाद एव । अत एव सर्वत्र प्रातीतिके विशिष्टभावनाविधाने
सत्यपि फलविषयभेदादेव षड्विधिप्रकारा उद्भिदधिकरणेऽस्मा-
भिरुपपादिताः । दौर्बल्यञ्चोत्तरोत्तरं तेषामुक्तम् । वार्तिककारेण
च प्रातीतिकभावनाविधिनैरपेक्ष्येणाऽष्टौ श्रुतिप्रकाराः परोक्ता
दूषिताः । विस्तरभिया तु त इह न प्रपञ्च्यन्ते । अतोऽपि वि-
शेष्यांशस्य प्राप्तत्वेऽपि गुणविशिष्टत्वेन रूपेण पुनर्विधानात् फ-
लतश्च गुणविधित्वोपपत्तेः तृतीयप्रकारोपपत्तिः ।

तत्रापि च गुणकरणिकायां भावनायां धात्वर्थस्य कर्मत्वे-
नैवाऽन्वयो न तु करणत्वेन, मत्वर्थलक्षणापत्तेः । उपपादितं चैत-
(१)दुद्भिदधिकरणे । नचैवं प्राप्ताया अपि भावनाया गुणविधा-

१. पू. मी. १. ४. २.

नार्थं पुनर्विध्यभ्युपगमे ; विद्वद्वाक्यविहितभावनाया अप्या'ग्नेयोऽष्टाकपाल' इत्यत्र द्रव्यदेवताविशिष्टत्वेन रूपेण पुनर्विधानोपपत्तेर्वाक्यभेदानापत्तिः, विधिविषयभावनायामनेकगुणवैशिष्ट्योपपत्तावपि विधिफलस्यैकविषयत्वस्वाभाव्येनाऽनेकविषयत्वे आवृत्त्यवश्यम्भावात् ।

अत एव यत्राऽपूर्वभावनाविधिः तत्र विधिफलस्य विशेष्य एवैकस्मिन् सत्त्वादार्थिकेन च विध्यन्तरेण विशेषणानां विधानान्नावृत्तिरिति(१)स्पष्टं(२)पौर्णमास्यधिकरणे । प्रकृते तु विधिफलस्यैकदध्यादिविषयत्वेन वाक्यभेदाभावान्युक्तस्तृतीयविधिप्रकार इति प्रकृतकर्माभावान्नाऽऽघाराग्निहोत्रवाक्ययोः समुदायानुवादकत्वम् । न च दध्यादिवाक्ये वाक्यभेदाभावेन कर्मविधायित्वाभावेऽपि 'यदग्नये चे'ति वाक्याभ्यां प्राप्तकर्मानुवादेनाऽनेकगुणविधाने वाक्यभेदापत्तेः कर्मविध्यवगमात्, विशेषतश्चोत्पत्तिवाक्यशिष्टदेवतासमुच्चयानुरोधेनाऽऽग्नेयवदेकैकस्मिन् वाक्ये कर्मद्वयविध्यवगतेश्चतुर्णां कर्मणामग्निहोत्रं जुहोतीत्ययं समुदायानुवादो भविष्यतीति वाच्यम् ; तत्प्रख्याधिकरणोक्तमार्गेण तत्राऽपि प्रजापतिमात्रविधानेन सायंप्रातःकालीनदेवतासमुच्चयविशिष्टप्रजापतिमात्रविधानेन वाऽग्निसूर्यादीनां मन्त्रवर्णैः प्राप्तिमभ्युपगम्य तृतीयविधिप्रकारोपपत्तेः । तस्मादग्निहोत्रं जुहोतीत्ययमेव कर्मविधिः ।

न चैवमनेकेषां गुणानामेकार्थत्वाद्विकल्पापत्तिः, 'सायं जुहोति' 'प्रातर्जुहोती'ति वाक्याभ्यां तावत्कालविधानेऽपि 'स वै सायं च प्रातश्च जुहोति'त्यनेन च तत्समुच्चयविधानादुत्पन्नशिष्टसमुच्चयानुरोधेन साङ्गस्याऽऽवृत्तिरित्यवगतेः । न च पौर्णमा-

१. क्षुण्णं. इति. ग. पु. २. पू. मी. २. २. ३

स्यमावास्याकालीनयोः दर्शपूर्णमाससंज्ञयोः कर्मणोर्भेदेन तत्रा ङ्गावृत्त्युपपत्तावपि अग्निहोत्रसंज्ञस्य कर्मणः सायम्प्रातःकालयोर्भे देनाऽनुष्ठीयमानस्याऽपि स्वरूपेणैकत्वात् सकृत्कृतैरेवाऽङ्गैरुपका रसिद्धेः प्रचारविप्रकर्षेऽपि सवनीये सकृदङ्गानुष्ठानवदिहापि तदु पपत्तेः कथं साङ्गस्य द्विरावृत्तिरिति वाच्यम्, उत्पत्तिवाक्ये उत्प न्नस्याऽपि कर्मणः सायम्प्रातःकालवाक्याभ्यां प्रयोगद्वयविधा नात् तस्य च साङ्गप्रधानविषयत्वात् पौर्णमास्यमावास्ययोरिव साङ्गस्याऽप्यावृत्तिसिद्धेः। सवनीये तूत्पत्तिवाक्य एवाऽऽश्विनग्र हग्रहणोत्तरकालश्रवणात् प्रयोगविधिप्रतीतेः "वपया प्रातस्सवने चरन्ती"त्यादौ च सवनीयप्रयोगावयवभूतानामेव वपाप्रचारा दीनां कालविधानात्तन्मात्रोपयोग्यङ्गविशिष्टानां प्रयोगविधानेऽ पि सवनीयप्रयोगविधिपरिगृहीतानां तदीयपरमापूर्वोपयोगिप्र याजादीनामुत्पत्त्यपूर्वोपयोगिनां च साधारणानां वपाप्रचारादि- वाक्यपरिगृहीतत्वेन नाऽऽवृत्तिरिति वैषम्यम्।

ननु—'आश्विनं ग्रहं गृहीत्वे'त्यस्य क्रमविधित्वात् कालवि- धित्वाभावे न सवनीयप्रयोग(१)विधित्वम्। क्रमस्य पाठादेव प्राप्त्युपपत्तेरस्य कालविधित्वावसायात्। "आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीये"त्यनयोस्त्वान्तयोरुभयोरपि क्रियान्वयव्यु- त्पत्तेः। परस्परं च पाठादेव क्रमोपपत्तेः। परिवीयेत्यनेन परि- व्याणान्तरविधायकेन व्यवहितस्य त्वान्तस्य क्रमविधायकत्वानु- पपत्तेश्च। विशिष्य चेदेमेकादशे निरूपयिष्यते। तस्माद्युक्त कालानुरोधेन साङ्गस्याऽभ्यासः।

एवमेकैकस्मिन्नपि काले दशाहुतिपक्षे 'द्वे आहवनीये जु होति, चतस्रो गार्हपत्ये, चतस्रोऽन्वाहार्यपचने, दश सम्पद्यन्ते

१. विषय इति क० पा०

दशाक्षरा विराट्, य एवं विद्वान् विराट्सम्पन्नमग्निहोत्रं जुहोती'त्यत्राऽग्निहोत्रवाक्योत्पन्नस्य होमस्य विराट्सम्पत्तिवाक्येनाऽप्राप्तिवललभ्यविधिशक्तिकेन दशधाऽऽवृत्तिर्विधीयते । तत्र 'द्वे आहवनीये' इति वाक्येनाऽभ्यासद्वयस्याऽप्याहवनीयाधिकरणकत्वे विहिते ऽवशिष्टाभ्यासेषु तत्तद्वाक्याभ्यां गार्हपत्यान्वाहार्यपचनरूपाधिकरणमात्रविधानात्(१) 'समं स्यादश्रुतत्वा'दिति न्यायेन चैकैकस्मिन् गार्हपत्यान्वाहार्यपचनरूपेऽधिकरणेऽभ्यासचतुष्टयप्राप्तेर्दशधाऽभ्याससिद्धिः ।

न च "यदाहवनीये जुहोती"ति अनारभ्याधीतेनैवाऽभ्यासद्वय आहवनीयप्राप्तेरभ्यासान्तरेषु चाऽधिकरणविधिवलादेव तद्बाधोपपत्तेः 'द्वे आहवनीये' इत्यस्य वैयर्थ्यापत्तिरिति वाच्यम् । एतद्विध्यभावे विराट्सम्पत्तिवाक्यविहितेऽपि दशधाऽभ्यासे गार्हपत्यादिवाक्ययोः होमानुवादेनाऽधिकरणमात्रविधाने 'समं स्या'दिति न्यायेनैकैकस्मिन् पञ्चहोमाभ्यासापत्तेश्चतुःपदानुवादायोगात् चतुस्सङ्ख्याविशिष्टहोमोद्देशेनाऽधिकरणमात्रविधौ च वाक्यभेदापत्तेः चतुस्सङ्ख्योद्देशेनैव तद्विधौ चाऽधिकरणचतुष्टयापत्तेः चतुस्सङ्ख्याकोद्देशेनाऽधिकरणविधौ चाऽतिप्रसङ्गापत्तेः, सङ्ख्याधिकरणविशिष्टतावत्कर्मान्तरविध्यवश्यम्भावादष्टानामेतेषामग्निहोत्रवाक्यविहितस्य च देवताभेदेन द्विरावृत्तस्यैव कर्मणो विराट्सम्पत्तिवाक्ये लिङ्गसमवायेनाऽनुवादापत्तेः। न चेष्टापत्तिः, विराट्सम्पत्तिवाक्ये अग्निहोत्रपदस्य गौणत्वेऽङ्गीकृतेऽपि फलादिवाक्ये तदङ्गीकारे प्रमाणाभावेनाऽग्निहोत्रवाक्यविहितस्यैव फलादिसम्बन्धापत्त्याऽऽपराग्निकहोमानामङ्गत्वापत्तेः। अत उक्तविधया तेषामपि फलादिसम्बन्धसिद्ध्यर्थं "द्वे

१. जै. सू. १० २०

आहवनीये" इत्यस्य सार्थक्योपपत्तिः।

ननु त्वदुक्तरीत्याश्रयणेऽपि 'द्वे आहवनीये' इत्यत्र द्वित्व विशिष्टहोमोद्देशेनाऽऽहवनीयविधौ वाक्यभेदापत्तेः न तावत् सामान्यविधितः पूर्वमेवैतद्विधिप्रवृत्त्यङ्गीकरणं युक्तम्, न च त्रेदोष्यमङ्गीकृत्याऽपि लक्षणया अभ्यासद्वयभिन्नेष्वभ्यासेष्वाहवनीयनिवृत्तिर्विधीयत इति युक्तम्; तथा सति तेष्वाहवनीयप्राप्तेर्वैधत्वेन(१) 'न तौ पशौ करोती' तिवद्विकल्पापत्तेः। अतः कथं त्वदुक्तस्याऽपि सिद्धिरिति चेत्? न, अभ्यासद्वयभिन्नाभ्यासेष्वाऽऽहवनीयभिन्नमधिकरणं कुर्यादित्येवं पर्युदासाङ्गीकरणेन विकल्पानापत्तेः। नचैवं लक्षणापत्तिः, वचनव्यक्त्यन्तरासंभवेनाऽगत्याऽङ्गीकारात्। न ह्याहवनीयमुद्दिश्य द्विरभ्यासविनियोगविधिः सम्भवति, आहवनीयाङ्गत्वापत्तेः। नाऽऽप्याहवनीये निमित्ते तद्विधिः, तस्य नियतत्वेन निमित्तत्वानुपपत्तेः। यदि तु 'गार्हपत्ये जुहोति, (२)अन्वाहार्यपचने जुहोती' ति वाक्यान्तराभ्यां तस्य पाक्षिकतया निमित्तत्वमुच्यते, ततः प्राकरणिकत्वेन ताभ्यां तस्य बाधादेव निमित्तत्वानुपपत्तिः। अतो युक्तो लक्षणया पर्युदासः। यद्यपि च न पर्युदासमात्रं तत्फलम्, तस्याऽधिकरणान्तरविधिबलादेव सिद्धेः, तथाऽप्यपराग्निकहोमानां फलादिसम्बन्धासिद्धिरुक्तविधया फलं भवतीति न कश्चिद्विरोधः।

यत्त्वत्र कैश्चित् न्यायसुधाकृदुक्तपक्षान्तरावलम्बनेनोक्तप-

१. तौ आज्यभागौ पशुयागे नाऽनुतिष्ठेदित्यर्थः। अत्र निषेधार्थं आज्यभागयोः दर्शपूर्णमासत अतिदेशावश्यंभावेन अतिदिष्टस्य शास्त्रीयत्वेनाऽत्यन्तबाधायोगात् विकल्पे पर्यवसानमिति सिद्धान्तितं दशमाष्टमे।

२. अन्वाहार्यं दर्शपूर्णमासयोर्दक्षिणात्वेन देयमोदनम्, तत् पच्यते यस्मिन् इत्यन्वाहार्यपचनो दक्षिणाग्निः।

कारेऽस्वरसबीजमुक्त्वा सुधोक्तं पक्षान्तरमुपपाद्य विधिरसायनदूषणाय प्रवृत्तम्; तथाहि—न तावत् 'द्वे आहवनीये' इति परिसङ्ख्याफलकोऽपूर्वविधिस्सम्भवति, सामान्यविधेरपि प्रत्यक्षत्वेन ततः पूर्वमेतद्विधिप्रवृत्त्यनुपपत्तेः, द्विरभ्यासोद्देशेनाऽऽहवनीयविधौ सामान्यविधिनोपसंहारापत्तेश्च। नाऽपि प्राप्तपरिसंख्या, त्रैदोष्यापत्तेः । अतश्च त्रिष्वपि वाक्येषु सङ्ख्यैव विधीयते । सा च यद्यपि न होमानुवादेन विधातुं शक्या, तथात्वे अधिकरणानां सर्वावृत्तिषु साङ्कर्यापत्तेः । सङ्ख्यानां तु समुच्चयेन सङ्ख्यान्तरोपजननापत्तेश्च, विकल्पे चतुस्सङ्ख्याविधायिवाक्यद्वयवैयर्थ्यापत्तेश्च, तथापि 'गार्हपत्ये जुहोति, अन्वाहार्यपचने जुहोती' ति वचनान्तरप्राप्ततत्तदधिकरणताकोद्देशेन विधीयते । तासां च विकल्पे प्राप्ते(१) 'तां चतुर्भिरादत्त' इतिवत् विराट्सम्पत्तिवाक्येन समुच्चयो विधीयत इति । तत्रेदं वक्तव्यम्-यस्तावदस्वरसः स पर्युदासाङ्गीकरणादेव निरस्तः । यदपि च पक्षान्तरमुक्तम् , तदपि गार्हपत्यान्वाहार्यपचनवाक्याभ्यामनारभ्याधीताहवनीयवाक्यवोधादाहवनीयाधिकरणताया अप्राप्तेः तदुद्देशेन द्वित्वविधानानुपपत्तेराहवनीयाधिकरणकत्वस्याऽपि च प्रतिप्रसवविधौ कर्मान्तरत्वापत्तेस्तस्य चाग्निहोत्रपदवाच्यत्वाभावेन फलसम्बन्धानापत्तेः परिहर्तव्यम् ।

किञ्च द्विरावृत्त्यादीनां केन समुच्चयसिद्धिः ? विराड्वाक्येनेति चेत् ! तत्र समुच्चयवाचकपदाभावेन तद्विध्यनुपपत्तेः, 'तां चतुर्भि' रित्यत्र तु न समुच्चयो विधीयते । अपि तु समुच्चयफलकचतुस्सङ्ख्यैव विधीयत इत्युक्तम्, प्रकृते तु दशत्वसङ्ख्या-

१. चयनप्रकरणस्थं वाक्यमिदम् । तां अभ्रिं खनित्रं चतुर्भिर्मन्त्रैः देवस्यत्वेत्यादिभिः मृत्खननार्थं हस्ते गृह्णीयादित्यर्थः ।

विध्यङ्गीकारे तत एव द्विराद्यत्तयादेः प्राप्तत्वात् न विधिसम्भवः। न च समुच्चय विध्यभावेऽपि त्रयाणामग्नीनामदृष्टार्थत्वेन समुच्चयात् तन्निमित्तकानामभ्यासनामपि समुच्चयापत्तिः, प्रक्षेपस्य प्रेक्ष्यद्रव्याधारं विनापि पूर्वाधारवियोगमात्रेणोपपत्तेः आहवनीयसंयोगस्याऽदृष्टार्थत्वेऽपि सप्तमीश्रुत्या आधारताजननरूपदृष्टद्वारैवाऽदृष्टार्थत्वावसायात् दृष्टावान्तरकार्यार्थत्वेन विकल्पोपपत्तेः। अत एव पदादिनाऽऽहवनीयादेर्बाधोऽपि सङ्गच्छते। नचैवं अग्नीनां दृष्टार्थत्वे प्रतिनिध्यापत्तिः, प्रतिनिधावदृष्टरूपाग्निसादृश्यसत्वे प्रमाणाभावेन तदनापत्तेः। अत एव क्वाचित्को (१)ब्राह्मणपाण्यादिविधिरभावे विधिरेव। अतः प्रकारान्तरेणाऽपि न समुच्चय सिद्धिः। तस्मादुक्तप्रकार एव श्रेयान्।

नचैवं 'गार्हपत्ये जुहोत्यन्वाहार्यपचने जुहोती' ति वचनान्तरेणैव 'सप्तं स्या' दिति न्यायसहकृतेनाऽभ्यासचतुष्टये तत्तदधिकरणप्राप्तेः 'चतस्रो गार्हपत्य' इति वचनद्वयवैयर्थ्यमिति वाच्यम्, 'चतस्रो गार्हपत्य' इत्यादेरुपसंहारार्थत्वेन वचनचतुष्टयसार्थक्योपपत्तेः। अथ वा-अस्तु 'द्वे आहवनीय' इत्यस्य शाब्दपर्युदासरूपपरिसङ्ख्याविधेरिदं वाक्यद्वयम्, शेषो विधेयस्तुत्यर्थः। सर्वथा 'द्वे आहवनीये' इत्यस्याऽऽपराग्निकहोमानां फलादिसम्बन्धसिध्यर्थत्वमिति सिद्धम्। तस्मादेकैकस्मिन्नपि काले दशधाभ्यासात् तद्देवतामन्त्रादीनां सर्वेषामेव समावेशोपपत्तेः न विकल्पः। एवं च 'द्वे आहवनीये, द्वे गार्हपत्ये, द्वे अन्वाहार्यपचने जुहोति, षट् सम्पद्यन्त' इति शाखान्तरवचनात् षडाहुतिपक्षे 'सप्त च शतानि विंशतिश्च संवत्सरे सायमाहुतयः। सप्त चो एव शतानि विंशतिश्च संवत्सरे प्रातराहुतय' इति लिङ्गानु-

१. यद्यन्यं न विन्देत्। ब्राह्मणस्य दक्षिणे हस्ते होतव्यम्। एष वा अग्निर्वैश्वानरो यद्ब्राह्मणः। इत्यादि॥

मितविधिबलेन वा द्व्याहुतिपक्षे च तावद्देवतामन्त्रादीनां न विकल्पः।

नचैवं वाचनिकाभ्यासविधिवशादेव प्रजापतेरग्न्यादिसमुच्चयसिद्धौ पुनः 'यदग्नये च' त्यत्र तद्विधानानुपपत्तिः, लिङ्गानुमितविधिना इतराहुतीनां पाक्षिकत्वप्रमापणेऽपि अस्यां शाखायां द्व्याहुतिसमुच्चयस्य 'यदग्नये चे' ति वाक्याधीनत्वात्। दध्यादिद्रव्याणाञ्चैकस्मिन् कर्मणि विकल्पोऽगत्या इष्ट एव। तस्मान्नाऽऽघाराग्निहोत्रवाक्यं समुदायानुवाद इति सिद्धम्।

प्रयोजनम्—अग्निहोत्रवाक्ये पूर्वपक्षे दध्यादिदशद्रव्याणि सान्नाय्यवत् सम्प्रतिपन्नदेवताकत्वेन सहोपादाय सकृद्यागः, सिद्धान्ते तु विकल्पेनेति न्यायसुधोक्तमेव द्रष्टव्यम्।

यत्त्वत्र केचित्—पूर्वपक्षे दध्यादिहोमेषु देवताप्राप्तिमुपपादयितुमशक्नुवन्तः तत्रत्यजुहोतेः प्रक्षेपमात्रलक्षकत्वेन पूर्वपक्षमुपपाद्य, न्यायसुधाकृतं बहुभाषित्वेन दूषयन्ति। तत् प्रसङ्गादनुषङ्गतो वा देवताप्राप्तेः पूर्वपक्षे उपपादितत्वात् जुहोतेः प्रक्षेपमात्रलक्षणायां प्रमाणाभावेनोपेक्षणीयम्।

यदि तु दध्यादिवाक्ये गुणमात्रविधित्वाङ्गीकारेऽपि 'यदग्नये चे' ति वाक्यद्वये विहितकर्मणामेव समुदायानुवादोऽग्निहोत्रवाक्यमिति पूर्वपक्षीक्रियेत, तदाऽन्यदपि प्रयोजनम्—मासाग्निहोत्रे सायम्प्रातः कर्मणां मध्य एकस्य सौर्ये द्वयोराग्नेययोर्मध्ये एकस्यैव कस्यचिद्विकल्पेन धर्मातिदेशात् मासाग्निहोत्रे सायंप्रातर्वा विकल्पेन मासपर्यन्तं कार्यम्। न चाऽऽत्यन्तसंयोगवाचिद्वितीयान्तमासपदोपदिष्टसातत्यानुरोधेनोऽतिदेशिककाल बाधात् सर्वदैव कर्तव्यत्वापत्तिः, आहारविहाराद्यावश्यककार्यानुरोधेन सातत्यबाधावश्यम्भावे जातेष्टिन्यायेनाऽऽतिदेशिककाला

नुरोधेनाऽपि तत्सम्पादनस्य सङ्कर्षे वक्ष्यमाणत्वात् ।

नचैवमपि 'उपसद्भिश्चरित्वे' ति क्त्वाप्रत्ययेनोपसदनन्त रकर्तव्यतारूपक्रमविधानादातिदेशिककालबाधावश्यम्भावः, उप सद्दिनोत्तरदिनेष्वबाधेऽपि वा तद्दिनेषु तद्बाध आवश्यक एवेति वाच्यम् ; व्यवहिताव्यवहितसाधारण्येन पूर्वकालतामात्रवाचि क्त्वाप्रत्ययस्याऽसति प्रमाणन्तरेऽव्यवहितत्वरूपक्रमपरत्वेऽपि सायम्प्रातः कालप्रापकचोदकसत्त्वे पूर्वकालतामात्रपरत्वाङ्गीका कारात् । अतो युक्तं मासाग्निहोत्रे सायम्प्रातर्वा विकल्पेनानुष्ठान पूर्वपक्षे, सिद्धान्ते तु समुच्चयेनेति ।

आघारवाक्ये तु पूर्वपक्षे ऊर्ध्वत्वादीनां मध्ये यस्यैव दैवा दन्तरायस्तद्युक्तस्यैव कर्मण आवृत्तिः, सिद्धान्ते तु गुणलोपनि मित्तं प्रायश्चित्तमात्रम्, न तु प्रधानावृत्तिरिति द्रष्टव्यम् । नच पूर्वपक्षेऽपि क्षरणरूपपदार्थस्य निष्पन्नत्वाद्गुणलोपनावृत्तिरिति वाच्यम्, क्षरणमात्रनिष्पत्तावपि ऊर्ध्वत्वैकाभिव्यङ्ग्यजात्यव च्छिन्नस्याऽनिष्पत्तेः । सूत्रं निगदव्याख्यातम् ॥

इति पञ्चममाघाराग्निहोत्राधिकरणम् ॥ ५ ॥

अथ षष्ठं पशुसोमाधिकरणम् ॥ ६ ॥

द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन ॥२-२-१७॥ (पू.)

(विषयसंशयौ)

"यो दीक्षितो यदग्नीषोमीयं पशुमालभते" इति प्रकृत्य

१. तै. सं. ६. १. ११.

"हृदयस्याऽग्रेऽवद्यति, अथ जिह्वाया, अथ वक्षस" इत्यादि श्रुतम्; तथा "सोमेन यजते"ति प्रकृत्य, "ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, आश्विनं गृह्णाती"ति। तत्र सन्देहः—किमवदानवाक्येषु ग्रहणवाक्येषु च विहितानां कर्मणां यथायथं पशुवाक्ये सोमवाक्ये च समुदायासिद्ध्यर्थमनुवादः; उत तयोरेव तत्तद्गुणविशिष्टयागविधिः, इतरेषु तु तदीयद्रव्योद्देशेनाऽवदानग्रहणादिरूपसंस्कारविधिरिति।

(सङ्गतिः)

पादाध्यायसङ्गती पूर्ववत्। अनन्तरा तु—दध्यादिवाक्यैरग्निहोत्रवाक्यविहितकर्मानुवादेन गुणमात्रस्य विधातुं शक्यत्वात् प्रकृतकर्माभावेनाऽग्निहोत्रवाक्ये समुदायानुवादत्वं नाङ्गीकृतम्, प्रकृते तु पशुसोमवाक्यविहितयागीयद्रव्योद्देशन हृदयादिविषयकावदानादिरूपसंस्कारविध्ययोगादवश्यमवदानादिवाक्येषु कर्मविध्यवगतेः प्रकृतकर्मसद्भावेन समुदायानुवादत्वोपपत्तिरिति पूर्वपक्षोत्थानात् प्रत्युदाहरणरूपा।

(पूर्वपक्षः)

तत्र पशुवाक्ये तावद्यद्यपि आग्नेयादिवाक्यवदेव द्रव्यदेवताविशिष्टयागविधिर्नानुपपन्नः, तथापि तत्र यागविधावुत्पत्तिशिष्टस्य पशोरवदानेन नाशापत्तेः श्रुतयागसाधनताविघातान्नावदानवाक्ये तद्वाक्यविहितयागीयद्रव्यसंस्कारविधिरुपपद्यते; न चोत्पत्तिशिष्टस्याऽपि पुरोडाशस्य मध्यपूर्वार्धावदानरूपसंस्कारवत् तदुपपत्तिः, मध्यपूर्वार्धावदानेऽपि पुरोडाशत्वजातेः प्रत्यभिज्ञायमानत्वेनाऽनपायात् मध्यपूर्वार्धादेरपादानमात्रतया श्रवणेनाऽवदानं प्रति प्रकरणात्

द्विर्हविषोऽवद्यती"ति कर्मणिषष्ठीश्रवणाच्च पुरोडाशस्य संस्कार्यत्वोपपत्तावपि "हृदयस्याऽग्रेऽवद्यती"त्यादौ "तानि द्विर्द्विरवद्यती"त्यादौ च कर्मत्वेन निर्दिष्टानां हृदयादीनामेवावदानसंस्कार्यत्वश्रवणेनावदानस्योत्पत्तिवाक्यशिष्टपशुसंस्कारकत्वायोगाच्च; ।

नच हृदयादिपदैर्लक्षणया पशोरेव संस्कार्यत्वावगतिः, तथाङ्गीकारेऽपि वाक्यान्तरवैयर्थ्यापत्तेः; । न चाऽस्तु हृदयादीनुद्दिश्यैवाऽवदानसंस्काराविधिः, तेषां भूतभाव्युपयोगाभावेन संस्कारानर्हत्वात्; न च संस्कारविधिबलादेव तत्कल्पनम्, सक्तुष्वपि तदापत्तेः; उत्पत्तिशिष्टपशुसाधनताविरोधेन तत्साध्ये यागे हृदयादीनामुपयोगासंभवाच्च ।

अत एव नानुनिष्पन्नस्याऽपि लोहितनिरसनादिवदियं प्रतिपत्तिः, पशोरेव साधनत्वेन हृदयादीनामनुनिष्पन्नत्वाभावात् । किंच हृदयादीनामुपयोगकल्पने तेष्वतिदेशेनैवाऽवदानप्राप्तिसम्भवात् तद्विधानानर्थक्यम्; तस्मादेवं वाच्यम्—हृदयाद्युद्देशेनैवाऽवदानाख्यसंस्काराविधिः; पूतीकोद्देशेनेवाऽभिषवविधिः । तत्र च यद्यपि पूतीकेषु सोमाभिषवस्यैव प्रत्यभिज्ञायमानस्य पूतीकसम्बन्धित्वेन विधानात् तस्य च यागीयद्रव्यसंस्कारकत्वदर्शनात् पूतीकानां यागीयत्वानुमानवत् सान्नाय्यावदानस्यैव यागीयद्रव्यसंस्कारकत्वेन क्लृप्तस्याऽपि अप्रत्यभिज्ञायमानत्वेन हृदयाद्युद्देशेन विधानायोगात् न तेषां यागीयत्वानुमानं सुकरम्. तथाऽपि प्रकरणान्तरन्यायेन स्वतन्त्रमेवावदानं हृदयाद्युद्देशेन विधीयते ।

न चाऽतिदेशेन तस्य प्रत्यभिज्ञानम्, तस्य यागविध्यधीनत्वेन तदानीमसत्त्वात् । अतः स्वतन्त्रस्यैवाऽवदानस्य प्राणिप्रभवद्रव्यकावदानत्वसामान्यात् सान्नाय्यावदानप्रकृतिक-

त्वावगतेरातिदेशेन यागीयद्रव्यवृत्तित्वस्याऽपि प्राप्तेः वदानमवदेयद्रव्याणां यागसाधनता कल्प्यमाना प्रत्यवदानं यागभेदमाक्षिपति । अतश्च पूतीकवदेव विवक्षितगत्या हृदयादिद्रव्यकयागविधिसिद्ध्यर्थमेवाऽवदानविधिः, न तु प्राकृतकार्यावदानप्राप्त्यर्थः, तस्य यागविध्युत्तरकालमतिदेशेनाऽपि प्राप्तिसम्भवात् ।तांश्च सर्वान् यागानालभतिना लक्षणयाऽनूद्याऽग्नीषोमौ, देवताविधीयते। न चैवं पशुप्रकृतिकत्वस्यापि विधाने वाक्यभेदः, देवतातद्धितस्य पशुपदसामानाधिकरण्यानुपपत्तिश्चेति वाच्यम् , "छागस्य हविष" इति मन्त्रवर्णात् हृदयादीनां छागप्रकृतिकत्वप्राप्तौ पशुपदेन लक्षणया हृदयादीनामेवानुवादात्; एवं च पशुवाक्ये विशिष्टविध्यनङ्गीकाराल्लाघवमपि ।

वस्तुतस्तु यागीयद्रव्यवृत्तित्वस्य प्रकृतौ सान्नाय्यावदानाङ्गत्वाभावेन इहाऽनतिदेशादुक्तरीत्या यागानुमानासम्भवेऽपि हृदयादिवाक्य एव सक्तुन्यायेन विनियोगभङ्गं प्रकल्प्य हृदयादिविशिष्टावदानविधाने कृते आलभतिना लक्षणया तान्यनूद्य पूर्ववद्देवताविधौ कृते देवतात्वनिर्वाहार्थमाघारयतिवदुत्पत्तिवाक्यस्थोऽवद्यतिर्यागपरोऽवधार्यते; तत्र त्वयं विशेषो-यदाघारयतावजहत्स्वार्थलक्षणया यागोपस्थितिः; अवद्यतौ तु निर्वपतिवत् जहत्स्वार्थलक्षणेति; न त्वेतावता यागविधाने कश्चिद्विशेषः ।

अथ वा हृदयादिवाक्येष्वपि हृदयाद्युद्देशेनाऽवदानान्येव विधीयन्ते। तेषाञ्चोपयोगापेक्षायां पशुवाक्ये पशुपदेन लक्षणया तान्यनूद्य देवता विधीयते, आलभतिश्चाऽस्मिन् पक्षे अवदानाक्षिप्तस्पर्शानुवादमात्रम् । हृदयादिसम्बन्धश्च देवताया यागं विनाऽनुपपन्न इति यावद्धृदयादि यागाः कल्प्यन्ते; नच प्राजापत्याधिकरणपूर्वपक्षन्यायादेकपदोपादानात् सहितानां हृद-

यादीनां एकदेवतासम्बन्धोपपत्तेः कथमनेकयागकल्पनमिति वाच्यम्', तद्वदिह साहित्यस्याऽनुवाद्यगतत्वेन विवक्षासम्भवात्। अतः सिद्धं पशुवाक्यस्थालभतिः पशुपदं च समुदायानुवाद इति। एवं च "हृदयस्याऽग्रेऽवद्यती"त्यादिक्रमदर्शनं "एकादश वै पशोरवदानानी"त्यादिसमुच्चयदर्शनं चोपपन्नं भवति; अन्यथा एकस्मिन् यागे हृदयादीनां विकल्पापत्तेः क्रमसमुच्चयदर्शनं नोपपद्येत ॥

तथा 'सोमेन यजेते' त्यत्रापि न सोमविशिष्टयागविधिः, तथात्वे उत्पत्तिशिष्टस्य सोमाख्यस्य लताद्रव्यस्याऽभिषवादसंस्कारैः विनाशप्रसङ्गेन तद्वाक्येषु सक्तुन्यायेन विनियोगभङ्गापत्तेः। एवं "ऐन्द्रवायवं गृह्णाती"त्यादावपि तद्धितस्य प्रकृतधारासमर्थद्रवद्रव्यवाचित्वेन लतोद्देशेन ग्रहणाख्यसंस्कारविध्ययोगाद्द्रवद्रव्यस्य च भूतभाव्युपयोगाभावेन विनियोगभङ्गापत्तिः।

एतेन सोमवाक्ये सोमविशिष्टयागविधिरेव, अभिषवादिवाक्यानि त्वर्थकर्माणि, ग्रहणवाक्येषु गृह्णातिना यागं लक्षणयाऽनूद्य देवतामात्रविधिरित्यपास्तम्, तद्धितस्य द्रवद्रव्यवाचित्वेन सोमपरत्वासम्भवात्; "दशैतानध्वर्युः प्रातस्सवने ग्रहान् गृह्णाति, आश्विनो दशमो गृह्यते, तं तृतीयं जुहोती"ति क्रमसमुच्चयदर्शनस्य देवतानामेकस्मिन्यागे विकल्पप्रसङ्गेनास्मिन्नपि पक्षेऽनुपपत्तेश्च।

किञ्च भवन्मते "ऐन्द्रवायवं गृह्णाती"त्यादौ किं विधीयते? न तावत् ग्रहणम्, तस्यार्थप्राप्तत्वात्; न हि पूतभृदाधवनीयद्रोणकलशेषु विद्यमानः सोमरसो ग्रहचमससाधनकेन होमेनाऽगृहीत्वा संस्कर्तुं शक्यते, अतो न तावत् ग्रहणम्; तस्य च गृह्यमाणसंस्कारार्थत्वमर्थसिद्धत्वादेव न विधेयम्।

नाऽपि तदनुवादेन देवता इन्द्रवाय्वादिः, तस्याः देवतात्वेन ग्रहणे अन्वयस्य बाधितत्वात्; देवतात्वं हि यागक्रियानिरूपितमेव, न तु क्रियान्तरनिरूपितम्; न च ग्रहणे देवतात्वेनाऽन्वयानुपपत्तावपि सम्बन्धसामान्ये ऐन्द्रवायवादितद्धितमङ्गीकृत्य तत्कालीनादृष्टार्थोच्चारणविषयत्वसम्बन्धेनेन्द्रवाय्वादेर्ग्रहणे अन्वयोपपत्तिरिति वाच्यम्; एवमपि मरुत्वतीयादौ(१)"द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छे"ति सूत्रेण देवताधिकारपतितेन देवतात्वमात्राभिधानावगतेः 'मरुत्वतीयं गृह्णाती'त्यादौ देवतात्वसम्बन्धेन ग्रहणे अन्वयस्याशक्यत्वात् । नच देवताया यागातिरेकेण निर्वापक्रियायामन्वयवत् ग्रहणेऽप्यन्वयोऽस्त्विति वाच्यम्, देवतात्वस्य त्यागैकनिरूपितत्वेन निर्वापेऽपि जुष्टपदोपात्तयागद्वारैवाऽन्वयस्य नवमे वक्ष्यमाणत्वात् । प्रकृते तु यागस्य स्ववाक्येऽनुपादानान्न तद्द्वारा ग्रहणेऽन्वय इति वैषम्यम् । अत एव देवताविशिष्टग्रहणाविधिरिति सिद्धान्त्यभिमतः पक्षोऽपि निरस्तः ।

किञ्च सोमवाक्ये ग्रहणवाक्ये च विशिष्टविध्यङ्गीकारापेक्षया वरमेकत्रैव ग्रहणवाक्ये विशिष्टविध्यङ्गीकरणम्, अतश्च द्रव्यदेवताविशिष्टा यागा एव गृह्णातिलक्षिता गुणाद्भिन्ना विधीयन्ते, तद्धितोक्तद्रव्यविशेषतात्पर्यग्राहकश्च 'अण्व्या धारया गृह्णाति' इत्यादिवाक्योन्नीतो(२)द्रवद्रव्याधिकारः । अत्र ह्यर्थप्राप्तग्रहणानुवादेन धारामात्रविधानेऽपि धाराया द्रवद्रव्यैकविषयत्वात् तदधिकारासिद्धिः । धाराशब्दस्य च ससम्बन्धिकत्वात् गृह्णातेश्च सकर्मकत्वात् प्रतिसम्बन्ध्यपेक्षायां प्रकृतः पावनादिसंस्कृतः पूतभृदाधवनीयपात्रस्थः सोमरस एव तत्त्वेन सम्बध्यते; न च संस्कारविध्यन्यथानुपपत्त्या

१. पा. सू. ४. २. ३२. २. वाक्योपपत्ति इति ग. ब. पुस्तकयोः ।

विनियोगकल्पनायोगात् पावनादिविधीनामर्थकर्मत्वं शङ्क्यम्, 'अध्वर्युं वृणीत' इतिवत् संस्कारविध्यन्यथानुपपत्त्यापि तत्कल्पने बाधकाभावात्। अत एवोत्पत्तिशिष्टसोमावरोधात् सक्तुषु न तत्कल्पनमित्युक्तं सम्मार्गाधिकरणे। अतः सोमप्रकृतिकत्वस्याऽपि प्रमाणान्तरेण सिद्धे स्सोमवाक्ये ऐन्द्रवायवादियागा एव यजिनाऽनूद्यन्ते, न तु सोमविशिष्टकर्मान्तरविधानम्, रूपालाभात्; तत्तद्याज्यापुरोरुचोश्च लिङ्गप्रकरणक्रमैरैन्द्रवायवादियागेष्वेव निवेशोपपत्तौ प्रकरणमात्रेणाऽश्रुतवैकल्पिकदेवताकल्पनानुपपत्तेश्च; अतोऽनुवाद एवायम्। सोमपदं च तत्प्रख्यन्यायात्तेषां नामधेयम्। सत्यपि च ज्योतिष्टोमनामकत्वे न्यायाविशेषादस्यापि नामत्वं नानुपपन्नम्। न चाऽनुवादे प्रयोजनाभावः, नामत्वसिद्धेरेव प्रयोजनत्वात्। प्रयोजनान्तरमपि अस्तुतशस्त्राणां सोमयागानां फलादिसम्बन्धसिद्धिः। अन्यथा हि ज्योतिष्टोमपदेन त्रिवृदादीनि ज्योतींषि स्तोमा एषामिति व्युत्पत्त्या सस्तुतशस्त्राणामेवोपादानात् फलादिसम्बन्धापत्तिः, नान्येषाम्; अस्मिन् समुदायानुवादे तु सति नामधेयानुरोधेन सोमद्रव्यकयागमात्रानुवादात् तद्वैयर्थ्यपरिहारार्थं ज्योतिष्टोमपदेनाऽपि गौण्या वृत्त्या सर्वेषामेव फलसम्बन्धोपपत्तिः।

नचैवं तर्हि सिद्धान्ते स्तोमसम्बन्धरहितसोमयागाभ्यासानां फलसम्बन्धानापत्तिः, स्तोमयुक्तयागाभ्यासानामेव फलसम्बन्धे तद्वाक्यस्थयजेरभ्यासलक्षणाप्रसङ्गेन सोमयागत्वावच्छिन्नस्यैव फलसम्बन्धात्। ज्योतिष्टोमपदं तु सोमयागमात्रस्य स्वसम्बन्ध्यभ्याससमुदायाश्रयवृत्तित्वसम्बन्धेन त्रिवृदादिस्तोमसम्बन्धसत्त्वान्नानुपपन्नम्। तत्सिद्धं सनामधेयस्यापि समुदायानुवादस्य सप्रयोजनत्वम्।

अथ वा सोमवाक्ये यजिना द्रवद्रव्यकयागाननूद्य सोमस्तदीयद्रव्यप्रकृतित्वेन विधीयते, साक्षाद्विधिसत्त्वे संस्कारविध्यन्यथानुपपत्त्या तत्कल्पनस्याऽन्याय्यत्वात्; सत्यपि प्रमाणान्तरेण सम्भवत्प्राप्तिकत्वे व्रीह्यादिवदभ्युदयशिरस्कत्वकल्पनयापि सोमपदेनैव तद्विधानस्याऽभ्युपगन्तुं न्याय्यत्वाच्च ।

यस्त्वत्र प्रदेयत्वेनैव लताविधिरिति पक्षो मूलोपन्यस्तः, स चोत्पत्तिशिष्टद्रव्यावरोधादतिशयार्थ इत्युपेक्षितः। एवं चात्राऽपि यागानामदृष्टार्थत्वेन समुच्चयात् विभिन्नदेवताकानां च क्रमापेक्षणात् "आश्विनो दशमो गृह्यते तं तृतीयं जुहोति । दशैतानध्वर्युः प्रातस्सवने ग्रहान् गृह्णाती"त्यादिक्रमसमुच्चयदर्शन मुपपन्नं भवति ।

ननु यागक्रमसमुच्चयोपपत्तावपि भवन्मते गृह्णातिना यागानामेव लक्षणया विधानात् ग्रहणविध्यप्रतीतेः ग्रहणक्रमसमुच्चयदर्शनानुपपत्तिस्तदवस्थैवेति चेत् ? गृह्णातिना ग्रहणविशिष्टयागलक्षणाङ्गीकाराददोष इति केचित् । तन्न; लक्ष्यतावच्छेदके गौरवापत्तेः । अत एवं परिहर्तव्यम्—दशमुष्टिपरिमितस्सोमरसः क्रयाभिषवपावनपूतभृदादिपात्राधारत्वादिसंस्कारसंस्कृतः तत्तद्यागाङ्गत्वेन विनियुज्यते, तस्य च 'अल्पं जुहोती'ति वाक्येन चतुरवत्तोद्देशेन होमविधिवदल्पमुद्दिश्य होमाख्यसंस्कारविधानाद्धोमानुवादेन च 'ग्रहैर्जुहोती'त्यादिवाक्यैर्जुह्वादिवत् ग्रहचमसादिरूपपात्रविधानात् पूतभृदादिपात्रस्थस्य च ग्रहणमन्तरेण ग्रहादिपात्रकरणकहोमसंस्कार्यत्वानुपपत्तेः यावद्यागं ग्रहणभेदोपपत्तिः ।

नच सर्वयागाङ्गभूतस्य दशमुष्टिपरिमितस्य सोमस्य साधारणत्वात् सकृदेव होमोपपत्तेः न ग्रहणभेदापत्तिः,

पूर्वपक्षे दशमुष्टिपरिमितस्याऽपि सोमरसस्य तत्तद्यागाङ्गत्व
वगतेः प्रतिप्रधानं पुरोडाशादिवदेव द्रव्यभेदात् होमभेदो
पपत्तेः । अतो ग्रहणानामपि भेदात् तदंशेऽपि क्रमसमुच्च
यदर्शनोपपत्तिः। तत्र तु यागस्यैकत्वात् गुणभूतग्रहणानुरोधेन
वृत्त्यनुपपत्तेः अनेकेषामपि च ग्रहणानां दृष्टविधया यागीयद्र
व्यसंस्कारार्थत्वेनैकार्थ्यात् बन्धनार्थखादिरत्वपालाशत्वादिवद्वि
कल्पापत्तेः उभयोरपि क्रमसमुच्चदर्शनानुपपत्तिः । न च ग्रहण
नां दृष्टार्थत्वेऽपि तदङ्गभूतदेवतासंयोगानामदृष्टार्थत्वादुभयोरपि
समुच्चयोपपत्तिः, अङ्गिभूतानां ग्रहणानां विकल्पे प्रमिते वि
जातीयग्रहणप्रयोगे विजातीयदेवतासंयोगानामार्थत्वे तस्यैवा
दृष्टार्थस्याप्यनुष्ठानोपपत्तेः। तस्मात् समुदायानुवादौ ।

सूत्रं तु—हृदयादिवाक्यं ग्रह्णातिवाक्यं च कर्मचोदना प्र
त्येतव्या, अन्यत्राऽसम्भवन्निवेशस्य हृदयरसादिद्रव्यस्य संयोग
तथा हि–पशुसोमवाक्ययोरुत्पत्तिचोदनात्वे सति प्रकरणसापेक्षो
वद्यतिगृह्णातिवाक्येषु, द्रव्यसंयोगो हृदयरसादिद्रव्यसंस्का
रो विधीयमानो न यागाङ्गत्वं प्रपद्यते, उत्पत्तिशिष्टपशुसोमावरो
धेन हृदयरसादीनां साधनत्वानुपपत्तेः, न हि तस्योत्पत्तिशिष्टस
द्रव्यस्याऽवदानग्रहणादि संस्कारकं सम्भवति, नाशकत्वादिति
व्याख्येयम् ।

भाष्यकारेण तु इदं सूत्रं सिद्धान्तपरत्वेनैव व्याख्यातम्
पशुसोमरूपापूर्वद्रव्यसंयोगात् पशुसोमवाक्ययोरेव कर्मचोदन
यतो द्रव्ये संयोगः पशुशब्दः सोमशब्दश्च प्रकृते हृदयादावन
र्थकः, लक्षणाप्रसङ्गात् , न हि हृदयादिवाक्यविहितयाग प
प्रदेयप्रकृतित्वेन पशुसोमविधिः सम्भवति, पशुवाक्ये प्राप्तकर्म
नुवादेन देवताविधिः प्रदेयप्रकृतिविधिश्चेति वाक्यभेदात्। सो

मे तूत्तरसूत्रे वक्ष्यते इति ॥

(अथ सिद्धान्तः)

अचोदकाश्च संस्काराः ॥२–२–१८॥ (सि.)

चशब्दस्त्वर्थस्सन् पूर्वपक्षनिराकरणार्थः । बुद्धिस्थयुक्तिसमुच्चयार्थो वा। तथा हि–पशौ तावत् पशुपदे हृदयादिलक्षणैव दोषः । न हि हृदयादिरूपे मांसे पशुशब्दप्रयोगोऽस्ति, पशुत्वाभिव्यक्तिर्वा; न च तर्हि पशुपदं हृदयादिप्रकृतिद्रव्यविधायकमस्तु, तथात्वे देवताया अपि विधाने वाक्यभेदापत्तेः । अतोऽवश्यं पशुवाक्ये तावद्द्रव्यदेवतासम्बन्धानुमितो यागस्तद्विशिष्टो विधेयः । किञ्चाऽवद्यतिवाक्येषु यागोपस्थापको न तावद्यजतिशब्दः, नाऽपि देवताश्रवणम् , अवदानमात्रस्य तु वत्सालम्भवन्न यागानुमापकत्वम् ।

न च हृदयाद्यवदानस्य सान्नाय्यावदानप्रकृतिकत्वादतिदेशेन यागीयद्रव्यवृत्तित्वलाभात् पूतीकवत् यागसाधनत्वानुमानोपपत्तिः, यागीयद्रव्यवृत्तित्वस्य प्रकृतावनङ्गत्वेन इहाप्राप्तेः । तद्धि संस्कारस्य फलम् । न च तस्याऽतिदेशोऽस्ति । न चौत्तरकालिकदेवतासम्बन्धबलादेवाऽवद्यतेः यागपरत्वावधारणं शक्यम्, पशुपदे हृदयादिलक्षणाया एवमप्यनिवारणात् । हृदयाद्युद्देशनाऽवदानमात्रविधिसम्भवे हृदयादिविशिष्टयागविधेरवद्यतौ यागलक्षणयाश्चाऽनेकादृष्टानुबन्धिन्या अयोगाच्च । भवन्मते अनेकेषामपि यागानां सम्प्रतिपन्नदेवताकत्वेन सह प्रदानापत्तेः 'हृदयस्याऽग्रेऽवद्यती'त्यत्र यागक्रमवैशिष्ट्यस्याऽप्यवश्यविधेयत्वात् गौरवापत्तेश्च । मम त्ववदानमात्रस्य विधेयत्वात् तस्य पाठादेव क्रमसिद्धेः न विधानम् ।

योऽपि च पशुवाक्य एव यावद्धृदयादिद्रव्यं यागानुमानपक्ष उक्तः, सोऽपि पशुपदे लक्षणापत्तेरनेकादृष्टानुबन्ध्यनेकयागकल्पनस्य च सत्यां गतावन्याय्यत्वादुपेक्षितः। तस्मात् पशुवाक्यमेव यागविधायकम्, हृदयादिवाक्यानि तु संस्कारमात्रविधायकानीत्येव युक्तम्।

न चोत्पत्तिशिष्टपशुसाधनताया विशसनावदानादिसंस्कारविधिविरोधः शङ्क्यः, पशुमिति द्वितीयया लक्षितस्य करणत्वस्य हृदयादिपरम्परयाऽप्युपपत्तेः। दृष्टं हि परम्परासम्बन्धेऽपि करणत्वं 'गोमयेन पचति' 'व्रीहिभिर्यजेते'त्यादौ। अत एव तादृशस्थले न लक्षणापि, साक्षात्परम्परासाधारण्येन करणत्वस्यैव तृतीयार्थत्वात्। असति तु परम्पराग्राहकप्रमाणे साक्षादेव तदित्याश्रीयते। अस्ति तु प्रकृते विशसनादिसंस्कारविधानमेव परम्पराग्राहकं प्रमाणम्। अतश्च पशोः परम्परया यागसाधनत्वमिव देवतासम्बन्धित्वमपि नैवाऽनुपपन्नम्। अतश्च पसुसंस्कारकविशसनविधिरूपतात्पर्यग्राहकसहकृतपशुशब्देनैवार्थाद्धृदयादीनां साधनत्वावगतेः तदुद्देशेनाऽवदानाख्यसंस्काराविधिरप्युपपन्न एव। अत एव व्रीह्युद्देशेनाऽवघातविधिरूपतात्पर्यग्राहकसहकृतेन व्रीहिपदेनैवाऽर्थात्तण्डुलादीनामपि साधनतावगतेः तदुद्देशेन पेषणादिविधिरप्युपपन्न एव।

नचैवं पश्ववयवानामपि प्रदेयत्वरूपयागसाधनत्वलक्षणहविष्ट्वावगतेः तत्संस्कारार्थस्य मध्यपूर्वार्धापादानकस्याऽवदानस्याऽतिदेशेनैव प्राप्तेः तद्विधिवैयर्थ्यम्, अतिदेशप्राप्तस्याऽप्यवदानस्य हृदयादिसंस्कारार्थत्वेन पुनर्विध्युपपत्तेः। तत्प्रयोजनं च तेषां प्रत्येकं हविष्ट्वसिद्धिः। एतद्विध्यभावे हि पशोर्विशसनविधानादवयवद्वारा साधनत्वावगतावप्यवयवानां न प्रत्येकं साधनत्वावगमः, अवय-

विनो व्यासज्य सर्वावयवनिष्ठत्वेन तत्साधनत्वान्यथानुऽपपत्त्यावय-वानामपि समुदितानामेव साधनत्वावगतेः। अतः समुदितस्यैवाऽवयवजातस्य हविष्ट्वावगमात् समुदितसंस्कारार्थत्वेन सकृदेवमध्य-पूर्वार्धापादानक्रमवदानं प्राप्नुयात्, एतद्विधिसत्त्वे तु प्राकृतावदान-स्य हविस्संस्कारार्थत्वेन क्लृप्तस्यैवाऽतिदेशसन्निधापितस्य प्रत्येकं हृदयादिसंस्कारार्थत्वेन विधानात् पूतीकानां यागसाधनत्वमिव हृदयादीनामपि प्रत्येकं हविष्ट्वावगमात् प्रत्येकं मध्यपूर्वार्धावदा-नसिद्धिः। ततश्च हृदयाद्येकादशावदानद्रव्यमात्रवृत्तिहविष्ट्वता-त्पर्यग्राहकसहकृतः पशुशब्दोऽपि तन्मात्रप्रकृतितयैव पशुं विधत्त इति तदितरेषामवयवानामवदानपरिसंख्याफलिका यागसाधन-त्वरूपहविष्ट्वपरिसंख्याऽपि 'हृदयस्याग्रेऽवद्यती'त्यादिवाक्यजातस्य फलमिति सिद्ध्यति। अत एव यद्यप्येतद्विध्यभावे अवयविसाध-नत्वान्यथानुपपत्त्या अवयवानामपि प्रत्येकमेव साधनत्वमवगम्येत ततश्च प्रत्येकमेवावदानं प्राप्नुयात्, तथापि तदितरावयवगतहवि-ष्ट्वपरिसंख्या एतद्वाक्यजातफलमित्युपपन्नमेव।

यत्त्वत्र न्यायसुधायां 'एकादश वै पशोरवदानानि तानि द्विर्द्विरवद्यती'त्यस्याऽवयवान्तरपरिसंख्याफलकत्वमित्युक्तम्, तत् पश्वावदानसम्पादकहविरवदानत्रित्वबाधेन तद्द्वित्वविधायकस्य तानीत्यस्य विशेषसमर्पकत्वेन 'एकादश वै' इत्यस्य तदेकवा-क्यत्वोपपत्तौ परिसंख्याफलकत्वाङ्गीकारेण भिन्नवाक्यत्वे प्रमा-णाभावात्, तस्यैव परिसंख्याफलकत्वाङ्गीकारे च 'हृदयस्याग्रे-वद्यती'त्यादेः वैयर्थ्यापत्तेरुपेक्षितम्।

न चैवं 'एकादश वै' इत्येतदपेक्षितद्रव्यविशेषसमर्पकत्वेनैव 'हृदयस्याग्रेऽवद्यती'त्यादिवाक्यजातस्योपपत्तौ अवयवान्तरपरि-संख्याफलकत्वे प्रमाणाभावः, तथा सति हृदयादिश्रवणमात्रेण

विशेषसमर्पणसिद्धौ अवद्यतिश्रवणस्य वैयर्थ्यापत्तेः । तस्मात् प्राकृतावदानस्यैव हृदयादिसंस्कारार्थत्वेन विहि तस्येतरावयवपरिसंख्याफलकत्वमेव युक्तमित्युत्पश्यामः । एवं च 'यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्ये'त्यनेन प्राकृतावदानानुवादेन पञ्चत्वविधानादुद्देश्यस्य चाऽवदानस्य वपया विशेषणसम्भवात् हृदयाद्यवदानेऽपि पञ्चत्वसिद्धिरजामदग्न्यानामप्याहतैव। पञ्चत्वप्रकारः परं वपाया उपस्तरणाभिघारणद्वयं हिरण्यशकलद्वयं वपेत्येवं वाचनिकः । अत एव प्राकृतस्य पञ्चत्वप्रकारस्य बाधः । तत्र च प्रकरणलभ्यावदानानुवादेन पञ्चत्वप्रकारविशेषस्य वपोद्देशेनैव विधानात् वपाग्रहणाविवक्षायां कारणाभावेन तस्य प्रकारस्याऽङ्गेष्वप्राप्तेः बाधकाभावेन प्राकृतप्रकारप्राप्तौ जातायां हविरवदानत्रित्वे प्राप्ते 'तानि द्विर्द्वि'रित्यनेन प्रकरणलभ्यावदानमनूद्यैव हृदयाद्युद्देशेन द्वित्वविधानात् पञ्चत्वसम्पत्तिरभिघारणवृद्ध्या सम्पादनीया ।

वस्तुतस्तु पञ्चावत्तवाक्येऽवदानानुवादेन पञ्चत्वविधाने एकप्रसरताभङ्गापत्तेरवदानान्तरमेव प्राकृतावदानकार्यापन्नं विधीयते, तस्यैव च वपोद्देशेनैव विधानादङ्गेष्वप्राप्तावपि 'हृदयस्याग्रेऽवद्यती'त्यादिवाक्यैः हृदयादिसंस्कारार्थत्वेन विधिः, न प्राकृतस्य ; तस्य हृदयादिवाक्याभावे पञ्चावत्तवाक्यविहितावदानान्तरेण बाधितस्याऽतिदेशेनाऽप्राप्तेः । न चोत्पत्तिशिष्टसंस्कार्यावरोधात् संस्कार्यान्तरसम्बन्धानुपपत्तेः कर्मान्तरत्वापत्तिः, पञ्चावत्तवाक्ये उत्पन्नवपोद्देशेन विनियुक्तस्य चाऽवदानस्य हृदयाद्युद्देशेन विनियोगमात्रकरणात् विनियोगविधिभेदेऽप्युत्पत्तिभेदाभावेन तन्निबन्धनकर्मान्तरत्वाप्रसक्तेः । अत एव स्ववाक्योपात्तफलावरुद्धस्याऽप्युद्भिदादेर्विविदिषावाक्येन ज्ञानाद्युद्देशेन विधि-

रभ्युपगम्यत एव । अतश्च वपायामिव हृदयादिष्वप्यवदानपृष्ठभावेन पञ्चत्वप्राप्तेः पूर्ववदेवोभयत्राऽपि तत्सम्पादनप्रकारो द्रष्टव्यः। पार्थसारथेस्तु पञ्चावत्तवाक्ये अवदानान्तरस्वीकारेऽपि वपाग्रहणस्योपलक्षणार्थत्वं वदतोऽभिप्रायं न विद्मः । या च "तानि द्विर्द्वि"रित्यस्य वैयर्थ्यापत्तेः वपादिपदं हृदयादीनामुपलक्षकमित्युपपत्तिरुक्ता, सा जामदग्न्यनिमित्तपञ्चावत्तसम्पादकहविस्त्रित्वबाधेनाऽपि द्वित्वविध्युपपत्तेरुपेक्षणीयेत्यस्मदुक्तप्रकार एव श्रेयान् । विस्तरेण चैतद्दशमे वक्ष्यामः । तस्मादवदानविधिवैयर्थ्याभावात् पशुवाक्य एव यागविधिरिति सिद्धम् । हृदयादीनां चाऽवयविसाधनत्वान्यथानुपपत्त्या समुच्चितानामेव साधनत्वावगतेः क्रमसमुच्चयदर्शनस्याऽपि नाऽनुपपत्तिः ।

प्रयोजनम्—पूर्वपक्षे सवनीयादेः हृदयादियागानां मध्येऽन्यतमस्य विध्यन्तान्नैकादशावदानगणप्राप्तिः, सिद्धान्ते तु सेति द्रष्टव्यम् ।

सोमेऽपि च ऐन्द्रवायवादिवाक्येषु देवताविशिष्टश्रुतग्रहणविधिसम्भवे नाऽश्रुतयागकल्पनमुपपत्तिमत् । तथा हि—यद्यपि तावद्देवतात्वं यागक्रियानिरूपितमेव, तथाऽपि तद्धितोपात्तस्य इन्द्रवायुनिष्ठदेवतात्वस्य ग्रहणकालीनोच्चारणकर्मीभूतवृत्तित्वसम्बन्धेन ग्रहणेऽपि वैशिष्ट्यं न विरुध्यते । अतश्चोक्तसम्बन्धेन देवतात्वविशिष्टे ग्रहणे गृह्यमाणसंस्कारार्थं विहिते देवतात्वस्य यागैकघटितत्वाद्यागापेक्षायां प्रकृतसोमवाक्योपात्तयागसम्बन्धोपपत्तिः । यथैव हि 'दध्नेन्द्रियकामस्ये'त्यादौ तृतीयोपात्तकरणत्वविशिष्टं दधि दधिविशिष्टं वा करणत्वं करणतासंसर्गेण इन्द्रियोद्देशेन विधीयते इति पक्षयोः तृतीयोपात्तकरणत्वस्य निरूपकरूपाश्रयापेक्षायां प्रकृतहोमान्वयः तथात्रापीति द्रष्टव्यम् ।

यत्त्वत्र कैश्चित् ग्रहणान्वयार्थमैन्द्रवायवादिवाक्येष्वपि यजिकल्पनाङ्गीकारेऽपि न तत्र यागविधिः; अपि तु सोमवाक्य एव, ग्रहणवाक्ये तु कल्पितयजिपदमनुवादमात्रमित्युक्तम्; तद्यजिकल्पनं विनाऽप्युक्तप्रकारेण ग्रहणान्वयोपपत्तौ तत्कल्पने प्रमाणाभावात् तदन्वयस्य दुरुपपादत्वाच्चोपेक्षणीयम्।

यदपि च भवदेवेन ग्रहणस्य यागावयवत्वात् देवतायाः तदन्वयोपपत्तेः अवयवान्तरापेक्षयैव च प्रकृतयागसम्बन्धोपपत्तेः न किंचित् बाधकमित्युक्तम्; तदप्यगृहीतस्यापि यागोपपत्तेर्वार्तिक एवोक्तत्वात् ग्रहणस्य यागावयवत्वकल्पनानुपपत्तेः; कल्पनेऽपि वा ग्रहणरूपावयवान्वयस्य पुनरपि दुरुपपादत्वोच्चापेक्षितम्।

तस्मादुक्तप्रकारेणैव देवताविशिष्टग्रहणविधिः। अत एव देवताया वाक्येन ग्रहणाङ्गत्वावसायादुभयाकाङ्क्षालक्षणप्रकरणेन यागं प्रति दधिवदेव जनकत्वमात्रावगमेऽप्यङ्गत्वानवगमात् यागस्याऽव्यक्तत्वसिद्धिः। न च ग्रहणे देवतात्वान्वयोपपत्तावपि तत्संस्कार्यस्य तद्धितोपात्तस्य द्रव्यस्य सन्निधानात् द्रवरूपत्वावसायात्तस्य च सोमवाक्यविहिते यागे उत्पत्तिशिष्टसोमावरोधेनाऽपि विनियोगायोगात् संस्कार्यत्वानुपपत्तिः, उत्पत्तिवाक्ये सोमस्य साक्षात्परम्परासाधारण्येन करणत्वमात्रेऽवगते सोमसंस्कारकाभिषवविधिरूपतात्पर्यग्राहकबलेन परम्परया करणत्वाङ्गीकारात् हृदयादिवद्द्रवस्याऽप्यर्थात् साधनत्वावगतेः तदुद्देशेन ग्रहणाख्यसंस्कारविध्युपपत्तेः। अतएव पशुवत् सोमस्यापि रसप्रकृतित्वेन विधिरिष्टः।

ननु न सोमवाक्ये सोमविधिर्विशिष्टविधिगौरवापादको युक्तः; स हि न तावत् प्रदेयत्वेनेष्टः, संस्कारविधिवैयर्थ्यापत्तेः;

नाऽपि प्रकृतित्वेन, तस्य संस्कारविध्यन्यथानुपपत्त्यापि प्राप्तिसिद्धेः । तथाहि—ग्रहणवाक्ये तावत्तद्धितोपात्तस्य द्रव्यस्य ग्रहणसंस्कृतस्य विनियोगापेक्षायां देवतासम्बन्धान्यथानुपपत्त्यवगततत्तद्यागाभ्यासेषु प्रदेयत्वेन विनियोगकल्पनं नाऽनुपपन्नम्, सर्वनामार्थकस्य च तद्धितस्य द्रव्यविशेषतात्पर्यग्राहकापेक्षायां सन्निधानाद्धारावाक्यप्रमितद्रवद्रव्यविशेषसिद्धिः । तत्र हि तत्तद्वाक्यप्राप्तग्रहणविशेषानुवादेन धारामात्रस्य विधानम्, न त्वणुत्वस्याऽपि, वाक्यभेदापत्तेः; अल्पपरिमाणेषु पात्रेषु स्थूलया ग्रहणे कृते पात्रात् बहिरपि पातापत्तेरणुत्वस्य प्राप्तत्वाच्च; धारायाश्च प्रतिसम्बन्ध्यपेक्षत्वात् गृह्णातेश्च कर्माकाङ्क्षत्वादुत्तरार्थादिवत् स्वतन्त्रजलादिप्रतिसम्बन्ध्याक्षेपकत्वानुपपत्तेः प्रकृत 'सोमं पावयती' त्यादिवाक्यप्रतीतसोमप्रकृतिकद्रवद्रव्यविषयत्वम्; पावनवाक्ये हि सोमशब्दो न लतापरः, तस्यां पावनसंस्कार्यत्वानुपपत्तेः । अपि तु लक्षणया तद्रसपरः । अतश्च सोमप्रकृतित्वस्यापि तत्तत्संस्कारविधिबलादेवावगतिसिद्धेः न सोमवाक्ये तद्विधानाङ्गीकरणं युक्तम् । अत एव क्रयाभिषवादिवाक्यस्थोऽपि सोमशब्दः तत्तद्यागाभ्यासापूर्वसाधनरसप्रकृतिभूतसोमपर एव ।

नच संस्कारविध्यन्यथानुपपत्त्या विनियोगकल्पने सक्तुष्वपि तदापत्तेः सोमतद्रसयोः विनियोगाभावे क्रयादिवाक्यानामर्थकर्मविधायित्वमेव स्यादिति वाच्यम्, 'अध्वर्युं वृणीते' 'स्वाध्यायोऽध्येतव्य' इत्यादौ संस्कारविध्यन्यथानुपपत्त्याऽपि विनियोगस्य सहस्रशः स्वीकृतत्वात्; सक्तुषु तूत्पत्तिशिष्टद्रव्यविरोधान्न तत्कल्पनमित्युक्तमेव । नचैवमपि प्रत्यक्षविधिसत्त्वे संस्कारविध्यन्यथानुपपत्त्या तत्कल्पनानुपपत्तिः, यथा कथंचि-

द्पि सम्भवत्प्राप्तिकत्वे प्रत्यक्षस्यापि विधेरनङ्गीकारात्। अत एव मान्त्रवर्णिकीमपि प्राप्तिमङ्गीकृत्य समिदादीनां नामधेयत्वमिष्टम्।

नचैवं संस्कारविध्यन्यथानुपपत्त्या व्रीहीणामपि प्राप्तिसम्भवात् तद्विध्यनापत्तिः, तद्वाक्ये विधेयान्तराभावेन अगत्याभ्युदयशिरस्कत्वसिध्यर्थं तद्विध्यङ्गीकारात्; प्रत्यक्षविध्यनुरोधेन संस्कारवाक्यस्थव्रीहिपदस्य यवलक्षकत्वापत्तेः तेषामप्राप्तत्वाच्च; सत्यामपि संस्काराविध्यन्यथानुपपत्तौ प्रकृतितासम्बन्धेन पुरोडाशाङ्गतया व्रीहिप्राप्तौ यागाङ्गत्वेन तद्विध्युपपत्तेश्च। तत्प्रयोजनं च पुरोडाशाङ्गत्वे तदङ्गभूतानेकपरिमाणशेषकार्यादिलोपप्रसङ्गेनैकव्रीहिमात्रबाधस्य युक्तत्वात् अल्पसत्त्वे न तदुपादानम्, अपि तु नीवारोपादानमेव। यागाङ्गत्वे त्वङ्गगुणविरोधन्यायेन पुरोडाशाङ्गभूतानामनेकेषामपि शेषकार्यादीनां लोपस्य युक्तत्वादल्पव्रीहिसत्त्वे यागाङ्गभूतव्रीह्युपादानमेवेति षष्ठोक्तम्। नचेदृक् सोमविधेः प्रयोजनमस्ति, अतोऽनुवादः तत्प्रख्यन्यायेन वा नामधेयं सोमपदमिति चेन्न; इहापि तत्तदभ्याससाधनीभूतरसाङ्गत्वेन प्राप्तिसम्भवेऽपि यागाङ्गत्वस्याप्राप्तत्वेन विधिसम्भवात्। तत्प्रयोजनं च—तत्तद्रसाङ्गत्वे प्रतिप्रधानावृत्तिन्यायेन तत्तदभ्यासापूर्वसाधनीभूतरसप्रकृतित्वेन विहितस्य दशमुष्टिपरिमितस्य सोमस्य चतुर्मुष्टिपरिमितव्रीहिभेदवत् भेदः प्राप्नुयात्।

न च क्रयस्य स्वतन्त्रकालाम्नानात्तदाप्तस्य सोमस्य पशुत्रयार्थदीक्षाच्छिन्नयूपस्येव सर्वाभ्यासार्थं तन्त्रत्वापत्तिः, क्रयाप्राप्तस्य दशमुष्टिपरिमितस्य सोमस्याऽभिषुतस्य पूतस्याऽऽधवनीयादिस्थस्य 'आधवनीयात् गृह्णाती'त्युपादानत्वेन श्रवणा-

देकाभ्यासापूर्वसाधनीभूतरसव्यक्त्युपादनस्याऽऽधवनीयस्थस्यप- योद्रव्यकमन्थ्यादिवदभ्यासान्तरापूर्वसाधनीभूतरसव्यक्त्यन्तरा- पादानत्वानुपपत्तेरनेकरसव्यक्तिभेदेन तदुपादानभूताधवनीयस्थ- सोमरसभेदावगमात् तद्भेदेन च तत्प्रकृतिभूतसोमभेदोपपत्तेः। यागाङ्गत्वे तु यागत्वपर्याप्त्यधिकरणताकोद्देशेनैव सोमविधाना- त्तादृशस्यैव च दशमुष्टिपरिमाणक्रयादिसंस्कारविधानात् सत्यपि तत्तदभ्यासापूर्वसाधनीभूतरसव्यक्तिभेदे तत्प्रकृतिभूतस्य सोमस्य तत्प्रकृतित्वसिद्धिः। अत एव 'आधवनीयात् गृह्णाती'त्यपादान- त्वश्रुतिरप्यवयवावयविसाधारण्येनोपपादनीया। अतस्तन्त्रतया ग्रहेयप्रकृतिभूतस्य सोमस्याऽप्राप्तत्वाद्विध्युपपत्तिः। प्रयोजना- न्तरं च सोमवत् सक्तूनामपि विकल्पेन विनियोगकल्पनाप्रसक्तौ तद्व्यावृत्तिः।

न च विशिष्टविधिगौरवभिया भेदं विकल्पं चाऽङ्गीकृत्याऽपि नामधेयत्वं शङ्क्यम्, ज्योतिष्टोमनामावरुद्धस्य कर्मणो नामधेया- न्तरवैयर्थ्यापत्तेः प्रयोजनलिप्सया 'सृष्टीरुपदधाती'त्यत्रेव गौर- वस्याऽप्यङ्गीकारात्। अतो युक्तं सोमवाक्ये सोमस्य विधेय- त्वेऽपि यागस्याऽपि श्रुतस्य विधेयत्वाङ्गीकारात्तस्यैव च सर्वदेव- तासम्बन्धोपपादकत्वोपपत्तेः न ग्रहणवाक्येऽतिरिक्तयागान्तर- कल्पना युक्तेति।

नन्वेवं "सप्तदश प्राजापत्यान् पशूनालभते" 'आग्नेयमष्टा- कपालं निर्वपेत्' 'सौम्यं चरुमि'त्यादावपि वाजपेयवाक्यवैश्व- देववाक्यविहितयागस्यैवोपपादकस्य सत्त्वात् प्राजापत्यादिवा- क्येषु देवताविशिष्टालम्भनिर्वापमात्रविधानोपपत्तेः न यागान्तर- कल्पनापत्तिरिति चेत्? न, वाजपेये तावदेवं सति बलीयसा द्रव्यसादृश्येन पशुविध्यन्तापत्तेः ब्रह्मसामादिरूपसोमधर्मप्रा

प्त्यभावात् 'तान् ब्रह्मसाम्न्यालभत' इति कालविध्यनुपपत्तेः। वैश्वदेवेऽपि द्रव्यसादृश्येनैष्टिकविध्यन्तप्राप्तौ निर्वापस्याऽपि प्राप्तिसम्भवात् तदनुवादेनाऽत्र देवताविधिर्वाच्यः। तत्र च निर्वापमात्रोद्देशे अग्न्यादिदेवतानामनियताष्टाकपालादिद्रव्यसम्बन्धिनिर्वापसम्बन्धापत्तेः, 'आग्नेयमष्टाकपालमि'ति सामानाधिकरण्यावगतपरस्परानियमानुपपत्तिः। अष्टाकपालविशिष्टनिर्वापोद्देशे तु वाक्यभेदः। निर्वापाख्यकर्मान्तरविधिस्तु भेदकप्रमाणाभावादेवाऽसिद्धः। न ह्यत्र प्रकरणान्तरमस्ति, अतिदेशेनोपस्थितत्वात्। अतिदेशावधृते निर्वापे सर्वासां देवतानामुत्पन्नशिष्टत्वाच्च न गुणोऽपि। अतस्तत्र कल्पितयागविधिरेवाऽगत्या समाश्रितः। प्रकृते तु वक्ष्यमाणरीत्या ग्रहणानामेव विधेयत्वादविधेयत्वेऽपि वा तदुद्देशेन देवतानामेव विधेयत्वोपपत्तेः न यागकल्पने प्रमाणमस्तीति वैषम्यम्।

सूत्रं तु-ग्रहणावदानवाक्यानि न यागस्य, चोदकानि कल्पकानि, संस्कारविधायित्वेनाऽप्युपपत्तेरिति व्याख्येयम्॥

(इति पशुवाक्ये सिद्धान्तः)

तद्भेदात् कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्यात् भेदो द्रव्यगुणीभावात्॥ २-२-१९॥

(अथ सोमवाक्ये सिद्धान्तः)

नन्वेवं सोमवाक्यविहितस्य यागस्यैकत्वात् क्रमसमुच्चयदर्शनोपपत्तिः कथम्? तथा हि-यागैकत्वे तावत् प्रदेयभूतं तद्द्रव्यमप्येकमेव, अतश्च सर्वोऽपि सोमरसः सकृदेव पुरोडाशवत् त्यक्तव्यः, 'अल्पं जुहोती'ति वचनाच्च तदेकदेशः सकृदेव व्यव-

दानवद्बोतव्यः, एकदेशान्तरस्य तु भक्षणादिप्रतिपत्तिरिति प्राप्नोति। अस्तु वा 'ऐन्द्रवायवमि'त्यादौ यथाकथञ्चित् प्रदेयद्रव्यभेदप्रतीतिः, तथाऽपि तेषामेकस्मिन् यागे विकल्प एव प्राप्नोति, गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात्; तद्वाक्यप्रमितनिरपेक्षसंस्कार्यत्वान्यथानुपपत्त्या नैरपेक्ष्येणैव साधनत्वप्रतीतेश्च। उत्पत्तिवाक्यादिप्रमितसमस्तसोमसाधनता तु प्रदेयद्रव्यापादानतयाऽप्युपपन्नेति न विरोधः; एवं सत्यपि यदि ग्रहणानां केनचित्प्रमाणेन समुच्चयोऽवधार्येत तदा गृहीतस्य पुनर्ग्रहणासम्भवादविनियुक्तसंस्कारायोगेन च भवेत् ग्राह्यद्रव्यभेदेन यागावृत्तिः; न तु तदस्ति, द्रव्याणां विकल्पे तत्संस्काराणां ग्रहणानामदृष्टार्थानामपि विकल्पस्यैवाऽऽपत्तेः।

वस्तुतस्तु आधवनीयादिस्थस्य सोमरसस्य ग्रहादिपात्रकरणकहोमसंस्कार्यतासम्पत्त्यर्थत्वात् ग्रहणस्य नैवाऽदृष्टार्थत्वम्। अत एवाऽर्थप्राप्तत्वान्नैन्द्रवायवादिवाक्येष्वपि तस्य विधेयता। अत एव न तद्भेदोऽपि; सत्यपि द्रव्याणां समुच्चये ग्रहणावृत्त्यैव सर्वेषां संस्कार्यत्वोपपत्तेः तद्भेदे प्रमाणाभावात्, देवतानामुत्पन्नशिष्टतया भेदकत्वायोगाच्च। ऐन्द्रवायवादिवाक्यैरपि च ग्रहणविध्यङ्गीकारेण तत्रोत्पन्नस्यैव वाक्योपात्तसंस्कार्यसम्बन्धेन विनियुक्तस्याऽपि वाक्यान्तरे संस्कार्यान्तरसम्बन्धेन विनियोगमात्रकरणादुत्पत्तिभेदाभावेनोद्भिद्यागस्येव विविदिषावाक्ये ज्ञानाद्यर्थत्ववत् भेदानुपपत्तेः।

न चैवमेकस्यैव ग्रहणस्याऽनेकसंस्कार्यसम्बन्धोपपत्तावपि उत्पत्तिशिष्टैकदेवतावरोधे देवतान्तरनिवेशानुपपत्तेः गुणाद्भेदोपपत्तिरिति वाच्यम्; ग्रहणे देवतासंयोगानामदृष्टार्थत्वेनैककार्यत्वे प्रमाणाभावेन गुणन्यायाविषयत्वात्। आमिक्षायागस्य हि वाजिन-

कार्ये आमिक्षयैव जनिते तद्विषये निराकांक्षस्य वाजिनाग्राहकत्वाद्युक्ता वाजिनस्य भेदकता; ग्रहणे तु मित्रावरुणदेवताकार्यस्यैन्द्रवायुदेवतयाऽजननान्नैराकांक्ष्यानुपपत्तेः न गुणान्वयविषयत्वमिति विशेषः ।

अस्तु वा ग्रहणानां भेदः, तथाऽपि ग्राह्यद्रव्याणां विकल्पेन यागसाधनत्वात् ग्रहणानामपि विकल्पापत्तेः तदङ्गभूतदेवतानामपि चाऽदृष्टार्थानामपि कार्यविकल्पबलेन व्यवस्थोपपत्तेः समुच्चये प्रमाणाभावेन नाऽदृष्टार्थदेवतासमुच्चयानुरोधेन ग्रहणसमुच्चयो यागावृत्तिर्वा युक्ता समाश्रयितुम् ।

वस्तुतस्तु ग्रहणे देवतोद्देशानामपि नाऽदृष्टविधयाऽङ्गता; निर्वाप इव वक्ष्यमाणदेवतास्मरणार्थत्वेनाऽभ्यासान्तरसाधनीभूतद्रव्यव्यावृत्तिफलकैतदभ्याससाधनीभूतद्रव्योपलक्षणार्थत्वेन वा दृष्टद्वारैव ग्रहणेऽपि देवतोद्देशोपपत्तेः ।

न च तत्राऽऽग्नेयादिवाक्ये यागाङ्गत्वेन प्रमिताया देवताया युक्तो निर्वापे दृष्टविधया सम्बन्धः, प्रकृते तु ग्रहणसम्बन्धोत्तरकालभावित्वाद्यागसम्बन्धस्य कथं ग्रहणसम्बन्धवेलायां दृष्टार्थत्वकल्पनेति वाच्यम्; उत्पत्तिवाक्ये इष्टसामान्यस्य भाव्यत्वावगमवत् ग्रहणवाक्ये दृष्टादृष्टसाधारण्येन भाव्यत्वावगमे जाते यागसम्बन्धोत्तरकालं दृष्टार्थत्वनिर्णयोपपत्तेः । अतश्च निर्वापवत् ग्रहणेऽपि देवतासंयोगो दृष्टार्थ एव । तत्र त्वयं विशेषः—यद्देवताया याग एवाङ्गत्वं न तु निर्वापे, उपकारकतामात्रेणैव तत्सम्बन्धोपपत्तेः; प्रकृते तु विपरीतमिति । न त्वेतावताऽदृष्टार्थत्वापत्तिः ।

वस्तुतस्तु तत्तद्देवत्ययाज्यापुरोरुगादिमन्त्राम्नानाद्यागेऽपि मान्त्रवर्णिकदेवताकल्पनस्य प्रथमत एव प्रतीतेः ग्रहणसंयोगोऽपि

देवतानामुपकारकत्वेनैव ; अत एव यागस्य देवताङ्गकत्वादव्यक्तत्वमपि दुर्वचम् । अतो ग्रहणवाक्ये देवताविशिष्टग्रहणविधिरप्युपकारकतासम्बन्धेन प्रत्येतव्यः ।

वस्तुतस्तु ग्रहणवाक्ये ग्रहणस्य स्वरूपेण ग्राह्यसंस्कारार्थत्वेन चाऽर्थादेव प्राप्तत्वात्, तस्मिंश्च देवतानां "उपयामगृहीतोऽसीन्द्रवायुभ्यां त्वा जुष्टं गृह्णामी" त्यादिमन्त्रलिङ्गादेव निर्वाप इव प्राप्तिसम्भवात्, विधेयाभावेन तव मते तद्वाक्यवैयर्थ्यमपि । अतो द्रव्याणां तत्संस्कारग्रहणानां तदङ्गदेवतासंयोगानां च विकल्पापत्तेः क्रमसमुच्चयदर्शनानुपपत्तिरिति चेत् ?

अत्र केचित् पार्थसारथिमतानुयायिनो लिङ्गदर्शनोपपत्तिमात्रमेवमाहुः—(१)"ग्रहैर्जुहोती" त्युपादेयगतपात्रसाहित्यस्य विवक्षितत्वात् तदनुरोधेन दृष्टार्थानामपि ग्रहणानां समुच्चयावगतेः यथागृहीतानामेव च होमात् तदभ्यासप्रतीतेः क्रमसमुच्चयदर्शनोपपत्तिरिति । तन्न, ग्रहाणां चमसानां च निरपेक्षसाधनत्वश्रवणेन समुच्चयाप्रतीतेः, तद्वृत्तिग्रहणानां तत्साध्यहोमाभ्यासानां च समुच्चयस्यैवमपि दुरुपपादत्वात् । एकस्यैव ऋतुपात्रादेरनेकदेवत्यग्रहणसाधनत्वश्रवणेन तादृशग्रहणानां विकल्पस्यैवमप्यनिवार्यत्वाच्च । अत एवं परिहर्तव्यम्—अन्यतस्सम्भवत्प्राप्तिकत्वे सत्यप्यैन्द्रवायवादिवाक्येषु देवताविशिष्टग्रहणविधिरेव विधेः पूर्वं प्रवृत्त्यङ्गीकारेणाऽऽश्रीयते । तथा हि—ऐन्द्रवायवमित्यत्र तद्धितार्थद्रव्यभेदस्तावत् प्रकृत्यर्थदेवताभेदाच्छब्दान्तरन्यायेन गुणन्यायेन वा सुप्रसिद्ध एव । अतश्च तत्तद्वाक्ये तत्तद्द्रव्योद्देशेन तत्तद्देवताविशिष्टतत्तद्ग्रहणविधिः । तत्प्रयोजनं च देवतांशे तावत् प्रत्ययार्थभेदासिद्धिः ग्रहणाङ्गत्वासिद्धिद्वारा यागस्याऽव्यक्त-

१. अनेनग्रहशब्दस्य रसाधारभूतपात्रवाचित्वमितिफलति ।

त्वसिद्धिश्च। एतद्द्वयभावे हि याज्यापुरोरुगादिमन्त्राम्नानाद्याgाङ्ग भूतानामेव देवतानां निर्वाप इव ग्रहणे तन्मन्त्रवर्णात् उपकारकतामात्रं स्यात्। सति त्वस्मिन् प्रत्यक्षविधौ ग्रहणाङ्गत्वप्रतीतेः यागे उपकारकतामात्रावसायात् याज्यादिमन्त्राणामपि तदकल्पकतया यागस्याऽव्यक्तत्वसिद्धिः। तत्प्रयोजनमपि चोद्भिदादीनां तद्विकृतित्वसिद्धिः। ग्रहणांशे तु द्रव्यसंस्कारतया अर्थतः प्राप्तस्याऽपि स्वतन्त्राददृष्टार्थत्वसिद्धिः। एतद्वाक्ये हि ग्रहणपुनर्विधिः प्रयोजनाकांक्षस्सन् प्रयोजनान्तरासम्भवात् ग्रहणस्य प्रयाजादिवदारादुपकारकतां प्रकरणात् कल्पयति।

अत एव सत्यपि वाक्यीये द्रव्यसंस्कारार्थत्वे ग्रहणानां प्रकरणग्राह्यत्वमाकरेऽभिहितम्। अत एव विधिपुनःश्रुतिबलाद्वाक्यीयस्याऽपि द्रव्यसंस्कारार्थत्वस्याऽऽनुषङ्गिकता प्राकरणिकस्यापि चादृष्टार्थत्वस्य प्रयोजकताङ्गीक्रियते। अन्यथा अदृष्टार्थत्वमात्रस्याऽप्रवृत्तिविशेषकरत्वेन विधिवैयर्थ्यतादवस्थ्यात्। अतश्च प्रयोजकीभूतादृष्टानुरोधेन ग्रहणानां तत्तद्देवतानां प्रयाजानुयाजवत् समुच्चयावगतेस्तदनुरोधेन च ग्राह्यद्रव्याणामपि समुच्चयप्रतीतेः विभिन्नदेवताकद्रव्यभेदबलेन यागावृत्तिसिद्धिः।

यद्यपि प्रयोजनान्तरमपि किञ्चित् ग्रहणविधेः सम्भाव्येत, तथापि क्रमसमुच्चयदर्शनरूपतात्पर्यग्राहकबलादुक्तप्रयोजनस्याप्यावश्यकत्वान्न कश्चिद्विरोधः।

नन्विदं प्रयोजनं ग्रहणविधिसत्त्वे खल्वावश्यकम्, तत्रैव तु प्रमाणाभावः, ऐन्द्रवायवादिवाक्येऽर्थप्राप्तग्रहणानुवादेनाऽव्यक्तत्वफलकदेवतामात्रविध्युपपत्तिरिति चेत्? "उपांशुं गृह्णाति, अन्तर्यामं गृह्णाती" त्यादौ संज्ञायुक्तवाक्ये तावद्विधेयान्तराभावेन ग्रहणस्यैव विधेयत्वादुक्तप्रयोजनोपपत्तेः ऐन्द्रवायवादि-

वाक्येऽपि प्राप्तग्रहणानुवादेन देवताविधिः तत्तत्संस्कार्यसम्बन्धश्चेति वाक्यभेदापत्तेः ग्रहणविध्यावश्यकत्वात् । ग्रहणमात्रानुवादेन देवताविधाने वेदिबर्हिर्न्यायेन प्राकरणिकयत्किञ्चिद्द्रव्यग्रहणेऽपि तदापत्तेश्च ।

यत्त्वस्मिन् पक्षे ऐन्द्रवायवपदे एकप्रसरताभङ्गापत्तेः ग्रहणानुवादेन देवताविधिरेवयुक्त इति कैश्चिदुक्तम्; तदेतादृशस्थले उद्देश्यद्रव्यस्य विधेयदेवतानिरूपितत्वाभावेन एकप्रसरताभङ्गस्यादोषत्वात्(१) सृष्टीरुपदधाती' त्यादौ च मन्त्रविशिष्टोपधानस्येष्टकासंस्कारार्थत्वेन विधेः स्वयमेव स्वीकृतत्वादुपेक्षितम् ।

नचैवं तर्हि विशिष्टविधिगौरवापत्तेः ग्रहणमात्रमेव विधीयताम्, ऐन्द्रवायवादिपदंतु ग्रहणमन्त्रवर्णप्राप्तानुवाद एवाऽस्त्विति वाच्यम्, ऐन्द्रवायवादिपदवैयर्थ्यभयेन विशिष्टविधेरप्यङ्गीकारात् । तत्प्रयोजनंत्वव्यक्ततासिद्धिरित्युक्तमेव । अत एव संज्ञायुक्तग्रहणेष्वपि देवताङ्गकत्वबोधको विधिरन्वेष्टव्यः । अत एव गुणादेव ग्रहणभेदः, प्राप्तग्रहणानुवादेन देवतासंस्कार्योभयसम्बन्धकरणे वाक्यभेदापत्तेः, तदापादकस्यैव गुणस्य भेदकत्वादुत्पत्तिशिष्टदेवतावरोधनिमित्तकस्याऽपि गुणस्य सत्त्वाच्च । देवतानां दृष्टविधयैव ग्रहणाङ्गत्वाङ्गीकाराच्च एकयैव देवतया ग्रहणस्य नैराकांक्ष्यमपि सुवचम् ।

वस्तुतस्तु गुणन्यायेनैव नैराकांक्ष्यप्रवेशः, अपि तु गुणस्याऽनिविशमानत्वमात्रम्, अस्ति चात्र देवतानामदृष्टविषया ग्रहणाङ्गताङ्गीकारेऽपि तत् । तथाहि-एकस्मिन् ग्रहणे अनेकासां देवतानामदृष्टार्थानां न तावत् विकल्पो युक्तः, प्रयाजादिवदेवैकार्थत्वे प्रमाणाभावात्; समुच्चयस्तु एकस्मिन् ग्रहणे किं सर्वेषां

१. तै. सं. ५. ३. ।

देवताप्रातिपदिकानामन्ते चतुर्थी समुच्चारणीयेत्येवंविधः, किंवा-प्रत्येकं चतुर्थ्यन्तपदान्युच्चार्याऽन्ते ग्रहणमित्येवंविधः ? नाऽऽद्यः; प्रत्येकं तद्धितश्रवणानुपपत्तेः'। अन्त्येऽपि किं सकृद्यागकरणं ग्रहणवत्, उत यागावृत्तिः ? नाऽऽद्यः, मित्रावरुणादीनामुपपादकीभूतयागसम्बन्धाभावेन देवतात्वानुपपत्तेः । नान्त्यः, प्रकृत्यर्थदेवताभेदेन प्रत्ययार्थभूतद्रव्यभेदावगमादनेकेषां द्रव्याणां सकृदनुष्ठीयमानग्रहणसंस्कार्यत्वायोगात् । न चैवमप्यावृत्त्यापि सर्वसंस्कारोपपत्तेः न ग्रहणभेदावश्यम्भावः, संख्यावत् गुणस्याऽपि स्वसम्बन्धिभेदकत्वसम्भवे तत्सम्बन्ध्यभ्यासभेदापादकत्वायोगात्; अन्यथा वाजिनस्यापि तदापत्तेः । अतो निविशमानेनापि गुणेन ग्रहणभेदावगमाद्युक्तस्तेषामुक्तविधया समुच्चयः ।

न चास्तु ग्रहणानां समुच्चयः, तावद्ग्रहणसंस्कृतद्रव्यैस्तु युगपदेव यागसिद्धेः न तदावृत्तौ प्रमाणमस्तीति वाच्यम्, समुच्चितानेकदेवताकत्वात्सकृदनुष्ठानानुपपत्तेः । न हि सर्वा उद्दिश्य सकृत्त्यागः सम्भवति, देवतोद्देशसमकालीनत्यागस्यैव यागपदार्थतया वृद्धव्यवहारसिद्धत्वेन सर्वेषां देवतोद्देशानां त्यागसमानकालीनत्वानुपपत्तेः ।

अत एव यत्र मन्त्रवर्णेनाऽनेकानि देवतात्वाधिष्ठानान्युच्यन्ते, तत्र देवतात्वस्य लाघवादेकस्यैव कल्पनेनाऽधिष्ठानोद्देशसमकालीनत्वासम्भवेऽपि देवतात्वोद्देशसमकालता नाऽनुपपन्ना । अत एव तादृशस्थले क्वचित् केषाञ्चित् प्रत्येकचतुर्थ्यन्तपदोच्चारणं निर्मूलमेव । अत एव सूक्तवाकादौ तत्तत्यागे अग्न्यादीनां प्रत्येकं देवतात्वेऽपि उपयुक्तदेवतापदवृत्तिदेवतात्वस्यैकस्यैव प्रस्तरादियागे कल्पनात् त्यागसमकालता उपपन्ना । यत्र तु "अग्नये कृत्तिकाभ्यः पुरोडाश" मित्यादौ द्वयोरप्यधिष्ठानदेव-

तात्वयोर्भेदः, तत्रैकवाक्योपादानावगतसाहित्यबलात् समका-लताबाधेऽपि न क्षतिः। प्रकृते तु प्रयोगविध्यवगतसाहित्यस्यो-त्तरकालिकत्वेन दुर्बलत्वान्न समकालत्वबाधकतेति वैषम्यम्। प्रकृते च याज्यापुरोरुचोर्भेदात् सुतरां सकृदनुष्ठानानुपपत्तिः, पृथग्गृहीतानां द्रव्याणां विना वचनं मेलनासम्भवाच्च।

अत एव च यत्रैकस्मिन्नेव पात्रे वायवे इन्द्रवायुभ्यां च ग्रहणं तत्र वचनान्मेलनेऽपि न दोषः। मेलनासम्भवेनैव चाऽग्निष्टुति "आग्नेया ग्रहा भवन्ती"ति वचनादग्निमात्रदेवत्यप्राकृतसर्वग्रहण-वति सम्प्रतिपन्नदेवताकत्वेऽप्यावृत्तिसिद्धिः। तस्माद्यागावृत्तेरपि न्यायसिद्धत्वाद्युक्तं क्रमसमुच्चयदर्शनम्। अथवाऽस्तु तद्विधायकम्, तेनैव चाऽग्निष्टुत्यावृत्तिसिद्धिरिति ध्येयम्।

प्रयोजनं पूर्वपक्षे उत्पत्तौ यागार्थतया देवताश्रवणात् नो-द्भिदादौ तद्विध्यन्तः, अपि तूपांशुयाजीयः; सिद्धान्ते त्वव्य-क्तत्वात् सौमिकविध्यन्तः, सर्वाभ्यासविध्यन्तसमुच्चयाच्च यथाप्र-कृत्यनुष्ठानमिति द्रष्टव्यम्।

सूत्रं तु—तद्भेदात् देवतोद्देशभेदात्, कर्मणः ग्रहण-स्य, अभ्यासः भेद इति यावत्। नन्वर्थप्राप्ते ग्रहणे सर्वेषां देवतासंयोगानां विधानोपपत्तेः कथं तावन्मात्रेण भेदसिद्धिः, अत आह—द्रव्यपृथक्त्वात् प्रकृत्यर्थदेवताभेदादेव संस्कार्यद्रव्यपृ-थक्त्वावगमात्, अतश्च प्राप्तग्रहणानुवादेनोभयविधाने वाक्यभे-दापत्तेः युक्तो ग्रहणभेद इत्याशयः। नचैवमपि तेषां दृष्टार्थतया कथं समुच्चयः? विधिबलेन दृष्टार्थताया अप्यङ्गीकारात्, अन्यथा विधिजातं अनर्थकमेव स्यात्, अतो दृष्टा-र्थत्वात् समुच्चयः। खादिरादिद्रव्याणां तु बन्धनक्रियां प्रति गुणभूतत्वाद्विकल्प इति भेद इति ग्रहणक्रमसमुच्चयदर्शनोपप-

त्तौ व्याख्येयम् । होमक्रमसमुच्चयदर्शनोपपत्तौ तु, तद्भेदात् समुच्चितदेवतोद्देशभेदात्, कर्मणः यागस्य, अभ्यासः आवृत्तिः, संस्कार्यद्रव्यस्य पृथक् ग्रहणाद्वचनं विना मेलनानुपपत्तेः, अन्यथा पृथक् ग्रहणमनर्थकं स्यात्, न चैवं यागभेदापत्तिः, देवतारूपस्य द्रव्यस्य ग्रहणं प्रत्येव गुणत्वेन स्ववाक्ये यामाकल्पकत्वात्; अतो यागावृत्तिमात्रबोधनाद्युक्ता होमेऽपि क्रमसमुच्चयदर्शनोपपत्तिरिति व्याख्येयम् ।

इति षष्ठं पशुसोमाधिकरणम् ॥ ६ ॥

अथ सप्तमं संख्याधिकरणम् ॥ ७ ॥

पृथक्त्वनिवेशात् संख्यया कर्मभेदस्स्यात् ॥२-२-२०॥

(विषयसंशयौ)

(१)"तिस्र आहुतीर्जुहोति" (२)"द्वादश द्वादशानि जुहोति" (३)"आज्यभागौ यजति" (४)"पार्वणौ जुहोती"त्यादौ किं यावत्संख्यं धात्वर्थभेदो भावनाभेदश्च, किं वा एक एव धात्वर्थो भावना चेति विचार्यते ।

(सङ्गतिः)

अत्र पादाध्यायसङ्गतिस्स्पष्टा । अभ्यासापवादत्वेन च पूर्वाधिकरणोत्थानात् तत्समाप्त्या बुद्धिस्थेऽभ्यासेऽप्रकृच्छ्रवणात् युक्ता भेदकता, प्रकृते तु सकृच्छ्रवणात् न भेदकत्वोपपत्तिरिति पूर्वपक्षोत्थानादभ्यासाधिकरणेनाऽपि प्रत्युदाहरणरूपा ।

१. तै. सं. २. ३. ६. ३.
२. तै. स. ५. ४. ८. २.
३ तै. सं. २. ६. २. १.
४. आप. श्रौ. १. ३. २०. ५.

(पूर्वपक्षः)

तत्र न तावत् संख्यायाः साक्षादेव भावनाभेदबोधकत्वम् । सत्यपि प्रथमत स्संख्यायाः अपि विशेष्यभूतायां भावनायामन्वये धात्वर्थवाच्याहुतिपदसामानाधिकरण्यदर्शनात् स्वाश्रयकरणकत्वसम्बन्धेन तदाश्रयणात्, संख्यायाश्चैकत्वातिरिक्तायास्स्वसमानाधिकरणस्वाश्रयप्रतियोगिकभेदव्याप्तत्वरूपपृथक्त्वनिवेशित्वस्वाभाव्यात्, सत्यपि स्वाधारवृत्तिभेदबोधकत्वे तदनाधारभावनाभेदबोधकत्वानुपपत्तेः । नाऽपि धात्वर्थभेदबोधनद्वारा, संख्यायाः पदान्तरोपात्तत्वेन समानपदप्रमितैकत्वसंख्यावरुद्धे धात्वर्थे साक्षात्सम्बन्धेन वृत्तित्वानुपपत्तेः । यद्यपि 'जुहोती'त्याख्यातोपात्तैकत्वं कर्तृगामित्वान्न धात्वर्थवृत्तित्वेन प्रमितम्, तथापि अनवच्छिन्नस्य धात्वर्थस्य भावनान्वयित्वानुपपत्तेः अवच्छेदकीभूतसंख्यापेक्षायां प्रथमातिक्रमे कारणाभावादेकत्वस्यैव धात्वर्थवृत्तित्वप्रमा नाऽनुपपन्ना । अतश्च यथैव "एकादश प्रयाजान् यजती"त्यादौ धात्वर्थसम्बन्धित्वेन श्रुताऽप्येकादशत्वसंख्या पञ्चत्वावरुद्धे धात्वर्थे साक्षाद्वृत्तितया निवेशमलभमाना धात्वर्थप्रयोगवृत्तित्वेनाऽऽश्रीयते इति सत्यपि प्रयोगरूपाभ्यासभेदे सोमयागवदेव न कर्मभेदकता, तथाऽत्रापि न धात्वर्थभेदकतेति द्रष्टव्यम् ।

अत एवाऽनन्तरसङ्गतिरपि; न चैकत्वसंख्याया अनुमितत्वेन न सामानाधिकरण्यप्रमितश्रुतसंख्यावृत्तिधात्वर्थानिष्ठत्वबाधकतेति वाच्यम्, एकत्वस्याऽनुमितत्वेन प्राबल्यात्; अन्यथा प्रयाजगतस्य पञ्चत्वस्य प्रत्येकैकत्वस्य च प्रकृतावार्थिकत्वेन प्राबल्यानुपपत्तेः । अत एव "तिस्र आहुती"रितिसामानाधिकरण्यमपि प्रयोगद्वारकमेव व्याख्येयम् ।

अस्तु वा धात्वर्थमात्रवृत्तिताङ्गीकारेण तद्भेदकता, तथाऽपि भावनाभेदे प्रमाणाभावः; न तावत्संख्या, तस्यास्तद्भेदकत्वानुपपत्तेरुक्तत्वात् । नाऽपि संख्यया धात्वर्थभेदस्तद्भेदे च शब्दान्तरन्यायेन भावनाभेद इति वाच्यम्, प्रकृतिभेदे हि तदर्थानुबद्धायां भावनायां प्रकृत्यन्तरार्थस्य निवेशासम्भवाद्युक्तो भावनाभेदः; प्रकृते त्वनेकेषामपि धात्वर्थानामेकेन धातुनोपादानात् सर्वेषामेकस्यामेव भावनायां समूहालम्बनवन्निवेशोपपत्तेः न शब्दान्तरन्यायविषयत्वम् । किञ्च भावनानेकत्वे विधेयानेकमुख्यविशेष्यकत्वाच्च वाक्यभेदोऽपि; अतः 'समिधो यजती'तिवत् सत्यपि संख्याश्रवणे न भेदः इति प्राप्ते-

(सिद्धान्तः)

अभिधीयते-"तिस्र आहुती"रिति सामानाधिकरण्याद्धात्वर्थवृत्तित्वप्रतीतेः तद्भेदकत्वमेव संख्यायाः । न च प्रयाजैकादशत्वन्यायविषयत्वम्, एकादशत्वविधितः पूर्वं प्रकृतौ प्रयाजानां प्रत्येकैकत्वेन वा प्रचयाशिष्टपञ्चत्वेन वा निर्ज्ञातसंख्यत्वात्; प्रकृते तु यावन्न्यायेन धात्वर्थे संख्याऽनुमातुमारभ्यते तावत् प्रत्यक्षश्रुतया संख्यया निराकाङ्क्षीकृते नाऽनुमानप्रसरः समस्ति ।

किञ्च कारणाभावे एव खल्वेकत्वकल्पको न्यायः । न चाऽत्र सोऽस्ति, त्रित्वश्रवणस्यैव कारणस्य सत्त्वात्; अतश्च प्रत्यक्षश्रुतसंख्यासत्त्वे धात्वर्थेन स्वपरिच्छेदार्थमेकत्वसंख्यानुमानाद्युक्तस्तया धात्वर्थभेदः । न चैवं यत्राप्युत्पत्तिवाक्ये संख्या न श्रुता वाक्यान्तरे च तस्याः श्रवणं तत्रापि श्रुतसंख्यासत्त्वे तदाक्षेपानवतारात् संख्यया कर्मभेदापत्तिः; तादृशस्थले श्रुतसंख्याबोधकवाक्यस्य प्रवृत्तेः पूर्वमेव तदुपजीव्येनोत्पत्तिवाक्येनैकत्वस्यैवाऽनुमानात् । तथा हि—

सर्वत्र पदश्रवणक्रमेण प्रथमतः पदार्थोपस्थितिः, पश्चात् सर्वेषां प्रत्यासत्तिक्रमेण भावनान्वयः, विशिष्टप्रतीत्युत्तरकालं च तस्यां विध्यन्वयः, तदुत्तरं चाऽपरिच्छिन्नानां क्रियान्वयायोगात् परिच्छेदकीभूतसंख्यानुमानमिति वस्तुस्थितिः। तद्यत्रोत्पत्तिवाक्य एव संख्याश्रवणं तत्रानुमानप्रवृत्तेः पूर्वमेव संख्याया भावनान्वयात् तन्निर्वाहार्थं तस्या धात्वर्थसम्बन्धावश्यम्भावात्तयैव निराकाङ्क्षत्वोपपत्तेः पश्चात् न संख्यान्तरानुमानप्रसक्तिः। यत्रोत्पत्तिवाक्ये सा न श्रुता, उत्पन्नवाक्यस्य च तदनुवादेन संख्याविधायकत्वात् तदुपजीवकत्वेन तदुत्तरप्रवृत्तिकत्वम्, तत्रोत्पत्तिवाक्येन स्ववाक्यार्थावधारणवेलायां परिच्छेदकीभूतसंख्यानुमाने तावन्न किञ्चिद्बाधकमस्ति।

न चाऽनुमितस्याऽप्युत्तरकालं श्रुतेन बाधः, दुर्बलस्याऽपि पूर्वप्रवृत्तस्यऽतदुपजीव्य प्रवृत्तेनोत्तरेण बाधायोगात्। अन्यथा प्रथमप्रतीतस्याऽपि दुर्बलस्य यागगतकरणत्वस्योत्तरकालिकेन श्रुतेन सोमकरणत्वेन बाधापत्तेः। न च उत्पन्नशिष्टस्याऽऽनर्थक्यम्; अभ्यासद्वारकतयाऽप्युपपत्तेः। प्रकृते त्वश्रुतसंख्यानुमानात् पूर्वमेव श्रुतायाः संख्यायाः भावनान्वयद्वारा विध्यन्वयप्रतीतेरौत्तरकालिकत्वाभावेनाऽनुमानप्रतिबन्धाद्युक्ता भेदकतेति वैषम्यम्।

अत एव यत्र संख्यायाः उत्पत्तिवाक्यगताया अपि सम्भवत्प्राप्तिकाया विशिष्टविधिगौरवापत्तेर्न भावनान्वयद्वारा विध्यन्वयः। तत्र तस्याऽनुमानप्रतिबन्धकत्वाभावान्न धात्वर्थभेदकता। यथा—(१)'समिधो यजती'त्यत्र समिध इति बहुवचनं (२)"समिधो अग्न आज्यस्य व्यंत्वि"ति मन्त्रवर्णे समिद्देवतागतत्वेन बहुत्वस्य प्राप्तत्वात् बहुत्वसंख्याविशिष्टयागविधौ च गौरवापत्तेः

१. तै. सं. २. ६. १. २. तै. ब्रा. ३. १. ६.

स्वाश्रयदेवत्ययागवृत्तित्वसम्बन्धेनैकत्वलक्षणार्थं सत् समित्प्रातिपदिकलक्षिततत्तद्देवत्ययाग एवाऽन्वेतीति शक्यार्थस्य बहुत्वस्य विध्यन्वयाभावान्न धात्वर्थभेदकता । अतश्चोत्पद्यमानकर्मसमानाधिकरणा विधेया संख्या कर्मभेदिकेति सिद्धम् । कर्मसामानाधिकरण्याभावादेव च "त्रिर्वेदिं प्रोक्षती"त्यादौ न कर्मभेदः, त्रिरित्यस्य क्रियाभ्यावृत्तिगणनार्थसुच्प्रत्ययान्तत्वेनाऽभ्यासवृत्तिसंख्याप्रतिपादकस्य कर्मसामानाधिकरण्याभावात् । अतः सिद्धः संख्यया धात्वर्थभेदः ।

न चैवमपि भावनाभेदकाभावः, शब्दान्तरस्यैव सत्त्वात् । यद्यपि च समानपदोपात्तधात्वर्थावरोधे पदान्तरोपात्तधात्वर्थस्यावच्छेदकत्वायोग इत्येवंविधो गुणन्यायसङ्कीर्णो मूलोक्तशब्दान्तरन्यायो नाऽत्र भावनाभेदकत्वेन सम्भवी, तथाऽपि कार्यतावच्छेदकतत्तद्यागत्वादिभेदात् कारणतावच्छेदकयत्नत्वेऽपि वैजात्यमित्येवंविधोऽस्मदुक्तश्शब्दान्तरन्यायस्तु प्रकृतेऽपि सम्भवत्येवेति न कश्चिद्विरोधः । सत्यपि च विधेयभावनानेकत्वे एकपदोपादानाद्युगपत्प्रतीतेः न वाक्यभेदः । अत एवाऽस्माभिः भिन्नप्रतीतिविषयानेकमुख्यविशेष्यराहित्यमर्थैकत्वलक्षणमुक्त(१)मर्थैकत्वाधिकरणे । तस्माद्युक्तः संख्यया कर्मभेदः ।

न च संख्या न स्वतन्त्रं मानम्, एकस्मिन् कर्मण्यनिविशमानत्वसाम्येन गुण एवाऽन्तर्भावादिति वाच्यम्; अनिविशमानत्वसाम्येऽपि उत्पत्तिगतायाः संख्यायाः प्रमाणान्तरासिद्धोत्पत्तिकस्यैव कर्मणोऽनेकत्वमात्रबोधकत्वात् । 'तिस्र आहुती'रित्यत्र हि शब्दान्तरादिनैवोत्पत्तिपरत्वावधारणम्, न तु संख्यायास्तत्र व्यापारः, अपि त्वनेकत्वमात्रबोधे, गुणस्य तु सत्यप्याग्नेयादावुत्पत्तिवाक्यगतस्य भेदकत्वे उत्पन्नवाक्यगतस्याऽप्यनिविशमा-

नत्वेन स्वविशिष्टकर्मोत्पत्तिबोधनद्वारा भेदबोधकत्वमिति वैषम्यम्।

एवं संज्ञातोऽपि संख्याया वैलक्षण्यं द्रष्टव्यम्। तस्मात् संख्यापि स्वतन्त्रं प्रमाणम्।

प्रयोजनं—एतदङ्गभूतो मन्त्रः वेदिप्रोक्षणमन्त्रवत् सकृदेव प्रयोज्यः पूर्वपक्षे, सिद्धान्ते त्वावर्तनीय इति। तथा एतत्कर्माश्रितो गुणः प्रत्यभ्यासं सायम्प्रातरावृत्तहोमाश्रितदधिवदावर्तनीयः पूर्वपक्षे, सिद्धान्ते त्वाश्रयापेक्षायां प्रत्येकमेवाऽऽश्रयत्वकल्पनादनियमेन यस्मिन् कस्मिंश्चित् होमेऽनुष्ठेय इति। सूत्रं स्पष्टम्॥

भाष्यकारेण तु कर्मसमानाधिकरणायाः संख्याया भेदकत्वस्य स्फुटत्वात् तदनादृत्य "सप्तदश प्राजापत्यान् पशूनालभत" इति द्रव्यसमानाधिकरणसंख्याया भेदकत्वं विचारितम्—किमत्र सप्तदशपशुद्रव्यक एको यागो विधीयते? किंवा एकैकपशुद्रव्यकास्सप्तदश यागाः? इति। तत्र पादाध्यायप्रकरणसङ्गतयः पूर्ववदेव। अनन्तरा तु पूर्वाधिकरणे भिन्नवाक्योपात्तानामनेकेषामपि देवतात्वानामेकेन यागेनोपपत्तावुक्तायामेकवाक्योपात्तैकदेवतात्वस्य सुतरामेकेन यागेनोपपत्तिरिति पूर्वपक्षोत्थानात् द्रष्टव्या।

तत्र प्राजापत्यानिति पदे प्रकृत्या प्रजापतिस्तद्धितेन देवतात्वविशिष्टद्रव्यं सन्निहितं पश्वाख्यं द्वितीयया करणत्वं बहुवचनेन बहुत्वमुच्यत इति तावद्वस्तुस्थितिः, पशुपदं च द्रव्यविशेषतात्पर्यग्राहकम्, तत्र पदद्वयेऽपि बहुत्वस्य प्रथमतः करणत्वेनान्वितस्याऽपि पार्ष्ठिकः पश्वाख्यद्रव्येणैवान्वयः पश्वेकत्वाधिकरणवक्ष्यमाणन्यायेनाऽवगम्यते, न तु देवतात्वविशिष्टद्रव्येण।

न च पशुपदे तथान्वयेऽपि प्राजापत्यपदे बहुत्वस्य देवतात्व-

विशिष्टद्रव्य एव तद्धितार्थेऽन्वयो युक्तः; प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थाभिधायकत्वनियमादिति वाच्यम्, संख्यारूपप्रत्ययार्थस्य प्रकृत्यर्थविशेष्यान्वयित्वव्युत्पत्तेः; अन्यथा द्वौ त्रय इत्यत्र द्वित्वादिविशिष्टे संख्यान्वये चतुर्णां नवानां वा प्रतीत्यापत्तेः; श्रुतविशेष्याऽन्वयबाधे हि क्वचित् विशेषणस्यैव विशेष्यत्वलक्षणयाऽन्वयः, यथा—"द्व्येकयोर्द्विवचनैकवचने" इत्यादौ, न तु क्वाऽपि विशिष्टेऽन्वयो दृष्टचरः ।

अत एव(१) "पञ्च पञ्चाशतस्त्रिवृतस्संवत्सराः" इत्यत्र पञ्चाशत्सख्यायामेव विशेष्यभूतायां पञ्चत्वान्वयः, संवत्सरसामानाधिकरण्यं तु संवत्सरपदस्य संवत्सरवृत्तिमल्लक्षणयेति न विरोधः। अतो देवतात्वविशिष्टद्रव्ये तद्धितार्थेऽपि बहुत्वान्वयो द्रव्य एवेति सिद्धम्। स चोभयथा सम्भवी, द्रव्ये देवतात्वान्वयोत्तरं, ततः पूर्वं वा, तत्र यद्युत्तरं ततो देवतासम्बन्धस्य प्रतिसम्बन्धिनि द्रव्ये साहित्यानवगमात् प्रत्येकं देवतासम्बन्धप्रतीतेः स्यादनेकयागकल्पनम्, पूर्वभाविनि तु तस्मिन् साहित्यावच्छिन्नस्यैव प्रतिसम्बन्धित्वात् सत्यप्यधिष्ठानभेदे प्रतिसम्बन्धितापर्याप्त्यधिकरणतावच्छेदकस्यैकत्वेन द्रव्यदेवतासम्बन्धैक्यप्रतीतेरेकयागकल्पनम्। तदेवमुभयोपपत्तावनेकयागतदपूर्वकल्पनागौरवभिया बहुत्वान्वयस्य पूर्वत्वमेवाऽऽश्रीयते। एवं च पशुपद इव तद्धितेऽपि बहुत्वान्वयात् पूर्वमेकशेषः क्रियमाणो द्रव्य एवाऽश्रितः स्यात् न तु देवतात्वे प्रजापतिरूपे च प्रकृत्यर्थेऽपीत्यपि लाघवम्। एवञ्च यद्यपि क्वचित् बहुत्वस्य विशिष्टेऽप्यन्वयो दृष्टचरो भवेत्, तथाऽपि विशेष्यमात्रेऽप्यन्वयदर्शनादुभयथा व्युत्पत्तिसत्त्वे पूर्वोक्तविधयाऽत्रोभयथाऽप्युपपत्तौ च लाघवस्यैव नियामकत्वाद्युक्तमेकयागकल्पनम्।

नन्वतिदेशशास्त्रस्य नियामकत्वसम्भवेन लाघवाख्यन्यायस्य नियामकता युक्ता; स हि प्रकृतित एकपशुनिष्पन्नैकादशावदानगणमेकं प्रापयति । प्रकृतौ हि 'पशुमालभेते'ति हृदयादिप्रकृतिभूतपशुगतमेकत्वं विवक्षितम् । 'हृदयस्याऽग्रेऽवद्यती'त्यादिष्वपि च संस्कारविध्यन्यथानुपपत्त्या विनियोगकल्पनदशायां अध्वर्युगतैकत्ववद्धृदयादिगतैकत्वस्य विवक्षितत्वादेक एवावदानगणोऽङ्गम् । अतश्च तस्य यागैकत्वे आतिदेशकत्वादेकस्यैव प्राप्तेः सप्तदशपशुप्रकृतिकत्वानुपपत्तिः ।

यद्यपि चौपदेशिक्या पशुसंख्यया आतिदेशिक्याः तस्या बाधस्स्यात्, तथाऽपि हृदयाद्येकत्वस्य भिन्नविषयत्वात् बाधकाभावेन तस्य सप्तदशपशुप्रकृतिकत्वानुपपत्तिस्तदवस्थैव । यागभेदे तु प्रतियागमतिदेशभेदात् तावतां गणानां प्राप्तेर्युक्ता तावत्पशुप्रकृतिकतेति । अतोऽतिदेशेनैव वाक्यशेषस्थानीयेन निर्णयोपपत्तेः देवतात्वान्वयोत्तरं द्रव्यमात्रे बहुत्वान्वयो विशिष्ट एव वा स इत्यङ्गीकर्तुं युक्तमिति चेत्—न ; अतिदेशस्योभयथाऽप्युपपत्तावनिर्णायकत्वात् । तथाहि—

प्रकृतौ पशुशास्त्रस्य विशसनादिरूपतात्पर्यग्राहकबलेन सर्वावयवद्वारा पशुसाधनताबोधकत्वे प्राप्ते हृदयादिशास्त्रं परिसंख्यार्थमित्युक्तम्; स्थास्यति च । अतः पशुशास्त्रमेवार्थाद्धृदयादिसाधनताविधायकं नाऽवदानशास्त्रम् । तत्र च पशुगतैकत्वेन हृदयाद्येकत्वस्याऽर्थसिद्धत्वान्न तदंशेऽपि विधिकल्पनम् । एवं च यद्यप्यवदानविध्यन्यथानुपपत्त्यैव हृदयादिविधिकल्पनम्, तथाऽप्यर्थसिद्धत्वान्नैकत्वविशिष्टस्य तस्य । अतश्च हृदयादिगणस्य यागसाधनस्यापि यथैव पशुगतैकत्वानुरोधेन प्रकृतावेकत्वं तथैवाऽत्र तद्गतसप्तदशत्वा-

विशिष्टद्रव्य एव तद्धितार्थेऽन्वयो युक्तः; प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थाभिधायकत्वनियमादिति वाच्यम्, संख्यारूपप्रत्ययार्थस्य प्रकृत्यर्थविशेष्यान्वयित्वव्युत्पत्तेः; अन्यथा द्वौ त्रय इत्यत्र द्वित्वादिविशिष्टे संख्यान्वये चतुर्णां नवानां वा प्रतीत्यापत्तेः; श्रुतविशेष्याऽन्वयबाधे हि क्वचित् विशेषणस्यैव विशेष्यत्वलक्षणयाऽन्वयः, यथा–"द्व्येकयोर्द्विवचनैकवचने" इत्यादौ, न तु क्वाऽपि विशिष्टेऽन्वयो दृष्टचरः ।

अत एव(१) "पञ्च पञ्चाशतस्त्रिवृतस्संवत्सरा" इत्यत्र पञ्चाशत्सङ्ख्यायामेव विशेष्यभूतायां पञ्चत्वान्वयः, संवत्सरसामानाधिकरण्यं तु संवत्सरपदस्य संवत्सरवृत्तिमल्लक्षणयेति न विरोधः । अतो देवतात्वविशिष्टद्रव्ये तद्धितार्थेऽपि बहुत्वान्वयो द्रव्य एवेति सिद्धम् । स चोभयथा सम्भवी, द्रव्ये देवतात्वान्वयोत्तरं, ततः पूर्वं वा, तत्र यद्युत्तरं ततो देवतासम्बन्धस्य प्रतिसम्बन्धिनि द्रव्ये साहित्यानवगमात् प्रत्येकं देवतासम्बन्धप्रतीतेः स्यादनेकयागकल्पनम्, पूर्वभाविनि तु तस्मिन् साहित्यावच्छिन्नस्यैव प्रतिसम्बन्धित्वात् सत्यप्यधिष्ठानभेदे प्रतिसम्बन्धितापर्याप्त्यधिकरणतावच्छेदकस्यैकत्वेन द्रव्यदेवतासम्बन्धैक्यप्रतीतेरेकयागकल्पनम् । तदेवमुभयोपपत्तावनेकयागतदपूर्वकल्पनागौरवभिया बहुत्वान्वयस्य पूर्वत्वमेवाऽऽश्रीयते । एवं च पशुपद इव तद्धितेऽपि बहुत्वान्वयात् पूर्वमेकशेषः क्रियमाणो द्रव्य एवाऽऽश्रितः स्यात् न तु देवतात्वे प्रजापतिरूपे च प्रकृत्यर्थेऽपीत्यपि लाघवम् । एवञ्च यद्यपि क्वचित् बहुत्वस्य विशिष्टेऽप्यन्वयो दृष्टचरो भवेत्, तथाऽपि विशेष्यमात्रेऽप्यन्वयदर्शनादुभयथा व्युत्पत्तिसत्त्वे पूर्वोक्तविधयाऽत्रोभयथाऽप्युपपत्तौ च लाघवस्यैव नियामकत्वाद्युक्तमेकयागकल्पनम् ।

नन्वातिदेशशास्त्रस्य नियामकत्वसम्भवेन लाघवाख्यन्यायस्य नियामकता युक्ता; स हि प्रकृतित एकपशुनिष्पन्नैकादशावदानगणमेकं प्रापयति । प्रकृतौ हि 'पशुमालभेते'ति हृदयादिप्रकृतिभूतपशुगतमेकत्वं विवक्षितम् । 'हृदयस्याऽग्रेऽवद्यती'त्यादिष्वपि च संस्कारविध्यन्यथानुपपत्त्या विनियोगकल्पनदशायां अध्वर्युगतैकत्ववद्धृदयादिगतैकत्वस्य विवक्षितत्वादेक एवावदानगणोऽङ्गम् । अतश्च तस्य यागैकत्वे आतिदेशकत्वादेकस्यैव प्राप्तेः सप्तदशपशुप्रकृतिकत्वानुपपत्तिः ।

यद्यपि चौपदेशिक्या पशुसंख्यया आतिदेशिक्याः तस्या बाधस्स्यात्, तथाऽपि हृदयाद्येकत्वस्य भिन्नविषयत्वात् बाधकाभावेन तस्य सप्तदशपशुप्रकृतिकत्वानुपपत्तिस्तदवस्थैव । यागभेदे तु प्रतियागमतिदेशभेदात् तावतां गणानां प्राप्तेर्युक्ता तावत्पशुप्रकृतिकतेति । अतोऽतिदेशेनैव वाक्यशेषस्थानीयेन निर्णयोपपत्तेः देवतात्वान्वयोत्तरं द्रव्यमात्रे बहुत्वान्वयो विशिष्ट एव वा स इत्यङ्गीकर्तुं युक्तमिति चेत्—न ; अतिदेशस्योभयथाऽप्युपपत्तावनिर्णायकत्वात् । तथाहि—

प्रकृतौ पशुशास्त्रस्य विशसनादिरूपतात्पर्यग्राहकबलेन सर्वावयवद्वारा पशुसाधनताबोधकत्वे प्राप्ते हृदयादिशास्त्रं परिसंख्यार्थमित्युक्तम् ; स्थास्यति च । अतः पशुशास्त्रमेवार्थाद्धृदयादिसाधनताविधायकं नाऽवदानशास्त्रम् । तत्र च पशुगतैकत्वेन हृदयाद्येकत्वस्याऽर्थसिद्धत्वान्न तदंशेऽपि विधिकल्पनम् । एवं च यद्यप्यवदानविध्यन्यथानुपपत्त्यैव हृदयादिविधिकल्पनम्, तथाऽप्यर्थसिद्धत्वान्नैकत्वविशिष्टस्य तस्य । अतश्च हृदयादिगणस्य यागसाधनस्यापि यथैव पशुगतैकत्वानुरोधेन प्रकृतावेकत्वं तथैवाऽत्र तद्गतसप्तदशत्वा-

नुरोधेन सप्तदशत्वमिति न कश्चित् यागैकत्वेऽपि तस्य विरोधः । अतो द्रव्यदेवतासम्बन्धस्यैकत्वे लाघवन्यायस्यैव नियामकत्वात् युक्तं यागैकत्वम् ।

अस्तु वा यथाकथञ्चित् सम्बन्धभेदः, तथाऽपि सर्वसम्बन्धोपपादकत्वेन सोमयागवल्लाघवेनैकस्यैव यागस्य कल्पनोपपत्तेः नाऽनेकत्वे प्रमाणमस्ति । तेन यथैव सिद्धान्ते सकृदनुष्ठानेनैवाऽनेकयागनिष्पत्तिः, तथा मन्मतेऽप्येकेनैव यागेन सर्वदेवतासम्बन्धोपपत्तिः । अतो न कर्मान्तरम् ।

यत्त्वत्र न्यायसुधाकृता तद्धितोत्तरबहुवचनमात्रालोचने विशिष्ट एव ताद्धितार्थे बहुत्वान्वयापत्तेः पूर्वपक्षानुत्थानप्रसङ्गात् न तन्मात्रालोचनेनाऽत्र पूर्वपक्षः, किन्तु तद्धितस्य सर्वनामार्थवृत्तित्वात् सर्वनाम्नश्च सन्निहितपशुपरामर्शित्वात् बहुवचनान्तपशुपदानुरोधेन सर्वनाम्न एवैकशेषत्वकल्पनया बहुत्वसंख्यावच्छिन्नसर्वनामार्थ एव ताद्धितोत्पादात् तदुत्तरबहुवचनस्याऽत एवानुवादत्वात् बहूनां पशूनामेकदेवतासम्बन्धेन कर्मैकत्वमित्येव पूर्वः पक्ष इत्युक्तम्; तत् बहुत्वान्वयस्य विशेष्य एव व्युत्पन्नतया अश्रुतसर्वनामैकशेषत्वकल्पने प्रमाणाभावाच्चोपेक्षितम् । अतः प्रागुक्त एव पक्षो युक्तः इति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—सत्यं संख्याया विशेष्यान्वय एव व्युत्पन्नः, तथापि तु समानाभिधानश्रुत्या संख्यान्वयात् पूर्वमेव देवतात्वं द्रव्येऽन्वेति, पश्चादेव पदश्रुत्या संख्या । अतश्च देवतात्वस्य प्रतिसम्बन्धिनि द्रव्ये साहित्यानवगमात् पशुत्वस्यैव प्रतिसम्बन्धितावच्छेदकत्वप्रतीतेः उत्तरकाले बहुत्वान्वयेन पशुत्वावच्छि-

त्वभेदप्रतीतेः सम्बन्धितापर्याप्त्यधिकरणताभेदेन देवतासम्बन्धानामपि योग्यताबलेन भेदप्रतीतिः। न च पशुत्वस्य पशुपदाधीनप्रतीतिकत्वात् तस्य च बहुवचनान्तत्वेन सामानाधिकरण्यसम्बन्धेन बहुत्वविशिष्टस्यैव तस्य प्रतिसम्बन्धितावच्छेदकत्वप्रतीतिरिति वाच्यम्, पशुत्वविशेषावधारणस्य उत्तरकालमप्युपपत्तौ तद्धितस्य पशुपदाधीनप्रवृत्तिकत्वे प्रमाणाभावात्।

न च तात्पर्यग्राहकज्ञानस्य तद्धितपदजन्यपदार्थोपस्थितावेव सहकारिकारणत्वाभ्युपगमात् कथं तद्धितपदस्य पशुपदाधीनप्रवृत्तिकत्वाभाव इति वाच्यम्, तात्पर्यग्राहकज्ञानाभावेऽपि तद्धितपदमात्रश्रवणेनाऽनिर्धारितद्रव्यविशेषबोधे बाधकाभावात्। अन्यथा तद्धितमात्रश्रवणात् द्रव्यविशेषसंशयानुपपत्तेः। अतोऽनिर्धारितद्रव्यविशेषे बुद्धेऽपि विशेषणान्तरव्यावृत्तिमात्रफलकत्वं तात्पर्यग्राहकस्येति द्रष्टव्यम्।

अस्तु वा गुणाधिकरणवार्तिकस्वारस्यात् तात्पर्यग्राहकस्य पदार्थोपस्थितावेवोपयोगः, तथाऽपि तत्त्वेन पशुप्रातिपदिकस्यैवोपयोगः, योग्यत्वात्, न तु बहुवचनादेरपि, बहुवचनस्योभयथाप्युपपन्नत्वेन तात्पर्यग्राहकत्वाभावाच्च। तथाहि—बहुत्वस्य पार्ष्ठिको द्रव्यसम्बन्धो द्वेधा सम्भाव्यते—करणत्वानां बहुत्वेनैकत्वेन वा। तद्यत्र प्रमाणान्तरेण प्रत्येकवृत्तिकरणत्वमवगतम्; यथाऽऽग्नेयादिषु तत्तदुत्पत्तिवाक्ये, यथा वा(१)"तां चतुर्भिरादत्ते" त्रिवृद्बहिष्पवमान"मित्यादौ, तत्तन्मन्त्रवृत्त्यर्थप्रकाशनकरणत्वे लोकव्युत्पत्तितः तत्र प्रत्येककरणताश्रयाणामेव पार्ष्ठिको बहुत्वान्वयः। अत एव तत्र करणानां समुच्चयो, न तु समुदितानां करणत्वमेकम्; यत्र तु प्रमाणान्तरेण न तद्भेदावगमः तत्र लाघ-

१. श. ब्रा. ६. ३. १. ४३. २. ता. ब्रा.

त्वेन करणत्वस्यैकस्यैव कल्पनादेककरणताश्रय एव पार्ष्ठिको बहुत्वान्वयः। अत एव तत्र समुदितानामेकं करणत्वम्। शक्यते तु तादृशस्थलेऽपि प्राथमिककरणतान्वयवेलायां बहुत्वानवच्छिन्नस्यैव प्रातिपदिकार्थस्य करणत्वान्वयप्रमापणात् तन्निर्वाहार्थं पार्ष्ठिको बहुत्वान्वयोऽपि करणीभूतप्रातिपदिकार्थवृत्त्यैव प्रतीयत इति तत्रापि करणानामेव समुच्चयो, न तु समुच्चितानां करणत्वमिति वक्तुम्। अतो यत्र प्रमाणान्तरेणैवैका करणता प्रतीयते तत्रैव समुदितानां करणत्वमिति द्रष्टव्यम्।

तदिह पशूनामपि यागकरणत्वं योग्यतया प्रत्येकमेवावगतम्। न हि पशुसमुदाये एकं स्वत्वम्, प्रमाणाभावात्, यथेष्टविनियोगादिरूपस्य स्वत्वकार्यस्य प्रत्येकं दर्शनाच्च, समुदायस्य स्वातन्त्र्येण यथेष्टविनियोगानर्हत्वाच्च। अतः प्रत्येकं पशूनां स्वत्वाश्रयत्वात् तद्ध्वंसानुकूलव्यापाराख्ययागकरणत्वमपि प्रत्येकमेवाऽवगम्यते। अत एवाऽत्र करणानामेव समुच्चयो, न तु समुदितानां करणत्वम्। अतश्च प्रत्येकमेव यागसाधनत्वाख्यहविष्ट्वावगतेः तदर्थविहितदेवतातद्धितेनाऽपि प्रत्येकमेव देवतात्वसम्बन्धावगतिः।

अत एव करणत्वविशिष्टपशुबोधकस्यैव शब्दस्य तात्पर्यग्राहकता न बहुवचनस्यापि। तदर्थस्य हविष्ट्वानवच्छेदकत्वात्। यद्यपि च पशुपदमात्रश्रवणेन यागसाधनत्वरूपं हविष्ट्वं न प्रतीयते, तथापि देवतातद्धितश्रवणाद्देवतात्वसम्बन्धात् पूर्वं तत्प्रतीतिरावश्यकी। अन्यथा "सूक्तहविषोरिष्टि" रिति स्मृत्या तस्य नियतविषयत्वादुत्पत्त्यनापत्तेः। अतो हविष्ट्वे पशूनां(१)प्रमिते देवतासम्बन्धः, तदुत्तरं च यागस्य प्रमाणान्तरेणान-

१. प्रतीते इति. ख. पु.

वगमात् कल्पनेत्यवधेयम् ।

यद्यपि च प्रदेयत्वाख्यं हृदयादीनामेव हविष्ट्वम् , तथापि प्रदेयप्रकृतित्वाख्यं हविष्ट्वं पशूनां देवतासम्बन्धसिद्ध्यर्थमिहोक्तमिति न विरोधः ।

नचैवमपि हविष्ट्वस्य स्वरूपसत एव तद्धितोत्पत्तावुपयोगान्न ज्ञानापेक्षेति वाच्यम् , तथात्वे सर्वनामार्थस्यापि स्वरूपसत एवोपयोगोपपत्तौ देवतात्वमात्रस्य वाच्यताप्रसङ्गेन द्रव्यविशेषस्याऽप्यवाच्यतापत्तेः । अतश्च यथैव सूत्रकृदुक्तः अस्यशब्दार्थो वाच्यकोटिप्रविष्ट इति गुणाधिकरणे वक्ष्यते तथा भाष्यकृदुक्तो हविरादिविशेषोऽपि वाच्यकोटिप्रविष्ट एवेति तत्प्रतीतिरपि देवतासम्बन्धात् पूर्वमावश्यकी । अतश्च यागसाधनत्व योग्यतावच्छेदकपशुत्वावच्छिन्नस्यैव बहुत्वानवच्छिन्नस्य देवतासम्बन्धात् तस्य च प्रतिसम्बन्धितापर्याप्त्यधिकरणभेदेन भिन्नत्वात् भेदसिद्धिः । अत एव(१) वसन्ताय कपिञ्जलानालभेते" इत्यत्रापि चतुर्थ्युपात्तस्य त्यज्यमानद्रव्योद्देश्यत्वाख्यस्य देवतात्वस्य त्यज्यमानद्रव्यस्वरूपहविष्ट्वं विनानुपपत्तेः कपिञ्जलानां च प्रत्यक्षमेव यागसाधनत्वाख्यहविष्ट्वयोग्यत्वात् पूर्ववद्देवतासम्बन्धभेदोपपत्तिः ।

अत एव पार्थसारथेः तदनुयायिनां चैकपशुनिष्पन्नैकादशावदानगणैकताप्राप्तिचोदकानुरोधेनैव देवतासम्बन्धभेदोपपादनं निर्मूलमेव ।

किञ्चैवं सति(२)सप्तदश मारुतीः त्रिवंत्सा उपाकरोति सप्तदश प्रश्नीनुक्षणः तान् पर्यग्निकृतानुत्सृजन्ति प्रेयतरा आलभन्ते" इत्यत्रोक्तवाक्ये पर्यग्निकरणान्ताङ्गरीतिविधानादेकादशावदानगणप्राप्त्यभावेन कथं देवतासम्बन्धभेदसिद्धिः ? यद्यपि तत्राऽने-

१. मै. सं. ३. १४. १. २. ता. ब्रा. २१. १४. ८.

कमादृतीयागविधाय्युपाकरोत्यनुषङ्गाद्वैरूप्यार्थमुक्षस्वपि अनेकयागकल्पनं शक्यते वक्तुम्, तथापि(१)"ईशनाय परस्वत आलभत" इत्यत्र तदभावात् पर्यग्निकरणान्ताङ्गरीतिविधानेन च एकादशावदानगणप्राप्त्यभावाद्यागभेदो दुरुपपादः ।

न च तत्राऽस्तु यागैकत्वम् , तदा हि परस्वतां प्रत्येकं करणीभूतानां समुच्चयस्स्वीक्रियते, समुदितानां वा करणता ? नाद्यः ; तथा सति बहुत्वस्य करणतावच्छेदकत्वादस्मदुक्तप्रकारेण यागभेदस्यैवाऽऽपत्तेः ।

अत एव प्राजापत्योदाहरणे यागैक्यसिद्ध्यर्थं पूर्वपक्षे समुच्चितानामेव करणत्वमुक्तं वार्तिककृता । नान्त्यः, तथात्वे प्रतिपरस्वतं नियोजनोपाकरणादिसंस्कारानापत्तेः । प्रकृतौ हि यागसाधनीभूते पूर्वसाधनतापर्याप्त्याधिकरणे संस्काराः कृताः, इहापि तादृशे समुदाये कर्तव्याः, न समुदायाधिष्ठानेषु प्रत्येकम् । नहि व्रीहिसंस्काराः प्रतिव्यक्ति क्रियन्ते, अपि त्वपूर्वसाधनतापर्याप्त्यधिकरणे चतुर्मुष्टिपरिमिते समुदाये । अतएव वार्तिके आग्नेयादीनां समुदितानां साधनत्वे न प्रत्येकमितिकर्तव्यतान्वयः, अपि तु प्रत्येकसाधनत्व एवेत्यसकृत् क्षुण्णम् ।

न चैवं(२) नवमे इष्टकासमुदायस्याग्निपदवाच्यत्वमङ्गीकृत्य हिरण्यशकलप्रोक्षणस्य प्रतीष्टकं कर्तव्यतारूपपूर्वपक्षकरणानुपपत्तिः, तत्रत्यसमुदायपदस्य सन्निवेशविशेषविशिष्टेष्टकारूपसमुदायिपरत्वस्यैवाऽङ्गीकारात् । तस्मात् समुदायस्य साधनत्वे प्रतिपशु संस्कारानुपपत्तेः परस्वद्वाक्ये यागैक्योक्तिर्मुधैव ।

किञ्चैवं वसन्तवाक्येऽपि यागैक्यं किमिति नाऽङ्गीक्रियते ? एकादशावदानगणानुपपत्तेः प्रकृतावेकत्वस्याऽर्थिकत्वेन परिहर्तुं

---

१. मै. सं. ३. १४. १०. २. पू. मी. ९. १. ८.

शक्यत्वात् । अथाऽस्तु भवदुक्तकत्यैव परस्वद्वाक्ये कर्मभेदः, ततो वसन्तवाक्येऽपि तत एव भेदसिद्धेः किमव्यापकेन स्वरूपासिद्धेन चैकादशावदानगणानुपपत्त्युपन्यासेन ? । तस्मात् सिद्धः प्राजापत्यवाक्ये अन्येष्वप्येवञ्जातीयकेषु कर्मभेदः । अत एवैकपशुसाध्यताऽप्यतिदेशप्राप्तानुगृहीता भवति । अन्यथा सामदृश्येन तद्बाधापत्तेः । अत एव सम्बन्धभेदाङ्गीकारेऽप्यनेकसम्बन्धोपपादकैकयागकल्पनैव लाघवादस्त्वित्यप्यपास्तम्, सम्बन्धानामुभयथाऽप्येकानेकयागकल्पनयैवोपपत्तौ लाघवाख्यन्यायापेक्षया पश्वैकताप्राप्त्यतिदेशशास्त्रस्यैव नियामकत्वौचित्यात् । अत एवाऽनेकयागकल्पनायां गौरवमपि प्रामाणिकम् । एवं चित्रेष्ट्यादावपि द्रव्यैकताप्रापिचोदक एव नियामकः ।

यत्त्वत्र मूले अवदानगणैकताप्राप्त्या सिद्धान्तकरणम्, तदतिशयार्थमिति द्रष्टव्यम् । तस्मात् सिद्धो धात्वर्थभेदः । तद्भेदाच्च भावना भेदः पूर्ववत् । अपूर्वभेदस्तु भाव्यभूतापूर्वभेदं विना भावनाभेदानुपपत्तेर्द्रष्टव्यः ।

प्रयोजनम्–पूर्वपक्षे सम्बन्धैकत्वपक्षे अवदानप्रकृतिभूतपशुगतसमुदायस्य देवतासम्बन्धात् तस्य चैकत्वेन प्रकृतिप्राप्तदेवतासम्बन्धवृत्तिप्रोक्षणोपाकरणादिधर्मजातं सकृदेव कार्यम् । दृष्टार्थं तु(१) नियोजनविशसनादि प्रतिपशु प्रयोजनानुरोधेन कार्यम् । तथैकस्य पशोर्नाशे तद्घटितसमुदायस्य नाशेन तद्वृत्तिसंस्काराणामपि नाशादानीयमानपशुसहितैतत्पशुसमुदायान्तरे पुनरपि संस्कारः कार्यः, तत्पशुविशसनोत्तरमेतत्पशुनाशे तु पश्वन्तराण्युत्पाद्यानि, सम्बन्धभेदपक्षे त्वेकपशुविस्मरणेऽपि यागस्यैकस्य जातत्वान्न तदर्थं पुनः करणम् । सिद्धान्ते तु पशू-

१. अञ्जनोपाकारणादि.

नामेव देवतासम्बन्धात् गृह्यमाणविशेषत्वेन प्रतिपशु प्रोक्षणादि, एकपशुनाशे च तत्रैव संस्कारकरणम्, विशसनोत्तरमप्येकस्यैवोत्पत्तिः, विस्मरणे पुनर्यागकरणमिति ध्येयम् ॥ सूत्रं स्पष्टम्॥

इति सप्तमं संख्याधिकरणम् ॥ ७ ॥

अथाऽष्टमं संज्ञाधिकरणम् ॥ ८ ॥

संज्ञा चोत्पत्तिसंयोगात् ॥ २–२–२१ ॥

(विषयसंशयौ)

ज्योतिष्टोमं प्रकृत्य श्रूयते-(१)"अथैष ज्योतिः" "(२)अथैष विश्वज्योतिः" (३)"अथैष सर्वज्योतिः।" "एतेन सहस्रदक्षिणेन यजेत, एतेन ऋद्धिकामो यजेते" ति; तथा(४)"अथैष गोः" (५)"अथैष आयु" रित्यादि च। तत्र किं ज्योतिष्टोमात् कर्मान्तराण्येवंसंज्ञकानि विधीयन्ते ? उत तस्यैवैताः संज्ञा? इति विचारः।

(सङ्गतिः)

पादाध्यायसङ्गती स्पष्टे। अनन्तरा तु सङ्ख्यावत् संज्ञायाः स्वसमानाधिकरणस्वाश्रयप्रतियोगिकभेदव्याप्तत्वरूपपृथक्त्वानिवेशित्वाभावान्न भेदकतेति पूर्वपक्षोत्थानात् प्रत्युदाहरणरूपा।

(पूर्वपक्षः)

तत्र "अथैष ज्योति" रित्यादीनि तावद्विभज्यमानसाकां-

---

१. ता. ब्रा. १६ ८. १. २ ता. ब्रा. १६, ९.१.
३. ता. ब्रा. १६. १०. १. ४. ता. ब्रा. १६. ३. १.
५. ता. ब्रा. १६. ४. १.

क्षत्वाभावात(१) त्रीणि वाक्यानि, "एतेन" इत्यनुषङ्गे प्रमाणाभावात् 'तस्मिन् सीदे'तिवच्चतुर्थमित्यप्यविवादम्। तत्र "अथैष ज्योति" रित्यादिवाक्येषु प्रथमान्तत्वादस्तीत्येतदध्याह्रियते। तेन च भेदकप्रमाणाभावात् प्रकृत एव यागोऽनूद्यते। तथाहि—न तावदत्र शब्दान्तरमस्ति, तस्य भावनामात्रभेदकत्वेनाऽसिद्धत्वात्, धातोश्च भावनानवच्छेदकत्वेनाऽभावात्। सिद्धे हि यागान्तरे तस्याऽप्राप्तत्वात् विधिः भावना वा कल्प्येत, न च तत्सिद्धिः शब्दान्तरन्यायप्रमाणिका। अत एव विधिपुनःश्रवणाभावाच्चाऽभ्यासोऽपि। सहस्रदक्षिणादिवाक्ये तत्सत्त्वेऽपि वाऽनन्यपरत्वाभावात् नाऽभ्यासता; ऋध्याख्यफलसम्बन्धपरत्वस्याऽपि स्वर्गवदुपपत्तेश्च। न च गुणः; ज्योतिरादिशब्दानां नामत्वस्य साधितत्वात्, गवादिशब्दानामपि दक्षिणात्वेन फलत्वेन च गवादीनां प्राप्तत्वात् तत्प्रख्यन्यायेनैव ज्योतिष्टोमनामत्वात्। न च गोस्तत्त्वेन प्राप्तावपि हविष्ट्वेन विधानोपपत्तेः प्रकृते च कर्मण्युत्पत्तिशिष्टसोमावरोधान्निवेशानुपपत्तेः भेदावश्यम्भाव इति वाच्यम्; गुणवाचिपदस्य नामधेयत्वेनाऽप्युपपत्तौ अपूर्वान्तरकल्पनानुबन्धिकर्मान्तरकल्पकत्वे प्रमाणाभावात्। न च वाजिनवत् कर्मणि प्रवृत्तिनिमित्ताभावः, गोसम्बन्धस्य प्राप्तत्वेन समिदादिवल्लक्षणया नामत्वोपपत्तेः। अतो न तावत् ज्योतिरादिपदवाच्यगुणस्य भेदकत्वम्। नाऽपि सहस्रद-

१. अत्रेदं चिन्त्यम्—ताण्ड्ये षोडशेऽध्यायेऽष्टमकण्डिकारम्भे "अथैष ज्योतिः" इति वाक्यं श्रूयते। नवमदशमयोः कण्डिकयोरादावग्रिमे वाक्ये। मध्ये बहुभिर्वाक्यैर्व्यवधानदेषामेकवाक्यत्वसंशयः कथमुदेति? यदभावबोधनार्थं विभज्यमानसाकाङ्क्षत्वाभावो हेतूक्रियत इति। अथ वा दक्षिणाफलवाक्यसहितं वाक्यत्रयमिदं कस्यां चिच्छाखायामेकत्रैव पठितं भवेत इति विभावनीयम्।

क्षिणादेः, तस्योत्पत्तिशिष्टगुणविरोधित्वात् भेदकत्वानुपपत्तेः । नाऽपि प्रकरणान्तरम्, अनुपादेयगुणाभावात् । ऋद्धिवाक्ये तत्सत्त्वेऽपि प्रकरणात् पूर्वपरामर्शितच्छब्दयोगाच्चोपस्थितिसत्त्वेनाऽसान्निध्याभावाच्च ।

नन्वधिकारार्थाथशब्दश्रुत्या कर्मान्तरविषयाधिकारावगमात् पूर्वकर्मप्रत्यभिज्ञाबाधेन प्रकरणस्य व्यापारासम्भवात्, एतच्छब्दस्य च जघन्यत्वेन दुर्बलत्वात्तदुपमर्दकत्वानुपपत्तेः, वस्तुतः तदादिसर्वनाम्नां पूर्वप्रकृतपरामर्शित्वेऽपि एतच्छब्दस्योभयसाधारण्येन सन्निहितप्रत्यक्ष एव प्रयोगानुसारेण शक्त्यवधारणात्, अथशब्दानुरोधेन वक्ष्यमाणपरामर्शित्वस्याऽप्युपपत्तेरसान्निधिसत्त्वेन तत्सहकृतफलरूपानुपादेयगुणस्य प्रकरणान्तरन्यायेन भेदकत्वोपपत्तिः । न चाऽत्राथशब्दस्याऽऽनन्तर्यार्थकत्वं शक्यते शङ्कितुम्, तव मते आनन्तर्यप्रतियोगिनः कर्मान्तरस्याऽसत्त्वेन तदर्थकत्वानुपपत्तेः, काम्यानां कर्मणां भिन्नप्रयोगविधिपरिग्रहेण क्रमासम्भवाच्च, उत्तरकालतामात्रस्य च प्राप्तत्वेनाऽथशब्दवैयर्थ्यापत्तेश्च।

अत एव पूर्वप्रकृतापेक्षत्वपरत्वस्याऽनुपपत्तिः, तद्धि संहत्य फलसाधनत्वाद्वा स्यादङ्गाङ्गिभावाद्वा ? अतिदेशसिद्ध्यर्थं वा ? नाऽऽद्यौ, नैरपेक्ष्येण फलसाधनत्वात् । नाऽन्त्यः, अथशब्दं विनाऽपि तत्सिद्धेः । अत एव पूर्वप्रकृतकर्मापेक्षित्वपरत्वानङ्गीकारेऽपि अनुवादार्थं पूर्वप्रकृतज्योतिष्टोमविध्यपेक्षित्वपरत्वं भविष्यतीत्यपास्तम् ; तदभावेऽपि "दध्ना जुहोती" तिवत् तत्सिद्धेः । अतः परिशेषात् "(१)अथ शब्दानुशासन" मितिवदधिकारार्थत्वावगमाद्युक्तमेव प्रकरणान्तरन्यायेन कर्मान्तरत्वमिति चेत्—

नः ज्योतिरादिसंज्ञकज्योतिष्टोमप्रयोगविशेषाधिकारार्थत्वेना-

---

१. व्याक. महाभा. १. १. १.

ऽयथशब्दस्य सार्थक्येन प्रत्यभिज्ञाविच्छेदानुपपत्तेः । तथाहि—

ज्योतिरादिसंज्ञास्तावदेताः ज्योतिष्टोमस्यैव, प्रकरणात्, तत्रैव वक्ष्यमाणरीत्या प्रवृत्तिनिमित्तसत्त्वाच्च । तथा चैतासां ज्योतिष्टोमसंज्ञया विकल्पेन सङ्कल्पादावुल्लेखः । अतश्च ज्योतिरादिसंज्ञोल्लेखयुक्तयागप्रयोगाधिकारार्थोऽथशब्दः । तत्प्रयोजनं च ज्योतिष्टोमसंज्ञोल्लेखयुक्तयागप्रयोगप्रत्यभिज्ञानोच्छेदात् तत्र सहस्रदक्षिणादिव्यावृत्तिः । एतदभावे हि सर्वप्रयोगेष्वेव तत् प्राप्नुयात्, सति त्वस्मिन् पूर्वाधिकृतानामेव प्रयोगविशेषाणामेतेनेत्यनेन परामर्शात् सहस्रदक्षिणादिकमपि तत्रैवेति सिद्ध्यति ।

अत एव सहस्रस्य द्वादशशतेनाऽष्टदोषदुष्टो विकल्पः कर्मैकत्वपक्षे प्रसज्यते, 'सहस्रदक्षिणेन यजेत' इत्येतावतैवार्थसिद्धेः वाक्यान्तराण्येतद्वाक्यगतश्चैतच्छब्दोऽनर्थकः स्यादित्यपास्तम् । तस्मादथशब्दस्य प्रयोगविशेषप्रत्यभिज्ञोच्छेदकत्वेऽपि कर्मप्रत्यभिज्ञोच्छेदकत्वाभावान्न प्रकरणान्तरन्यायेन कर्मान्तरत्वम् ।

अत एवाऽनुपादेयगुणाभावेऽप्यथशब्दमात्रेणैवास्तु भेद इत्यपास्तम् । न चाऽलमनङ्गीकृतभेदकप्रमाणोपन्यासेन, संज्ञयैव त्वत्र भेदोपपत्तेः कथं कर्मैक्यमिति वाच्यम्; संज्ञा हि संख्यावत् पृथक्त्वनिवेशित्वस्वाभाव्याद्वा भेदिका ? गुणवत् पूर्वकर्मण्यनिविशमानत्वाद्वा ? नाऽऽद्यः; संज्ञायास्त्वया पूर्वकर्मवाचित्वानभ्युपगमेन शक्तिसम्बन्धेनाऽपि पूर्वकर्मवाचित्वाभावाद्व्यासज्यवृत्तित्वाभावाच्च स्वसमानाधिकरणस्वाश्रयप्रतियोगिकभेदव्याप्तत्वरूपपृथक्त्वानिवेशित्वासम्भवात् ।

नच तथाविधपृथक्त्वनिवेशित्वासम्भवेऽपि द्वयोस्संज्ञयोः परस्पराश्रयाभिन्नवृत्तित्वव्याप्तत्वरूपस्य तस्य सम्भवः, घटकलशा-

दिपर्यायेषु द्वयोस्संज्ञयोरेकाश्रयत्वस्याऽपि दर्शनात् । नाऽन्त्यः; तथात्वे गुण एवान्तर्भावप्रसङ्गात् ।

किञ्चाऽनिविशमानत्वमपि किमनेकशक्तिकल्पनप्रसङ्गभिया, उत वैयर्थ्यप्रसङ्गेन ? नाऽऽद्यः; अनेकशक्तिकल्पनस्य कर्मान्तरत्वपक्षेऽपि तुल्यत्वात् ; प्रत्युत मम शब्दभेदात्तदाश्रितशक्तिभेदेऽप्यर्थस्यैकत्वात् तद्विषयैकत्वकल्पने लाघवम् । अन्यच्च कर्मान्तरापूर्वान्तरभावनान्तरतद्वाचकविधिवाचकपदकल्पनाभावाल्लाघवम् । ज्योतिरादिवाक्येषु हि प्रकृतं ज्योतिष्टोममेतच्छब्देनाऽनूद्य विद्वद्वाक्यवत् सहस्रदक्षिणादिव्यवस्थाफलकज्योतिरादिसंज्ञामात्रं क्रियत इति न विधिभावनावाचकपदापेक्षा ।

वस्तुतस्तु ज्योतिष्टोमपदेऽपि ज्योतींषि स्तोमा यस्मिन् इत्यन्यपदार्थस्य यागस्य लक्ष्यत्वात् सर्वज्योतिर्विश्वज्योतिःपदयोरपि तथैव यागस्य लक्षणीयत्वात् ज्योतिःपदेऽपि च भामा सत्यभामेतिवत् स्वार्थवाचकपदघटितपदगम्यत्वसम्बन्धेन "वसन्ते वसन्ते ज्योतिषा यजेते"ति वद्यागस्य लक्षणीयत्वावगतेः । अन्यथा तत्रापि कर्मान्तरत्वापत्तेर्दुर्निवारत्वात् । आयुर्गोपदयोरपि च स्वशक्यसम्बन्धेन लक्षणावगतेर्न काऽपि शक्तिकल्पनाप्रसङ्गः । तवैव परमुक्तशक्यसम्बन्धानां यागकल्पनातः पूर्वमप्रसिद्धत्वात् शक्तिकल्पनेति गौरवम् । नान्त्यः; सहस्रदक्षिणादिव्यवस्थाफलकत्वेन सार्थक्यस्योक्तत्वात् ।

किञ्च तव मते संज्ञात्वासिद्धावेव प्रमाणाभावः । न तावद्बुद्धिन्न्यायः, रूढत्वेन तुल्यवद्वृत्तिकत्वाभावात् । नाऽपि वाक्यभेदः; गुणान्तरानुपादानात् । तत्प्रख्यन्यायस्तु कर्मान्तरसिध्युत्तरकालं सम्भवन्नपि ततः पूर्वमनुपस्थितेर्न नामधेयत्वबोधक इति कथं तद्बोधात् कर्मान्तरत्वबोधः ? । न च कर्मा-

न्तरे प्रवृत्तिनिमित्तमस्ति, उक्तप्रवृत्तिनिमित्तस्य ज्योतिष्टोमैकविषयत्वात् । अतो धर्मिग्राहकप्रमाणेन सिद्धस्य संज्ञात्वस्य ज्योतिष्टोमविषयत्वावधारणान्न संज्ञयाऽपि भेदसिद्धिः । तेन सिद्धं भेदकप्रमाणाभावान्न कर्मान्तरमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते–भेदकान्तराभावेऽपि संज्ञाया एव भेदकत्वात् कर्मान्तरत्वसिद्धिः । तथा हि संज्ञात्वमेव तावदेवं सिद्ध्यति—ज्योतिरादिशब्दास्तावन्न ज्योतिष्टोमे गुणविधयः, उत्पत्तिशिष्ट(१)सोमावरोधेन तत्र गुणविधानासम्भवात्; अतः कर्मान्तरत्वापेक्षया लघुभूतं संज्ञात्वं तावत्प्रथमतोऽवधार्यते । तच्च यद्यपि प्रकृतत्वात् प्रवृत्तिनिमित्तावगमाच्च ज्योतिष्टोमविषयकत्वेनैवाऽवधारितम्, तथाऽपि वक्ष्यमाणरीत्या तद्विषयकत्वबाधेऽपि न संज्ञात्वस्याऽपि बाधः । न हि ज्योतिष्टोमविषयकत्वाभावव्याप्तः संज्ञात्वाभावः, अन्यविषयिण्या अपि संज्ञायास्सम्भवात् । अतश्चाऽन्यविषयत्वासम्भवनिश्चयाभावदशायां संज्ञात्वं पूर्वं प्रमितं बाधकाभावेनाऽवतिष्ठमानं पूर्वविषयासम्भवाद्विषयान्तरं स्वसङ्गतये कल्पयतीति युक्तः संज्ञाप्रमाणको भेदः ।

न च कर्मान्तरे प्रवृत्तिनिमित्तानवगम एवाऽन्यविषयत्वासम्भवनिश्चायकस्सन् भवति बाधकः, अग्निहोत्रवत्पूर्वं प्रवृत्तिनिमित्तानवगमेऽपि वक्ष्यमाणरीत्या कर्मान्तरबोधोत्तरकालमवगमसम्भवात् । अत एव उत्पत्तिवाक्ये इष्टसामान्यस्येव पूर्वं सामान्यतः किञ्चिदस्य प्रवृत्तिनिमित्तं भविष्यतीत्यवधार्य संज्ञात्वे निर्णीते ततो भेदावधारणोत्तरं तद्विशेषनिश्चये नैव बाधकं पश्यामः

१. सोमावरोधादिनेति. ख. पु.

न चाऽवधारितेऽपि कर्मान्तरे ज्योतिरादिपदानां तत्र गुणविधित्वोपपत्तौ संज्ञात्वे प्रमाणाभावः । अतश्च कर्मान्तरत्वावधारणात्पूर्वं निश्चितमपि संज्ञात्वं उत्तरकालं गुणविधित्वोपपत्त्या बाध्यताम्, अतश्च वाजिनवत् परं गुणादेव कर्मभेद इत्यवधार्यतामिति वाच्यम् । विशिष्टविधिगौरवभिया गुणविधित्वाभावनिश्चयेन संज्ञात्वे बाधकाभावात् । एवं सत्यपि यदि सोमवाजिनवदत्र प्रवृत्तिनिमित्ताभावोऽवधार्येत, ततो विशिष्टविधिगौरवापादकमपि गुणविधित्वमेव निश्चित्य संज्ञात्वं बाध्येत, न तु तदस्ति। अतो यत्र संज्ञात्वं पूर्वं प्रमितमुत्तरकालमपि च न बाध्यते तत्र संज्ञया भेदः, अन्यत्र तु गुणादिति विवेकः।

किं पुनरत्र प्रवृत्तिनिमित्तम् ? तदुच्यते–ज्योतिश्शब्दादीनां तावत् द्योतते(?) "द्युतेरिसिन्नादेश्च ज" इत्यौणादिके इसिन्प्रत्यये कृते आदिभूतस्य दकारस्य जादेशाज्ज्योतिश्शब्दव्युत्पत्त्यवगतेः स्वफलसाधनतया द्योतनरूपमुख्यार्थयोगेनैव ज्योतिश्शब्दप्रवृत्तिः समस्तफलसाधनत्वाच्चेतरयोरपि द्रष्टव्या ।

यद्यपि चेदं प्रवृत्तिनिमित्तमतिप्रसक्तम्, तथाऽपि कर्मान्तरे रूढिकल्पनया प्राचीनप्रयोगस्य सहकारिकारणत्वकल्पनया वा नाऽतिप्रसङ्गः । गवादिशब्दानां त्वतिदेशप्राप्तगोसम्बन्धेन वाक्यान्तरप्राप्तायुःफलसम्बन्धेन च लाक्षणिकत्वात् प्रवृत्तिनिमित्तोपपत्तिः । ज्योतिरादिपदेष्वपि वाऽतिदेशेन ज्योतिःपदगम्यत्रिवृदादिसमस्तस्तोमसम्बन्धात् लाक्षणिकत्वोपपत्तिः । अतः कर्मान्तरेऽपि प्रवृत्तिनिमित्तस्य सत्त्वात् संज्ञात्वनिश्चयोपपत्तेः युक्तं तत्प्रमाणकं कर्मान्तरत्वम् । न च संज्ञात्वसिद्धावपि तस्योक्तविधया ज्योतिष्टोमविषयत्वस्यैवोपपत्तौ विषयान्तरकल्पक-

---

१. पा. उ. सू. १२७ ।

त्वानुपपत्तिः, प्रकृतसोमयागस्य ज्योतिष्टोमसंज्ञावरुद्धत्वेन संज्ञान्तरविषयत्वानुपपत्तेः । तथा हि—

संज्ञाकार्यस्य व्यवहारस्यैकेनैवोपपत्तौ संज्ञान्तरस्य तावद्वैयर्थ्यमेव । न च विनिगमनाविरहाद्वैकल्पकी व्रीहियवादिवद्व्यवहारहेतुता, अथशब्देन सोमयागाधिकारविच्छेदार्थकेन विनिगन्तुं शक्यत्वात् । सोमयागाधिकारवर्तिनी हि संज्ञा तद्विषयिणीति शीघ्रं निश्चीयते, न विच्छिन्नाधिकारिकेति कथं विनिगमनाविरहः ? न चाऽथशब्देन पूर्वसंज्ञावच्छिन्नप्रयोगस्यैवाऽधिकारविच्छेदात् तदनुरोधेन चैतच्छब्दस्य संज्ञान्तरयुक्तप्रयोगपरामर्शित्वावगतेः तत्र सहस्रदक्षिणादिव्यवस्थार्थत्वेन संज्ञान्तरसार्थक्यमिति वाच्यम् । कर्मण एव प्रधानत्वेन पुरस्स्फूर्तिकस्याऽथशब्देनाऽधिकारविच्छेदात् , सर्वनाम्नामुपस्थितार्थमात्रपरत्वेनैतच्छब्दस्य ज्योतिरादिपदवाच्यकर्ममात्रपरामर्शित्वावगतेः, अव्युत्पत्तिसिद्धसंज्ञायुक्तकर्मप्रयोगपरामर्शित्वाङ्गीकारस्याऽयुक्तत्वाच्च । न हि घटोऽस्ति एनमानयेत्यादौ घटपदयुक्तस्य सर्वनाम्ना परामर्शः क्वचित् दृष्टः । अतः सहस्रदक्षिणादिव्यवस्थाफलकत्वासम्भवात् कर्माधिकारविच्छेदार्थकेनाऽथशब्देन पूर्वसंज्ञातो ज्योतिरादिसंज्ञानां विलम्बितत्वावधारणान्न व्रीहियवादिवद्विकल्पोपपत्तिः ।

अत एव यत्र न किञ्चिन्नियामकं लभ्यते तत्र विकल्पोऽङ्गीक्रियत एव । यथा—"वैश्वानरो ज्योतिष्टोमः प्रायणीयमहर्भवति" इत्यत्र वैश्वानरप्रायणीयपदयोः । अत्र हि वैश्वानरदेवत्यग्रहणाम्नानाद्यागेऽपि प्रसङ्गेन तद्देवताजन्योपकारलाभाद्वैश्वानरपदवाच्यत्वोपपत्तेः वैश्वानरपदं तत्प्रख्यन्यायेन नामधेयम् । प्रायणीयपदमपि प्राथम्यगुणयोगेन । एतयोश्च वि-

निगमनाविरहेण द्वयोरप्येकस्मिन्नेव कर्मणि निवेशावगमादेक-संज्ञावरुद्धे संज्ञान्तरस्य वैयर्थ्यमित्येवंविधस्य च संज्ञाभेदकत्व-न्यायस्याऽभावेन कर्मान्तरबोधकत्वासम्भवात् अगत्या व्रीह्या-दिवत् सङ्कल्पादावेकस्या उल्लेख इत्येवंविधो विकल्प एव। ज्यो-तिष्टोमपदं तु ज्योतिष्टोमविध्यन्तप्रतिप्रसवार्थं सन्नामातिदेशकम्। एतदभावे हि गणत्वसामान्याद्द्वादशाहविध्यन्त एव प्राप्नुयात्, न ज्योतिष्टोमविध्यन्त इति विरोधे तस्यैव प्राप्त्यर्थं ज्योतिष्टोम-पदम्। तेन यत्र पूर्वस्मिन् कर्मण्येकसंज्ञावरुद्धेऽपि संज्ञान्तरस्य कार्यान्तरकल्पनया सार्थक्यम्, यत्र वा विनिगमनाविरहेण द्वयोरपि विकल्पः तत्र संज्ञायाः कर्मभेदकत्वाभावेऽपि यत्र पूर्व-कर्मण्येकसंज्ञावरुद्धे संज्ञान्तरस्य वैयर्थ्यप्रसङ्गः तत्र तेन स्ववि-षयसिद्ध्यर्थं कर्मान्तरकल्पनाऽऽवश्यक्येव। अस्ति च प्रकृते ज्यो-तिष्टोमसंज्ञाया उत्पत्तिशिष्टत्वाभावेऽप्यविच्छिन्नेऽधिकारे समाम्ना-नेन तया शीघ्रमवरोधः, ज्योतिरादीनां च विच्छिन्नेऽधिकारे समाम्नानात् कार्यान्तराभावाच्च वैयर्थ्यप्रसङ्गेन तैरनवरोधः।

अत एव "वसन्ते वसन्ते ज्योतिषा यजेत" इत्यत्राऽविच्छिन्ने-ऽधिकारे समाम्नानात् ज्योतिस्संज्ञायाश्च ज्योतिष्टोमसंज्ञैकदेशत्वेन तदानुगुण्यान्न कर्मान्तरत्वम्। न वा "अथैष ज्योति"रित्यस्यैव निमित्तसम्बन्धः, अपि तु ज्योतिष्टोमस्यैव। अत एव यत्र तदानु-गुण्यम्, यथा—उद्भिदादौ, तत्र पूर्वसंज्ञावरुद्धे सोमयागे उद्भि-त्संज्ञायाः कथमपि सार्थक्यासम्भवादसत्यप्यधिकारविच्छेदे संज्ञया केवलयैव कर्मान्तरत्वसिद्धिः।

न च तत्र द्वयोरपि संज्ञयोरुत्पत्तिशिष्टत्वाभावा-विशेषाद्विकल्पो वैपरीत्यं वा किं न स्यादिति वाच्य-म्; ज्योतिष्टोमपदप्रवृत्तिनिमित्तस्य त्रिवृदादिस्तोमसम्बन्ध-

स्य(१) "ग्रहं वा गृहीत्वे" ति वचनेन सोमयोग शीघ्रं बुध्यमानत्वात् । अतः क्लृप्तप्रवृत्तिनिमित्तज्योतिष्टोमसंज्ञावरुद्धे सोमयागे उद्भित्संज्ञायाः सार्थक्यासम्भवाद्युक्तं तया कर्मान्तरत्वम् ।

न चैवं गुणान्तर्भावः शङ्कनीयः, संज्ञाया हि पूर्वस्य कर्मणो नियमेन तत्कार्ये नैराकांक्ष्यावगमे सत्येव स्ववैयर्थ्यभिया भेदकत्वम्, गुणे तु पूर्वकर्मणो नैराकांक्ष्यनियममनादृत्य तत्र स्वस्याऽनिविशमानत्वमात्रेणैव भेदकत्वम् । न हि वाक्यभेदापादकगुणभेदस्थले पूर्वस्य विद्वद्वाक्यविहितस्य कर्मणो नैरपेक्ष्यं सम्भवति । अतो निवेशासम्भवेन गुणस्य भेदकता, वैयर्थ्येन तु संज्ञाया इति वैलक्षण्यम् । तस्मात्सिद्धः संज्ञया कर्मभेदः ।

एवं च तत्तद्विजातीययागत्वप्रकारकयागविशेष्यकशाब्दत्वावच्छिन्नं प्रति प्रवृत्तिनिमित्तसम्बन्धेन तत्तत्पदवत्ताज्ञानस्य कारणत्वकल्पनाल्लाघवम् । अन्यथा कर्मान्तरत्वानभ्युपगमात् तत्पदवत्ताज्ञानाभावेऽपि पदान्तरवत्ताज्ञानेन तद्विशाकार्यतावच्छेदकावच्छिन्नजननात् व्यभिचारापत्तेः । घटकलशादिपर्यायवत्तु तत्तत्पदश्रवणाव्यवहितोत्तरतादृशशाब्दत्वावच्छिन्नं प्रति तत्तत्पदवत्ताज्ञानस्य कारणत्वमिति कल्पनात् कार्यतावच्छेदके गौरवापत्तेः । अतः "अथैष ज्योति"रित्यादिषु त्रिषु वाक्येषु त्रीणि कर्माणि तत्तत्संज्ञानि विधीयन्ते । तेषां च यागरूपत्वं अव्यक्तत्वसादृश्यप्रमाणकातिदेशोत्तरं गुणवाक्ये यागानुवादाद्वा निश्चीयते । तानि च कर्माण्येतच्छब्देऽनूद्य सहस्रदक्षिणाविधानम् । फलवाक्ये च तेषां फले विधानम् । एतेनेत्येकवचनं च समुदायाभिप्रायेण राजसूयवत् बहुत्वलक्षणार्थम् । विश्वज्योतिरादिवाक्ययोश्चाऽथशब्दो न पूर्वयागाधिका-

१. तै. सं. ३. १. २.

रविच्छेदकः, अपि तु यागान्तरोत्पत्त्यधिकारार्थः। अन्यथा पूर्वयागे फलकल्पनापत्तेः । सर्वथा सिद्धो भेदः ।

प्रयोजनं पूर्वपक्षे सहस्रदक्षिणायाः प्रकृतिभूतसोमयागाङ्गत्वादाद्यप्रयोगेऽपि तदनुष्ठानम्, सिद्धान्ते तु विकृतिविशेषाङ्गत्वान्नेति द्रष्टव्यम् ।

सूत्रं तु संज्ञाऽपि भेदिका, उत्पत्तावेव संज्ञान्तरेण संयोगादिति व्याख्येयम् ।

इत्यष्टमं संज्ञाधिकरणम् ॥ ८ ॥

अथ नवमं गुणाधिकरणम् ॥ ९ ॥

गुणश्चाऽपूर्वसंयोगे वाक्ययोस्समत्वात् ॥ २-२-२९ ॥

(विषयसंशयौ)

चातुर्मास्येषु वैश्वदेवे पर्वणि "वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन"मिति श्रुतम् । तत्राऽमिक्षावाक्ये तावत् प्राप्तकर्मानुवादेन द्रव्यदेवतारूपानेकगुणविधानाद्वाक्यभेदापत्तेः पौर्णमास्यधिकरणे प्रसङ्गादुक्तेन वाक्यभेदापादकेन गुणेनैव कर्मविधित्वमविवादम् । वाजिनवाक्ये तु किं पूर्वयागानुवादेन द्रव्यदेवतान्यतरविधिः, उत कर्मान्तरविधिरिति विचार्यते ।

(सङ्गतिः)

पादाध्यायसङ्गती पूर्ववत् । अनन्तरा तु सत्यप्यसम्भववैरूप्यर्थाभ्यां संज्ञागुणयोरवान्तरभेदे अनिविशमानत्वसाम्यात् संज्ञाविचारानन्तरं गुणविचार इति सङ्गतिः ।

(पूर्वपक्षः)

तत्र यद्यपि वाजिपदमश्वे प्रसिद्धम्, तथापि तेषां चतुर्थ्युपात्तदेवतात्वेनाऽप्रसिद्धत्वात् वाजिपदस्य यौगिकत्वावगतेः वाजमन्नं विद्यते येषां त इति व्युत्पत्त्या वाजिशब्दस्याऽऽमिक्षारूपवाजरूपान्नयोगेन पूर्वोपस्थितविश्वदेवपरत्वावगतेः तत्सम्बन्धेनैवाऽत्र वाजिनं द्रव्यं विधीयते, न त्वपूर्वदेवतासम्बन्धेन । ततश्च द्रव्यदेवतासम्बन्धाद्यागः कल्प्यमानो नाऽपूर्वः कल्प्यते, किन्तु विश्वदेवदेवत्ययागमेव कल्पितयजिपदेनाऽनूद्य तत्र वाजिनं विधीयते, ततश्च विवक्षितगत्या वाजिपदं कल्पितयजिपदस्याऽऽमिक्षायागतात्पर्यग्राहकमित्येवं द्रष्टव्यम् । अत एव विश्वदेवदेवत्ययागोद्देशेन वाजिनविधानात् विशिष्टोद्देशे वाक्यभेदोऽपि नाऽऽशङ्क्यः, यजिपदस्यैव तात्पर्यग्राहकानुरोधेन विजातीययागपरत्वाङ्गीकारात् । कल्पितयाजिपदेन वाजिनान्वयाङ्गीकारादेव च कारकसम्बन्धप्रसङ्गात् चतुर्थ्यन्तवाजिपदानन्वयोऽप्यनाशङ्क्यः ।

न च तात्पर्यग्राहकस्याऽपि वाजिपदस्य वाजिसम्बन्धाविशेषेण प्रकृतसर्वदेवतोपस्थापकत्वापत्तेः बहुवचनस्याऽधिष्ठानाभिप्रायकत्वाङ्गीकारेऽपि चाऽप्रकृतमन्त्रदेवतोपस्थापकत्वस्याऽऽप्यापत्तेरामिक्षायागमात्रतात्पर्यग्राहकत्वानुपपत्तिरिति वाच्यम्; वाजिशब्दस्य सर्वनामार्थकत्वात् तस्य चाव्यवहितपरामर्शकत्वसम्भवे व्यवहितपरामर्शकत्वस्याऽव्युत्पत्तिसिद्धत्वात्, विश्वदेवमात्रोपस्थापकत्वसम्भवेनाऽऽमिक्षायागतात्पर्यग्राहकत्वोपपत्तेः ।

न चैवमुत्पत्तिशिष्टद्रव्यावरोधेनाऽनिवेशः शङ्क्यः, साक्षाद्वचनेनैव तस्मिन्यागे वाजिनविधानात् । अतश्च यथैव तस्मिन्यागे वाजिनमिति वाक्ये सति नोत्पत्तिशिष्टप्राबल्यमभ्युपगन्तुं शा-

चयम्, वचनस्यातिभाराभावात्, तथैवाऽत्रापीति द्रष्टव्यम्। तेना ऽऽमिक्षयाऽपि सह वाजिने समुच्चयो विकल्पो वा। यदि तात्पर्यग्राहके वाजिपदे वाजरूपाया आमिक्षायाः विशेषणत्वं ततः समुच्चयः, यद्युपलक्षणत्वं ततो विकल्प इति द्रष्टव्यम्।

अथवा अस्तु वाजिनपदमामिक्षायागनामधेयम्, वाजिनस्याऽऽमिक्षानुनिष्पन्नतया शकुललोहितादिवच्चद्यागसम्बन्धित्वेन प्राप्तत्वात्। अतश्च तत्प्रख्यन्यायेन वाजिनपदेनाऽऽमिक्षायागमात्रमनूद्य वाजिदेवता उत्पन्नशिष्टाऽपि वचनाद्विधीयते। न च वाजिशब्दार्थस्य न देवतात्वम्, तत्त्वेनाऽप्रसिद्धेरिति शङ्क्यम्, तत्त्वेनाऽप्रसिद्धानामपि वसन्तादिवद्देवतात्वोपपत्तेः। एवञ्च वाजिपदस्य न रूढार्थत्यागोऽपि। न चाऽस्मिन् पक्षे यजिपदकल्पनाऽप्यावश्यकी, वाजिनपदेनैव तदुपस्थितेः। तस्मात् भेदकप्रमाणाभावात् प्रकृतहानाप्रकृतयागभावनापूर्वकल्पनाविशिष्टविधिगौरवाद्यभावाच्च कर्मैक्यमेव युक्तम्।

किञ्च सत्यप्युत्पन्नशिष्टत्वे यथा संख्यायाः पूर्वकर्मण्यनिविशमानाया अपि न स्वसङ्गतये कर्मोत्पत्तिपरत्वम्, अपि त्वभ्यासापादनेन तत्रैव निवेशः, तथा गुणस्याऽप्यभ्यासापादनेन विकल्पसमुच्चयाभ्यां वा तत्रैव निवेशोपपत्तेः न स्वसङ्गतये कर्मोत्पत्तिपरत्वम्। अन्यथा हि(१) तत्रापि(२) तदापत्तेः इति प्राप्ते।

(सिद्धान्तः)

अभिधीयते—स्ववाक्योपात्तयोः द्रव्यदेवतयोः वाक्यान्तरोपात्तद्रव्यदेवतापेक्षया शीघ्रोपस्थितिकत्वेन ताभ्यामेव यागस्य नैराकांक्ष्यप्रतीतेः न वाक्यान्तरोपात्तयोः तत्र निवेशो युक्तः। न चोत्पत्तिवाक्ये वैशिष्ट्यप्रतीत्या नैराकांक्ष्यावगमेऽपि

(१) वा. इति ख. ग. घ.। (२) तत्रापि इति घ पु.।

विशेष्यमात्रस्याऽनुवादादाभिधानिकाकाङ्क्षोपपत्तेः वास्तविक्या अपि च तद्बलेन कल्पनादुत्पन्नाशिष्टस्याऽपि निवेशोपपत्तेः; क्लृप्ताकाङ्क्षाहेतुकसम्बन्धेन कल्प्याकाङ्क्षाहेतुकसम्बन्धस्य द्रव्यदेवतस्यैवमपि बाधोपपत्तेश्च; वाजिनवाक्यस्थयजेरधिकाराख्यप्रकरणसापेक्षस्य प्रकृतयागोपस्थापकत्वात् तदनपेक्ष्यैवोपस्थापकस्याऽऽमिक्षावाक्यस्थस्य यजेः द्रव्यदेवतापदान्वये सन्निकर्षाच्च।

किञ्चोभयत्रापि यजिकल्पकत्वमात्रपक्षे द्रव्ये देवतासम्बन्धः, स चामिक्षायामेकपदोपादानात् प्रतीयते, वाजिनस्य तु पदान्तरोपादानादिति विप्रकर्षः। तथाहि—"वैश्वदेवी"ति तद्धिते तावद्विश्वे देवाः प्रातिपदिकार्थः, तद्धितार्थस्तु देवतात्वविशिष्टो द्रव्यविशेषो यः प्रकृतः, तद्धितस्य "साऽस्य देवते"ति सर्वनामार्थे स्मरणात्। सर्वनाम्नां हि बुद्धिस्थप्रकारावच्छिन्नबोधकत्वमनुभवसिद्धम्, अतश्च लाघवेन शक्तिकल्पनायां बुद्धिस्थप्रकारे एव घटत्वादौ तद्व्यक्तित्वादौ वा शक्तिः, न तु तदवच्छिन्नेऽपि, तस्य व्यक्तिन्यायेन लाभोपपत्तेः। अत एवामिक्षापदसमानार्थकत्वं सर्वनाम्नामुक्तं वार्तिककृता। न चैवं बुद्धिस्थत्व एव लाघवात् शक्तिरस्तु? तस्य शाब्दबोधे मानाभावेन शक्तिविषयत्वानुपपत्तेः।

न चैवं तत्तत्प्रकाराणां युगपदनुपस्थितेः शक्तिग्रहासम्भवः शङ्क्यः, बुद्धिस्थत्वस्यैवैकस्य शक्तिग्रहे उपलक्षणत्वात्। शक्तिग्रहे उपलक्षणस्यैव शक्यतावच्छेदकत्वमित्युत्सर्गस्तु मानाभावादपोदित इति न कश्चिद्विरोधः। सर्वनामार्थे च देवतात्वविशिष्टे तद्धितस्य शक्तिः। तथाहि—तद्धितपदश्रवणोत्तरं तावत् तद्बोध इत्यवश्यमङ्गीकर्तव्यम्, इतरथा देवतात्वमात्रबोधे आमिक्षापदसमानाधिकरण्यानुपपत्तेः, अतश्च सर्वनामार्थबोधस्याऽप्यावश्य-

कत्वात् तत्रापि शक्तिः । न च तस्य व्यक्तिन्यायेन बोधसम्भवः, तथात्वे (१)"साऽस्य देवते"ति सर्वनामार्थकत्वानुशासनवैयर्थ्यापत्तेः । तदा हि (२)"सम्प्रदाने चतुर्थी"तिवद्देवतायां तद्धित इत्येवानुशिष्येत ।

एतेन देवतात्वस्य प्रकृतिप्रत्ययार्थसंसर्गबलादेव भानोपपत्तेः सर्वनामार्थ एव तद्धितस्य शक्तिरङ्गिक्रियतामिति निरस्तम्, संसर्गविधया भासमानस्य पदार्थानुशासनप्रवृत्तेरनुशासनानुपपत्तेः । अतो देवतात्वविशिष्टसर्वनामार्थ एव तद्धितस्य शक्तिः । सर्वनामार्थस्य देवतात्वं प्रति विशेष्यतायां च विभक्त्यर्थान्वय एव बीजम् । विश्वेदेवास्तु सेत्यनुशासनेनाऽनुशिष्टा अपि न तद्धितार्थः, प्रकृतिपदार्थत्वात् । तस्य चाऽऽश्रेयत्वं देवतात्वे संसर्गः । देवतात्वस्य च निरूप्यत्वं सर्वनामार्थे वैशिष्ट्यमिति प्राञ्चः ।

अस्तुवा देवतात्वस्यैव वा तद्धितवाच्यता, सर्वनामार्थस्य तु व्यक्तिन्यायेन बोधः, सर्वनामार्थ एव शक्तिः, देवतात्वे कृदन्त इव कृतौ निरूढलक्षणा ; अनुशासनस्याऽबोधव्युदासमात्रफलकत्वेन निरूढलक्षणाज्ञापकत्वेन वोपपत्तेः । दृष्टं हि तादृशमप्यनुशासनं "कर्माणि षष्ठी"त्यादि । तेन सर्वथा द्रव्यविशेषप्रत्ययस्य तद्धितपदादेव जायमानत्वादेकपदोपात्तस्तत्र द्रव्यदेवतासम्बन्धः । न चैवमामिक्षापदवैयर्थ्यं शङ्क्यम्, तेनाऽऽमिक्षात्वानुपस्थितौ तद्धितस्य बुद्धिस्थप्रकारवाचिनस्स्वार्थबोधकतानुपपत्तेः । तेनाऽऽमिक्षापदं तात्पर्यग्राहकं सत्तद्धितपदार्थबोधे व्याप्रियत इति देवताया आमिक्षासम्बन्धोऽपि तद्धितान्तपदार्थोपस्थितिवेलायामेवेति न तस्य वाक्यीयत्वम् ।

१. पा. सू. ४. २. २४. २. पा. सू. २. ३. १३.

अस्तु वा तद्धितान्तपदमात्रश्रवणे आमिक्षापदाश्रवणेऽपि द्रव्यविशेषसंशयोत्पादात् तद्धितान्तपदादेवाऽनिर्धारितद्रव्यविशेषप्रतीतिः, आमिक्षापदं च पश्चादेव तन्निर्धारणार्थमिति न तस्य तद्धितपदार्थोपस्थितौ व्यापार इति, तथाऽप्यामिक्षापदस्य विशेषान्तरव्यावृत्तिमात्रफलकत्वेनाऽनिर्धारितद्रव्यविशेषे देवतासम्बन्धस्य पदश्रुतिमात्रप्रमाणकत्वमव्याहतम्। वाजिभ्य इति चतुर्थीपञ्चमीसाधारणत्वाच्छब्दत एव तावत्सन्दिग्धम्, कथञ्चिच्चतुर्थीत्वेन निर्णीयते, चतुर्थ्यपि च सम्प्रदानत्वमात्रवाचिनी प्रतिगृहीतृत्वासम्भवात् देवतात्वमेव तावल्लक्षणया वदेन्न तु द्रव्यसम्बन्धम्, देवता हि स्वपातिसम्बन्धिनं द्रव्यमाक्षिपेदर्थापत्तिविधया, न तु शाब्दबोधे तस्य भानम्, आक्षेपोऽपि च सर्वप्रमाणप्रवृत्त्यस्तमये भवेत्, अस्ति चाऽत्र वाजिनपदसमभिव्याहार एव तत्र प्रमाणम्, अतो वाजिभ्य इति पदात् तद्विषयिणी आकाङ्क्षैव केवलं भवेत्, न तु द्रव्यसम्बन्ध इति तस्य पदान्तरगम्यत्वादामिक्षासम्बन्धापेक्षया वाजिनसम्बन्धस्य विप्रकृष्टत्वम्। वाजिनपदस्य नामधेयत्वपक्षेऽपि च उपांशुयाजाधिकरणोक्तप्रकारेण तद्धितोपात्तदेवतात्वैः विश्वैः देवैरवरुद्धे यागे चतुर्थ्युपात्तदेवतात्वानां वाजिनां निवेशायोगो द्रष्टव्यः। उत्पत्त्युत्पन्नशिष्टादिबलाबलं च समस्त्येव। न च पक्षद्वयेऽपि तस्मिन्नेव यागे वाजिनमितिवदत्रामिक्षायागानुवादाभावे आनर्थक्यम्, कर्मान्तरविधानेनाऽपि चारितार्थ्यात्।

यच्चात्र संख्यावदभ्यासाद्यापादनेन पूर्वकर्मणि निवेश इत्युक्तम्, तद्द्वित्वादिसंख्यायाः पूर्वावधारितैकत्वादि संख्यासमानाधिकरणत्वस्वभावतया तथाङ्गीकारेऽपि गुणे तदभावान्न निवेशोपपत्तिः। कर्मस्वरूपे त्वेकत्वे सत्येवाऽभ्यस्ते तस्मिन्नेकादश-

त्वं निविशते । वाजिनस्य त्वामिक्षासामानाधिकरण्येनाऽनिवेशादभ्यस्तस्याऽपि पूर्वकर्मणस्तत्त्वानपायेनाऽऽमिक्षयाऽवरोधान्न वाजिननिवेश इति वैषम्यम् । अतो द्रव्यदेवतासम्बन्धकल्पितं यागान्तरमेव सान्नाय्यप्रकृतिकं आमिक्षानुनिष्पन्नवाजिनप्रतिपत्त्यर्थतया आमिक्षायागमात्राङ्गत्वेन विधीयते । गुणश्चाऽत्र पूर्वकर्मण्यनिविशमानो भेदकः । अनिवेशश्च क्वचिद्वाक्यभेदापत्त्या । तदुदाहरणं च प्रसङ्गात् पौर्णमास्याधिकरण एव दर्शितम् । क्वचिच्चैकप्रसरताभङ्गादिना तत्र तत्र वक्ष्यते । प्रकृते च सन्निकर्षविप्रकर्षादिभिः । अत एव पार्थसारथ्युक्तद्वैविध्यमप्येकप्रसरताभङ्गादेरपि गुण एवान्तर्भावात् नातीवाऽऽदर्तव्यमित्यप्युक्तं पौर्णमास्यधिकरणे ।

यत्त्वत्र न्यायसुधाभवदेवाभ्याम्—उत्पत्तिशिष्टैकहायन्यवरुद्धेऽपि क्रये "(१)वाससा क्रीणाती"त्यादिना वासःप्रभृतिद्रव्यान्तरविधानम्, न हि तत्रोत्पन्नशिष्टानां गुणानां निवेशोऽसम्भवी, आनतिरूपकार्यभेदात्; न चानतीनामेवैकसोमप्राप्तिजनकत्वेन विरोधसम्भवः, द्वारभूतस्य विक्रेतृमनस्समाधानस्यानेकैरपि जननेनाऽविरोधसम्भवात्; अत एव तेषां द्वादशे समुच्चय उक्तः, न च विनिगमनाविरहात् क्व क्रयविधिः क्व वा गुणमात्रविधिरिति निश्चयासम्भवः, एकहायनीवाक्ये अनेकगुणोपादानस्यैव नियामकत्वात् इत्युक्तम्; तन्न, सोमचमसादिवैकृतदक्षिणया प्राकृतदक्षिणाबाधस्य तन्त्रिदक्षिणया दक्षिणाप्रसङ्गसिद्धेश्च शतशो निरूपयिष्यमाणत्वेन विक्रेत्रानतिवशेन समुच्चयस्य वक्तुमनुचितत्वात् ।

अत एव विक्रेताऽपि ऋत्विग्वत्तादृश एव सम्पाद्येत, य

१. तै. सं. ६. १. ६

एकमात्रद्रव्यानतः । द्वादशोक्तस्तु समुच्चयो "दशभिः क्रीणाती"-ति वचनात् क्रयाणामेव सम्पद्यत इति न विरोधः । यदि तु क्रयैक्यमावश्यकम्, ततो "दशभिः क्रीणाती"ति वचनादेवो-त्पत्तिशिष्टद्रव्यावरोधेऽप्युत्पन्नशिष्टद्रव्याणां निवेशो वक्तव्यः।

वस्तुतस्तु उक्तवचनस्य क्रयसमुच्चयार्थत्वेनाऽप्युपपत्तौ द्रव्याणामवगतस्य परस्परनैरपेक्ष्यस्य गुणविधया क्रयभेदकत्वस्य च बाधे प्रमाणाभाव एव । तस्मात्सर्वत्रैव गुणस्य पूर्वकर्मसं-योगासम्भवे भेदकत्वम् । न च पूर्वकर्मनिवेशासम्भवेऽपि वैश्वदे-ववाक्यवत् भेदकत्वाभावः शङ्क्यः, विधायकत्वांशे आमिक्षावा-क्यस्य वाजिनवाक्यस्य च समत्वेनाऽनुवादकत्वशङ्कानुपपत्ते-रिति सूत्रार्थः ॥ २२ ॥

प्रयोजनं स्पष्टम् ॥

इति नवमं गुणाधिकरणम् ॥ ९ ॥

अथ दशमं गुणशेषाधिकरणम् ॥ १० ॥

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥ २-२-२३ ॥

यत्रोत्पत्तिवाक्ये गुणो नैव श्रूयते, उत्पन्नवाक्येषु चैकैक एव श्रूयते, यथा—दध्यादौ, तत्राऽपि कर्मैकत्वे विकल्पप्रसङ्गात् पूर्वकर्मनिवेशानुपपत्तेः तत्तद्गुणविशिष्टतत्तत्कर्मण एव तत्तद्वा-क्ये विधेयत्वावगतेर्युक्तो भेदः । न च विकल्पस्योत्तरकाली-नत्वात् पूर्वप्रमितविशेषणमात्रविधिलाघवेनाऽवगतस्य पूर्वकर्मनि-वेशस्य बाधानुपपत्तेः कथं भेदावगतिरिति वाच्यम् । अष्टदो-षदुष्टविकल्पानुरोधेन पूर्वप्रमितस्याऽपि निवेशस्य बाधोपपत्तेः ।

अन्यथा "नाऽनूयाजेषु ये यजामहं करोती"त्यादौ विकल्पप्रसङ्गेनाऽभाववाचिनो नञोऽन्योन्याभावलक्षकत्वमङ्गीकृत्याऽनूयाजभिन्नेष्विति पर्युदासाङ्गीकरणं न युज्यते। अतो विकल्पानुरोधेनाऽप्यनिविशमानत्वोपपत्तेः पूर्वाधिकरणवदेव युक्तो भेद इति प्राप्ते—

अभिधीयते—नाऽत्र पूर्वकर्मानिवेशः, गुणमात्रविधानेन तदुपपत्तेः। न च विकल्पप्रसङ्गस्तद्बाधकः, तस्य तत्तद्वाक्यार्थपर्यालोचनकालेऽनुदयेन फलमुखत्वात्। 'नानूयाजेष्वि'त्यत्र तु प्रतिषेधपक्षे तस्य प्राप्तिसापेक्षत्वात् प्रापकप्रमाणप्रवृत्त्युत्तरकालप्रवृत्तित्वावगतेः, तस्य च शास्त्रत्वेनाऽत्यन्तबाधायोगाद्विकल्पस्य वाक्यार्थबोधवेलायामेव प्रतीतेर्युक्तं तदनुरोधेन लक्षणाश्रयणम्।

वस्तुतस्तु अन्योन्याभाववत्यपि "तदन्यतद्विरुद्धतदभावेषु नञ्" इति प्रसिद्धेर्नञः शक्तिरेवेत्यनूयाजपदमनूयाजभिन्नलक्षकम्, नञ्पदं तात्पर्यग्राहकम्, प्रत्ययार्थान्वयानुरोधात्। अत एव प्रतिषेधापेक्षया पर्युदासो दुर्बल इति वक्ष्यते। प्रकृते तु दध्यादिविधीनामन्योन्यसम्बन्धानादरेण प्रधानविधिमात्रसम्बन्धिनामेकवाक्यार्थबोधवेलायामितरापेक्षाभावात् विकल्पस्योत्तरकालिकत्वमिति विशेषः।

न चैवमपि पाठक्रमेण प्रधानविधेरेकसम्बन्धावगमोत्तरमन्यसम्बन्धायोगात् वाजिनन्यायेन भेदोपपत्तिः, प्रधानविधेः पर्यायेणाऽङ्गताग्राहकत्वस्य(१)एकादशे निषेत्स्यमानत्वेन पाठस्याऽनियामकत्वात्। अत एव तादृशस्थलेऽनुष्ठानवेलायामप्यनियामकः पाठो नान्तरीयकत्वात् पारायणादावेवोपयुज्यत इति द्रष्टव्यम्। अतः सर्वेषां युगपत् सम्बन्धान्न वाजिनन्यायेनाऽपि भेदकत्वमिति।

---

१. पू. मी. ११. १. ८.

प्रयोजनं-पूर्वपक्षे दध्यादिहोमानां समुच्चयः, सिद्धान्ते दध्यादीनां विकल्प इति । अथवेदं सूत्रं वाजिनन्यायप्रत्युदाहरणमेव, न त्वधिकरणान्तरम् । सूत्रं स्पष्टम् ॥ २३ ॥

इति दशमं गुणशेषाधिकरणम् ॥ १० ॥

अथैकादशमिन्द्रियकामाधिकरणम् ॥ ११ ॥

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् ॥ २-२-२४ ॥

(विषयसंशयौ)

अग्निहोत्रं प्रकृत्य "दध्नेन्द्रियकामस्य जुहुया"दिति श्रुतम् । तत्र किं तस्यैव कर्मणो दधिविशिष्टस्य फले विधानम्? उत कर्मान्तरस्य दधिविशिष्टस्य? उत दध्न एव फले विधानं, होमस्त्वाश्रयत्वेन प्रकरणप्राप्तोऽनूद्यत? इति विचारः ।

(सङ्गतिः)

आद्यपक्षे भावनाभेदाभावादितरयोश्च गुणप्रमाणकस्य तस्य सत्त्वात् पादाध्यायसङ्गती स्पष्टे । अनन्तरा तु पूर्वसूत्रस्य प्रत्युदाहरणत्वपक्षे पूर्वाधिकरणोक्तवाक्यभेदापादकगुणस्याऽपवादादुद्रष्टव्या । न च तस्य पौर्णमास्यधिकरणे निरूपितत्वान्न पूर्वाधिकरणविषयत्वमिति वाच्यम् । गुणमात्रस्य पूर्वाधिकरणविषयत्वेऽपि प्रसङ्गादन्यत्र निरूपणे बाधकाभावात्, वाजिनवाक्येऽपि पूर्वयागानुवादेनोभयविधौ तस्य वक्तुं शक्यत्वाच्च । अधिकरणान्तरत्वपक्षेऽपि च "गुणस्तत्र प्रतीयेते"ति पूर्वसूत्रोक्ताया गुणस्य पूर्वकर्माङ्गताया अपवादादुद्रष्टव्या ।

(पूर्वपक्षः)

तत्रेन्द्रियकर्मिकायां भावनायां भावार्थाधिकरणन्यायेन होमस्यैव करणत्वोपपत्तौ न तावद् गुणस्य करणत्वोपपत्तिः। नाऽपि कर्मान्तरम्, भेदकप्रमाणाभावात्। तथा हि–भेदकप्रमाणानां मध्ये गुणस्त्वया भेदकत्वेन शङ्क्यते ? प्रकरणान्तरं वा ? नाऽऽद्यः; उत्पत्तिशिष्टगुणान्तराभावेन वाजिनन्यायेन तस्याऽभेदकत्वात्।

ननु तथाऽप्युत्पत्तिवाक्ये कर्मणः प्राप्तत्वात् तदनुवादेन फलसम्बन्धस्य गुणसम्बन्धस्य च विधौ वाक्यभेदापत्तेः तदापादकस्य गुणस्य भेदकत्वं भविष्यत्येव। न च गुणस्य "दध्ना जुहोती"त्यनेनैव प्राप्तत्वात् तद्वाचकपदस्याऽनुवादकत्वेन नामधेयत्वेन चोपपत्तेः केवलफलसम्बन्धमात्रकरणान्न वाक्यभेद इति वाच्यम्। अग्निहोत्रे द्रव्यान्तरस्याऽपि विहितत्वेनेन्द्रियकामप्रयोगे दध्नो नियमेन प्राप्त्यभावात् पाक्षिकानुवादकत्वनामधेयत्वयोरसम्भवेन विधेयत्वापत्तेः वाक्यभेदानिवारणात् गोदोहनादीनां कदाचिदपि प्राप्त्यभावेन एतत्परिहारानुपपत्तेश्चेति चेन्न; उत्पन्नस्याऽपि कर्मणः फलोद्देशेन विधेयत्वात्, तत्र गुणविशिष्टस्य विधानोपपत्तेः; अन्यथा "राजा राजसूयेने"त्यत्र प्राप्तस्याऽपि राजसूयस्य राजकर्तृविशिष्टस्य फले विधानानुपपत्तेः।

न च तत्र राजपदस्य स्वाराज्यकामपदसमभिव्याहारादधिकारिविशेषणत्वमात्राङ्गीकारान्नैतादृशवाक्यार्थाङ्गीकरणमिति वाच्यम्। तथात्वे उद्देश्यविशेषणत्वेन स्वाराज्यकामपदोपात्तपुंस्त्ववद्राजत्वस्याऽप्यविवक्षापत्तेः।

अत एव शुचित्वाहिताग्नित्वादीन्यपि तत्तत्प्रमाणप्रमितान्येव मिलित्वा स्वातन्त्र्येणाऽधिकारविधिं कल्पयन्ति, न तु

श्रूयमाणे विधौ विशेषणतां प्रतिपद्यन्ते । अतश्च राजत्वस्य कर्तृत्वेनैव यागविशेषणत्वस्य वाच्यत्वात् कर्तृविशेषणस्याऽपि चाऽर्थादधिकारिविशेषणत्वेन कल्पनोपपत्तेः फलोद्देशेन विशिष्टयागविधानादेव वाक्यभेदपरिहारो वाच्यः ।

न च राजत्वस्योपादेयकर्तृविशेषणत्वे तत्पदोपात्तस्य पुंस्त्वस्याऽपि विवक्षापत्तिः, प्रमाणान्तरेण स्त्रिया अप्यधिकारावगमेन "वसन्ते ब्राह्मणोऽग्नीनादधीते"तिवत् कस्यचिल्लिङ्गस्य साधुत्वार्थं वक्तव्यस्याऽवर्जनीयतया पुंस्त्वानुवादेन गौरवापादकविधेयताङ्गीकारानुपपत्तेः । अतो यथैव राजत्वविशिष्टस्य प्राप्तस्याऽपि राजसूयस्य फलोद्देशेन विधानान्न वाक्यभेदः, तथात्राऽपीति द्रष्टव्यम् । अवश्यं चाऽयं प्रकारः "त्रिवृदग्निष्टुदग्निष्टोम" इत्युत्पत्तिवाक्यप्राप्ताग्निष्टुत एव "वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो ह्येतेन यजेते"ति फलवाक्ये अग्निष्टोमकर्तृत्वत्तिवाय्वादिगुणविशिष्टस्य फलोद्देशेन विधानादङ्गीकर्तव्यः । दर्शपूर्णमासवाक्ये च साहित्यविशिष्टानां प्राप्तानामप्याग्नेयादीनां फले विधानात् । तस्मान्न तावत् गुणात् भेदः ।

अत एव फलरूपानुपादेयगुणयोगादनुपादेयगुणविशिष्टस्य कर्मणो मासाग्निहोत्रवदुत्सर्गतः प्राप्तस्य विधेयत्वस्याऽपवादकाभावात् प्रत्यभिज्ञायाश्च प्रणयनादिमात्रविषयिण्यो भिन्नविषयत्वेन गोदोहनाविशिष्टप्रणयनवृत्तिविधेयतापादकत्वायोगात् दध्यादावपि दधिमात्रविशिष्टहोमवृत्तिविधेयताया दशद्रव्यविशिष्टहोमविषयकप्रत्यभिज्ञयाऽपवादायोगस्य तुल्यत्वादनुपादेयगुणसहकृतानुपस्थितिरूपप्रकरणान्तरमेव मूलोक्तं भेदकं प्रत्युक्तम् । राजसूयादिस्थले विशेष्यमात्रप्रत्यभिज्ञायाः तन्मात्रवृत्त्युत्पत्तिविधिविषयतारूपविधेयताप्रतिबन्धत्वस्यैव प्रकृतेऽपि सम्भवात् ।

तस्मात् भेदकप्रमाणासम्भवेन कर्मान्तरत्वायोगात् तदेव कर्म गुणविशिष्टं फलोद्देशेन विधीयत इत्येकः पक्षः। तत्र पूर्वसूत्रमपि योजयितुं शक्यत इत्येवं योज्यम्–अगुणेऽपि कर्मप्रापके शब्द इति तत्र फलसम्बन्धकरणे गुणोऽपि वैशिष्ट्येन प्रतीयेतेति।

द्वितीयस्तु–गुण एव वाक्यभेदापादको भेदकः। तथाहि–विधिस्तावत् चतुर्विधः–उत्पत्तिविधिः विनियोगविधिः प्रयोगविधिरधिकारविधिरिसविवादम्। अङ्गान्यपि च कानिचिद्द्रव्यदेवतादीन्युत्पत्तौ, कानिचित् साहित्यादीनि विनियोगे, कानिचिच्च कर्तृदेशकालादीनि प्रयोगेऽन्वीयन्ते (१)इत्यप्येकादशे वक्ष्यते। अत एव द्रव्यादीनां प्रधानमात्रे कर्त्रादीनां च साङ्गे प्रधाने निवेशो लभ्यते। अत एव यत्रैकस्मिन्नेव वाक्ये विधिचतुष्टयं विधित्रयं विधिद्वयं वा तत्र पूर्वविशिष्टापरविध्यङ्गीकारेऽपि यथायोगमङ्गानामन्वयो द्रष्टव्यः। तदिह दध्नः उत्पत्तावन्वयायोग्यस्य विनियोगान्वयादिन्द्रियकामवाक्ये च तव मते विनियोगमात्रकरणेनोत्पत्त्यविधानाद्वैशिष्ट्यासम्भवेन प्राप्तोत्पत्त्यनुवादेन दधिविधिः, इन्द्रियोद्देशेन च होमविनियोगविधिरिति वाक्यभेदो दुरपह्नवः। देशादिवाक्ये तु साहित्यस्य विनियोगविधावन्वययोग्यत्वेन फलोद्देशेन विधेयविनियोगविशेषणत्वोपपत्तेः विशिष्टविधिसम्भवान्न भेदः।

एवं राजसूयवायव्यादिवाक्येष्वपि विषयस्य विशिष्टविधिसम्भवेन वाक्यभेदः परिहर्तव्यः। यद्यपि चाऽनुमत्यादीनां प्रत्येकं दैशिककालिकप्रयोगा देशकालविधिषु प्राप्ताः, तथाऽपि अप्राप्तकर्तृसम्बन्धेन प्रयोगान्तरविधिः कालसम्बन्धेन प्राप्तेऽपि दर्शपूर्णमासप्रयोगे समवाक्ये देशसम्बन्धेन प्रयोगान्तरविधि-

१. पू. मी. ११. २. १.

वन्नाऽनुपपन्नः । अयञ्चैकः प्रयोगो मुख्यकर्तृविषयः, प्रत्येकं दक्षिणाम्नानात्तु ऋत्विक्कर्तृविषया भिन्ना एव प्रयोगा इति द्रष्टव्यम्।

वायव्यवाक्येऽपि च क्त्वाप्रत्ययोपात्तस्य पूर्वकालत्वादेः प्रयोगविशेषणत्वात् न वाक्यभेद इत्युत्तराधिकरणे निरूपयिष्यामः । तस्माद्दधिवाक्ये वाक्यभेदसम्पादकस्य गुणस्यैव भेदकस्य सत्त्वात् कर्मान्तरत्वोपपत्तिः ।

न च रूपाभावाद्विधानयोग्यत्वम्, सत्यपि दर्वीहोमत्वे आकांक्षावशेन दधिद्रव्यहोमत्वसादृश्येन चाऽग्निहोत्रधर्मातिदेशोपपत्तेः । न दर्वीहोमानामपूर्वत्वमिति राजाज्ञा, कृत्स्नविधानत्वात् प्रकृतिविशेषनिर्णयाभावाच्च तदिति हि(१) वक्ष्यते । न चाऽत्र तद्द्वयमप्यस्ति, अतो रूपसत्त्वात् कर्मान्तरत्वमेव युक्तम् ।

सूत्रं तु-फले होमविनियोगस्य श्रवणात् तत्र च दध्याद्यन्वयायोगेन कर्मान्तरमेव विधेयं स्यात्। न च गुणफलसम्बन्धशङ्का, फलस्य भावार्थाधिकरणन्यायेन कर्मयोगित्वावगमादिति व्याख्येयम् ॥ २४ ॥

(इति पूर्वः पक्षः)

(अथ सिद्धान्तः)

अतुल्यत्वाद्वाक्ययोर्गुणे तस्य प्रतीयेत ॥२-२-२५॥

तत्र भावार्थाधिकरणन्यायो यत्र धात्वर्थादनुच्चारणं विधेः। तदपि च यत्र धात्वर्थमात्रमप्राप्तम्, धात्वर्थनामार्थावुभावप्राप्तौ, यत्र वोभौ सम्भवत्प्राप्तिकौ, प्राप्तौ वा, यथा-"अग्निहोत्रं जुहोति" "सोमेन यजेत" "उरुप्रथस्वेति पुरोडाशं प्रथयति"

१. भाट्टदीपिकायामष्टमाध्याये चतुर्थपादे ।

"ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेर-न्नि"त्यादौ। अत्र हि ऐन्द्रवायवाग्रतायाः पाठाद्ग्रहणानां च तत्तद्विधिभ्यः प्राप्तत्वेऽपि प्रजाफलसम्बन्धो ग्रहणानामेव भावार्थाधिकरणन्यायेनेति (१)दशमे वक्ष्यते।

यत्र तु नामार्थ एवाऽप्राप्तः तत्र तन्मात्रसंक्रान्तत्वाद्विधिशक्तेर्धात्वर्थविधाने गौरवापत्तेरन्यतः प्राप्तधात्वर्थानुवादमपेक्ष्य गुणमात्रं विधिर्विधत्ते। तत्र धात्वर्थांशे विधेयताया अभावेन प्रयोजनाकाङ्क्षत्वात् फलसम्बन्धस्य पक्षेऽप्यप्राप्तत्वेन प्रत्यासत्तेरनियामकत्वात् न भावार्थाधिकरणन्यायप्रवृत्तिरिति नामार्थस्यैव विधेयत्वेन प्रयोजनसाकाङ्क्षत्वात् फलसम्बन्धः स्वीक्रियते।

एवं नामार्थेष्वपि यत्र कश्चिदेवार्थोऽप्राप्तः अन्ये तु प्राप्ताः, तत्राऽपि तस्यैव फलसम्बन्ध इति द्रष्टव्यम्। अत एव "साकं प्रस्थायीयेन यजेत पशुकाम" इत्यादौ सहत्वमात्रं फलाय विधीयते; न तु यागः प्रस्थानं वेति (२)वक्ष्यते। तदिह धात्वर्थस्याऽन्यतः प्राप्तत्वात् गोदोहनादेश्च गुणस्याऽप्राप्तेः दध्यादेश्च नियमेनाऽप्राप्तेः तस्यैव फलसम्बन्धः।

यद्यपि च दधिहोमयोरुभयोरपि स्वरूपेण प्राप्तिः इन्द्रियसम्बन्धेन चाऽप्राप्तिस्तुल्या, तथाऽपीन्द्रियकामपदाभावे दधिनियमं कर्तुमारभमाणस्य विधेः दधिमात्रविषयत्वप्रतीतेः तस्यैव फलसम्बन्धात्। न च दधिनियमस्याऽपि "दध्ना जुहोती"त्यनेनैव प्राप्तत्वादैन्द्रवायवादिग्रहणवद्धात्वर्थस्यैव फलसम्बन्धो युक्त इति वाच्यम्। तथात्वे दधिपदस्य पाक्षिकानुवादत्वैयर्थ्यापत्तेः दधिविशिष्टधात्वर्थस्य फलसम्बन्धे गौरवापत्तेः दधिमात्रस्य फलसम्बन्धाङ्गीकारात्।

---

१. पू. मी. १०. ५. १८. २. पू. मी. २. ३. ४.

ऐन्द्रवायवाग्रत्वस्य तु शुक्राग्रत्वेन पाक्षिकानुवादाद्यापत्तावपि न फलसम्बन्धः, तथात्वे काम्यत्वेन बृहत्सामत्वपक्षेऽपि तदापत्त्या "यदि रथन्तरसामे"त्येतद्वाक्यावगताया रथन्तरसामकत्वाभावे ऐन्द्रवायवाग्रत्वाभावव्याप्तेर्भङ्गापत्तेः। अतस्तात्पर्यग्राहकानुरोधेन तत्र पाक्षिकानुवादत्वमङ्गीक्रियाऽपि धात्वर्थस्यैव फलसम्बन्धः, न तु प्रकृते। अतो दधिपदवाच्या दधित्वादिजातिरेव तल्लक्षितव्यक्तिर्वा फलार्थं विधीयते। तस्याश्चाऽऽश्रयत्वेन प्रकरणप्राप्त एव होमो जुहोतिनाऽनूद्यते प्रत्ययसाधुत्वाय। तथा हि—दध्यादेस्तावत् सिद्धरूपत्वेन न यागादिवत् क्रियान्तरानपेक्षस्य फलजनकत्वम्, तथात्वे विधिं विनाऽपि फलकामनायां सत्यां कारणस्य सत्त्वेन फलोत्पत्त्युपपत्तौ कारणविधिवैयर्थ्यापत्तिः। न हि कार्यकारणभावो विधिना जन्यते, अपि तु बोध्यते। न च तद्बोधस्य यागादाविव किञ्चित्फलमस्ति, तमन्तरेणाऽपि कारणस्य सत्त्वेन फलोपपत्तेः। अत एवेतिकर्तव्यताविषय एव परमुपयुज्यन्तां, न तु दधिरूपकरणविधिरपि। अतो विधिसार्थक्याय दृष्टविधया कृतिसाध्यधात्वर्थविशेषरूपाश्रयसम्बन्धित्वमवश्यमपेक्षणीयम्।

तत्र च यद्यपि योग्यताबलेन स्वोत्पादनस्वसाध्यभोजनहोमाद्यनेकधात्वर्थविशेषसम्बन्धो नियमेन प्रसज्यते, तथापि प्रकरणेनाऽधिकाराख्येन विधिकल्पनद्वारा होमस्यैवोपनयान्नेतरधात्वर्थानामाश्रयत्वप्रसक्तिः। अत एव न कल्पितेनाऽपि विधिना दधिहोमयोरङ्गाङ्गिभावो बोध्यते, गौरवात्, क्लृप्तप्रयोजनत्वाच्च; अपि तु लोकसिद्धकार्यकारणभावनियममात्रम्—दध्ना होमः कर्तव्य इति।

न च दधिजन्यहोमकर्तव्यताया अपि "दध्ना जुहोती"त्य-

नेनैवाऽवगतिसिद्धेर्दधिविशिष्टहोमानुष्ठानेनैव फलोपपत्तौ पुनरपीन्द्रियकामवाक्यवैयर्थ्यापत्तिः, इन्द्रियकामनाया अधिकारिविशेषणत्वज्ञापनफलकत्वेन सार्थक्यात् । एतद्विध्यभावे हि दधिविशिष्टहोमानुष्ठानस्य नेन्द्रियोद्देश्यकता सिध्यतीति तत्सिध्यर्थमिन्द्रियकामविधिरर्थवानेव । प्रकरणकल्पितविधिबलादेव वाऽऽश्रयलाभसिद्धेः न "दध्ना जुहोती"त्यादेराश्रयसमर्पकत्वमाशङ्कनीयम् । अतोऽनन्यलभ्यत्वात्तेन क्रत्वर्थतैव बोध्यत इति ध्येयम् । अन्यलभ्यत्वादेव चेन्द्रियकामवाक्यस्थजुहोतिनाऽप्याश्रयतासम्बन्धेन होमविशिष्टदधिविधानमङ्गीकृत्याऽऽश्रयविधिरित्यपि निरस्तम् । यथा च प्रकारान्तरेणाऽपि न वाक्येनाऽऽश्रयविधिः तथाऽग्रिमाधिकरणे वक्ष्यते । अङ्गतासम्बन्धेन होमविशिष्टदधिविधिस्तु होमस्य प्रयोजनानाकाङ्क्षत्वान्निराकर्तव्यः । अतोऽत्र दधिमात्रमेव फलोद्देशेन विधीयते । होमस्त्वाश्रयतासम्बन्धेन प्रकरणप्राप्तो जुहोतिना साधुत्वार्थमनूद्यते ।

अत एव भावनाया दधिकरणिकाया अवच्छेदकीभूतधात्वर्थविशेषापेक्षायां समानपदश्रुत्युपात्तो होमोऽवच्छेदकतयाऽन्वितोऽपि न तदंशेऽपि विधिव्यापारकल्पना, होमावच्छेदस्य महाप्रकरणात् प्रणयनाद्यवच्छेदस्य चाऽवान्तरप्रकरणाल्लाभोपपत्तेः । अत एव करणविधिवैयर्थ्यस्याऽऽश्रयत्वनियामकत्वात् भावनाया अवच्छेदकापेक्षाऽपि तन्नियामिकेति द्रष्टव्यम् ।

किञ्च यत्र ससम्बन्धिक एव पदार्थोऽप्राप्तत्वेन फलोद्देशेन विधीयते, तत्र तस्य सत्यपि यागादिवत् साक्षात्कृतिव्याप्यत्वे ससम्बन्धिकत्वादेव प्रतिसम्बन्धिरूपाश्रयलाभो न विरुध्यते, यथा—"पशुकाम उक्थ्यं गृह्णीया"दित्यादौ, उक्थ्यादिपदाभिधेयायास्संस्थायास्समापयतिधातुवाच्यत्वेन यागादिवत्साक्षा-

त्कृतिसाध्यत्वेऽपि ससम्बन्धिकत्वादेव प्रतिसम्बन्धिभूतज्योतिष्टोमरूपाश्रयलाभः ।

यदा तु सौभराधिकरणन्यायसुधाकृदुक्तरीत्या उक्थ्यादिपदवाच्यग्रहयागाभ्यासा एव फले विधीयन्ते, तदाऽभ्यासस्य प्रतिसम्बन्धियागापेक्षयैव ज्योतिष्टोमस्याऽऽश्रयत्वम् । यथा चाऽयं पक्षो दुश्लिष्टस्तथा (१)संस्थाधिकरणे वक्ष्यामः । सर्वथा कृतिसाध्यधात्वर्थविशेषसम्बन्धित्वं दृष्टविधया फलार्थं विधीयमानस्य गुणस्य स्वनिष्ठकरणतासम्पादकत्वेनाऽपेक्षितम् । अत एव न विधीयमानगुणजन्यत्वमेवाऽऽश्रयत्वम् , तदभावेऽपि "मन्थ्यग्रानाभिचरन्" इत्यादौ ग्रहणानां मन्थिग्रहाग्रत्वरूपगुणाश्रयत्वदर्शनात् । अपि तु अदृष्टाद्वारकसम्बन्धेन गुणविशेषावच्छिन्नत्वम् । अदृष्टाद्वारकेति पदकृत्यं तु वारवन्तीयादेरग्निष्टोमस्तोत्रजन्यादृष्टद्वारा यागेन सम्बन्धात् तस्याऽऽश्रयत्वव्यावृत्तिरित्युत्तराधिकरणे वक्ष्यते । तदेवं दध्यादौ यागादिवत्फलनिरूपितैव करणतेति पक्षमाश्रित्य करणविधिवैयर्थ्यादिना आश्रयाकांक्षोपपादिता ।

यदा तु दध्नेति तृतीयोपात्तं करणत्वं नेन्द्रियनिरूपितम् ; अपि तु करणतासंसर्गेणैवेन्द्रियेऽन्वेति, अतश्च करणत्वविशिष्टस्य दध्नो दधिविशिष्टस्य वा करणत्वस्य करणतासंसर्गेणेन्द्रिये समन्वयो न तु यागादिवत्तृतीयोपात्तस्य करणत्वस्य निरूपकतासंसर्गेणेति पक्ष आश्रीयते, तदा तृतीयोपात्तस्य करणत्वस्य निरूपकापेक्षायां प्रतिसम्बन्धिविधयैव प्राकरणिकाश्रयलाभो न विरुध्यते । परन्तु निरूपकतासंसर्गापेक्षया करणतासंसर्गस्य गुरुभूतत्वाद्यागादिवैलक्षण्ये प्रामाणाभावाच्चाऽयं पक्षो नातीवाऽऽद्रि-

१. पू. मी. ३. ६. ८.

यते। सर्वथा प्रकरणादाश्रयलाभोपपत्तेरनेन गुणमात्रं विधीयते। भावनाऽपि च सैव, धात्वर्थवत्तस्या अपि प्रत्यभिज्ञायमानत्वात्। न च प्राप्तभावनानुवादेन गुणसम्बन्धः फलसम्बन्धश्च विधीयेतेति वाक्यभेदापादकगुणादेव भेदः, भावनायाः फलसम्बन्धस्य रागप्राप्तत्वेनाऽविधेयत्वादिति भवदेवः।

वस्तुतस्तु इन्द्रियाख्यफलस्य जन्यत्वेन व्यापारमात्रजन्यत्वावगमेऽपि लोकाद्विजातीययत्नजन्यत्वानवगमाद्विशेषतश्चाऽग्निहोत्रहोमानुकूलयत्ने स्वर्गादिजनकत्वेनाऽवगते इन्द्रियजनकत्वस्य प्रमाणान्तरेणाऽनवगतेर्वाक्येनैव विधेयत्वापातात् दधिरूपद्रव्यस्य चोत्पत्तावन्वयेन राजसूयन्यायाविषयत्वाद्वाक्यभेदावश्यम्भावेन गुणात् भेद एव। न ह्यत्र धात्वर्थाविवक्षावद्भावनाया अप्यविवक्षामङ्गीकृत्य गुणफलयोरेव मिथोऽन्वयो वक्तुं युक्तः, कारकान्वयस्याऽव्युत्पन्नत्वात्। अतो भावना भिन्नैव। सकृदनुष्ठानेऽपि सान्नाय्यादिवत् तत्तज्जात्यवच्छिन्नव्यक्तिद्वयोत्पत्त्यङ्गीकारान्नैकव्यक्त्याश्रितजातिद्वयाङ्गीकारापत्तिः।

अस्तु वा तत्, तथाऽपि न साङ्कर्यम्; होमविधिविधेयतावच्छेदकजातेर्गुणविधिविधेयतावच्छेदकजातिव्यतिरेकेण सत्त्वेऽपि तस्यास्तद्व्यतिरेकेणाऽन्यत्राऽसत्त्वात्। व्यक्तिभेदपक्षे तु यत्नद्वयस्याऽप्यवच्छेदकीभूतो धात्वर्थ एक एव, प्रमाणबलेन चैकस्य धात्वर्थस्य युगपदुत्पद्यमानयत्नद्वयजन्यताऽपि जायमाना न विरुध्यते। तस्मादत्र दधिकरणकामिन्द्रियकर्मकं भावनान्तरमेव विधीयत इति सिद्धम्।

अपूर्वं तु दधिजन्यमेकमिन्द्रियजनकम्, होमजन्यं च स्वर्गादिजनकमपरम्; अपूर्वस्य शक्तिरूपत्वेन शक्तिमद्भेदे भेदस्याऽऽवश्यकत्वात्। आश्रयस्य प्रणयनादेर्दृष्टविधया स्वकार्योपयोगे तु गुणज-

न्यमेव पश्वादिजनकं न त्विन्द्रियाद्यनुकूलं होमजन्यमपरम्, होमस्योत्तरक्षण एव दधिनिष्ठकरणतासम्पादकत्वेनाऽपूर्वाजनकत्वात्। यदि ह्याश्रयत्वं नामाऽवान्तरव्यापारत्वमुच्येत, ततः क्षणिकस्य होमस्येन्द्रियजनकत्वायोगात् तदनुकूलमप्यपूर्वं कल्प्येत। न तु तत्त्वे प्रमाणमस्ति, करणविधेः तज्जन्यत्वमात्रेणाऽप्युपपत्तेः तज्जन्यजनकत्वस्याऽपि कल्पने गौरवात्। अतो गुणफलसम्बन्धस्थले भावनाभेदात् गुणजन्यमप्यपूर्वं भिन्नमेव।

भावनान्तरस्य चेतिकर्तव्यतापेक्षायामाश्रयतो धर्मातिदेशः। तथा हि—न तावदाश्रयस्यैव प्रकरणादितिकर्तव्यतात्वेनाऽपि ग्रहणं शंक्यम्, वाक्येन स्वर्गादिसंयुक्तस्य होमस्य प्रकरणाविषयत्वात्। न चाऽङ्गत्वाभावेऽप्याश्रयस्य सतः प्रसङ्गेनेतिकर्तव्यताकाङ्क्षानिवर्तकत्वोपपत्तेः नाऽतिरिक्तेतिकर्तव्यताकाङ्क्षेति वाच्यम्। आश्रयस्य करणतानिर्वाहकत्वेन करणकोटावन्तर्भावात् तदनुग्राहकेतिकर्तव्यताया भेदेनैवाऽपेक्षितत्वात्। आश्रयाकाङ्क्षा करणाकाङ्क्षातो भिन्नेति मते आश्रयस्य करणकोटावनन्तर्भावेऽप्याश्रयस्य दृष्टविधया करणतासम्पादकस्याऽदृष्टार्थाया भावनाया अदृष्टोपायापेक्षत्वात् न तदुपकारकत्वं सम्भवतीति युक्तं तद्व्यतिरिक्तेतिकर्तव्यतापेक्षणम्।

यद्यप्याश्रयान्तरकरणे फलानुत्पत्तेराश्रयनियमादृष्टस्याऽप्युत्पत्तेरावश्यकत्वात् तद्द्वारा तन्नियमस्येतिकर्तव्यतात्वमाशङ्क्येत, तथाऽपि दध्यादिगुणसन्निपत्योपकारस्य क्रयसम्पादनादेरपेक्षितत्वात् आश्रयसमानविधानत्वस्य च (१)संस्थाधिकरणे निषेत्स्यमानत्वात् युक्त आश्रयतो धर्मातिदेशः। न चैवमपि सादृश्याभावात्कथं कल्पितवचनातिदेशः? सादृश्यकार्यस्य प्रकृति-

१. पू. मी. ३. ६. ८.

विशेषोपस्थापनस्य प्रकरणेनैवेह सिद्धेः तदनपेक्षणात् । यद्यपि च ये प्रकृतावाश्रयस्वरूपसिध्यर्था देवतादयः तेषामिह गुणस्वरूपसिध्यर्थत्वासम्भवात् बाध एव प्राप्नोति, तथाऽपि तदन्येषामतिदेशः, ते त्वाश्रयसिध्यर्थं क्रियमाणा अपि न गुण उपकुर्वन्ति।

न च येऽपि प्रकृतौ प्रधानद्वारा तदपूर्वसाधनीभूतद्रव्यसंस्कारार्थाविञ्वलनादयः, तेऽपि कथं प्राकृतप्रणाडीरहिते गुणे प्राप्नुयुः ? सत्यमेवं न प्राप्नुवन्ति, तथाऽपि दध्यादौ क्रत्वर्थत्वस्याऽपि सत्त्वात् गोदोहनादेश्च नित्यचमसस्थानत्वात् स्थानापत्तिरूपातिदेशेन प्रणयनानङ्गभूतेऽपि प्रणयनोपकारके गोदोहने धर्माः प्राप्नुवन्त्येव । परं तु ते प्रणयनादिकार्यप्रयुक्ता एव न तु गुणापूर्वप्रयुक्ताः । गुणस्याऽपि त्वपेक्षिताः केचित्सम्पादनप्रक्षालनादयः प्रसङ्गादुपकुर्वन्ति, अन्ये त्वारादुपकारका जपोपस्थानादयो गुणभावनायामतिदेशेन प्राप्नुवन्ति । तत्राऽपि तज्जन्या उपकारा एवाऽतिदिश्यन्ते, न तु तज्जनकीभूताः पदार्था अपि, गुणस्य स्वर्गादिप्रयुक्ताश्रयोपजीवित्वेन तत्तन्त्रमध्यपातावगमात् प्रसङ्गेन तदर्थानुष्ठिताङ्गजन्योपकारलाभोपपत्तेः स्वातन्त्र्येण जनकानपेक्षत्वस्य(१) द्वादशे वक्ष्यमाणत्वात् । अत एव गोदोहनादेः दर्शपूर्णमासापूर्वप्रयुक्तप्रणयनाद्युपजीवित्वात् सौर्यादावनतिदेश इति वक्ष्यते । आश्रानुष्ठापकत्वं त्वाश्रयस्याऽनङ्गत्वात् क्लृप्तानुष्ठापकान्तरयुक्तत्वाच्च स्पष्टमेव । तस्मात्सिद्धं गुणादेव फलमिति ।

प्रयोजनम्—आद्यपक्षे दध्यपचारे प्रतिनिध्युपादानमारम्भोत्तरम्, ततः प्राक् दध्यभावेऽनारम्भ एव । द्वितीयपक्षे यद्यपि "वि वा एतद्यज्ञश्छिद्यते यदन्यस्य तन्त्रे प्रतते अ-

१. पू. मी.

न्यस्य तन्त्रं प्रतीयत" इति वचनादेकप्रयोगमध्येऽपरस्य कामस्य प्रयोगस्सामान्यतो निषिद्धः, तथाऽपि द्वयोरनयोरग्निहोत्रकर्मान्तरयोरेककालत्वात्तन्त्रप्रयोगापत्तेः सङ्कल्पादौ तत्तत्फलार्थं कर्मद्वयमपि तन्त्रेण करिष्य इत्युल्लेखः प्रयोजनम्। गोदोहनोदाहरणे तु प्रयोगात् बहिः प्रणयनानुष्ठानम्।

यत्तु वार्त्तिके प्रणयतीत्यस्य कर्मसाकाङ्क्षत्वात् "अपः प्रणयती"ति वाक्यान्तरश्रुतद्वितीयान्तापपदानुषङ्गावगतेरपां चोपयोगसत्त्वेन तत्संस्कारार्थस्यैव प्रणयनस्य फलार्थत्वावगमात् परप्रयुक्तसंस्कार्योपजीवित्वेन पक्षद्वयेऽपि क्रतुप्रयोगमध्यकरणोपपत्तेः नाऽनुष्ठाने भेदो लभ्यत इत्युक्तम्; तदनुषक्तस्याऽप्पदस्य संस्कार्यपरत्वे उद्देश्यानेकत्वकृतवाक्यभेदापत्तेः सक्तुन्यायेन विनियोगभङ्गावसायाल्लौकिकाप्साधनकप्रणनयनस्य पश्वर्थत्वावगतेरातिशयार्थम्।

सिद्धान्ते तु तत्तत्फलार्थकेन गुणेन सहाश्रयं स्वफलार्थं करिष्य इत्युल्लेखः प्रयोजनं द्रष्टव्यम्।

सूत्रं तु—यागादिवाक्यस्य दध्यादिवाक्यस्य च भावार्थाधिकरणप्रवृत्त्यप्रवृत्तिभ्यां तुल्यत्वाभावात् तस्याऽऽश्रयस्य फलसम्बन्धिनि गुण एव दध्यादिवाक्यस्थं फलं प्रतीयेतेति योज्यम्॥

इत्येकादशमिन्द्रियकामाधिकरणम्॥ ११॥

अथ द्वादशं रेवत्यधिकरणम् ॥ १२ ॥

समेषु कर्मयुक्तं स्यात् ॥ २-१-२६ ॥

(विषयसंशयौ)

ज्योतिष्टोमप्रकृतिकोऽग्निष्टुद्यागः समाम्नातः-(१)"त्रिवृदग्निष्टुदग्निष्टोमः, तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो ह्येतेन यजते"ति । अत्र च प्रथमान्तत्रयस्य यजेतेत्यनेनान्वयात् कर्तव्यपदाध्याहारेण भिन्नवाक्यत्वं तावदावश्यकम् । तत्र च त्रिवृत्पदं तावदातिदेशिकचतुस्तोमत्वव्यावृत्तिफलकतया सर्वस्तोत्रेषु त्रिवृत्स्तोमविधायकम् । अग्निष्टुत्पदं"आग्नेयीषु स्तुवत" इति वचनादाग्निदेवत्यमन्त्रसाध्यस्तोत्राङ्गकत्वात् तत्प्रख्यन्यायेन नामधेयम् । अग्निष्टोमपदं चाग्निष्टोमसंस्थाकत्वप्रतिप्रसवार्थम् ।

यद्यपि हि ज्योतिष्टोमात् नियतमेवाऽग्निष्टोमसंस्था नित्यत्वात् प्राप्यते, तथाऽप्येतत्पूर्वभावियागस्योक्थ्यसंस्थाकस्य निकायित्वेन एतद्यागप्रकृतित्वावसायात् ततः उक्थ्यसंस्थाया एव प्राप्स्यमानत्वेन प्रतिप्रसवत्वोपपत्तिः । राजन्यनिमित्तकाग्निष्टोमसंस्थाविकारभूताग्निष्टोमताव्यावृत्तिफलको वाऽयं सर्वसाधारण्येनाऽग्निष्टोमसंस्थाविधिरिति द्रष्टव्यम् । गुणद्वयविशिष्टापूर्वकर्मविधानाच्च न वाक्यभेदः । तस्येति वाक्येन तु राजसूयन्यायेन वायव्यमन्त्रैकविंशस्तोमविशिष्टाग्निष्टोमस्तोत्रभावनोचरकालतादिविशिष्टो यागप्रयोगः फलोद्देशेन विधीयते । तत्र वायव्यमन्त्राणामतिदेशप्राप्तमन्त्रबोधनाऽऽग्नेयीमन्त्रबाधेन वा निवेशः ।

---

१. ता. ब्रा. १७. ६१. अस्य विवरणमधिकरणान्ते करिष्यामः ।

यद्यपि चात्राऽग्निष्टोमसामपदसमभिव्याहारादाधारतासम्बन्धेन साम्नि मन्त्राणां विशेषणत्वं प्रतीयते, तथाऽपि अक्लृप्तकार्यकल्पनापत्तेः न सामाङ्गत्वेन मन्त्रविधिः, किन्तु पार्ष्टिकान्वयलभ्यं समसम्बन्धमनूद्य विशेषणप्रधानमग्निष्टोमशब्दमङ्गीकृत्य स्तोत्राङ्गतयैव मन्त्रविधिः । एवमेकविंशस्तोमकताप्रतिप्रसवोऽपि तत्रैव । प्रकृतितो हि अग्निष्टोमस्तोत्र एकविंशस्तोमकत्वे प्राप्ते आतिदेशिकेन त्रिवृत्सामान्यविधिना निवर्तमाने ऽयं प्रतिप्रसवः । अतश्चोभयविशिष्टाग्निष्टोमस्तोत्रभावनोत्तरकालादिविशिष्टयागप्रयोगविधिरेवाऽयम् । यद्यपि चाऽग्निष्टोमस्तोत्रभावनोत्तरकालाद्यतिदेशतः सम्भवत्प्राप्तिकम्, तथाऽप्येकवाक्यत्वसिध्यर्थं विशिष्टविधिसन्दष्टन्यायेन वाऽतिदेशप्राप्तेः पूर्वपक्षत्यङ्गीकरेण वा तस्य विधिर्नाऽनुपपन्नः । यद्यपि चाऽग्निष्टोमस्तोत्रस्य प्रकृतौ सर्वान्त्यत्वान्न यागप्रयोगपूर्वकालत्वं सम्भवति, तथाऽपि सर्वाङ्गानुष्ठानसौकर्यार्थमादितोऽवधारणादग्निष्टोमस्तोत्रस्याऽपि तत्सिद्धेः प्रतिपत्तिपूर्वकालत्वाभिप्रायेण तदिति मूलानुयायिनः ।

वस्तुतस्त्वेतादृशविषये मुखं व्यादाय स्वपितीतिवत् समकालत्वमेव प्रयोगमध्यवृत्तित्वरूपं लक्षणया क्त्वाप्रत्ययार्थो विधीयते वाक्यभेदपरिहारार्थम् ।

अथवा अस्तु समानकर्तृकत्वमात्रमत्र तदर्थः । यद्यपि च ऋत्विक्कर्तृकस्तोत्रसमानकर्तृकत्वं यजमानकर्तृके यागे न मुख्यम्, तथाऽपि प्रयोजककर्तृत्वाभिप्रायेण तदुपपत्तेर्न विरोधः; तत्प्रकरणे च 'वारवन्तीयमग्निष्टोमसाम कार्यमि'ति श्रुतेन वाक्येन प्राकृत यज्ञायज्ञीयाख्याग्निष्टोमस्तोत्रं वारवन्तीयं विहितम् । तदनन्तर "श्रैतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेते"ति श्रुतम् । तत्र च पूर्ववदेव त्रेधा सन्देहः । पादाध्यायसङ्गती स्पष्टे । आपवादिकी त्वनन्तरा ।

(पूर्वपक्षः)

तत्र प्रकृतप्रत्यभिज्ञानादेतच्छब्दश्रुतेः प्रमाणाभावाच्च न तावत्कर्मान्तरम्, सिद्धान्ते वक्ष्यमाणरीत्यैव चाऽऽश्रयाभावान्नाऽपि गुणफलसम्बन्धः, अतो वायव्यवाक्यवदेव रेवतीमात्राविशिष्टाग्निष्टोमस्तोत्रभावनोत्तरकालतादिविशिष्टो यागप्रयोगः फलार्थं विधीयते। न ह्यत्र दधिन्यायेन गुणस्योत्पत्तावन्वययोग्यत्वम्, अपि तु कालादिरूपत्वाद्राजसूयन्यायेन प्रयोगविशेषणत्वमेव, अतोऽत्र गुणविशिष्टस्य तस्यैव कर्मणः फलोद्देशेन विधानमित्येकः पक्षः। द्वितीयस्तु नाऽत्र राजसूयन्यायः, प्रयोगस्य वायव्यवाक्येनैव प्राप्तत्वात्, फलान्तरश्रवणेऽपि च विविदिषावाक्यवद्विनियोगमात्रकरणेन प्रयोगान्तरस्याऽविधानोपपत्तेः। न च विनिगमनाविरहः, प्राथम्येन वायव्यवाक्य एव प्रयोगविधेर्नियन्तुं शक्यत्वात्।

एवं सत्यपि यदि विशेषणीभूतस्य रेवतीमात्रविशिष्टाग्निष्टोमस्तोत्रभावनोत्तरकालतादेरप्राप्तिः स्यात् ततोऽवेष्टेः "यदि ब्राह्मणो यजेत"इत्यादौ विधेयकर्तृकालादिरूपानेकगुणवशादिव प्रयोगान्तरमपि विधीयते, न त्वेतदस्ति, तस्याऽपि वायव्यवाक्येनैव प्राप्तत्वात्। न ह्यत्र ततः पूर्वप्रवृत्तिश्शक्यते वक्तुम्, प्रापकस्याऽपि प्रत्यक्षत्वात्। न च प्राप्तस्याऽपि विशिष्टविधिसन्दष्टन्यायेन विधेयतामापाद्य प्रयोगभेदकत्वम्, अन्योन्याश्रयापत्तेः। सति हि प्रयोगविधौ विशिष्टविधिसन्दष्टता, (१)यस्यां च विधेयत्वात प्रयोगविधिरिति। अतः परिशेषाद्रेवतीमात्रं प्राप्ताग्निष्टोमस्तोत्रोत्पत्त्यनुवादेन विधेयम्, फलोद्देशेन यागविनियोगश्चेति वाक्यभेदतादवस्थ्यात् दधिन्यायेनाऽत्र लाघवात्

१. तस्यामिति क. पु.

गुणफलसम्बन्धविधिरेव । तत्राऽपि रेवतीमात्रस्याऽप्राप्तत्वात् यद्यपि विधिस्तन्मात्र एव संक्रमते, तथाऽपि नाऽत्र तासां फलसम्बन्धः । तथात्वे तासां विलिङ्गसङ्ख्यत्वादेतच्छब्देन तृतीयान्तेन फलसाधनतयाऽपादानानुपपत्तेः, किन्तु प्राप्तस्याऽपि रेवतीविशिष्टस्य वारवन्तीयस्यैव । यद्यपि चाऽत्राऽप्यक्लृप्तकार्यकल्पनापत्तेः रेवतीनामाग्निष्टोमस्तोत्र एवाऽङ्गत्वम् , तथाऽपि पार्ष्ठिकान्वयलभ्याधारतासम्बन्धेनैव साम्नि रेवतीनां वैशिष्ट्यं नाऽनुपपन्नम् ।

अत एवैतच्छब्दोपपत्तावपि नाऽग्निष्टोमस्तोत्रस्यैव रेवसङ्ककस्य फलसम्बन्धः, अग्निष्टोमसामपदस्य विशेषणप्रधानत्वे लक्षणापत्तेः । न च रेवतीवारवन्तीययोः पृथक्पदोपात्तकारकत्वेन कथं वैशिष्ट्योपपत्तिः? फलकर्मकभावनाया विधेयत्वेन तस्यामुभयोः प्रथमतस्सम्बन्धाङ्गीकरणेन सोमादिवत्पश्चात् परस्परवैशिष्ट्योपपत्तेः । कृत्वाशब्दश्रवणेन रेवतीषु कृत्वा वारवन्तीयं तेन फलं भावयेदित्यर्थावगमाद्वैशिष्ट्योपपत्तेश्च । अतो(१) रेवतीविशिष्टस्य वारवन्तीयस्य फलसम्बन्धः, तस्य च स्वरसमाहारात्मकस्य सौभरादिवत् सिद्धरूपत्वेनाऽऽश्रयापेक्षायां प्राकृतस्य यागस्यैवाऽऽश्रयत्वम् । न हि गायतिधातुवाच्यत्वात् साम्नः क्रियात्मकत्वाशङ्का, 'गीड वदनैकदेश' इत्यादौ गण्डादीनां धातुवाच्यत्वेऽपि सिद्धरूपत्ववत् । सामशब्दस्य "सामाथो यः कश्च रावणः स्वर' इति श्रुतेः षड्जादिस्वरसमाहारवाचित्वात् स्वरशब्दस्य च "मारुतस्तूरासि चरन्मन्द्रं जनयति स्वर"मित्यादि सङ्गीतशास्त्रपर्यालोचनया सिद्धरूपवायवीयसंयोगविभागजनितध्वन्यात्मकशब्द-

१. युक्तो रेवतीविशिष्टस्येति. क. पु.

विशेषवाचित्वावगमेन वारवन्तीयादेः सिद्धरूपत्वप्रतीतेः । अतश्च तस्याऽऽश्रयापेक्षायां युक्तमेव यागस्याऽऽश्रयत्वम् । शक्यते हि साम्ना ऋगक्षराभिव्यक्तिद्वारा स्तोत्रमिव यागस्साधयितुम् । अतश्च सौभरसाम्नस्स्तोत्राश्रितत्वमिव वारवन्तीयस्याऽपि यागाश्रितत्वं तदीययाज्यादिमात्राधारतया उच्चैष्ट्वादिवन्न विरुध्यते।

रेवतीनामपि चाऽत एव याज्यादिकार्ये निवेशोऽप्युन्नेयः । काम्येन च वारवन्तीयादिना सामान्यविधिप्राप्तस्य वाऽतिदेशप्राप्तस्य वैकश्रुत्यादेर्बाधोऽपि सुवच एव। (१)यदि चाऽग्निष्टोमसामेत्यनुवादानुपपत्तिराशङ्क्येत, ततोऽग्निष्टोमस्तोत्रद्वारैव यागस्य जन्यत्वापरपर्यायमाश्रयत्वम् । इष्यत एव हि व्रीह्यादौ परम्परासम्बन्धेन जन्यत्वम् , आश्रयत्वमपि च सौभरादौ स्तोत्रादेः ।

अस्तु वा यागस्याऽग्निष्टोमस्तोत्रजन्यत्वात् परम्परासम्बन्धेन जन्यत्वापरपर्यायाश्रयत्वायोगेऽप्यानर्थक्यतदङ्गन्यायेनाऽग्निष्टोमस्तोत्रेऽवतारः। इष्यते चोक्थ्यादिस्तोत्रनिरूपितसमाप्तिप्रतियोगित्वरूपस्याऽऽश्रयत्वस्य साक्षात् प्रकृते यागेऽसम्भवेन (२)प्रयोगे चाऽवतारः 'पशुकाम उक्थ्यं गृह्णीया''दित्यादौ । न च स्तोत्राणामपि प्रकृतयागाङ्गत्वादग्निष्टोमस्तोत्र एवाऽवतारे प्रमाणाभावः, अग्निष्टोमस्तोत्रस्य वायव्यवाक्ये विहितत्वेन वारवन्तीयवाक्येऽनुवादेन चाऽतिदेशिकस्तोत्रान्तरापेक्षया विशिष्योपस्थितत्वात् शास्त्रस्याऽबाधपक्षपातित्वेन काम्यस्याऽपि वारवन्तीयस्य स्तोत्रान्तरे निवेशः । आतिदेशिकसामबाधापत्तेः वारवन्तीयाङ्गकाग्निष्टोमस्तोत्रमात्रनिवेशावगमाच्च ।

एतेन यत् सिद्धान्तवार्तिके पुरुषार्थवारन्तीयस्य क्रत्वर्थेन सहाऽभेदाद्वाऽग्निष्टोमस्तोत्रवृत्तित्वं भवेत् क्रत्वर्थस्य तद्वृत्तिदर्श-

---

१. यदि त्विति. क. पु. २. तदीये प्रयोग इति क. पु.

नेनाऽत्राप्यनुमानाद्वा एतस्य तत्, स्थानापन्नत्वाद्वा ? नाऽऽद्यः; एकस्य देवदत्तस्य युद्धभोजनादिकार्यभेदेन एकस्थानानियमवदेकस्थानत्वे प्रमाणाभावात् । न द्वितीयः, सामान्यतो दृष्टस्याऽप्रयोजकत्वात्, वारवन्तीयत्वहेतोराधानेऽनैकान्तिकत्वाच्च । आग्निष्टोमस्तोत्रवृत्तित्वस्य च साधनतापरपर्यायस्य सामप्रयोजनत्वेन सामानङ्गतया कार्यापत्त्याऽप्यनतिदेशान्न तृतीयोऽपि । अतो नाऽग्निष्टोमस्तोत्रमात्रवृत्तिता सम्भवतीत्युक्तम्, तदपि परास्तम्, अबाधेनोपपत्तौ बाधायोगादिति न्यायेनैव तदुपपत्तेः । यस्त्वस्मिन् पक्षे रेवतीभिर्वायव्याबाधः, स स्तोत्रान्तरेऽप्यातिदेशिकऋगन्तरबाधात्तुल्य इत्यकिञ्चित्करः । अतो युक्त एव(?) आनर्थक्यतदङ्गन्यायेनाऽग्निष्टोमस्तोत्रमात्रेऽवतारः ।

अस्तु वाऽग्निष्टोमस्तोत्रस्यैव विशिष्योपस्थित्यादिनाऽऽश्रयत्वम्, तस्य च धर्मिग्राहकप्रमाणेनाऽग्निष्टुद्यागसम्बन्धिन एव लाभाद्यजिः, षष्ठ्यन्तैतच्छब्दः कस्त्रामसयश्च सर्वमनुवादः ।

अथ वा वारवन्तीयमग्निष्टोमसामकार्यमिति प्राकरणिकवाक्येनैव लाघवादाश्रयसम्बन्धो विधीयते, न त्वङ्गाङ्गिसम्बन्धः, गौरवात् । दध्यादिवाक्येषु त्वन्यलभ्यत्वादाश्रत्वयस्याऽगत्या गौरवाङ्गीकरणम् । तदेवं वारवन्तीयस्यैव फलसम्बन्ध इति मूलोक्तः पक्ष उपपादितः ।

अथ वाऽस्तु रेवतीनामेवाऽप्राप्तत्वात् तस्यैव विधिसंक्रमणावगतेस्तासामेव फलसम्बन्धः । सप्तमी चेयं यद्यपि स्तोत्रनिरूपितं सामनिरूपितमेव वाऽधिकरणत्वं वदति, तथाऽप्येतच्छब्देन तृतीयान्तेन रेवतीविशिष्टवारवन्तीयस्यैव पूर्वोपस्थितस्य परामर्शात् तत्र च विशेष्यस्य प्राप्तत्वेनाऽविधेयत्वादप्राप्तरेवतीरूपविशेषण-

१. पू. मी. ३. १. ९.

स्यैव दाक्षायणयज्ञपदे आवृत्तेरिव फलसम्बन्धोपपत्तिः। अत एवैतच्छब्दस्य विलिङ्गसंख्यत्वान्न रेवतीपरामर्शकत्वमित्यप्यपास्तम्, विशिष्टपरामर्शकत्वेनाऽविरोधात्।

न चैतस्मिन्पक्षे रेवतीनामग्निष्टोमस्तोत्रमात्रवृत्तित्वस्य पूर्वोक्तविधयाऽप्यलाभात् कथं गुणफलसम्बन्धोपपत्तिः; प्रकरणेन तदलाभेऽपि वाक्येनाऽऽश्रयलाभोपपत्तेः। तथा हि—दध्यादावपि सम्भवत्येव वाक्येनाऽऽश्रयविधिः। न च वाक्यभेदः, होमविशिष्टदध्नः फलोद्देशेन विधानोपपत्तेः। न चैवं होमस्य दध्यङ्गत्वापत्तिः, क्लृप्तप्रयोजनत्वेनाऽङ्गतासम्बन्धेन वैशिष्ट्यानङ्गीकारात्, अपि त्वपेक्षावशादाश्रयतासम्बन्धेनैव। अतश्च यथैव "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते"त्यादौ न दर्शपूर्णमासयोः सोमाङ्गत्वमुत्तरकालाङ्गत्वं वा, अपि तु निरूपकतासम्बन्धेनैवोत्तरकालतायां वैशिष्ट्यम्, तथाऽत्राऽप्याश्रयतासम्बन्धेन तदङ्गीकारे न कश्चिद्विरोधः। स तु तत्र नाऽऽश्रितः, अन्यत एव लाभोपपत्तेः। प्रकृते तु प्रकरणेनाऽऽश्रयप्राप्तेः(१)-असम्भवाद्वाक्येनैवाऽग्निष्टुद्यागवृत्त्यग्निष्टोमस्तोत्रसाधनीभूतरेवतीविधानाद्वाक्यभेदं विनैवाऽऽश्रयलाभोपपत्तिः।

अथ वा अग्निष्टोमस्तोत्रस्यैवाऽऽश्रयतासम्बन्धेन वैशिष्ट्यम्, तस्य तु प्रकरणात् प्रणयनादेरिवाऽग्निष्टुद्यागसम्बन्धिन एवोपस्थितेष्षष्ठ्यन्तैतच्छब्दो यजिश्च वारवन्तीयपदवदनुवादः।

किञ्चाऽस्मिन् पक्षे यथैव सिद्धान्ते रेवत्यादिविशिष्टस्तोत्रभावनाविशिष्टयागभावनाविधानं कृत्वाशब्दमाहिम्ना न दुष्यति, तथैव ममाऽप्याश्रयभावनाविशिष्टगुणभावनाविधानमिति सर्वथा आश्रयप्राप्तेस्सत्त्वाद्गुणफलसम्बन्धविधिरेव युक्त इति प्राप्ते—

१. असम्भवेऽपीति क. पु.

(सिद्धान्तः)

अभिधीयते—नाऽत्र गुणात् फलम् , आश्रयालाभात् । तथा हि—वारवन्तीयस्य फलसम्बन्धित्वपक्षे तावन्नाश्रयलाभः । स हि प्रकरणादभिप्रेतो वाक्याद्वा ? आद्येऽपि किं यागस्यैवाऽऽश्रयत्वम् , अग्निष्टोमस्तोत्रस्य वा ? तत्राऽपि किं यागस्य साक्षादग्निष्टोमस्तोत्रद्वारा वा ? नाऽऽद्यः; अग्निष्टोमसामेत्यस्याऽनुवादानुपपत्तेः । न द्वितीयः, स्तोत्रस्याऽदृष्टविधया यागाङ्गत्वात् तद्द्वारा यागस्याऽऽश्रयत्वानुपपत्तेः । दृष्टविधया हि कृतिसाध्यधात्वर्थसम्बन्धित्वं गुणस्याऽपेक्षितमित्युक्तं पूर्वाधिकरणे । अदृष्टद्वारा हि तदाश्रयणे गुणस्याऽऽश्रयं विनाऽपि फलकरणत्वस्याऽदृष्टद्वारोपपत्तेः कृतमाश्रयाकाङ्क्षया । न चेष्टापत्तिः, करणाविधिवैयर्थ्यापत्तेरुक्तत्वात् ।

न चैवमपि पूर्वकालतादिरूपदृष्टसम्बन्धेनैवाऽग्निष्टोमस्तोत्रस्य द्वारत्वोपपत्तेः युक्तमेव परम्परया यागस्याऽऽश्रयत्वमिति वाच्यम् । एवमपि यागस्यैव तदीयऋगाधारत्वेनाऽऽश्रयत्वोपपत्तेः स्तोत्रद्वारकपरम्परायामेव प्रमाणाभावात् । न च 'अग्निष्टोमसामे'-त्यनुवादानुपपत्तिः प्रमाणम् , तथात्वे तस्याऽपि तत्र तात्पर्यकल्पनेन वाक्यभेदस्याऽपरिहार्यत्वात् ।

किञ्चाऽस्तु वा यागस्य साक्षात्सामाश्रयत्वयोग्यत्वम् , तथाऽप्यग्निष्टोमस्तोत्रस्यैव द्वारत्वनिवेशे किं मानम् ? तस्यौपदेशिक्युपस्थितिरिति चेत् ? तस्या द्वारत्वाभावसाधकत्वेन विरुद्धत्वात् । न ह्यातिदेशिकस्तोत्रवृत्तिऋग्बाधसम्भवे औपदेशिकस्तोत्रवृत्त्यौपदेशिकवाक्यबाधो रेवतीभिर्युक्तः । तस्मादौपदेशिकत्वस्य द्वारत्वासाधकत्वादग्निष्टोमस्तोत्रस्यैव न द्वारत्वे प्रमाणम-

मस्ति । एतेन तस्यैव विशिष्योपस्थितेः साक्षादाश्रयत्वं यागे, आनर्थक्येन वा तत्रैवाऽवतरणं प्रत्युक्तम् ।

किञ्च नाऽयमानर्थक्यतदङ्गन्यायस्य विषयः । सर्वत्र हि श्रुतशब्दजन्यशाब्दबोधे योग्यताज्ञानाभावेऽप्ययोग्यतानिश्चयाभावमात्रेण शाब्दबोधस्याऽऽनुभाविकत्वात् तन्निश्चयः प्रतिबन्धकमात्रम् । अतश्च "सप्तदशारत्निर्वाजपेयस्ये"त्यादौ श्रुतषष्ठ्या अयोग्यतानिश्चयाभावमात्रेण शाब्दबोधे जाते पश्चाद्योग्यतालोचनादशायां साक्षादसम्भवेऽप्युक्तपरम्पराश्रयणम् । यत्र तु कल्पितशब्देन शाब्दबोधः, तत्र शब्दकल्पनायां योग्यताज्ञानस्यैव कारणत्वम्, अयोग्यतानिश्चयाभावसत्त्वेऽपि योग्यताज्ञानाभावे शब्दकल्पनानुदयस्याऽऽनुभविकत्वात् । अतश्च यागगतयोग्यताज्ञानाभावेन तद्गताश्रयत्वबोधकशब्दस्यैव प्रकरणेनाऽकल्पनात् कुतस्तदसम्भवे अङ्गेष्ववतारः ।

यत्तु प्रकरणेनाश्रयलाभाभावेऽपि वारवन्तीयवाक्येनैव तल्लाभोपपत्तिरित्युक्तम्, तन्न; तथात्वेऽग्निष्टुद्यागमात्रवृत्त्यग्निष्टोमस्तोत्रस्यैवाऽऽश्रयत्वे प्रमाणाभावात् । न ह्यग्निष्टोमपदस्याऽविशेषप्रवृत्तस्याऽनपेक्षत्वे सति अधिकाराख्यप्रकरणमात्रेण सङ्कोचो युक्तः, (१)'तुल्येषु नाऽधिकारस्स्या'दिति न्यायात् । यद्यपि च प्रयुक्तिशक्तिकल्पनागौरवपरिहारार्थं क्रतुप्रयोगवृत्तित्वमग्निष्टोमस्तोत्रस्याऽपेक्ष्यते, तथाऽपि क्रत्वन्तरप्रयोगवृत्तित्वस्याऽपि सम्भवात् नाऽधिकारेण सङ्कोचः ।

ननु नेदं कुशकाशावलम्बनं युज्यते, गुणविधेः प्रयुक्तिशक्तिकल्पनापरिहारार्थं हि प्रणयनादेरिवाऽग्निष्टोमस्तोत्रस्याऽपि प्रयोजकान्तरापेक्षायां युज्यत एव प्रकृतक्रत्वधिकारस्य सङ्कोचक-

१. जै. सू. ९. १. ११.

त्वम् । अत एव यदपि वार्तिके वारवन्तीयवाक्यस्य गुणफलवाक्यस्य च द्वयोरपि यागोत्पत्तिवाक्येनैवाऽन्वयात् परस्परान्वयाभावेन न वारवन्तीयवाक्यस्याऽऽश्रयसमर्पकत्वं युज्यत इति समाहितम्, तदप्यपेक्षावशेन व्यूढाद्युत्पत्तिवाक्यवत् वारवन्तीयवाक्यस्याऽपि गुणफलवाक्यैकवाक्यतयाऽऽश्रयसमर्पकत्वोपपत्तेरकिञ्चित्करम् ।

यदपि च प्राकरणिकाश्रयपक्षे अग्निष्टोमस्तोत्रमात्रवृत्तित्वासम्भवे कारणमौपदेशिकऋग्बाधायोगरूपमुक्तम्, तदपि स्तोत्रान्तरस्याऽऽश्रयत्वे ऋचां साम्नश्च बाधापत्तेरुभयबाधापेक्षया चैकस्यैवौपदेशिकस्याऽपि बाधौचित्यात् कुशकाशावलम्बनमिति कथं रेवत्याधारस्य वारवन्तीयस्याऽऽश्रयालाभान्त्वाद्वि[illegible]त्वाभावात् पूर्वमप्यङ्गीकारेण वाऽग्निष्टोमस्तोत्रभावनोत्तरकालताविधेर्वायव्यवाक्यन्यायेनाऽङ्गीकरणात् । अत एव तावतैव रेवतीविधिसिद्धेर्न वारवन्तीयस्याप्युक्तरीत्या विध्यङ्गीकरणम् । न च विनिगमनाविरहः, अक्लृप्तकार्यकल्पनाभिया सामाङ्गत्वासम्भवेन स्तोत्राङ्गत्वस्यैव न्याय्यत्वात् ।

अत एवाऽग्निष्टोमसामेत्यपि विशेषणप्रधानतया स्तोत्रपरमेव, वारवन्तीयपदं तु निकायितया प्राप्तवारवन्तीयानुवादः । रेवतीनां च स्तोत्रं प्रत्यपि तदनुकूलपदशक्त्याधारत्वेन "आग्नेयीषु स्तुवत" इतिवदधिकरणत्वोपपत्तेः सप्तमी यथाश्रुतैव, करणत्वलक्षणार्था वा । अतश्च रेवतीमात्रविशिष्टस्तोत्रभावना उत्तरकालादिसम्बन्धेन यागभावनाविशेषणमिति तद्विशिष्टो यागः फलोद्देशेन विधीयते इति सिद्धम् । न च भावनाया अकारकत्वात् कथं भावनान्तरविशेषणत्वम्, क्त्वाप्रत्ययादिस्थले

१. अनुपपत्तौ. इति ख. पु. २. जै. सू. १. ४. ९.

अतः सोमादिवदेव भावनासम्बन्धोत्तरकालं पार्ष्ठिकं तदित्या-श्रयणीयम् ।

न च गुणभावनायामाश्रयस्याऽन्वयस्सम्भावयितुं शक्यः । स हि न तावत् करणत्वेन, तथात्वे भावार्थाधिकरणन्यायप्रवृत्त्या तस्यैव फलसम्बन्धापत्तेः, करणत्वेनोपस्थितस्य गुणसम्बन्धायोग्यत्वाच्च । क्लृप्तप्रयोजनत्वात् गुणाङ्गत्वापत्तेश्च नेतिकर्तव्यतात्वेन । अतः परिशेषात् कर्मत्वेनाऽन्वयो वाच्यः । तत्राऽपि यदीप्सितकर्मत्वरूपेण भाव्यत्वेन, तत उद्देश्यानेकत्वाद्वाक्यभेदो गुणस्याऽऽश्रयाङ्गत्वापत्तिश्च । यदि त्वनीप्सित-कर्मत्वेनाऽन्वयः, तदाऽपि फलस्य कर्मत्वेनाऽन्वयात् प्रत्ययस्य निष्कर्तृकत्वापत्तेः । [illegible] करोतिपर्यायत्वेन प्रत्यय-कल्पनेति तद्विषयोऽसौ न्यायः । न तु यत्र [illegible]क्तसम्बन्धेन समासादौ द्रव्यान्वयद्वाराऽपि भावनान्वयव्युत्पत्तिः, यथा—"लोहितोष्णीषा ऋत्विज" इत्यादौ, तत्र विशेषणविशेषणेऽपि विशेषणविधिकल्पनायां न किञ्चित् बाधकमस्ति । अतस्तादृशस्थले प्राप्तकर्मानुवादेनाऽपि परस्परवैशिष्ट्यस्य पूर्वमेव प्रमितत्वादनेकविधानेऽपि न वाक्यभेदः ।

चित्रयेत्यादौ च लिङ्गस्य प्रातिपदिकार्थेऽन्वयोऽव्युत्पन्न इति वैशिष्ट्यस्य पूर्वमप्राप्तत्वात् प्राप्तकर्मानुवादेनाऽनेकविधाने युक्तो वाक्यभेदः । प्रकृते तु रेवतीनां भावनान्वयस्याऽपि सत्त्वात् भावनायाश्चोत्तरकालतादिसम्बन्धेन मुख्यभावनाविशेषणत्वोपपत्तेर्युक्तं विशिष्टविधानम् । तस्मात् कर्मान्तरविधिरेवाऽयम् ।

नन्वेवमपि न कर्मान्तरत्वे प्रमाणमस्ति, "यदि ब्राह्मणो यजेते"त्यादावत्रेष्टेरिवाऽग्निष्टुत एव प्रयोगान्तरोपपत्तेः; न ह्युभयत्राऽपि वाजिनन्यायेन कर्मान्तरत्वाशङ्का सम्भवति । वाजि-

फलसम्बन्धानुपपत्त्या(१) पूर्वकर्मण्यनिविशमानात् रेवतीरूपात् गुणादेव कर्मान्तरम् ।

तत्र चाऽपूर्वकर्मविधित्वाद्वाक्यभेदं विनैव यद्यपि सर्वमेव विधातुं शक्यम्, तथाऽपि (२)"न चेदन्येन शिष्टा" इति न्यायेन यदप्राप्तं तदेव विधीयते, इतरत्तु प्राप्तमनूद्यत इति नाऽतीव गौरवम् ।

न चैवमपि फलोद्देशेन यागविधिः, तत्र चाऽतिदेशादेवाग्निष्टोमस्तोत्रस्य निकायित्वेन च पूर्वयागातिदेशाद्वारवन्तीयसाम्नो वाऽप्राप्तत्वात् तदुद्देशेन रेवतीविधिरिति वैशिष्ट्यासम्भवाद्वाक्यभेदस्स्यादेवेति वाच्यम् । वैशिष्ट्यसम्पत्तये विशिष्टविधिसन्दष्टन्यायेन [illegible] विधीयते । [illegible] गुणोऽपि विधेय एव भेदकः, न त्वविधेयः । 'यावज्जीव'मित्यादावपि च निमित्तस्य स्वरूपेण विधेयस्याऽपि नैमित्तिकसम्बन्धित्वेनाऽप्राप्ततया विधेयत्वात् विनियोगभेदकत्वाविघातः ।

अत एव "यदि ब्राह्मणो यजेते"त्यादौ ब्राह्मणादिकर्तृकत्वस्याऽप्राप्तत्वाद्युक्ता भेदकता । प्रकृते तु क्त्वाप्रत्ययोपात्तस्याऽग्निष्टोमस्तोत्रोत्तरकालतादेस्स्वरूपेण कर्मसम्बन्धित्वेन चाऽतिदेशादेव प्राप्तत्वात् नैवाऽस्ति भेदकत्वम् ; अपि तु रेवतीरूपस्य गुणस्यैव । तस्य चोत्पत्त्यन्वायित्वात् कर्मभेदकत्वमेव न प्रयोगभेदकत्वम् ।

न चैवं रेवतीरूपस्य गुणस्याऽग्निष्टोमस्तोत्र एवाऽन्वयात् तद्भेदकत्वमेव स्यात् न कर्मभेदकत्वमिति वाच्यम् । तथात्वे फलोद्देशेन यागप्रयोगान्तरस्याऽप्यवश्यविधेयत्वापत्तेर्लाघवेन कर्ममात्रभेदकत्वस्यैवाऽङ्गीकारात् । अत एव विवक्षितगत्या परम्परासम्बन्धेन रेवतीविशिष्टयागविधिरेवाऽयम् । शाब्दबोधेऽन्वयनि·

उत्तरकालतादिसम्बन्धेनाऽपि विशेषणत्वव्युत्पत्तेः । अत एव पूर्वभावनाया मुख्यविशेष्यत्वाभावेऽपि रेवत्यादिकारकाणां तत्रैवाऽन्वय इत्युक्तं भावनानिरूपणे ।

अत एव पश्वेकत्वाधिकरणपूर्वपक्षन्यायेन मुख्याविशेष्यभूतभावनाविशेषणविशेषणीभूतासु रेवतीषु विशेषणविधिकल्पनायोगात् तासामविवक्षेत्यप्यनाशङ्क्यम्, मुख्यविशेष्यभूतभावनाविशेषणत्वाभावेऽपि क्त्वाशब्दोक्तभावनाविशेषणत्वस्य सत्त्वेन पश्वेकत्वाधिकरणपूर्वपक्षन्यायाविषयत्वात् । अपि च यत्र लिङ्गसंख्यादौ कारकान्वयद्वारा भावनान्वयो व्युत्पत्तिसिद्धः तत्र तेषां तदनादरेण द्रव्यान्वये विशेषणविशेषणत्वान्न विधिमान्तरमत्र विधीयते । तृतीये [illegible] ऽपि कारक [illegible]रितिवत् प्रस्तोष्यमाणकर्मवचन इति न विरोधः । प्रयोजनं स्पष्टम् ।

सूत्रं त्वाश्रयतया परस्परानन्वयात् समेष्वेषु वाक्येषु कर्मयुक्तमेव फलं स्यादिति व्याख्येयम् ॥

इति द्वादशं रेवत्यधिकरणम् ॥ १२ ॥

अथ त्रयोदशं सौभराधिकरणम् ॥ १

सौभरे पुरुषश्रुतेर्निधने कामसंयोगः ॥२-२-२७॥

(विषयसंशयौ)

ज्योतिष्टोमे सौभराख्यं साम त्रेधा समाम्नातं—नित्यं नैमित्तिकं काम्यं च । तत्र षोडशिसंस्थावान्तरप्रकरणे "सौभरमुक्थ्यानां

नस्य ह्युत्पत्त्यन्वयिनस्तद्विधिभेदापादकस्य युक्तं कर्मान्तरत्वापादकत्वम्, कर्तृकालादिरूपस्य गुणस्य तु प्रयोगविध्यन्वयित्वेनोत्पत्त्यनन्वयान्नोत्पत्तिविधिभेदनिबन्धनकर्मभेदापादकत्वम् । अत एव कालोऽपि यः प्रयोजनविशेषार्थमुत्पत्तावेवाऽन्वेति, यथाऽऽग्नौ, तत्रेष्ट एव तेनाऽप्याग्नेयकर्मभेदः; "यदि ब्राह्मणो यजेते"त्यादौ तु ब्राह्मणादेः कर्तुः प्रयोगान्वयित्वात् तद्भेदकत्वमेवाऽङ्गीकरिष्यत इति तन्न्यायेन प्रकृतेऽप्युत्तरकालतादिरूपस्य गुणस्य प्रयोगभेदकत्वस्यैव युक्तत्वान्न कर्मभेदकता युक्तेति चेत्—न; क्त्वाप्रत्ययोपात्तस्य गुणस्याऽतिदेशत एव सम्भवत्प्राप्तिकतया स्वरूपेण विशेषणविध्याविषयस्याऽत्र भेदकत्वाभावात् । सर्वत्र हि [illegible]वदित्यादि सौभरं विधीयते । पुनश्च नित्यविधिसन्निधौ "यो वृष्टिकामो योऽन्नाद्यकामो यस्स्वर्गकामः स सौभरेण स्तुवीते"त्यनेन फलत्रयार्थं सौभरं विधीयते । अत्र चोद्देश्यानेकत्वात् 'सौभरेण स्तुवीते" त्यस्याऽनुषङ्गाङ्गीकारेण वाक्यत्रयं द्रष्टव्यम् । सौभरस्य च षड्जादिस्वरसमाहारात्मकस्य ध्वन्यात्मकशब्दत्वेन सिद्धरूपस्य दध्यादिवदेवाऽऽश्रयापेक्षायां षोडशिसंस्थाङ्गभूतब्रह्माख्यस्तोत्रमेव प्रकर[illegible]प्रणयनादिवदाश्रयत्वेन सम्बध्यते ।

यत्त्वत्र पार्थसारथिना भवदेवेन च सौभरस्य गीतिरूपतयावाचित्वादाश्रयापेक्षाभावेन 'स्तुवीते'त्यनुवादानुपपत्तिमा[illegible]श्र, अनुवादान्यथानुपपत्त्यैव तृतीयान्तेन सौभरपदेन करणविशिष्टस्यैव सौभरस्य करणतासम्बन्धेन फलोद्देशेन विधा[illegible]ाद्यकरणत्वस्य निरूपकापेक्षायां प्रकरणात् पूर्वस्तोत्रविशेष[illegible]न्धोपपत्तिरित्युपपादनायोपन्यस्तम्, तत् गीतेरपि षड्जा[illegible]दि स्वरसमाहारात्मकत्वस्य पूर्वाधिकरणे साधितत्वादुपेक्षितम् ।

र्थाहार्थं तु सम्भवत्प्राप्तिकस्याऽप्यग्निष्टोमस्तोत्रादेर्विशिष्टविधि
न्दष्टन्यायादिना विधेयत्वाङ्गीकरणम्, न वस्तुतः। अतश्च
वक्षितगत्या रेवतीरूपस्य गुणस्य यागान्वयिततयैव विधेयत्वा
क्ता तत्स्वरूपभेदकता । अतस्सिद्धं कर्मान्तरमेवाऽत्र फलोद्दे
विधीयत इति ।

न चैवमपि षष्ठ्यन्तैतच्छब्देन पूर्वकर्माङ्गतयाऽप्येतद्विधि
तीतेः कथं फलोद्देशेन कर्मान्तरविधानमिति वाच्यम् । तस्यो
श्यानेकत्वकृतवाक्यभेदभिया निकायितया प्राप्तपूर्वयागप्रकृ
त्वरूपसम्बन्धानुवादकत्वात् वाक्येन च फलोद्देशेन विधाना
प्रकरणात् पूर्वयागाङ्गत्वं त्वनाशङ्क्यमेव । तस्मात् फलार्थं
वृष्ट्याद्यर्थत्वेन विधीयन्ते, "अथैष ज्योति
मेन प्राप्तानि नियम्यन्त इति विचारः ।

(सङ्गतिः)

वाक्यभेदापादकगुणप्रमाणकभावनाभेदाभेदविचारात् पा
ध्यायसङ्गती स्पष्टे । इन्द्रियकामाधिकरणरेवत्याधिकरणयोर्द्व
रप्यपवादात्त्वनन्तरा ।

(पूर्वपक्षः)

तत्र वृष्टिकामपदस्य तावत् स्वर्गकामाधिकरणन्या
फलपरत्वात् तादर्थ्यचतुर्थ्या तदर्थत्वेन हीषादिकं दध्यादि
गुणसंक्रान्तशक्तिकेन विधिना विधीयते । अत एव निधन
दमाश्रयतया प्राप्तनिधनसम्बन्धानुवादः । तथा हि—हीषाद्य
राणि तावत्सिद्धरूपाणि सामभागपरिपूरकत्वेन योग्यत्व
प्रकृतसौभराख्यं सामैवाश्रयत्वेनाऽवलम्बन्ते । युक्तं हि
स्वावयवद्वारा स्तोभाक्षराधारत्वात् दृष्टविधया हीषादि

ा साम भवती"त्यनेन नित्यतया विहितम्। अत्र हि ब्रह्म-
माख्यस्तोत्रोद्देशेन समाम्नायाऽवगतं सौभरं विधीयते, प्रक-
ाच्च षोडशिसंस्थापूर्वसाधनीभूतता स्तोत्रे लभ्यते, तस्य च
त्रस्य वस्तुत उक्थ्याख्यस्तोत्रत्रयमध्यमत्वात् 'उक्थ्याना'
यनुवादः। नैमित्तिकतया तु अतिरात्रसंस्थावान्तरप्रकरणे
दि बृहत्सामाऽतिरात्रस्स्यात् सौभरमुक्थ्यानां ब्रह्मसाम का-
"स्यनेन विहितम्। अत्राऽप्यतिरात्रसंस्थायामतिदेशप्राप्ते
त्सामत्वे निमित्ते तदपूर्वसाधनीभूतब्रह्माख्यस्तोत्रोद्देशेनैव
रं विधीयते। तत्रैवाऽतिदेशप्राप्ते रथन्तरसामकत्वे निमित्ते
'यदि रथन्तरं सौभरमुक्थ्येषु कुर्यादि"त्यनेनाऽतिरात्रसं-
दपूर्वसाधनीभूतोक्थ्यस्तोत्रोद्देशेन सौ...

न च सौभरस्याऽपि क्रत्वर्थत्वेन प्राप्तत्वादुभयप्राप्तौ ऐन्द्र वायवाग्रानितिवद्धात्वर्थस्य स्तोत्रस्यैव फलोद्देशेन विधिरस्त्विति वाच्यम्। तथा सति स्तोत्रस्यैव बहिःक्रतुप्रयोगापत्तौ तत्र सौ भरस्याऽप्राप्तत्वात्, तथाऽपि विधाने विशिष्टविधिगौरवापत्तेः सौभरस्य फलसम्बन्धाङ्गीकारात्। अतस्सिद्धं सौभरस्य काम्य त्वमपि। तस्य च समानकाले शाखाभेदेन निधनाख्यान्तिम सामावयवाधारत्वेन 'हीष्, ऊर्क्, ऊ' इत्यादीनि स्तोभाक्षराणि समाम्नातानि। तदेवंविधं सौभरं प्रकृत्य श्रूयते,—"हीषिति वृष्टि कामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामा ये"ति। तत्र किं हीषादिस्तोभाक्षराणि प्रकृतसौभराश्रितानि ... उत वृष्ट्याद्यर्थे सौभर एवाऽनि